॥ शिवरहस्यसप्तमांशः प्रारंभोयं ॥ पत्रैं २८१ ॥

शि॰ स्त॰ ॥१॥

श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ श्रीकाशीविश्वनाथाय न
मः॥ ॥ऋषय ऊचुः॥ ॥सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण॥ भक्त्युपायं वदास्मभ्यं कृपा
लो मुनिसत्तम॥१॥ कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा॥ स्थानं तथैव तत्रापि नित्यं किं वा
सर्वार्थसाधकं॥२॥ सूत उवाच॥ धन्यान्मन्यामहे नूनमनन्यशरणान्मुनीन्॥ त्वन्याशिवो
वनावासान्यस्तमन्युजकल्मषान्॥३॥ भवद्भिः सर्ववेदार्थतत्त्वं ज्ञातमकल्मषैः॥ परात्प
रतरः सर्वः सर्वदा पूज्यते धिया॥४॥ भवद्भिः सर्ववेदार्था ज्ञाता एवास्ति यद्यपि॥ तथापि
किंचिद्वक्ष्यामि यथा ज्ञातं मया तथा॥५॥ पुरा कैलासशिखरे सुखासीनं जगत्प्रभुं॥
वेदांतवेद्यमीशानं शंकरं लोकशंकरं॥६॥ विश्वतश्चक्षुषं देवं विश्वतोमुखमव्ययं॥ वि
श्वतोबाहुमाराध्यं विश्वतःपादमीश्वरं॥७॥ निष्कलं निर्गुणं शांतं निरवद्यमनाम
यं॥ निष्प्रपंचं निराकारं निर्मलं निरुपाधिकं॥८॥ सर्वब्रह्मण्यवदनं सर्वाभरणभूषितं

श्रीः॥ ॥१॥

गौरीभूषितवामांगं ब्रह्मविष्ण्वादिसेवितं॥९॥ अप्रमेयं जगज्जन्मस्थितिसंहारकारणं॥ सोम
सूर्याग्निनयनं सोमार्धकृतशेखरं॥१०॥ बिल्वचंदनलिप्तांगं नवबिल्वदलार्चितं॥ व्याघ्रचर्म
परीधानमनंतं दुरविप्रभं॥११॥ नानामणिगणाकीर्णकिरीटकटकांकितं॥ दयासुधार्द्रनय
नं वरदाभयपाणिनं॥ नित्यसंतोषपूर्णांगमुमालिंगितविग्रहं॥ विलोक्यातीव संतुष्टं ष
ण्मुखः सांबमीश्वरं॥ नत्वा कृतार्थमात्मानं प्रणिपत्य सदाशिवं॥ पप्रच्छ सर्वलोकानां
मुक्त्युपायं कृतांजलिः॥ विश्वेश्वर महादेव विष्णुब्रह्मादिवंदित॥ देवानां मानवानां च किं
मोक्षस्यापि साधनं॥ तव नामान्यनंतानि संति यद्यपि शंकर॥ तथापि तानि दिव्यानि
न ज्ञायंते मयाधुना॥ प्रियाणि शिवनामानि सर्वाणि शिव यद्यपि॥ तथापि कानि र
म्याणि तेषु प्रियतमानि ते॥ तानि सर्वार्थदान्यद्य कृपया वक्तुमर्हसि॥ यन्नामस्मरणा
देव सद्यो मुच्येत पातकैः॥ रसना रससारज्ञा त्वन्नामामृतपायिनी॥ यस्यास्ति स पुमान्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शि०स्क ॥२॥

धन्यो मान्यो ह्यमनुजैरपि॥ जन्मांतरसहस्रेषु तप्तं यदि तपस्तदा॥ तन्नामस्मरणासक्तं चित्तं ज-
न्तोः प्रजायते॥ महेशनामामृतदिव्यधारापरिप्लुतांगो दवमध्यगोपि॥ न शोकमाप्नोति नरोय
तोहं संतापितो वह्निगतः शिवेन॥ यतो विभूतिकवचाः शिवनामास्त्रपाणयः॥ चत्वारश्च वया
मीपेश्च जुर्युद्धपुरा पुरा॥ ब्रह्महत्यासहस्राणि पुरा कृत्वापि पुल्कसः॥ शिवेति नाम विमलं
श्रुत्वा मोक्षं गतः पुरा॥ एकोपि प्रमथाः शुद्धाः शिवनामामृताशनाः॥ इंद्राद्यैरर्चितपादा आ-
वसंति शिवसन्निधौ॥ शिवनामैव संसारमहारोगैकशामकं॥ नान्यत्संसाररोगस्य
शामकं दृश्यते मया॥ शिव शंकर विश्वेश महादेवेति यन्मया॥ पूर्वमुच्चारितं युद्धे जय-
स्तेनाभवन्मम॥ शंकरेश महेशेति नाम दिव्यं महावने॥ पुराश्रुतं पिशाचेन ततस्त-
स्मात्स मोचितः॥ समस्तवेदवेदांतसारभूतं शिवप्रदं॥ शिवनामामृतं दिव्यं पेयं स-
र्वार्थसाधकं॥ ये संततं शंकरमादरेण मनः सरोजासनसन्निविष्टं॥ ध्यायंति शंभु

श्री॥ ॥२॥

स्मरणानिसक्तास्त एव धन्याः शिवसंमताश्च॥ शिवनामामृतास्वादरसनाः शिवपूजकाः॥
शिवध्यानरतानित्यं संति धन्याः क्वचित्क्वचित्॥ इत्युक्त्वा वैपमानागः प्रणिपत्य पुनः शिवं॥ कु-
मारः पार्श्वतस्तस्थौ नतमूर्धा कृतांजलिः॥ कुमारोदीरितां वार्तां सर्वलोकहितावहां॥ श्रु-
त्वा प्रसन्नवदनस्तमुवाच सदाशिवः॥ साधु साधु कुमारोय सम्यक्पृष्टं त्वयाधुना॥ यदि-
दानीं त्वया पृष्टं तद्वक्ष्ये शृणु सादरं॥ एवमेव पुरा गौर्या पृष्टः काश्यामहं तदा॥ समाख्यातं
मया सम्यक्तवैषां मोक्षसाधनं॥ दिव्यान्यनंतनामानि संति तन्मध्यगं पुरा॥ अष्टोत्तर-
सहस्रं तु नाम्नां स्तोत्रं प्रियतरं मम॥ एकैकमेव तन्मध्ये नाम सर्वार्थसाधकं॥ मयापि नाम्नो
सर्वं पापफलं वक्तुं न शक्यते॥ तिलाक्षतैर्बिल्वपत्रैः कमलैः कोमलैर्नवैः॥ पूजयिष्यति मां
भक्त्या यस्त्वेतन्नामसंख्यया॥ स पापेभ्यः समस्तेभ्यो मुच्यते नात्र संशयः॥ ततो मामंति-
ति कं पुनरावृत्तिदुर्लभं॥ एकैकेनैव नाम्नामर्पितात्दृढव्रताः॥ इष्टफलं प्राप्नुवंति

शि०स० ॥३॥

सत्यमेवाव्यतेमया॥ एतन्नामावलीयस्तु पठनं प्रणमेत्सदा॥ स याति मम सायुज्यं स्वेष्टबंधुसम
न्वितः॥ स्पृष्ट्वा मल्लिंगममलमेतन्नामानि यः पठेत्॥ स पातकेभ्यः सर्वेभ्यः सद्य एव प्रमुच्यते॥ यस्त्वे
तन्नामभिः सम्यक् त्रिकालं वत्सरावधि॥ मामर्चयति निर्दंभः स देवेंद्रो भविष्यति॥ एतन्नामानुसंधा
ननिरतः सर्वदा मुदा॥ मम प्रियतरस्तस्मिन्निवसाम्यहमादरात्॥ तस्य जयाप्रजितो हं सर्ववाह्य
नो मम॥ तस्मात्प्रियतमं स्थानमन्यच्चैव हि हि दृपते॥ हिरण्यबाहुरित्यादि नाम्नां ऋषिरहं ऋषिः
देवताप्यहमेवात्र शक्तिर्गौरी मम प्रिया॥ महेशादव संसेव्यः सर्वैरिति हि कीलकं॥ धर्माद्यर्थाः फलं ज्ञेयं
फलदाता सदाशिवः॥ ॥ॐ हिरण्यबाहुः सेनानी दिक्पतिस्तरुराट् हरः॥ हरिकेशः पशुपतिर्महांस्त
स्पिंजरो मृडः॥ विव्याधिर्बभ्लुशः श्रेष्ठः परमात्मा सनातनः॥ सर्वान्नराट् जगत्कर्ता पुष्टेशो नंदिकेश्वरः श्रीः॥
आततावी महारुद्रः संसारास्त्रः सुरेश्वरः॥ उपवीतिरहंत्यात्मा क्षेत्रेशो वननायकः॥ रोहितः स्थप ३
तिः सूतो वाणिजो मंत्रिरुन्नतः॥ कक्षेशो हुतभुग्देवो भुवंतिर्वारिवस्कृतः॥ उच्चैर्घोषो घोररूपः

पत्तीशः पाशमोचकः॥ ओषधीशः पंचवक्त्रः कृत्स्नवीतो भयानकः॥ सहमानः स्वर्णरेता निव्या
धिर्निरुपप्लवः॥ आव्याधिनीशः ककुभो निषंगी स्तेनरक्षकः॥ मंत्रात्मा तस्कराध्यक्षो वंचकः परि
वंचकः॥ अरण्येशः परीचरो निचेरुः स्तायुरक्षकः॥ प्रकृंतेशो गिरिचरः कुलुंचेशो गुहेष्टदः॥ भवः
शर्वो नीलकंठः कपर्दी त्रिपुरांतकः॥ सुमेरुशो गिरिशायः सहस्राक्षः सहस्रपात्॥ शिपिविष्टश्चंद्र
मौलिर्ह्रस्वो मीढुष्टमोनघः॥ वामनो व्यापकः शूली वर्षीयानजडोनणुः॥ ऊर्व्यः सूर्म्योग्रियः शी
घ्र्यः प्रमथः पावकाकृतिः॥ अचरस्तारकस्तारो वरस्तन्योनंतविग्रहः॥ द्वीप्यः स्रोतस्य ईशानो
धुर्यो गव्यपनो यमः॥ पूर्वजोपरजो ज्येष्ठः कनिष्ठो विश्वलोचनः॥ अपगल्भो मध्यमोर्म्यो
जघन्यो बुध्नियः प्रभुः॥ प्रतिसर्योनंतरूपः सोभ्यो याम्यः सुराश्रयः॥ खल्योर्वर्योभयः
क्षेम्यः श्लोक्यः पथ्यो नभोग्रणीः॥ वन्यो वसान्यः पूतात्मा श्रवः कक्षः प्रतिश्रवः॥ आशुषेणो
महासेनो महावीरो महारथः॥ शूरोतिघातको वर्मी विरूपी बिल्मी रुद्यतः॥ श्रुतः सनः

शि॰ स॰ ॥ ४ ॥

श्रुतः साक्षी कवची वशी कृद्दशी ॥ आहनन्यो नन्यनाथो दुंदुभ्यो रिष्टनाशकः ॥ धृष्णुः प्रमृशः ईशा
त्मा वदान्यो वेदसंमतः ॥ तीक्ष्णेषु पाणि प्रहितः स्वायुधः शास्त्रवित्तमः ॥ सुधन्वा सुप्रसन्नात्मा
विश्वचक्रः सदागतिः ॥ श्रुतः पथ्यो विश्वबाहुः काद्यो नीप्यः शुचिस्मितः ॥ सूद्यः सरस्यो वैशंतो
नाद्यः कूप्यो ऋषिर्मनुः ॥ वर्ष्यो वर्ष्यो वर्ष्यरूपः कुमारः कुशलोमलः ॥ मेध्यो वद्यो वेद्यशास्त्रि
र्विधुत्सोमो घविक्रमः ॥ उरास्थ्यो दुराराध्यो निर्द्वंद्वो दुःसहः प्रभुः ॥ ईधियः कुधरायनो जातकृ
र्णपुरस्कृतः ॥ आतप्यो पायु रजोवात्यः कात्यायनिप्रियः ॥ वास्तव्यो वास्तुपुरुषो विश्वमूर्द्धा
वसुप्रदः ॥ सोमस्ताम्रारुणः संगो रुद्रः सुखकरः सुहृत् ॥ उग्रानुग्रो भीमकर्मा भीमो भीमप
राक्रमः ॥ अपैवध्यो हनीयात्मा हंता दूरवधो वधः ॥ हंतुर्मयो भवो नित्यो शंकरः कीर्तिसाग
रः ॥ मयस्करः शिवतरः खंडपर्शुरजः शुचिः ॥ तीर्थ्यः कूल्यो मृताधीशः पार्यो वार्यो मृताक
रः ॥ शुद्धः प्रतरणो मुख्यः शुद्धपाणिरलोलुपः ॥ उच्च उत्तरणस्तार्यस्तार्यस्तार्यहृद्गतः ॥

श्री ॥ ४ ॥

... OF BHAU DAJI

आतर्पः सारभूतात्मा सारग्राही दुरत्ययः ॥ आलाद्यो मोक्षदः पथ्यो नर्थहा सद्यशोगरः ॥ शाष्प्यः
फेन्यः प्रवाह्यो ऽसिकृत्सः सेकृता श्रयः ॥ इरिण्यो ग्रामणीः पुण्यः शरण्यः शुद्धशासनः ॥ वरेण्यो यज्ञ
पुरुषो यज्ञेशो यज्ञनायकः ॥ यज्ञकर्ता यज्ञभोक्ता यज्ञविघ्नविनाशकः ॥ यज्ञकर्मफलाध्यक्षो य
ज्ञमूर्तिरनातुरः ॥ प्रपथ्यः किंशिलो गेह्यो गृह्यतल्प्यो धनाकरः ॥ पुलस्त्यः क्षयणो गोष्ठ्यो गोविंद्रो
गीतसत्क्रियः ॥ हृदय्यो हृदयरूहृद्यो गह्वरेष्ठः प्रभाकरः ॥ निवेष्प्यो नियतो यंता पांसव्यः प्रतापनः
शुष्क्यो हरित्यः पूतात्मा रजस्यः सात्विकप्रियः ॥ लोप्यो लप्यः पर्णशद्यः पर्ण्यः पूर्णः पुरातनः
भूतो भूतपतिर्भूयो भूधरो भूधरायुधः ॥ भूतसंघो भूतमूर्तिर्भूतिहा भूतिभूषणः ॥ मदनो मादको
माद्यो मदहा मधुरप्रियः ॥ मधुर्मधुकरः क्रूरो मधुरो मदनांतकः ॥ निरंजनो निराधारो निर्लिप्तो
निरुपाधिकः ॥ निष्प्रपंचो निराकारो निरीहो निरीहो निरुपद्रवः ॥ सत्वः सत्वगुणोपेत सत्ववि
त्सत्ववित्प्रियः ॥ अक्षमालाभृत् सत्वनिष्ठः सत्वमूर्तिः सत्वेशः सत्ववित्तमः ॥ समस्तजग

दाधारः समस्तगुणसागरः॥ समस्तदुःखविध्वंसी समस्तानंदकारणः॥ रुद्राक्षमालाभरणो रुद्रा
क्षप्रियवत्सलः॥ रुद्राक्षवक्षा रुद्राक्षरूपो रुद्राक्षभक्षकः॥ विश्वेश्वरो वीरभद्रो सम्राट् दक्षम
खांतकः॥ विघ्नेश्वरो विघ्नकर्ता गुरुर्देवशिखामणिः॥ भुजगेंद्रलसत्कंठो भुजंगाभरणप्रियः॥
भुजंगविलसत्कर्णो भुजंगवलयावृतः॥ मुनिवंद्यो मुनिश्रेष्ठो मुनिवृंदनिषेवितः॥ मुनिहृत्पुंडरीकस्थो
मुनिसंघैकजीवनः॥ मुनिमृग्यो वेदमृग्यो मृगहस्तो मृगेश्वरः॥ मृगेंद्रचर्मवसनो नरसिंहनिपातनः
मृत्युंजयो मृत्युमृत्युरपमृत्युविनाशकः॥ दुष्टमृत्युरदुष्टेष्टमृत्युहा मृत्युपूजितः॥ ऊर्ध्वो हिरण्यः परमो
निधनेशो धनाधिपः॥ यजुर्मूर्तिः साममूर्तिरृङ्मूर्तिर्मूर्तिवर्जितः॥ व्यक्तो व्यक्ततमो व्यक्तोव्यक्ताव्य
क्ततमो जवी॥ लिंगमूर्तिरलिंगात्मा लिंगालिंगात्मविग्रहः॥ ग्रहो ग्रहो ग्रहाधारो ग्रहाकारो ग्रहे
श्वरः॥ ग्रहकृद्ग्रहभिद्ग्राही ग्रहो ग्रहविलक्षणः॥ कल्पाकारः कल्पकर्ता कल्पलक्षणतत्परः॥ कल्पो
कल्पाकृतिः कल्पनाशकः कल्पवात्मकः॥ परमात्मा प्रधानात्मा प्रधानपुरुषः शिवः॥ वेद्यो

वेद्यो वेदवेद्यो वेदवेदांतसंस्तुतः॥ वेदवक्त्रो वेदजिह्वो विजिह्वो जिह्वनाशकः॥ कल्याणरूपः कल्याणः
कल्याणगुणसंश्रयः॥ भक्तकल्याणदो भक्तकामधेनुः सुराधिपः॥ पावनः पावको वामो महाकालो म
दापहः॥ घोरपातकदावाग्निर्दग्धभस्मकणप्रियः॥ अनंतसोमसूर्याग्निमंडलप्रतिमप्रभः॥ जग
देकप्रभुः स्वामी जगद्वंद्यो जगन्मयः॥ जगदानंददो जन्मजरामरणवर्जितः॥ खट्वांगी नीतिमान्स
त्यो देवतात्मात्मसंभवः॥ कपालमालाभरणः कपाली विष्णुवल्लभः॥ कमलासनकालाग्निः क
मलासनपूजितः॥ कालाधीशस्त्रिकालज्ञो दुष्टावग्रहवारकः॥ नाट्यकर्ता नटवरो महाना
ट्यविशारदः॥ विराड्रूपधरो धीरो विराड्रूपभवाहनः॥ वृषांको वृषभाधीशो वृषात्मा वृष
भध्वजः॥ महोन्नतो महाकायो महावक्षा महाभुजः॥ महास्कंधो महाग्रीवो महावक्त्रो महाशि
रः॥ महाहनुर्महादंष्ट्रो महदोष्ठो महोदरः॥ सुंदरभ्रूः सुनयनः सुललाटः सुकंधरः॥ सत्यवा
क्यो सत्यवक्ता सत्यजः सत्यवित्तमः॥ धर्मवान्धर्मनिपुणो धर्मो धर्मप्रवर्धकः॥ कृतज्ञः कृत

शि॰स्त
॥६॥

कृत्यात्मा कृतकृत्यः कृतागमः॥ कृत्यवित्कृत्यविच्छ्रेष्ठः कृतज्ञः प्रियकृत्तमः॥ व्रतकृद्व्रतवि
च्छ्रेष्ठो व्रतविद्वान्महाव्रती॥ व्रतप्रियो व्रताकारो व्रताधारो व्रतेश्वरः॥ अतिरागी वीतरागो रागहे
तुर्विरागवित्॥ रागघ्नो रागशमनो रागदो रागिरागवित्॥ विद्वान्विद्वत्तमो विद्वज्जनमा
नससंश्रयः॥ विद्वज्जनाश्रयो विद्वज्जनस्तव्यपराक्रमः॥ नीतिकृन्नीतिविन्नीतिप्रदाता नी
तिविप्रियः॥ विनीतवत्सलो नीतिस्वरूपो नीतिसंश्रयः॥ क्रोधवित्क्रोधकृत्क्रोधिजनवित्क्रो
धरूपधृक्॥ क्रोधदः क्रोधहा क्रोधिजनहा क्रोधकारणः॥ गुणवान्गुणविच्छ्रेष्ठो वीर्यवद्वीर्य
संश्रयः॥ गुणाधारो गुणाकारो गुणसद्गुणनाशकः॥ वीर्याकारो वीर्यकरो वीर्यहा वीर्यवर्द्ध
कः॥ कालवित्कालकृत्कालो बलकृद्बलविद्बली॥ मनोन्मनो मनोरूपो बलप्रमथनो ब
लः॥ विद्याप्रदाता विद्येशो विद्यमात्रैकसंश्रयः॥ विद्याकारो महाविद्यो विद्याविद्यो विशार
दः॥ वसंतकृद्वसंतात्मा वसंतेशो वसंतदः॥ ग्रीष्मात्मा ग्रीष्मकृद्ग्रीष्मवर्धको ग्रीष्मनाय

श्री॥
॥६॥

कः॥ प्रावृडात्मा प्रावृडाकारः प्रावृट्कालप्रवर्त्तकः॥ प्रावृट्प्रवर्धकः प्रावृण्णाथः प्रावृड्वि
नाशकः॥ शरदात्मा शरद्धेतुः शरत्कालप्रवर्त्तकः॥ शरन्नाथः शरत्कालनाशकः शरदा
श्रयः॥ हिमस्वरूपो हिमदो हिमहा हिमनायकः॥ शैशिरात्मा शैशिरेशो शैशिरर्तुप्रवर्त्ते
कः॥ प्राच्यात्मा दक्षिणाकारः प्रतीच्यात्मोत्तराकृतिः॥ ऊर्ध्वाद्यन्यदिगाकारो शानादेशै
कनायकः॥ सर्वपक्षिमृगाकारः सर्वपक्षिमृगाधिपः॥ सर्वपक्षिमृगाकारो मृगाद्युत्पत्ति
कारणः॥ जीवाध्यक्षो जीववंद्यो जीवविज्जीवरक्षकः॥ जीवकृज्जीवहा जीवजीवनो जीवसंश्रयः॥
ज्योतिस्स्वरूपो विश्वात्मा विश्वनाथो वियत्पतिः॥ वज्रात्मा वज्रहस्तात्मा वज्रेशो वज्रभूषितः॥
कुमारगुरुरीशानो गणाध्यक्षो गणाधिपः॥ पिनाकपाणिः सूर्यात्मा सोमसूर्याग्निलोचनः
अपायरहितः शांतो दांतो दमयिता दमः॥ ऋषिः पुराणपुरुषः पुरुषेशः पुरंदरः॥ कालाग्नि
रुद्रः सर्वेशः शमरूपः शमेश्वरः॥ प्रलयानलकृद्रूपः प्रलयानलनाशकः॥ त्रियंबको ऽरिषड्वर्ग

शि०स्र ॥७॥

नाशकोधनदप्रियः॥अक्षोभ्यः क्षोभरहितः क्षोभदः क्षोभनाशकः॥सदंभो दंभरहितो दंभदो दंभना
शकः॥कुंदेंदुशंखधवलो भस्मोद्धूलितविग्रहः॥भस्मधारणहृष्टात्मा तुष्टः पुष्टोरिसूदनः॥स्थाणु
र्दिगंबरो भर्गो भगनेत्रभिदुज्वलः॥त्रिकाग्निकालः कालाग्नी रद्वितीयो महायशाः॥सा
मप्रियः सामवेत्ता सामगः सामगप्रियः॥धीरोदात्तो महाधीरो धैर्यदो धैर्यवर्धकः॥लावण्य
राशिः सर्वज्ञः सुबुद्धिर्बुद्धिमद्वरः॥तुंबवीणः कंबुकंठः शंबरारिनिकृंतनः॥शार्दूलचर्मवसनः
पूर्णानंदो जगत्प्रियः॥जयप्रदो जयाध्यक्षो जयात्मा जयकारणः जंगमाजंगमाकारो जगदुत्प
त्तिकारणः॥जगद्रक्षाकरो वश्यो जगत्प्रलयकारणः॥पूषदंतभिदुत्कृष्टः पंचयज्ञप्रभंजकः॥अ
ष्टमूर्त्तिर्विश्वमूर्त्तिरतिस्फूर्त्तिरमूर्त्तिमान्॥कैलासशिखरावासः कैलासशिखरप्रियः॥भ श्री:॥
क्तकैलासदः सूक्ष्मो मर्मज्ञः सर्वशिक्षकः॥सोमः सोमकलाकारो महातेजा महातपाः॥हि ॥७॥
रण्यश्मश्रुरानंदः स्वर्णकेशः सुवर्णदृक्॥ब्रह्मा विश्वसृडुर्वीशो मोचको बंधवर्जितः॥स्वतंत्रः स

र्वतंत्रात्मा द्युतिमानमितप्रभः॥पुष्कराक्षः पुण्यकीर्त्तिः पुण्यश्रवणकीर्त्तनः॥पुण्यमूर्त्तिः पुण्यद
ता पुण्यापुण्यफलप्रदः॥सारभूतः स्वरमयो रसभूतो रसाश्रयः॥ॐकारः प्रणवो नादः प्रणता
र्त्तिप्रभंजनः॥निकटस्थोतिदूरस्थो वशी ब्रह्मांडनायकः॥मंदारमूलनिलयो रसभूतो रसा
श्रयः मंदारकुसुमावृतः॥वृंदारकप्रियतमो वृंदारकवरार्चितः॥श्रीमाननंतकल्याणपरिपूर्णो
महोदयः॥महोत्साहो विश्वभोक्ता विश्वाशापरिपूरकः॥सुल[illegible]भो सुलभालभ्यो लभ्यो लो
भप्रवर्धकः॥लाभात्मा लाभदो वक्ता द्युतिमाननसूयकः॥ब्रह्मचारी दृढाचारी देवसिंहो
धनप्रियः॥वेदज्ञो देववेदज्ञो देवदेवोत्तमोत्तमः॥बीजराजो बीजहेतुर्बीजदो बीजवृद्धिदः॥
बीजाधारो बीजरूपो निर्बीजो बीजनाशकः॥कर्पूरगौरो गौरीशो गौरीगुरुगुहाश्रयः॥धू
र्जटिः पिंगलजटो जटामंडलमंडितः॥मनोजवो जीवहेतुरंधकासुरसूदनः॥लोकबंधुः
कलाधारः पांडुरः प्रमथाधिपः॥अव्यक्तलक्षणो योगी योगीशो योगिपुंगवः॥भूतावासो

जनावासः सुरावासः सुमंगलः॥ भववैद्यो योगिवैद्यो योगीसिंहहृदासनः॥ उत्तमोनुत्तम
शक्तिः कालकूटविषादनः॥ प्रार्थनीयः कमनीयात्मा शुभः सुंदरविग्रहः॥ भक्तकल्पतरुः स्तोता
स्तव्यः स्तोत्रवरप्रियः॥ अप्रमेयगुणाधारो वेदकृद्वेदविग्रहः॥ कीर्त्याधारः कीर्तिकरः कीर्तिहेतु
रहेतुकः॥ अप्रधृष्यः शांतिभद्रः कीर्तिस्तंभो मनोमयः॥ भूशयोन्नमयो भोक्ता महेष्वासो महीतनुः
विज्ञानमय आनंदमयः प्राणमयोन्नदः॥ सर्वलोकमयो यष्टा धर्माधर्मप्रवर्तकः अनिर्विण्णो
गुणग्राही सर्वधर्मफलप्रदः॥ दयासुधार्द्रनयनो निराशीरपरिग्रहः॥ परार्थवृत्तिर्मधुरो मधु
रप्रियदर्शनः॥ मुक्तादामपरीतांगो निःसंगो मंगलाकरः॥ सुखप्रदः सुखाकारः सुखदुःख
विवर्जितः॥ विशृंखलो जगत्कर्त्ता जितसर्वपितामहः॥ अनपायोक्षयो मुंडी सुरूपो रूपवर्जि
तः॥ अतींद्रियो महामायो मायावी विगतज्वरः॥ अमृतः शाश्वतः शांतो मृत्युहा मूकनाशकः॥ म
हाप्रेतासनासीनः पिशाचानुचरावृतः॥ गौरीविलाससदनो नानागानविशारदः॥ विचित्रमा

ल्यवसनो दिव्यचंदनचर्चितः॥ विष्णुब्रह्मादिवंद्यांघ्रिः सुरासुरनमस्कृतः॥ किरीटलेढिबालेंदुर्मणिकं
कणभूषितः॥ रत्नांगदांगो रत्नेशो रत्नरंजितपादुकः॥ नवरत्नगणोपेतकिरीटो रत्नकंचुकः॥ नाना
विधानेकरत्नलसत्कुंडलमंडितः॥ दिव्यरत्नगणाकीर्णकंठाभरणभूषितः॥ नवभालमणिर्नासापु
टभ्राजितमौक्तिकः॥ रत्नांगुलीयविलसत्करशाखो नखप्रभः॥ रत्नभ्राजद्धेमसूत्रलसत्कटितट
स्फुटः॥ वामांगभागविलसत्पार्वतीवीक्षणप्रियः॥ लीलावलंबितवपुर्भक्तमानसमंदिरः॥ मंदमंदा
रपुष्पौघलसद्वायुनिषेवितः॥ कस्तूरीविलसद्भालो दिव्यवेषविराजितः॥ दिव्यदेहप्रभाकूटसंदी
पितदिगंतरः॥ देवासुरगुरुस्तव्यो देवासुरनमस्कृतः॥ हस्तराजः पुंडरीकः पुंडरीकनिभेक्षणः॥
सर्वाशास्यगुणोमेयः सर्वलोकेष्टभूषणः॥ सर्वेष्टदाता सर्वेष्टः स्फुरन्मंगलविग्रहः॥ अविद्यालेशर
हितो नानाविद्यैकसंश्रयः॥ मूर्तिर्भवकृपापूरो भक्तेष्टफलपूरकः॥ संपूर्णकामः सौभाग्यनि
धिः सौभाग्यदायकः॥ हितैषी हितकृत्सौम्यः परार्थैकप्रयोजनः॥ शरणागतदीनार्त्तपरित्राण

शि०र०
॥ ९॥

परायणः॥ जिष्णुर्नेतावषट्कारो भ्राजिष्णुर्भोजनं हविः॥ भोक्ता भोजयिता जेता जितारिर्जित
मानसः॥ अक्षरः कारणं रुद्रः समरः शारदप्लवः॥ आज्ञापकेष्टो गंभीरः कवि दुःस्वप्ननाशकृ
पंचब्रह्मसमुत्पत्तिः क्षेत्रज्ञः क्षेत्रपालकः॥ व्योमकेशो भीमवेषो गौपतिरनामयः॥ भवाब्धि
तरणोपायो भगवान्भक्तवत्सलः॥ वरो वरिष्ठो नेदिष्टः प्रियः प्रियदवः सुधीः॥ यंता यविष्ठः क्षो
दिष्ठो यविष्ठो यमशासकः॥ हिरण्यगर्भो हेमांगो हेमरूपो हिरण्यदः॥ ब्रह्मज्योतिरनावेक्ष्यश्चा
मुंडाजनको रविः॥ मोक्षार्थिजनसंसेव्यो मोक्षदो मोक्षनायकः॥ महाश्मशाननिलयो वेदाश्वो भू
रथः स्थिरः॥ मृगव्याधो धर्मधामा प्रभान्तः स्फटिकप्रभः॥ सर्वज्ञः परमार्थात्मा ब्रह्मानंदाश्रयो वि
भुः॥ महेश्वरो महादेवः परब्रह्म सदाशिवः॥ ॥ एवमेतानि नामानि मुख्यानि मम षण्मुख॥ शु श्री॥ ॥९॥
भदानि विचित्राणि गौर्यै प्रोक्तानि सादरं॥ एतन्नामजपे योग्या विप्रा देवा मुनीश्वराः॥ शुचि
र्भक्ताः शिवपराः नान्ये रागादिमोहिताः॥ विभूतिभूषितवपुः शुद्धो रुद्राक्षभूषणः॥ शिव

शिवलिंगसमीपस्थो निःसंगो निर्जितासनः॥ एकाग्रचित्तो नियतो वन्नीभूतहितेरतः॥ शिवलिं
गार्चको नित्यं शिवैकशरणः सदा॥ मम नामानि दिव्यानि यो जपेद्भक्तिपूर्वकं॥ एवमुक्तो गुणोपेतः सर्वदेवैः
पूजितो भवेत्॥ संसारपाशसंबद्धजनमोक्षैकसाधनं॥ मन्नामस्मरणं नूनं तदेव सकलार्थदं॥ मन्ना
मैव परं जप्यमहमेवाखिलार्थदः॥ अहमेव सदा सेव्यो ध्येयो मुक्त्यर्थमादरात्॥ विभूतिवज्रकवचैर्मन्नाम
शरपाणिभिः॥ विजयः सर्वतो लभ्यो न तेषां दृश्यते भयं॥ ये मुक्तिदायक महेश पिनाकपाणे शं
भो गिरीश हर शंकर चंद्रमौले॥ विश्वेश्वरांधकरिपो पुरसूदनेति मामर्चयंत्यनुवदंति त एव धन्याः॥ ये
देवदेव जगदीश्वर पंचवक्त्र सोमाग्निभानुनयनानघ शूलपाणे॥ गौरीमनोरमण मारनिषूदने
ति मामर्चयंत्यनुवदंति त एव धन्याः॥ ये शर्व भालनयनामल विश्वमूर्त्ते श्रीनीलकंठ वरदोत्तम वि
श्ववर्ष्मबाहो॥ भर्ग त्रिलोचन भगाक्षिहराजरेति मामर्चयंत्यनुवदंति त०॥ ये विष्णुवल्लभ सदाशि
व कालकालकालाग्निरुद्र करुणाकर दीनबंधो॥ कर्पूरगौर परमेश महेश्वरेति मामर्चयंत्यनु

शि०स्प॥ ॥१०॥

वदंति०॥ येवामदेवभवभंजकभूतिभूषभूतेशखंडपरशोप्रमथाधिनाथ॥ विश्वाधिकत्रिदशावं
द्यसुरेश्वरेति मामेवयंत्यनुवदंति०॥ येभक्तवत्सलजटापटलावलंबिबालेंदुखंडरुचिमंडलमंडि
तांग॥ रत्नस्फुरद्भुजगराजविभूषणेति मामेवयंत्यनुवदंति०॥ येभीमषण्मुखगुरोमृगशावह
स्त शार्दूलचर्मवसनाव्ययसत्यसंध॥ शैलाधिराजनिलयत्रिपुरांतकेति मामेवयंत्यनुविवदंति
०॥ येभीमरुद्रवृषभध्वजवीरभद्र भद्रावताग्भगवन्भवभव्यरूप॥ निःसंगनिर्मलनिरंजननि
र्गुणेति मामेवयंत्यनुवदंति०॥ येकालकूटविषभक्षिभयार्त्तदेवसंरक्षकाद्यविषमाक्षसम
स्तसाक्षिन्॥ सूक्ष्मातिसूक्ष्मशिवदक्षमखांतकेति मामेवयंत्यनुवदंति०॥ येसोमसोमविशिपि
विष्टजगन्निवाससर्वैकवासवासमुनिहृत्कमलाधिवास॥ सोमावतंससशितिकंठशिवाप्रिये
ति मामेवयंत्यनुवदंति०॥ येनीललोहितदिगंबरयेपशूशाश्वतवृषासनधर्मरूपयज्ञादिक
र्मफलदायकयज्ञमूर्त्ते॥ सृष्टिस्थितिप्रलयकारणसात्त्विकेति मामेवयंत्यनुवदंति०॥ येनीललोहि
तदिगंबरकृत्तिवासश्रीकंठशांततनिरुपाधिकनिर्विकार॥ मृत्युंजयाव्ययनिधीशगणेश्वरे

श्री०म ॥१०॥

ति मामेवयंत्यनुवदंति तरव०॥ मन्नाममृतपायिनः स्वजननीस्तन्यःपुनःसर्वथा ना
कांक्षंति न चाप्नुवंति सततंमत्पादपद्मार्चकाः॥ मल्लिंगार्चनतत्परा ममहितामल्लोकवासनिरा
संति शंतिनिरस्तदुःखनिकरा मद्भक्तवर्यामुदा॥ मल्लिंगसंपूजनसक्तचित्ता मद्भक्तपूजार्थमु
पार्जितेन ताः॥ मन्नाम संकीर्त्तन मात्रमत्ता वसंति मन्नाम सुधैकचित्ताः॥ संतःक्वचित्संति
नितांतमीशा स्वांतःस्थितं संततमर्चयंतः॥ मामेवविश्वेशमनाद्यनंतमेकाद्यमेकं निगमां
तवेद्यं॥ सूत उ॥ इत्युदीरितमाकर्ण्य महादेवेन तद्वचः॥ संतुष्टः षण्मुखः शंभुं तुष्टाव गिरिजासु
तः॥ स्कंद उवाच॥ देवदेव जगन्नाथ देवदेवोत्तमोत्तम॥ वेदवेदांतवेद्येश जगज्जन्मैककारण॥
निरामय निराधार निर्द्वंद्व निरुपाधिक॥ निष्कलंक निराकार विकाररहितानघ॥ महादेव म
हाधीश वृषांक वृषवाहन॥ वृषभध्वज विश्वेश त्रिपुरांतक शंकर॥ कालकालकृपासिं
धो शितिकंठ शिवाप्रिय॥ त्रिकाग्निकालकालात्मन्कालधाराप्रवर्त्तक॥ मनोन्मनाम

शि॰स्त लानंत व्योमकेशा जगत्पते॥ भूतेशाभूत संघात्मा भूतैकनिलयामल॥ विभूतिभूषण श्रीम
॥११॥ न् भस्मोद्धूलितविग्रह॥ कैलासशिखरावास कृत्तिवासमहेश्वर॥ कपालमालाभरण जरामरण
वर्जित॥ योगिवृंदैकमंदार वृंदारकगणार्चित॥ योगिहृत्पंकजारूढ निगूढनिजविग्रह॥ गंडमंडल
संभ्राजन्मणिकुंडलमंडित॥ अनंतचंडमार्तंडमंडलाधिकसुप्रभ॥ हिरण्यबाहो विश्वात्मन् संसा
रार्णवतारक॥ विश्वतोमुखसामात्मन्विश्वतश्चरणाज॥ विश्वतोलोचनानंत व्योमकेशा सदाशि
व॥ ज्येष्ठ श्रेष्ठ समस्तात्मन्व्यापकानंतविग्रह॥ त्रिशूलपाणे खट्वांगी निःसंगा निगमाश्रय॥ नि
राश्रयाखिलाधार परब्रह्मन्परात्पर॥ ब्रह्मानंदैकनिलय मयस्करनिरीश्वर॥ सत्वप्रधान सत्वा
त्मन्नानंदमय सर्वग॥ महाश्मशाननिलय महाप्रेतासनस्थिर॥ पिनाकपाणे दुष्टारिन्त्रिलो श्रीः॥
कैकजीवन॥ शार्दूलचर्मवसन भूधरेशारासन॥ स्वेच्छाकृतावनीयान दग्धत्रिपुरकानन॥ वा ॥११॥
सीकृतानंदवन सोमसूर्याग्निलोचन॥ मुनिचित्तासनासीन कालकूटविषादन॥ कंदर्पदर्पद

लन वृषाधीशैकवाहन॥ दुष्टारिसंघघ्नाम्न दुर्लंघ्यदृढशासन॥ अप्रधृष्यानिरीक्ष्याच्छ तेजःपुंजनिरं
जन॥ सतीकृतास्वतेजस्पहितकृक्षुरानन॥ हिमाद्रिशिखरस्वच्छरत्नवारुस्थिरासन॥ महोदा
र महावीर महाश्रमसुरेश्वर॥ महाघोषकृताकृत सर्वलोकक्षमाकर॥ नमस्ते नमस्ते महादेव शं
भो नमस्ते नमस्ते प्रसन्नैकबंधो॥ नमस्ते नमस्ते दयासारसिंधो नमस्ते नमस्ते नमस्ते महेश॥
नमस्ते नमस्ते महामृत्युहारिन् नमस्ते नमस्ते महादुःखहारिन्॥ नमस्ते नमस्ते महापापहारिन्न
मस्ते नमस्ते नमस्ते महेश॥ नमस्ते नमस्ते जगज्जन्महेतो नमस्ते नमस्ते वृषाधीशकेतो॥ न
मस्ते नमस्ते महापुण्यसेतो नमस्ते नमस्ते नमस्ते महेश॥ नमस्ते नमस्ते सदाचंद्रमौले नमस्ते
नमस्ते सदाशूलपाणे॥ नमस्ते नमस्ते सदोमेशजाने नमस्ते नमस्ते नमस्ते महेश॥ यस्य स्वरू
पं न विदुः सुरासुरा यस्य स्वरूपं न विदुर्मुनीश्वराः॥ यस्य स्वरूपं न विदुर्यमेश्वरास्तस्यैव नित्यं
शिवरूपमीड॥ यस्य स्वरूपं निगमैरगम्यं यस्य स्वरूपं नियमैरगम्यं॥ यस्य स्वरूपं परमैरगम्यं

तस्यै नित्यं शिवरूपमीडे॥ संसारदावानलशामकाय मृत्युंजयायामितविक्रमाय॥ सुरासुरो
घार्चितपादुकाय शिवासमेताय नमः शिवाय॥ घोराघिकाघौघनिवारकाय स्वर्गापवर्गादि
फलप्रदाय॥ निरामयायांधकसूदनाय शिवासमेताय नमः शिवाय॥ कुंदेंदुशंखस्फटिकोपमा
य महेश्वरायाश्रितवत्सलाय॥ श्रीनीलकंठाय यमांतकाय शिवासमेताय नमः शिवाय॥ भु
जंगचक्राधिपभूषणाय नानामणिभ्राजितकुंडलाय॥ कर्पूरगौराय सुरोत्तमाय शिवासमेता
य नमः शिवाय॥ त्रिकाग्निकालाय मनोन्मनाय त्रिपंचकाय त्रिपुरांतकाय॥ कालाग्निरुद्राय जग
न्मयाय शिवासमेताय नमः शिवाय॥ दयार्द्रमुद्राय निधीश्वराय धनेशमित्राय सुधामयाय॥
कारुण्यरूपाय मयस्कराय शिवासमेताय०॥ ब्रह्मेंद्रविष्ण्वादिसुरार्चिताय देवादिदेवाय दिगंब
राय॥ अनंतकल्याणगुणार्णवाय शिवासमेताय नमः शिवाय॥ वेदांतवेद्याय महोदयाय कैलास
वासाय शिवाधवाय॥ शिवस्वरूपाय सदाशिवाय शिवासमेताय नमः शिवाय॥ इति स्तु

त्वा महादेवं सर्वव्यापिनमीश्वरं॥ पुनः पुनः प्रणम्याथ स्कंदस्तस्थौ कृतांजलिः॥ महेश्वरः प्रस
न्नात्मा कुमारं नतकंधरं॥ प्रीत्या शिवा च वचनं सर्वानंदकरं ततः॥ श्रीशिव उवाच॥ प्रहृष्टोस्मि
प्रसन्नोस्मि स्तोत्रेणानेन षण्मुख॥ वरदोहं वरानिष्टान् वृणु दास्ये वरानहं॥ स्कंद उवाच॥ सांब शं
भो महादेव दयासागर शंकर॥ मच्चित्तभ्रमरो नित्यं तवास्तु पदपंकजे॥ सर्वथा सर्व सर्वज्ञ सर्वे
श मम महेश्वर॥ तव नामामृतं दिव्यं जिह्वाग्रे मम लुंठतु॥ अनन्यशरणं चित्तं तवैव चरणांबुजे॥ नि
वसतु निशं शंभो मम देव दयानिधे॥ शिवास्तु तव पादाब्जमन्मनो मकरंदपः॥ चतुर्वर्गफला
कारमकरंदविजृंभिते॥ किं वरेण ममान्येन मयैतद्याचितं वरं॥ सर्वसौभाग्यदं नूनमिति वेदैर्वि
निश्चितं॥ इति तद्वचनं श्रुत्वा सांबः संतुष्टमानसः॥ पस्पर्श तच्छिरः सम्यगानंदपरिपूरितः॥ कुमा
र तव भाग्यस्य मातानूनं न संशयः॥ तत्त्वतो मां विदित्वैव विश्वेशं स्तोतुमिच्छति॥ त्वया तु याचि
तं दत्तं मया तुभ्यं वरोत्तमं॥ वरं वरं च दास्यामि सर्वलोकोपकारकं॥ त्वयेह यत्कृतं स्तोत्रं मम प्रि

शि०रह यरूपं॥ तद्यः पठेच्छृणुयान्नित्यं स समाप्नोत्यभीप्सितं॥ अघोरपातकेभ्यश्च संसाराच्च विमुच्यते॥
॥१३॥ भक्तिक्षमा नसुसततं मपि सांबमहेश्वरे॥ सूत०॥ इति दत्वा वरानिष्टान्सांबः संसारमोचकः
तत्रैवांतर्दधे तुष्टो ब्रह्मविष्ण्वादिसेवितः॥ भवंतोऽपि मुनिश्रेष्ठाः सांबध्यानपरायणाः॥ शि
वनामजपं कृत्वा तिष्ठंतु सुखिनः सदा॥ शिव एव सदा सेव्यः सर्वदेवोत्तमः प्रभुः॥ शिव एव
सदा पूज्यो मुक्तिकामैर्न संशयः॥ महेशान्नाधिको देवः स एव सुरसत्तमः॥ स एव सर्ववेदांत
वेद्यो नात्रास्ति संशयः॥ अनन्यशरणो यस्तु शंकरार्चनतत्परः॥ स एव धन्यः पुण्यात्मा स
त्यमेवोच्यते मया॥ जन्मांतरसहस्रेषु यदि तप्तं तपस्तदा॥ तस्य श्रद्धा महादेवे भक्तिश्च भवति
ध्रुवं॥ मुक्तिदाता महादेवादन्यो नास्त्येव सर्वथा॥ सत्यमेतत्पुनः सत्यं सत्यमेतन्न संशयः॥ श्रीः॥
सुभगा जननी तस्य तस्यैव कुलमुन्नतं॥ तस्यैव जन्म सफलं यस्य भक्तिः सदा शिवे॥ ये शं ॥१३॥
भुं सुरसत्तमं सुरगणैराराध्यमीशं शिवं शैलाधीशसुतासमेतममलं संपूजयंत्यादरात्॥

ते धन्याः शिवपादपूजनपरादन्यो न धन्यो जनः सत्यं सत्यमिहोच्यते मुनिवराः सत्यं पुनः सर्वथा
२५८॥ ॥इति श्रीशिवरहस्ये सप्तमांसे स्कंदसदाशिवसंवादे मुख्यशिवरहस्यकथनं
नाम प्रथमोऽध्यायः॥१॥ ॥ऋषय ऊचुः॥ त्वत्प्रसादाद्वयं सूत निष्पापास्मो न संशयः॥ धन्या
स्तात्वया नूनं सत्कथाश्रवणाद्वयं॥ त्वद्वागमृतधाराभिः पापदावानलो महान्॥ शांतः प्रशांत
चित्तं स्वदुःखान्यपगतानि च॥ पुनः पुण्यकथामन्यां वद पापौघनाशिनीं॥ यत्कथाश्रवणं स
द्यः प्रसादयति चेतसं॥ कस्मिन्क्षेत्रवरे रम्ये अप्यामेत्रः शिवात्मकः॥ कुत्र वा शंकरस्यास्ति देव
देवस्य सन्निधिः॥ सूत०॥ एवमेव पुरा पृष्टः पार्वत्या परमेश्वरः॥ ततः प्रहृष्टवदनो निजगा
द सतीं प्रति॥ शिव उवाच॥ अस्ति क्षेत्रवरं देवि सर्वक्षेत्रोत्तमोत्तमं॥ वेदोपगीतमनिशं काशी
क्षेत्रमनामयं॥ कल्पांते सकलांल्लोकान्संहृत्य निजमायया॥ काश्यामेव त्वया सार्धं संवसामि
शुभानने॥ काशी त्रिशूलनिलया निर्मलालयवर्जिता॥ पुरातनानसाजन्मा प्रलयेपि न नश्य

शि०स्प
१४

ति॥ ममापरा तनुः काशी मत्तो भिन्ना न सा प्रिया॥ वीशोहं नावयोर्भेदः सत्यमेवावयोः प्रिये॥ नाहं
वसामि कैलासे न वा मंदरपर्वते॥ न वा हिमाचले भद्रे काशीमेव वसाम्यहं॥ वसन्नपि च रम्ये कैला
से विलासार्थं कदाचन॥ विहाय काशीमनिशं निवसामि मनोरमे॥ ज्योतिःपुंजमयी काशी शु
नरूपा मनोरमा॥ तया तु सदृशं वस्तु नास्ति ब्रह्मांडगोलके॥ भूगतापि न भूः काशी निर्मला
प्यखिलोन्नता॥ वेद्यवेद्यापि सा नूनं वेदवेद्या न तत्त्वतः॥ मत्स्वरूपा यतः काशी ततो हि मि
व तत्त्वतः॥ वेदांतैरपि सा काशी न ज्ञातुं शक्यते ध्रुवं॥ यथा त्वयि मम प्रीतिस्तथा काश्यां शु
भानने॥ सर्वथा प्रीतिरस्त्येव नाप्रीतिः कदाचन॥ मयि त्वमिव सा काशी सर्वसौख्य श्रीः॥
प्रदायिनी॥ काशी काशीति सततमुच्चरन्निव साम्यहं॥ धर्मैकराशिः सा काशी पापरा ॥१४॥
शिविनाशिनी॥ अविनाशिसुधाराशिरास्था वशिभिः सदा॥ बहुभिर्जन्मभिर्नित्यं यदि

घोरतरं तपः॥ तत्तं सदा तत्प्रसादात्काश्यां वासो भविष्यति॥ काशीवासरता मर्त्याः स्वर्गलोक
निवासजं॥ सुखं सर्वं तिरस्कृत्य निवसंत्यनिशं मुदा॥ नो यैस्तपोभिर्दानैश्च धर्मैरध्ययनैरपि॥
काशीप्राप्तिर्न लोकानां मत्प्रसादं विना शुभे॥ काशीप्रकाशकं वस्तु लोके नैव हि दृश्यते॥ चंद्रो
वा भानुरग्निर्वा तत्प्रकाशकरो न हि॥ या न वेद्या वदसंवेद्यस्तदन्यैरपि साधनैः॥ अवेद्या सा कथं वे
द्या काशी लोकैः शिवात्मिका॥ स्वर्गभोगमयीं त्यक्त्वा देवेंद्राद्यमराः सदा काशीवासमुपेक्षंते मु
क्त्यर्थं सर्वसाधनैः॥ सर्वयज्ञतपोदानधर्माणां फलमुत्तमं॥ काशीवासात्मकं सत्यं न तस्माद
धिकं फलं॥ ब्रह्महत्यादिपापानि घोराणि विविधान्यपि॥ काशीति स्मरणादेव क्षणान्नश्यंत्यसं
शयं॥ काशीनिवासनिरतान्नरानप्यमरा मुदा॥ नमस्कुर्वंति सततं पूजयंति स्तुवंति च॥ काशी
वाससमुत्पन्नसुखेन सदृशं सुखं॥ नानुभूतं मया क्वापि कस्मिन्नप्यमलानने॥ मन्मनो रमते
काश्यां यथा तद्वद्वरानने॥ नान्यत्र रमते चेतस्तद्वस्त्वेव हि तादृशं॥ सर्वधर्मास्तु लारूढाः पर

शि० स्प ॥१५॥

स्पर्जिगीषया॥ पुरा श्रीशैलशिखरे श्रीशैलेश्वरसन्निधौ॥ काशीनिवासजाद्दुर्मदान्यधर्मि
स्तुआगताः॥ परस्परं जयप्रश्नाः प्रथमं तेन ततः परं॥ ३०॥ काशीनिवाससंभूतधर्मश्रेष्ठजिगीष
या॥ पुनः सर्वेतु लोकाप्रमुमुथताः संभ्रमान्विताः॥ श्रीशैलेशस्तदा धर्मान्संवीक्ष्य जयकांक्षिणः
उवाच वचनं प्रीत्या साम रूपं जगत्प्रियं। काशीवासजधर्मेण स्पर्धा कार्या न सर्वथा॥ स्वसर्वध
र्मवक्रेश इति देवैर्विनिश्चितः॥ समेन राजते स्पर्द्धा साहीनेन न राजते॥ सर्वोत्तमेन तु स्पर्द्धा
त्वनाशायोपपद्यते॥ लोकनीतिविरुद्धानि कर्माणि विफलानि हि॥ न कुर्वन्त्येव निपुणा नीति
शास्त्रविशारदाः॥ स्वशक्तिं परशक्तिं च विचार्य समयादिकं॥ ततः स्पर्द्धां प्रकुर्वाणा निपुणा
इति संमताः॥ कथं भवन्तो न्यूनवीर्या कथं सर्वोत्तमः परः॥ कानेतोयद्वात्तुतेजाः क्वास्वल्पा
रमणुकप्रभा॥ ततस्तेन सह स्पर्द्धा न कर्त्तव्या कदाचन॥ अल्पस्य महता सार्धं विरोधो ने
पपुज्यते॥ इति श्रीगिरिनाथस्य श्रुत्वा वचनमादरात॥ विश्वस्य तद्वचः सम्यक् स्पर्द्धां स

श्रीः॥ ॥१५॥

त्यक्त्वा यपुस्ततः॥ तस्मात्तु भाननेदेवी काशीवाससमुद्भवः॥ धर्मो धर्मवरो ह्येयो धर्मस्तादृग्न सर्व
था॥ यावंति संति तीर्थानि पाताले पृथिवीतले॥ सत्यलोकादिलोकेषु तावंति सुखदे सदा॥ काशीं
प्रयांति श्रीकाशीमर्चयंति स्तुवंति च॥ काश्यां विशेषतीर्थेषु स्नानं कुर्वंति यत्नतः॥ पुण्यक्षेत्राणि स
र्वाणि दूरदेशास्थितान्यपि॥ गत्वा काशीं मुदा सम्यक् पूजयंति हितं सदा॥ देवाः स्वस्वगणैः सार्कं
विहाय स्वर्गजं सुखं॥ गच्छंतीव संतुष्टाः काशीं प्रतिसदा प्रभो॥ सरस्वत्या सह स्रष्टा काशीवा
सारतः सदा॥ सत्यलोकं विहायैव काशीमायाति हृष्टधीः॥ विष्णुरप्याधिकं स्वीयं स्थानं त्यक्त्वा
सदा मुदा॥ काश्यां तिष्ठति मामेव लिंगरूपिणमर्चयन्॥ गंधर्वाः किन्नरा यक्षाः सर्वे स्वस्वग
णान्विताः॥ प्रयांति सततं काशीं काशीपूजनतत्पराः॥ पांडुपर्णाशिनो धन्या मुनयो ब्र
ह्मवादिनः॥ वाताशनाश्च सततं संति काश्यां मुनीश्वराः॥ क्षीराब्धिप्रमुखाः सर्वे समु
द्राः सततं मुदा॥ काशीपूजार्थमायांति रत्नैरभ्यर्चयंति तां॥ कामदोग्ध्रिस्वयं गत्वा क्षी

त्रि॰स्थ॰ ।१६।

रेणे वाभिषिच्यतां ।। काश्यां तिष्ठति संतुष्टा देवलोकं विहायसा ।। पुष्पिताः कल्पवृक्षाश्च गत्वा का
शी महर्निशं ।। पुष्पवृष्टिं वितेनुस्ते काशी पूजापरायणाः ।। आदित्या वसवः साध्याः सिद्धाश्च सुरग
णान्विताः ।। ~~पुष्पिताः कल्पवृक्षाश्च गत्वा~~ काशी महर्निशं काश्यां शुचिव्रता नित्यं निवसंत्यादरे
णते ।। कश्यपो ऽत्रिर्वसिष्ठाद्या ऋषयः शैवपुंगवाः ।। विश्वेदेवाश्च सततं काश्यां तिष्ठंत्यनाकुलाः
अन्येपि सप्तलोकादि सप्तलोकनिवासिनः ।। सर्वेपि काश्यामनिशं वसंति शिवपूजकाः ।। का
शीं ते दुर्लभां प्राप्य निक्षेपमिव निर्धनाः ।। त्यक्तुं मनः कदाचिद्वा न कुर्वंत्येव सर्वथा ।। क्षुधिता
इव मृष्टान्नं पिपासव इवोदकं ।। कदाचिदपि ते काशीं न त्यजंति दृढव्रताः ।। चकोरा इव पूर्णेंदुं का
मुका इव कामिनीं ।। न विहास्यंति ते काशीमन्याशारहिताः सदा ।। भ्रमरा इव पुष्पाणि गावो व
त्सतरानिव ।। काशीं प्रकाशमानां तां न त्यजंति दृढाशयाः ।। पतिव्रतेव भर्तारं विद्येव विम
लाशयं ।। काशीं त्यागं मुक्तिकामो न करोत्येव पावनः ।। कः काशीं यतते त्यक्तुं मोक्षार्थी वि

श्री॰ग॰ ।१६।

DR BHAU DAJI

गतस्पृहः ।। सर्वोग्रासममलं न जहाति क्षुधातुरः ।। सिंहासनं यथा राजा न जहाति बलान्वितः ।। न ज
हाति तथा काशीं मर्त्यः संसारदुःखितः ।। अनंतोग्रतपोधर्मैर्लब्धा काशी शिवस्थितां ।। कः स जहाति सु
भगे सौभाग्यनिलयां शुभां ।। अनंतजन्मभिर्घोरं तपः कृत्वातिदुर्लभं ।। तेनैव तपसा काशी लब्धा कः सं
जहाति तां ।। दुर्लभा सर्वथा देवी लोके काश्याभिधा सुधा ।। कस्तां जहाति निपुणो वज्रगांशार्करामिव ।।
सर्वथा दुर्लभा काशी दुर्लभा दुर्लभा ध्रुवं ।। दुर्लभा दुर्लभा सत्यं दुर्लभा दुर्लभा शुभे ।। महानिधिरियं का
शी पापराशिप्रणाशिनी ।। मोक्षरूपेष्टफलदा ब्रह्मानंदप्रवर्द्धिनी ।। इयं काशी कामधेनुर्मोक्षरूपे
ष्टकामदा ।। विनाशकामदा नेयं काशी नित्येष्टकामदा ।। काशी काशीति सततं यः काशीस्मरणे
रतः ।। स सद्यः सर्वपापेभ्यो मुच्यते देवि सर्वथा ।। देशांतरेपि यः स्थित्वा काशी काशीति संवदेत् ।।
स पापिष्ठोपि सुभगे पातकेभ्यो विमुच्यते ।। विना सुयेण तपसा काशीप्राप्तिः शुभानने ।। न भ
वत्येव तत्सत्यं सत्यं सत्यं न संशयः ।। दुर्लभं मानुषं जन्म संप्राप्यापि नरो यदि ।। काशी प्राप्तं नय

शि॰स्य
॥१७॥

ततेसएवपुरुषाधमः॥ अन्यत्र दुःसहं मर्त्यैस्तपः कृत्वापि सर्वदा॥ न पारलौकिकं सौख्यं प्राप्नो
ति विमलानने॥ प्रज्वलज्ज्वलनेत्यक्त्वा भस्मन्याज्यादिकं हविः॥ कृतमप्यखिलं व्यर्थं तथान्यत्र
कृतं तपः॥ धिक्कृतस्य जीवनं जंतोर्धिग्धिग्धिग्वपुर्नरं वं॥ येन काशी नावलोकी येन काशी न
पूजिता॥ धिक्कुलं तस्य धिक् सौख्यं धिग्बुद्धिर्धिग्वरं यशः॥ येन काशी शिवपुरी नानर्चि स
कलार्थदा॥ धिगैश्वर्यं धिगैश्वर्यं धिक्तस्य नवयौवनं॥ येन काशी पुण्यराशिर्नाभ्यर्चि शुचिसाधनैः॥
धिग्धिग्वाणी तस्य जंतोर्येन काशी न संस्तुता॥ धिग्धिग्ज्ञानं तस्य येन काशी न चिंतिता॥ धिग्धि
धिग्धिक् शिरस्तस्य येन काशी न वंदिता॥ धिक्पाणिस्तस्य विमलो येन काशी न मार्जिता॥ कीट
पतंगो मंडूको मत्स्यो वा शिवसंमतः॥ काश्यां स्वतनुत्यागे वा प्नोति तनुं ध्रुवं॥ यस्य कस्यापि
वा जंतोर्मरणे समुपस्थिते॥ काश्यां शिवशिवेत्येतन्नामैवादिशाम्यहं॥ मद्भक्तपन्नविमलानन्दश्च मरणा
सन्नजीवनान्तान्ममैवांके सन्निस्यपशिवे तदुपदिशाम्यहं॥ शिवनामानुसंधानात्तुराभूत्तनुर्नरः

धिग्धि

श्रीः
॥१७॥

पुनर्मन्नाम तत्काश्यां मंते प्राप्नोति मानवः॥ शिवेति नाम दावाग्निः पापतूलादिनाशकः॥
तस्माच्छिवशिवेत्येतन्नामोच्चारणतत्परैः॥ काश्यां मंते शिवेत्येतन्नाम संप्राप्यते ध्रुवं॥ ततः शि
वशिवेत्येतन्नाम मुक्तिप्रदायकं॥ तन्मयाप्युपदिष्टं वै काश्यां किं पुनरंबिके॥ ८४॥ काश्यन्य
पुण्यक्षेत्रेषु मद्भक्तः स्ववपुर्यदि॥ त्यजत्सैते सभूयोपि मद्भक्तो जायते भुवि॥ ततः काशीमवाप्या
त्र मद्भक्तो मत्प्रसादतः॥ अंते शिवशिवेत्येतन्नाम संप्राप्नुवंति ते॥ काश्यां मुक्ततनुर्मर्त्यो न पुन
स्तनुभाक् शुभे॥ किंतु मद्रूपतां याति मद्भक्तो मत्परायणः॥ यथा भूयो न यात्येव प्रज्वलद्वह्नि
गं हविः॥ तथा त्यक्तातनुः काश्यां शैवैर्नैवाप्यते पुनः॥ काशी शोक्कुमारी राणि गृहीत्वा याचितापि
सा॥ न ददाति हवीषीव पावकः पुनरुज्वलः॥ अन्यत्र मुक्तिकामैस्तु न त्याज्यं तन्न कदाचन॥ त्य
क्त्वा काशीं शुभे सत्यमुद्भवसभुजमच्यते॥ मद्भक्त एवाधिकारी मोक्षकाश्यैव मुक्तिदा॥ मन्नामस्मृ
तिरेवास्यां प्राच्या मोक्षसाधनमुत्तमं॥ शिवशिवशिवेत्येतन्नामस्मरणमेव हि॥ कारणं मोक्ष

शि०र०
॥१८॥

कौ रूपात्फलस्येति मति मम॥ मत्प्रसादेन संप्राप्य काशीं मुक्तिप्रदायिनीं॥ मद्भक्तो मत्परो नित्यं को वा
मुच्येत्किं नुरः॥ पुण्यपुष्पसमाकीर्णं मोक्षरूपफलान्वितं॥ कः काशीतरुमाश्रित्य पुनरन्यत्र गच्छति॥
यानभासयितुं दक्षा भानुचंद्रानलाः शुभे॥ तामिष्टफलदां काशीं कः त्यक्तुं नु ते मतिः॥ अमरैरप्य
लभ्यां तामनायासेन मुक्तिदां॥ कः संजहाति विमलः काशीमीशाननायिकां॥ क्षुधितः करगं ग्रासं
यथान्ये वदि मुंचति॥ तथा न मुंचति प्राज्ञः काशीं मुक्तिप्रदायिनीं॥ मल्लिंगार्चनतत्पराहृदि सदा मामे
व कारुण्यामुदा ध्यायंतो मम नाम शंकर महादेवाखिलेशप्रभो॥ गौरीनाथ शिवेश्वरेति विमलं भक्त्या
जपंतः परां संत्यक्त्वेतमपार[illegible]भोगविषयाः शैवा यशं गण्या शिवे॥१०३॥ ॥इति श्रीशिव
रहस्ये सप्तमांशे शिवगौरीसंवादे काशीमाहात्म्ये काशीप्रशंसा नाम द्वितीयोध्यायः॥२॥ ॥ श्री:॥ ॥१८॥
पार्वत्युवाच॥ देवोत्तमाखिलाराध्य विश्वेशाखिलविश्वग॥ श्रुत्वा पुण्यकथां रम्यां त्वत्प्रसादान्मनो
हरा॥ त्वन्मुखांभोजविलसत्कथापुण्यरसं पुनः॥ मच्चित्तश्चंचरीकोयं पातुमिच्छति शंकर॥ म

हादेव कियत्काशीरूपा परिमाणविशेषतः॥ किं वा तत्र महत्स्थानं किं वा तीर्थमहद्विभो॥ किं वा श्रेष्ठतमं लिं
गं सर्ववेदांतसंस्तुतं॥ तत्सर्वमविशेषेण निरूपय कृपानिधे॥ शिव उवाच॥ सम्यक्पृष्टं वरारोहे सा
साधु साधु वरानने॥ प्रश्नोयं तव कल्याणि कल्याणं तनुते मम॥ यद्यत्पृष्टं त्वया देवि तत्तद्वदामि संमतं
विचार्य तद्धृदि स्थाप्य हृष्ट शृणु कर्णमनोरमं॥ पंचक्रोशात्मकं रम्यं काशीक्षेत्रमनुत्तमं॥ तत्तु ज्योतिर्मयं
लिंगं वेदवेद्यं पुरातनं॥ सहस्रकनकद्वारपरिवेष्टितमुन्नतं॥ वज्रसंघटितश्रेष्ठसहस्रावर
णान्वितं॥ अत्यूर्ध्वलोकगश्रेष्ठरत्नगोपुररंजितं॥ नानाविधसुधासौधशृंगकांतिविराजितं॥
तद्गोपुराग्रभागेषु विमलेषु कदाचन॥ नभानुभानुसंचारश्चंचला क्षिवरानने॥ न कैलासेषु विम
लाश्चंद्रस्यापि नराश्रयः॥ न चाग्रहगणस्यापि कांतिरन्यस्य वाछविः॥ तत्सु तैतद्गोपुराजच्छविस्र
तिहतप्रभा॥ निष्प्रभा एव तिष्ठंति सर्वे सूर्योदयप्रिये॥ काशीगोपुरशृंगाणि रम्याण्यत्युन्नतानि च॥
दृष्ट्वा सुमेरुशृंगोपि लज्जितो भवति ध्रुवं॥ अमूल्यानर्घ्यरत्नौघरचितं शृंगमुन्नतं॥ सर्वा लोका

शि॰ रु नतीत्यैव यातिपनृपवरानने॥ एतत्तु शेखरिश्रृंगं मूले भानुविधुग्रहाः॥ तिष्ठंति निष्प्रभा नित्यं श्रृंगच्छ
॥१९॥ विहतप्रभाः॥ कथमुच्चतरो भाति पुण्यस्तेभ इवामलः॥ ईदृशान्येव श्रृंगाणि संति काश्यामनेकधा॥
काश्यां गोपुरश्रृंगाणामग्रभागदिदृक्षया॥ पुरा पुरमथा देवी कदाचित्कृतमादरात्॥ वृषेशप्रमुखाः
सर्वे प्रमथाधीश्वरा अपि॥ समागता मया सार्धं महासत्वा महाजवाः॥ तैः सहैव मया देवी गतमू
र्ध्वं ततः परं॥ बहुकालाटनात्सर्वे श्रांतास्ते प्रमथाधिपाः॥ ततः सर्वे निवर्त्यैव पार्वत्या शुभानने॥
वृषेश्वराधिरूढेन मयैव गमनमयतः॥ गमने कति वा मासा जाताः संख्या न सा स्मृता॥ ततः परं वा मामे
के श्रृंगाग्ररत्नराजितं गोष्ठ ऊर्ध्वमपादृष्टं तत्कोणधृतांतरः॥ धृतमप्यतिवेगेन गतमूर्ध्वं तदंबिके श्री:॥
ममाश्चर्यमभूच्छीघ्रगमनं तत्स्यपनृपतः॥ वायोरपि तथा वेगो न दृष्टोस्ति कदाचन॥ तदृष्टाग्रंद ॥१९॥
र्पमानमदस्थेमभवक्षणात्॥ तदानीमेव तं दृष्ट्वा वृषेशो विस्मयं गतः॥ महदाश्चर्यसंपन्नस्तत
परं महत्शुभे॥ समागतो स्मि कैलासमारस्य वृषभाधिपे॥ हर्म्यगोपुरश्रृंगाणि पारस्पारजिगीषय

गच्छत्यत्यंतवेगेन सदा रत्नमयानि हि॥ अष्टदिक्षु गणाधीशाः शूलमुद्गरपाणयः॥ असंख्याताः सदा
देवीव संस्मितविक्रमाः॥ सहस्रार्बुदभूतेशाः शितशूककराः सदा॥ निवसंति प्रतिद्वारि तीक्ष्णाक्षा
विकृताननाः॥ शक्तिसंघाश्च बहवः प्रतिद्वारि वरानने॥ ज्वलदग्निनिभाः संति भैरवाश्च बलोन्न
ताः॥ रविरक्ताश्च गंधर्वाः कश्चिदद्भुतविक्रमाः॥ काश्यां दक्षिणदिग्भागे दुर्धर्षस्तिष्ठति प्रिये॥ धृ
तोर्ध्वमुष्टिरुन्मत्तः शूलदंतकरायुधाः॥ प्रज्वलद्वह्निसंकाशः सूर्यमंडलसन्निभः॥ तद्भृत्यास्त
दृशा वीरा बलमानविजृंभिताः॥ रक्तवस्त्रा रक्तकायाः शत्रुरक्तैकजीवनाः॥ उन्मत्तभैरवो नाम
कश्चिदस्ति महाबलः॥ तस्यामेव दिशि श्रेष्ठः कोटियोजनमुन्नतः॥ मंदराचलसंकाशो महाका
यो भयानकः॥ कोटिकोटिगजाधीशसंकाशांगुलिविक्रमः॥ श्वेतोश्वदीर्घरदतः पिंगलाक्षि
शिरोरुहः॥ सितवज्रनिभानंतकररोमा मदोद्धतः॥ क्रूरावेक्षिपातमात्रेण दहत्यरिकुलान्ब
हून्॥ पातालेषु विना केवा तत्तुल्यो नैव दृश्यते॥ तत्क्रूरदृष्टिपातेन भस्मसंजायते गिरिः॥ नत

शि०ख क्रूरदृष्ट्या पृथिवी कंपमाना नैव तिष्ठति॥ क्षीराब्धिः कदा पूर्वं पीतस्तेन ततः परं॥ महाभुजो महाकायः
॥२०॥ क्रूरदृष्टिरलोलुपः॥ सर्वे समुद्राः सरितः पीतास्तेनैव लीलया॥ शैलेंद्राः पूर्वमेतेन भक्षिता बहवो मु
दा कदाचिदूर्ध्वं नीतेयं पृथिवी पृथुबाहुना॥ छत्रीकृता तदा सेवतेन शैलवनान्विता॥ बहुकाले
प्रयत्नेन सुरगंधर्ववीक्षितः॥ चक्रवद्भ्रामयामास नखाग्रे सन्निवेश्य च॥ अनेनैवातिमत्तेन लो
कामत्ता सिताः पुरा॥ ततः स्वरूपया लोकान्यथापूर्वं चकार च॥ इंद्रादिलोकपालाश्च कृतांज
लिपुटाः सदा॥ संसेवंते भयग्रस्ताः कूपमानास्तमादरात्॥ तपसा सम्यगाराध्य तमेव तदनु
ग्रहात्॥ काशीप्रवेशमिच्छंति स्वर्गलोकनिवासिनः॥ अनिवेद्य गतः पूर्वं तमेव चतुराननः॥ श्रीः॥
काश्यां ततः क्रूरदृष्टिर्लीलया चतुराननं॥ शीघ्रं निष्कासयामास प्रलयंतं सभेनवः॥ काशी ॥२०॥
प्रवेशो नैव तस्य तद्दाप्रभृति सर्वथा॥ दुःखितः सविधिस्तेन धिक्कृतो वनमाययौ॥ प्रलयन्व
नमाश्रित्य सरस्वत्या सतिष्ठति॥ इदानीं विधिरत्यंतं काशीदर्शनलालसः॥ तमेव तपसा स

म्यगाराधयति सादरं॥ अस्य श्रुतपसा तुष्टो पैनवो भक्तवत्सलः॥ तस्य काशीप्रवेशार्थं मार्गं दा
स्यसंशयं॥ अयमेतादृशो देवि काशीपालनतत्परः॥ इतोपि प्रबलाः संति काशीसंरक्षणक्ष
मः॥ तेषां तेजो बलं वीर्यं शौर्यमौदार्यमुत्कटं॥ वक्तुं न शक्यते देवि सहस्रवदनैरपि॥ काशीसंरक्ष
कावीरायवेतः संतितावतां॥ प्रसादेन विना काशीं प्रवेष्टुं नैव शक्यते॥ भिन्नप्रकृतिकाः क्रू
राः काशीसंरक्षकाः सदा॥ अनंता दुर्मदाः सर्वे परस्परजिगीषवः॥ अनल्पाराधनप्रीता
बहुसेवाभिलाषिणः॥ छिद्रान्वेषणलोलाक्षाः पक्षपातविवर्जिताः॥ त्वत्प्रसादाद्ययत्नोपि
कर्तुं नैव हि शक्यते॥ त्वत्प्रसादस्वरूपं तु फलं मे नोपलभ्यते॥ अनंतजन्मभिः क्लेशाः के
न कार्याः प्रयत्नतः॥ केन वा तत्प्रसादोपि प्राप्तव्यः क्लेशसाधितः॥ केनस्व्ययमारस्य तपः
कर्त्तव्यमादरात्॥ केनोपवासाः कर्त्तव्याः काशीप्राप्त्यै निरंतरं॥ केनाधोमुखमासाद्य धूम्र
पयोति दुःसहः॥ केनेंद्रियजयः कार्यः काशीप्राप्त्यै निरंतरं॥ केनागलं जले स्थित्वा हिमका

शि०स्प केदुगासदे। पंचाक्षरजपः कार्यः काशीप्राप्त्यै निरंतरं॥ केन मृष्टान्नपानादि। त्यक्तानि स्पृहमा
॥२१॥ दरात्॥ स्वल्पवाताशनैः कार्यं काशीप्राप्त्यै निरंतरं॥ केन स्वछंदं नं स्विष्ट वनिता कनकादयः॥ अ
विवादं कथं त्याज्या॥ काशीप्राप्त्यै निरंतरं॥ केन मुक्तावली त्याज्या नानारत्नविराजिताः॥ रुद्रा
क्षधारणं कार्यं काशीप्राप्त्यै निरंतरं॥ केन तप्त्वा पटुस्पष्टदृढनारीकुचासनं॥ कुशासनपरिग्रह
यं काशीप्राप्त्यै निरंतरं॥ केन नानाविधाः सौधास्त्यक्ताः शृंगविराजिताः॥ अरण्ये वसतिः कार्या
काशी०॥ केन कांतासमाक्रांता शय्यास्त्यक्ता मनोरमा॥ भस्मशय्यापरिग्राह्या काशी०॥ यस्य
विद्यते पुण्येन बहुजन्मार्जितेन हि॥ महेशानुग्रहे जाते काशीप्राप्तिर्भविष्यति॥ निरंतर कृताभ
क्तिर्येन मय्यनपायिनी॥ तेन काशी परं प्राप्या नान्येन शुभदर्शने॥ यस्य भक्तिर्दृढा नित्यं मय्य श्रीः॥
वाप्यभिचारिणी॥ तस्यैव काशी सुलभा नान्यस्य नखवर्णिनी॥ शिवक्षेत्रादरं येन बहुधा कृत ॥२१॥
मादरात्॥ तेनैव काशी संप्राप्या नान्येव कमलानने॥ त्रिपुंड्रधारणं येन कृतस्याद्विधिपूर्वकं

तेनैव०॥ कृतं येन सदा भक्त्या शिवक्षेत्रस्य मार्जनं॥ तेनैव काशी०॥ शिवपूजार्थमनिशं येन बि
ल्वार्जनं कृतं॥ तेनैव०॥ शिवस्थानानि येनैव कारितानि कृतानि च॥ तेनैव०॥ शिवभक्तैः सदा प्री
तिः कृता येन भविष्यति॥ तेनैव०॥ येन बिल्ववनं रम्यं सम्यक् कृतमनामये॥ तेनैव०॥ येन मूर्ध्नि
गले कर्णे रुद्राक्षाः सततं धृताः॥ तेनैव०॥ रुद्राभिषेकपानीयं येन पीतं सदा मुदा॥ तेनैव०॥ ये
न सांगं लिंगदानं कृतं स्याद्भक्तिपूर्वकं॥ तेनैव०॥ येन शैवाः शिवप्रीत्यै भोजिताः साधुसाधनैः॥
तेनैव०॥ येन पार्थिवलिंगानि पूजितान्यनिशं मुदा॥ तेनैव०॥ शैलाश्चूर्णयितुं शक्या मंदर
प्रमुखादृढाः॥ कदाचित्केन वित्तस्य काशीप्राप्तं न शक्यते॥ अत्यासः सर्वलोकानां शक्यते
कर्तुमेकदा॥ कदाचित्केन वित्तस्य काशीप्राप्तं न शक्यते॥ इंदुः कंदुकवत्कर्तुं शक्यते भा
नुमानपि॥ कदाचित्केन वि०॥ प्रज्वलद्वह्निमध्येपि शक्यते स्थातुमन्वहं॥ कदाचि०॥ बहु
धापि विधं द्रव्यं बहु दातुं च शक्यते॥ कदाचि०॥ पुरा कश्चिद्द्विजाधीशः शिवमूर्तिरितिष्व

शि०स्प ॥२२॥

सम्यक्श्रुतः॥ सर्ववेदार्थतत्वज्ञः सर्वशास्त्रविशारदः॥ नीतिमान्निपुणो मंत्री सर्वदा शिवपूजकः॥
पुराणश्रवणासक्तः काशीमाहात्म्यमुत्तमं॥ श्रोत्रानंदकरं रम्यं सुश्रावाघनाशकं॥ ततः स मन्मथा
कारो नवमन्मथनिंदकः॥ स्वोपार्जितगजाश्वादिधनधान्यादिकं स्वकं॥ रूपलावण्यसौंदर्यनवयौव
नदर्पितां॥ स्वभार्यां चावलोक्याय बभाषे वचनं मुदा॥ अयि भार्ये वरारोहे शृणु कर्णैकभूषणं॥ काशी
क्षेत्रस्य माहात्म्यं श्रुतमद्य मयाधुना॥ दिवि वान्यत्र वा लोके काशीस्थलसमं स्थलं॥ न दृष्टं न श्रुतं क्वा
पि नास्ति नैवेति कथा श्रुता॥ बहुजन्मतपःसाध्या काशीप्राप्तिः किलामला॥ अलभ्या किल सा काशी
विरिंचिप्रमुखैरपि॥ दुर्धर्षाः प्रबला वीरा नानाशास्त्रास्त्रपारगाः॥ विहृता स्यान्मदोन्मत्ताः श्री
काशीपालकाः किल॥ तादृशानां प्रसादेन विना काशी शिवात्मिका॥ न दृश्यते किलामर्त्यैर्मनु
जैर्दृश्यते कथं॥ विश्वेश्वराभिधं लिंगं ज्योतिरूपं सनातनं॥ वेदवेदांतसंवेद्यमेकमस्तीत्यपि श्रुतं
१०१॥ तल्लिंगदर्शनात्सद्यो मुच्यते किल पातकैः॥ तदेवाराध्यममलं मर्त्यैर्देवासुरैरपि॥ तद्विश्वे

श्री०॥ ॥२२॥

श्वरमुल्लंघ्य मनाद्यंतमनामयं॥ लिंगं द्रष्टुमनर्घं यत्नैर्नानाविधैरपि॥ विना तद्दर्शनं लोके मुक्ति
रत्यंतदुर्लभा॥ लिंगमूर्तिर्महादेवस्तदा कोणे तिष्ठति॥ ब्रह्मणापि न सा काशी लभ्यते किल सर्वथा॥
किमन्यैर्मादृशैर्मर्त्यैः किं कर्तव्यमतः परं॥ तपोभिर्विविधैर्दानैर्यथाविधि कृतैरपि॥ काशी न लभ्य
ते नूनं किं कर्तव्यमतः परं॥ नानाविधशिवक्षेत्रभ्रमणे नापि सर्वथा॥ न लभ्या किल सा काशी किं
कर्तव्यमतः परं॥ काशीप्राप्त्यर्थमुद्युक्तं पुमांसं विघ्नराशयः॥ तिष्ठंति किल संश्रित्य किं कर्तव्य
मतः परं॥ कश्चित्किलाग्निप्राकारः काश्यामंतेति दुःसहः॥ तत्तापतप्ता निकटे नायांति किल दे
वताः॥ धिग्जन्म किल मम धिग्भाग्यं धिक्कांतं नवयौवनं॥ सा काशी न मया प्राप्ता या मुक्तिफ
लदायिनी॥ धिगैश्वर्यं धिगौदार्यं धिङ्मे तद्वपुर्नवं॥ सा काशी न मया प्राप्ता या मुक्तिफलदा
यिनी॥ धिक्शोभां च धिगानत्यं धिगेतत्सुंदरं सुखं॥ सा काशी०॥ धिगेतच्चरणद्वंद्वं कोम
लं कमलामलं॥ सा काशी०॥ धिङ्नेत्रयुगलं धिग्धिङ्मे तत्करपल्लवं॥ सा काशी०॥ धि

शि॰ रह ॥२३॥ ज्ञानाविधात्लोर्थे कोशागारं मम मेन्नतं॥ साकाशी०॥ धिक्कातु यं जनस्तं धिस्नमैतत्कुलं ब
लं॥ साकाशी०॥ स्वादरं सा मयेपि संपूरयति सर्वदा॥ तच्छरीरान्मच्छरीरं नवरं नारमीदृ
शं॥ दुर्लभं मानुषं प्राप्य जन्मप्राप्यापि शर्मदं॥ हाहाहहा मया काशी न लब्धा किं करोम्यहं॥ किं
दुष्कृतं मया पूर्वं कृतं बहुविधं मुदा॥ हाहाहाहा मया काशी न लब्धा किं करोम्यहं॥ किं मस्वधार
णं सम्यक्कृ पुरा सूत मादरात्॥ किं हाहा०॥ किं पूर्वजन्मन्यनिशं रुद्राक्षा न धृता शुभाः॥ हाहा०
किं लिंगस्फोटनं पूर्वं कृतं दुःखेव कसाधनं॥ हाहा०॥ किं वा बिल्वदलैरीशो नाराधि बहुधा शिवः॥ श्रीः॥
हाहा०॥ किं वा शिवालयं भग्नं शिवप्रीतिकरं मुदा॥ हाहा०॥ किं गो कोटि सहस्राणि संहतानि पुरा ॥२३॥
मया॥ हाहा०॥ किं वा शैवः पुरा विप्रः शिवलिंग तनुर्हतः॥ हाहा०॥ किं वा बिल्ववनं रम्यं पुरा छिन्नं शि न
वप्रियं॥ हाहा०॥ किं वा बिल्वदलैरीशः मनाप्यर्चि शिवपुरा॥ हाहा०॥ एवं विलप्य बहुधा स विप्रो गिरि
× किं वा शिवान्वाररताः शैवा नाराधिताः पुरा॥ हाहा०॥ किं वा शिवक्षेत्रमध्ये पुरीषादि कृतं मया॥ हाहा०॥ ×
किं वा रुद्रजपेनेशो नाराधि गिरिजापतिः॥ हाहा॥ ४ ×

जतः॥ स्वसे वितथनं सर्वं शोकयः प्रददौ मुदा॥ ततः सर्वं परित्यज्य स्वभार्यः स्वार्जितं धनं॥ जगाम म
गहनं रम्यं सबिल्वतरुसंवृतं॥ तस्मिन्वने जिताहारः सभार्योपि जितेंद्रियः॥ तपस्तेपे महद्धोरं स
र्वभूतभयावहं॥ तेनैव कंपिता देवाः सर्वे ब्रह्मादयः सदा॥ चेलुश्च गिरयः सर्वे तनवश्याति कंपितः
क्षीराब्धिप्रमुखाश्चापि समुद्राः कंपिता तदा॥ वसुधापि चचालेयं सरत्का नन संवृता॥ एवं घोरतरं
विप्रस्तपः कर्तुं समारभेत॥ पूर्वपूर्व भवेषेवं तपस्तप्तमनेन हि॥ कोटिजन्मावधिप्रीत्या काशी
संप्राप्तये मुदा॥ तपो घोरतरं तीव्रमयं कृत्वैव तिष्ठति॥ ईदृशा बहवो देवा काशीप्राप्त्यर्थमेव
हि॥ तपो घोरतरं कृत्वा तिष्ठंति नियतेंद्रियः॥ पि काशीवाससिध्यै दृढं तानिय मासक्तचित्ता विवि
क्तदेशे संश्रित्य रम्ये शिवजनसहिते बिल्ववृक्षोपवीते॥ तिष्ठंत्यत्यंतहृष्टाधृतभसितकणा
विष्टदेहा मनोज्ञास्ते धन्याः सत्यमेतद्गिरिवरतनये सर्वथा सत्यमेव॥ १४०॥ ॥ इतिश्री
शिवरहस्ये सप्तमांशे शिवगौरीसंवादे काशीमाहात्म्ये तृतीयोध्यायः॥ ॥३॥ ॥छ॥

शिवउवाच॥ कथामन्यां प्रवक्ष्येहं शृणु सादरमंबिके॥ यत्कथाश्रवणादेव सद्यो मुच्येत पातकैः॥ शिव
स्थानान्यनेकानि संति कानपावनानने॥ तेषां संख्यामपास्य च कर्तुमेव न शक्यते॥ कदाचिच्छक्य
ते कर्तुं भूपांसुगणना भुवि॥ काशी शिवस्थान संख्या केन कार्या विशेषतः॥ लिंगोपर्यपि लिंगानि
विचित्रफलदानि च॥ तिलांशस्यापि सूक्ष्मस्य सावकाशा तया स्थितिः॥ न दृश्यते मया काश्यं
लिंगसंमर्दतः शुभे॥ मम दिव्या तनुः काशी सर्वा यद्यपि सर्वथा॥ तथाप्यंतर्गृहाकारा मम
चास्त्यनुत्तमा॥ अंतर्गृहस्य प्राकार काशी रमणि रंजितः॥ सेवदानीमपि स्पष्टं जवेनोर्ध्वप्र
याति हि॥ तन्मूलमंतर्भागो वा नेक्ष्यते नापि दृश्यते॥ तत्प्राकारप्रभापूरैर्दिशः सर्वा विभूषि
ताः॥ नानाविधानेक दिव्य रत्नराजि विराजितं॥ तदंतर्गृहरम्यं मम प्रियतरं वरं॥ तस्मि
न्नंतर्गृहे रम्ये निवसाम्यनिशं शुभे॥ न तत्र वसतिर्नित्यं ब्रह्मादीनामपि स्फुटं॥ गंधर्वाणां मनु
ष्याणां मुनीनामपि किं पुनः॥ रागद्वेषादि विलयापतस्ते दुष्टविग्रहाः॥ सर्वथांतर्गृहे वासो

न कर्तव्यः शरीरिभिः॥ यतो मूत्रपुरीषादि निरोद्धुं तैर्न शक्यते॥ प्रमादाद्यदि वा मोहान्मूत्रोत्सर्गं करोति
यः॥ अंतर्गृहे स पापिष्ठो घोरां प्राप्नोति यातनां॥ किंचित् कुलजाः स्वस्वधर्मेणोत्तमलोकगाः॥ नी
यंते नरकं घोरं सर्वेपि यमकिंकरैः॥ नरकेषु तिघोरेषु पच्यमाना दिवानिशं॥ तिष्ठंति पुनरावृ
त्ति दुर्लभे नरकालये॥ दुःसहं कैश्चिद् निघ्नंताडयंते कैश्चिदुद्भटैः॥ खाद्यंते तप्तशूलाग्रे निपात्यं
ते मुहुर्मुहुः॥ संतप्तवालुकामध्ये भर्ज्यंते निर्भयं भटैः॥ ततस्तप्तायसंपिंडैर्निपीड्यंते दुरासदैः॥
पुनस्तप्तशिलाग्रेषु निपात्यंते भटैर्मुदा॥ संतप्ततैलमध्येपि निक्षिप्यंते पुनः पुनः॥ पुनः संतप्तरु
धिरं पापयंत्यसिर्मासाहताः॥ तत्र मूत्रं पाययंति बहुधी तीव्रमुद्गताः॥ तप्तशूलप्रोथपित्वा भ्रामयं
ति मुहुर्मुहुः॥ ईदृशान्यतिघोराणि भुंजते नरकाणि ते॥ पुराकश्चिद्द्विजवरो वेदवेदांगपारगः॥
पूर्वार्जितैर्भूरिपुण्यैः काशी संप्राप्य संस्थितः॥ अंतर्गृहाद्बहिर्देशे स्थित्वा नियममाश्रितः॥
कृत्वा दानान्यनेकानि तपः कृत्वातिदुःसहं॥ जलमात्राशनो नित्यं नियतो नियतेंद्रियः॥ प्रद

क्षिणत्रयं कुर्वन्नित्यमंतर्गृहस्य सः॥ प्रत्यहं बिल्वपत्रैर्भो लिंगरूपिणमर्चयन्॥ वर्षाणामयुतं तस्थौ ज्व
लदग्निरिवानिशं॥ ततः कदाचिन्मोहेन नियतोपि द्विजोत्तमः॥ एकांतं तर्गृहे शैवं मूत्रोत्स
र्गमुपाचरत्॥ ततः स निलयं प्राप्य स्वकीयं द्विजपुंगवः॥ अंतर्गृहे कृतं स्वेन मूत्रोत्सर्गं स्मर
न्मुहुः॥ रुरोदोच्चैः स्वकं देहं स्वयमेवाभिताडयन्॥ भूमौ पतित्वा विलुलं शिरः संताडयन्मु
हुः॥ तत्पर्णशालानिकटवासिनोन्ये मुनीश्वराः॥ श्रुत्वा तद्रोदनं सर्वे किमासीदिति चोचि
रे॥ पृष्टस्तैः स रुदन्नुच्चैर्नैरकावाससाधनं॥ स्वकृतं पापजं कर्म तेभ्यः सम्यङ्न्यवेदयत्॥
ततस्ते श्रुतितत्वज्ञाः॥ श्रुत्वा वाचमरं तदा॥ हाहा हाहेति रुरुदुर्निभृतं ताडिता इव॥ ततः स
विनयान्नत्वा तानेवर्षिसत्तमान्॥ प्रायश्चित्तं यथा वैहं स्वकृताघोघनाशकं॥ ते वेदा
न्विलोक्य सम्यग्लोकोऽथापि पुनः पुनः॥ तत्पापनाशकं सम्यक्प्रायश्चित्तं न संजगुः॥ रवि
प्रडुर्मे तेदुष्टमहापापं त्वया कृतं॥ नवास्य निष्कृतिर्दृष्टा सर्ववेदेषु सर्वथा॥ बहुकालं तपः

कृत्वाधर्मोयः साधितस्त्वया॥ सोपि नष्टः क्षणेनैव तत्पापेन बलेन हि॥ येप्यधर्मास्त्वया सम्य
क्साधिताः पूर्वमादरात्॥ तेपि दुःखार्जिता धर्मा नष्टा एव न संशयः॥ नास्त्येव शरणं लोके
नवद्दृक्पापकारिणां॥ यामी यत्किंकराः सर्वे नृसंकुर्वंति साहसा॥ पुरा ये तर्जिताः सम्यक्त्वया
ते यमकिंकराः॥ नृसंत्यतीव संतुष्टाः शूलमुद्गरपाणयः॥ बहुक्लेशार्जितो धर्मः क्षणेनैव क्षयं ग
तः॥ दुरदृष्टस्य माहात्म्यमिदमेव हि दृश्यते॥ असंतं दुर्लभो विप्र काशीवासो न संशयः॥ मनुष्यदेहमासा
द्य काश्यां स्थातुं न शक्यते॥ अतिधर्मेण चेन्नित्यं काशीवासो भविष्यति॥ कदा कदाचिन्नि श्रेयो भवत्से
व मुदावहं॥ कथं शिवं प्रयास्यामो निर्विघ्नेनाक्षिरंपरां॥ शांतं प्रसन्नमनघं कदा वाक्षयधर्मतः॥ कथम
स्माभिरप्यत्र काश्यां स्थातुं हि शक्यते॥ पातकानि बहून्येव संभविष्यंति सर्वथा॥ बहुपुण्यार्जिता
काशी कथं त्याज्या मनीषिभिः॥ काश्यां शास्त्रार्थमेवाद्य तपः कृतमनेकधा॥ देहपातः कदा वा चाभ
विष्यति तपोबलात्॥ शिवमेव प्रयास्यामः काशीवासजधर्मतः॥ पुनरावृत्तिरहितं दुःखमात्र विव

शि०स्य ॥२६॥

जितं॥ सा च रूपं कदा काश्यां मरणात्प्राप्य मां द्रक्ष्यति॥ बहुपुण्यैरियं काशी लब्धातीव मिदं वपुः॥ न
रहा विक्रयेशीत्या मुक्तिदा भक्तवत्सला॥ इति तद्वचनं श्रुत्वा बभाषे तान्यथा द्विजः॥ पापं मया कृतं दु
ष्टमस्य नास्ति वनिष्कृतिः॥ इतः परं मया कार्यं पापशांतिकरं नहि॥ पापिष्ठेन कृतं कर्म फलदं वा भ
विष्यति॥ अनेनैव हि पापेन तत्तत्कर्म समुद्भवं॥ विनश्यति फलं नूनं पुण्यस्य द्विन सर्वथा॥ किं वा
स्मत्कुलजाः केचिदूर्ध्वलोकगताः पुरा॥ मत्पापेनैव ते सर्वे यास्यंति नरकं ध्रुवं॥ अहमेव न नष्टोऽस्मि
तेऽपि सर्वे विनाशिताः॥ कृतं तत्स्वकृतं मे किं कर्तव्यमतः परं॥ नरकाण्यति घोराणि भोक्तव्या
नि कथं मया॥ पितृभिश्चानुभोक्तव्यानि द्रष्टव्यानि कथं सदा॥ एवं विलप्य बहुधा कालेन समृ
तो द्विजः॥ काश्यामेव महादेवी दुःखितो व्याधिपीडितः॥ ततो यमभटाः सर्वे प्रणम्य यममुद्धतं
कृतांजलिपुटा भूत्वा वचः प्रोचुर्मदोद्धताः॥ यमभटा उवाच॥ यम कश्चिद्द्विजः काश्यां मृत
पापात्मनां वरः॥ तेनैवात गृहे पूर्वं मूत्रोत्सर्गः कृतोऽपि हि॥ तद्द्राजाः पूर्वमेव स्वर्गलोकनिवा

श्रीः॥ ॥२६॥

सिनः॥ आनिता नरके घोरे पातिता स्त्वत्र शासनात्॥ पश्यंते ते सदा घोरे नरके यमकिंकरैः॥ सकृमस्राभिरा
नेयो नवा शासय शासक॥ यम उवाच॥ रे रे काश्यां मृतो जंतुर्बहुपापाश्रयोपि सन्॥ न याम्यं लोकमाप्नो
ति सत्यमेवोक्तमेव मया॥ श्रीकालभैरवः काश्यां मृतान्पापरतान्जनान्॥ अघोरयातनाशास्ति स्व
भटेभ्यः प्रयच्छति॥ भवतां गमनं काश्यां व्यर्थमेव भविष्यति॥ दुर्धर्षाः प्रबला वीराः कालभैरवकिंक
राः॥ नानाविधानेकरूपा यातनाकारिणः सदा॥ तरक्षुमर्दाः सम्यक् ताडयिष्यंति तं द्विजं॥ सोढुं
न शक्यते लोके कालभैरवयातनां॥ तथा तनावीक्षणं च दुःसहं दुःखदायकं॥ क्षणेन जायते तत्र य
तनाया दशाभटाः॥ तादृशी भूपसाम्यत्र कालेन न भविष्यति॥ एकैकोपि यः कशाघातः स सोढुं के
न शक्यते॥ तादृशो हि कशाघातः केन कर्तुं च शक्यते॥ कथं वंतः कथं काश्यां कथं वा काश्यां मृतो
जनः॥ समागः सर्वथा त्याज्यो भवद्भिर्दुर्वहैर्भटाः॥ काशीभिन्नप्रदेशेषु ये मृताः पापिनो जनाः
भवद्भिस्ते समानेया स्ताडनीयाः प्रयत्नतः॥ इत्थं यमवचः श्रुत्वा ते सर्वे यमकिंकराः॥ तद्द्राजा

न्याचयंते नरकेषु सदाखिताः॥ सोपि द्विजः कदा काश्यां कालभैरवकिंकरैः॥ ताड्यमानः स्वकं पापं
भुक्त्वा तिष्ठत्यहर्निशं॥ पापं कृत्वा मृतो यस्तु काश्यां जंतुर्भविष्यति॥ स कालभैरवेणैव शिक्षितो भवति
ध्रुवं॥ अल्पं चापि कृतं काश्यां पातकं बहु जायते॥ पुण्यमप्येवमेवात्र जायते वरवर्णिनि॥ काश्यां कृ
तानि पापानि न नश्यंति कदाचन॥ अणुमात्रं च तत्पापं मेरुतुल्यं भविष्यति॥ पुण्यं पुराकृतं काश्यं
पापेनैकेन पश्यंति॥ न चत्पापं तद्वत्पुण्यं वर्धते बहुधा शुभे॥ दुर्लभा सर्वथा काशी काश्यां वासोति
दुर्लभः॥ दुर्लभं मरणं काश्यां काश्यां धर्मोति दुर्लभः॥ काश्यां धर्मार्थमुद्युक्तं पुरुषं विघ्नराशयः
समाश्रित्याखिलं धर्मं नाशयंति मुहुर्मुहुः॥ प्रतिक्षणं प्रतिपदं विघ्नसंघा दुरासदाः॥ धर्मोद्यु
क्तमतिं मर्त्यं नाशयंत्येव सर्वथा॥ श्रीपार्वत्युवाच॥ महादेवैवमनिशं विघ्नोपद्रुतमानसः॥ क
थं काशीनिवासार्थमुद्योगं कर्तुमिच्छति॥ एवमुक्तप्रकारेण भुवि कस्यापि सर्वथा॥ न भविष्यति
विश्वेश काशीवासोतिदुर्लभः॥ कीदृशः पुरुषो योग्यः काश्यां स्थातुं पुरांतक॥ कथं स्थातव्य

मनिशं वद सर्वविशेषतः॥ शिव०॥ शृणु गौरि वरारोहे यथावत्त्वं वदाम्यहं॥ काशीवासाय योग्यो
हि पुरुषो विजितेंद्रियः॥ निष्कल्मषो नीतियुक्तो नियतो निर्गतस्पृहः॥ जीर्णवल्कलवीतांगः पंडुप
र्णाशनप्रियः॥ दमयुक्तः शांतियुक्तो निरीहो निर्गतस्पृहः॥ अष्टांगयोगनिरतो मौनव्रतपरायणः
विभूतिभूषणो नित्यं त्रिपुंड्रांकितमस्तकः॥ रुद्राक्षमालावीतो गोलिंगपूजापरायणः॥ तुल्यनिं
दास्तुतिर्धीरस्तुल्यमानापमानयोः॥ रागद्वेषादिरहितो विरक्तो विगतत्रपः॥ पंचाग्निसेवानिरतो
नित्ययात्रापरो निशं॥ नित्यांतर्गृहयात्रायां निरतो दृढविग्रहः॥ पंचाक्षरजपासक्तः पक्षेपक्षे यथा
विधिः॥ पंचक्रोशस्य यात्रायां नियतः सत्यमानसः॥ सत्यव्रतः सत्यपरो नित्यं मत्पूजने रतः॥ मद्भ
क्तजनसंसेवी मल्लिंगेकार्चनप्रियः॥ शैवशास्त्ररतो नित्यं शैवव्रतरतः सदा॥ काशीवासाय मु
ख्योयं मध्यमोप्युच्यते जनः॥ असंचिताष्टपन्नीवारकणभोजनः॥ यथोक्तयात्रानिरतः
सर्वसंगविवर्जितः॥ निर्ममो निरहंकारस्त्यक्तबंधुनिराकुलः॥ सर्वदा धूपदीपाद्यैर्मल्लिंगार्च

शि०स०
॥२५॥

न तत्परः॥ वीतरागो गतस्नेहः पुत्रस्नेहादिवर्जितः॥ वेदांतश्रवणासक्तो वेदाध्ययनतत्परः॥ यदृ
च्छालाभसंतुष्टः प्रतिग्रहपराङ्मुखः॥ मित्रे पुत्रे च शत्रौ च समदृष्टिरलोलुपः॥ विभूतिधारणपरो रु
द्राक्षाभरणः सदा॥ रुद्राध्यायजपासक्तः पंचाक्षरपरायणः॥ शिवभक्त्या च निरतः सर्वदा शिवचिं
तकः॥ अनन्यशरणो नित्यं सदाराधनतत्परः॥ कालभैरवपूजायां नियतः प्रतिवासरं॥ इतोन्ये
मनुजाः काश्यां तिष्ठंतोपि नराधमाः॥ काशीवाससमुत्पन्नाधर्मभाजो न सर्वथा॥ प्रसुता
स्याश्रिताः काश्यां पापमेवार्जयंति ते॥ तदन्यैर्मनुजैः काश्यां न स्थातव्यं कदाचन॥ तदैवारा
त्महत्यैव क्रियते स्थितैर्यदि॥ मदुक्तकर्महीनैस्तु काश्यां नस्थेयमेव हि॥ काश्यां प्रतिग्रहो नैव कर्तव्यः
सर्वथा जनैः॥ यदि मोहात्प्रमादाद्वा करोति स पतत्यधः॥ जीर्णं वा पांडुपर्णानि भक्षयित्वा यथोचि
तं॥ स्थातव्यमनिशं काश्यां मुक्तिकामेन नो त्यजेत्॥ ततद्दिनार्जितैः स्वल्पैर्नीवारैर्वा स्वकं वपुः
पोषणीयं नित्यं वा शिवध्यानपरायणैः॥ दिनांतरशनार्थाय संग्रहः सर्वथा जनैः॥ न कर्त

श्री॥
॥२५॥

व्यो न कर्तव्यः काश्यां प्रयतमानसैः॥ काश्यां प्रतिग्रहासक्तैर्धनसंग्रहतत्परैः॥ स्थितं तैर्यातना
घोरा भोक्तव्या नात्र संशयः॥ दुष्प्रतिग्रहसंसक्तैर्दुरन्नाशनलोलुपैः॥ अन्यायार्जितवित्तैश्च काश्यां
न स्थेयमंबिके॥ असत्यवादिभिर्दुष्टैर्विषयासक्तमानसैः॥ शिवाचारविहीनैश्च काश्यां न स्थेयमंबि
के॥ मदन्यपूजनासक्तैर्मदन्यालोकमुत्सुकैः॥ मदन्याश्रयवित्तैश्च काश्यां न स्थेयमंबिके॥ पुत्रस्ने
हरतैर्लुब्धैर्धीवरैः पिशुनैर्जडैः॥ स्वदेहपोषणासक्तैः काश्यां न स्थेयमंबिके॥ शिवद्वेषरतैर्मूढैः स्वप
क्षैः शैवनिंदकैः॥ भिक्षाविहीनैश्च काश्यां०॥ परस्त्रीनिरतैर्नष्टैः शैववस्त्रविनिंदकैः शैवदुः
खकरैः क्रूरैः काश्यां०॥ भस्मोद्धूलनरुद्राक्षैर्जपहीनैर्नराधमैः॥ लिंगपूजाविहीनैश्च काश्यां न स्थे
यमंबिके॥ रागद्वेषाक्रांतचित्तैर्मदनाक्रांतविग्रहैः॥ राजसैस्तामसैः शून्यैः काश्यां०॥ ईदृशैः पापनिर
तैः स्थित्वा काश्यां यथेच्छया॥ देहांते यातनाः क्रूराः प्राप्तव्याः सत्यमुच्यते॥ पापभीरुभिरस्पृष्टैः शैवरूप
स्त्रविशारदैः॥ लिंगपूजारतैः शैवैः काश्यां०॥ शुद्धत्रिपुंड्रनिटिलैर्भस्मोद्धूलनतत्परैः॥ शिवैकदैवतैः

शि०रह
॥२९॥

शैवैः कार्यं पा० ॥ शिवदीक्षापरैः शिष्टैः पंचाक्षरपरायणैः ॥ मन्त्रराजजपैः शैवैः कार्यं पा० ॥ रुद्राध्या
यजपासक्तैः शिववीक्षणतत्परैः ॥ निष्कल्मषैः परैः शैवैः कार्यं पा० ॥ रुद्राक्षमालाभरणैर्जटामंडलमं
डितैः ॥ शिवध्यानरतैः शैवैः कार्यं पा० ॥ जितेंद्रियैर्जिताहारैर्जीर्णचीर्णांबुभक्षणैः ॥ कलत्रपुत्रमित्रे
ष्ट स्नेहहीनैरनाकुलैः ॥ शिवभक्तिरतैः शैवैः कार्यं पा० ॥ नित्यमत्पूजनासक्तैर्मद्भक्तजनसेवकैः ॥
दृष्टांतःकरणैः शैवैः कार्यं पा० ॥ अंतर्गृहादियात्राकं नित्यमुद्युक्तमानसैः ॥ तत्तत्त्वचिंतकैः शैवैः
कार्यं पा० ॥ असूत्तुकैरनिर्विण्णैः प्रतिग्रहपराङ्मुखैः ॥ वशीकृतेंद्रियैः शैवैः कार्यं पा० स्नातव्यमं
बिके ॥ हा हर परमेशानेदं देशांभो शिव शिव करुणाब्धे शंकराशेषहेतो ॥ भव भव भव हारिन्दे
वदेवेति नित्यं शिवनगरनिवासा सक्तचित्ता वदंति ॥ १२६ ॥ ॥ इति श्रीशिवरहस्ये सप्त
मांशे शिवगौरीसंवादे काशीमाहात्म्ये चतुर्थोध्यायः ॥ ४ ॥ ॥ पार्वत्युवाच ॥ महेशाखि
लदेवेश काशीवासरतैर्नरैः ॥ प्रत्यहं नियतं कार्यं किं कर्तव्यं वदप्रभो ॥ शिव उवाच ॥ कमलामल

श्रीः॥
॥२९॥

पत्राक्षि शृणु शैलसुते मले ॥ वक्ष्ये सात्यहितं कर्म काशीवासस्य चेतसां ॥ अरुणोदयवेलायामुत्था
य प्रत्यहं शुभे ॥ पंचक्रोशाद्बहिर्दूरं गंतव्यं नियतेंद्रियैः ॥ विलोक्य निर्जनं देशमुत्थां तृणवर्जितं ॥ तृ
णैराच्छाद्य तं देशं मृद्रमाहृत्य नूतनां ॥ तीर्थान्यजलमाहृत्य सहस्तात्रं प्रपूरयेत् ॥ कर्णस्थब्रह्मसूत्रः स
न् दक्षिणामुखमास्थितः ॥ कुर्यान्मूत्रपुरीषे च ततोन्यत्रोपसंविशेत् ॥ मृदं चैव विभज्याथ भाग
मेकं च गृह्य वा ॥ स्थूलामलकमानेन गृहीत्वा मृदमादरात् ॥ शौचं कार्यं प्रयत्नेन गंधलेपक्षयावु
धि ॥ करशौचं ततः कृत्वा पादशौचं निवर्तते ॥ अप्रमादेन मौनेन त्यक्त्वान्यालापनं तदा ॥ पूर्वस्था
पितमृद्भागद्वयेनैव यथाविधि ॥ अन्यां वा मृदमानीय मरुद्देशस्थितां शुचिः ॥ अपाने पंचधा
हस्ते दशधा तेन रद्वये ॥ सप्तका पादयोरेकां लेपे तिस्रः करे त्रिधा ॥ एवं गृहस्थैः कर्तव्यं द्विगुणं
ब्रह्मचारिणा ॥ त्रिगुणं वनवासेस्तु यतिभिस्तु चतुर्गुणं ॥ एतद्दशगुणं कार्यं महापाशुपतैर्वरैः ॥
ततश्चतुर्गुणं कार्यं महाशैवैः शिवार्चकैः ॥ ततो द्वादशगंडूषैः कुर्याद्वक्त्रस्य शोधनं ॥ एकैकगु

शि०स्य
३०

णवृद्धैव मात्रैव मिदमादरात्॥ कर्त्तव्यं नियतैर्नित्यं शौचं पापापनोदकं॥ नो चेदप्येतते कर्म
ण्यधिकारो न विद्यते॥ ततः खदिरकाष्ठाद्यैर्दंतधावनमाचरेत्॥ पुनः प्रक्षाल्य वदनं प्रविशेत्स्वा
लयं गृहं॥ तत्र शुद्धासनासीनः शिवमद्वयमव्ययं॥ चिंतयित्वा ततो गच्छेत्स्नानायाहितमान
सः॥ शिवलिंगप्रांतदेशे विलसद्विमले जले॥ सर्वपापहरे शुद्धे स्नानं कार्यं विधानतः॥ ती
र्थे द्वादशधा कार्यं मज्जनं पापनाशकं॥ रुद्रसूक्तैर्मार्जनं च ततः कार्यं प्रयत्नतः॥ ततस्तीर्थ
जले सम्यङ् मज्जनियतेंद्रियैः॥ स्मर्तव्यः शंकरः साक्षादहमेव जगत्प्रभुः॥ तर्पणीयास्ततः
सम्यग्देवर्षिपितृदेवताः॥ परिधानं च कर्तव्यं ततश्चाहतवाससा॥ ततः सम्यक्कुशासीनः ॥श्री:॥
कुर्यादुद्धूलनं क्रमात्॥ आपादमस्तकं शुद्धभसितार्धैर्नैव भस्मना॥ वामहस्ते विनिक्षिप्य भ ॥३०॥
स्म संप्रोक्ष्य चोदकैः॥ सद्योजातादिमंत्रैस्तु ततः समभिमंत्रयेत्॥ ततो मूर्ध्नि ललाटे च क
र्णे कंठे च वक्षसि॥ नाभौ च सेबाहुमूले प्रकोष्ठमणिबंधके॥ बाहुपार्श्वे पृष्ठदेशे नेत्रयो

र्गंडमंडले॥ कुर्यात्त्रयं ततः सम्यक् त्रिपुंड्रं भस्मना शुचिः॥ रुद्राक्षधारणं सम्यक् कार्यं यथाविधि ततः क्र
मात्॥ ततश्च स्वस्वशाखोक्तसंध्या कार्या प्रयत्नतः॥ ततो हुत्वाग्निरूपमथ्यवाज्यादिसाधनैः॥ ततो म
ल्लिंगमभ्यर्च्य पूजनीयं यथाविधि॥ ततो विश्वेश्वरं नत्वा मामेव सुरपुंगवं॥ पूजां कृत्वा विधानेन प्रण
म्य च पुनःपुनः॥ ततश्च नित्ययात्रार्थं कुर्यादुद्योगमादरात्॥ नियतेन स्वार्जितेन गंधपुष्पाक्ष
तादिना॥ आदौ नियममास्थाय दंडपाणिं यथाविधि॥ धूपदीपादिभिः सम्यगर्चयित्वा प्रणम्य च
ध्यात्वा सम्यग्यथाशास्त्रं दंडपाणिं गणेश्वरं॥ कृतांजलिपुटो भूत्वा ततो मंत्रमिमं पठेत्॥ नित्य
यात्रां करिष्यामि दंडपाणे प्रसीद मे॥ करुणाकर सर्वज्ञ सुरासुरनमस्कृत॥ ज्ञानवाप्यां महेशो
त्तमुद्युक्तोस्म्यघशांतये॥ आज्ञां देहि कृपासिंधो शिवभक्तैकजीवन॥ इति संप्रार्थ्य नत्वा च दंडपा
णिं तदाज्ञया॥ यथाविधि ततः स्नानं ज्ञानवाप्यां समाचरेत्॥ ततश्चोद्धूलनं कृत्वा त्रिपुंड्रं च ततः
परं॥ रुद्राक्षधारणं कृत्वा शिवध्यानपरायणः॥ ज्ञानेश्वराभिधं लिंगं सर्वेष्टफलदायकं॥ प्रण

शि०स्य
॥३१॥

म्य प्रार्थयेद्देवं प्रसीदेति पुनः पुनः॥ ततश्च बिल्वपत्राद्यैः समभ्यर्च्य यथाविधि॥ तदाहूयात तत
सम्पूज्य त्वाप च विनायकान्॥ दधिदूर्वादिभिः सम्यगर्चयित्वा यथाविधि॥ तदाहूय ढुंढिराज
मर्चयेन्नित्यमादरात्॥ गंधपुष्पाक्षतैः शुद्धैर्बिल्वपत्रैर्मनोहरैः॥ दूर्वांकुरैर्यथायोग्यं नैवेद्यैश्च प्र
पूजयेत्॥ प्रदक्षिणादिकं कृत्वा ढुंढिं शांतं प्रणम्य च॥ तदाज्ञां समवाप्याथ पुनर्नत्वा गणेश्वरं॥ ततो
मत्पूजनार्थाय पूजाद्रव्यं नवं शुभं॥ गृहीत्वा नियमेनैव मुक्तिमंडपमाश्रयेत्॥ कृतांजलिपुटस्तत्र
पठेन्मंत्रममुं ततः॥ पुनः पुनः प्रणम्येशं मामेवानंतमव्ययं॥ शिवानंत महादेव सोम सोमार्धशेख
रव॥ यथाशक्ति मया पूजा क्रियते भक्तवत्सल॥ इति संप्रार्थ्य मामेवं ततो नंदीशमर्चयेत्॥ श्रीः॥
ततोऽभ्यर्च्य यथायोगं द्वारपालानपि क्रमात्॥ ततो मामजरं नित्यं सर्वज्ञं सर्वतोमुखं॥ लिंगरू ॥३१॥
पिणमीशानं ध्यात्वा सर्वोत्तमं शिवं॥ शुद्धस्तीर्थोदकैः सम्यगभिषिच्य यथाविधि॥ नमकं च
मकं चैव पठन्नन्यान्मनूनपि॥ ततश्च गंधपुष्पाद्यैर्बिल्वपत्रैर्मनोहरैः॥ धूपदीपैरनेकैश्च नैवेद्यै

र्चयेच्छिवं॥ प्रदक्षिणनमस्कारान्नृत्यैश्च करताडनैः॥ नानाविधस्तोत्रपाठैर्मामाराध्य यथावि
धि॥ उपविश्य ततः शुद्धे निर्मले मुक्तिमंडपे॥ स्वहृत्कमलमध्यस्थं चिंतयित्वा सदाशिवं॥
पंचाक्षरजपं कुर्याद्यथायोग्यं यथाक्रमं॥ ततः परं पुनर्नत्वा पुनः संपूज्य मां विभुं॥ अंतर्गृह
स्य यात्रार्थं कुर्यात्संकल्पमादरात्॥ ततः षष्टिसहस्रेष्टगणनाथान्प्रपूजयेत्॥ अष्टा
शीतिसहस्रेष्टभैरवांश्च ततः परं॥ ततः कोटिमहादुर्गाः पूजनीयाः प्रयत्नतः॥ ततः
पुनर्ज्ञानवाप्यां स्नानं कृत्वा विधानतः॥ ततोंतर्गृहयात्रापि कर्त्तव्या विधिपूर्वकं॥ स्वश
क्त्या संप्रसाध्यैव तानंतर्गृहरक्षकान्॥ अंतर्गृहस्थलिंगानि संपूज्याथ स्वशक्तितः॥ अंत
र्गृहस्थतीर्थेषु स्नानं कार्यं यथाविधि॥ तर्पणानि च पितरो नित्यं पात्रपरैः शुभैः॥ पुनः
स्नानं यथायोग्यं ज्ञानवाप्यां समाचरेत्॥ ततो ममांतिकं गत्वा मामाराध्य यथाविधि
यात्रां निवेद्य स्वकृतां मह्यमेव प्रणम्य मां॥ पुराणवाचनैर्मंत्रैः स्तोत्रैराराध्य मामजं॥

शि॰स्व
॥३२॥

विश्रम्याथ यथा योग्यं विमले मुक्तिमंडपे ॥ विश्वेश्वरार्चनायागंतव्यं च ततः परं ॥ वीरेश्व
र समीपस्थे वीरतीर्थे पुनः शुभे ॥ स्नानं कृत्वा प्रयत्नेन भक्तिपूर्वकमादरात् ॥ ततो विश्वेश्वरं
सम्यक्पूजयित्वा यथाविधि ॥ तदाज्ञां समवाप्याथ गच्छेत्पशुपतीश्वरं ॥ तत्र पाशुपते कुंडे पुनः
स्नात्वा यथाविधि ॥ भस्मनाविलिप्तैश्च यजेत्पशुपतीश्वरं ॥ उपहारैरनेकैश्च नृत्यगीतैर
तिप्रियैः ॥ समभ्यर्च्य ततो गच्छेत्संप्रार्थ्येशं तदाज्ञया ॥ ईशामभ्यर्च्य तदनु गच्छेच्छ्रीकालभैर
वं ॥ स्नात्वा च भैरवे तीर्थे यातनादुःखनाशके ॥ श्रीकालभैरवं सम्यगर्चयेद्विधिपूर्वकं ॥
धूपदीपोपहारैश्च पुष्पैर्नानाविधैरपि ॥ प्रदक्षिणनमस्कारैर्नृत्यगीतैरनेकधा ॥ नानावि ॥श्री॰॥
धोपचारैश्च पूजयेत्कालभैरवं ॥ ततस्तदाज्ञया गच्छेद्वक्रतुंडविनायकं ॥ तद्वक्रतुंडतीर्थे ॥३२॥
पि स्नात्वा विघ्नविनाशके ॥ दूर्वांकुरादिभिः सम्यगर्चयित्वा विनायकं ॥ वक्रतुंडप्रसा
द्यैव तदाज्ञां समवाप्य च ॥ आग्नीध्रेश्वरपूजार्थं गच्छेन्नियमपूर्वकं ॥ तत्रापि हि वगंगायां

स्नानं कृत्वा विधानतः ॥ शिवगंगोदकैः शुद्धैः संतर्प्य स्वपितॄंस्ततः ॥ आग्नीध्रेशं ततः सम्यक्पूजयेद्वि
ष्टदायकं ॥ पुनर्मां सम्यगाराध्य ततश्च मदनुज्ञया ॥ अन्नपूर्णापूजनार्थं गच्छेद्धर्मप्रसूस्व ॥ अन्नपू
र्णा मन्नदात्री मम वार्धांगभागिनी ॥ सर्वसौभाग्यदा नित्यं स्वाभीष्टफलदायिनी ॥ गंधैः पुष्पैस्त
था धूपैर्दीपैश्च विविधैः फलैः ॥ नैवेद्यैरर्चयेन्नित्यं नानापूजोपहारकैः ॥ प्रदक्षिणनमस्कारैरर्चयित्वा
प्रसाद्य च ॥ ततो निजालयं गत्वा पुनरभ्यर्च्य शंकरं ॥ पंचयज्ञादिकं कृत्वा ततः संपूज्य चातिथीन् ॥
प्रणम्य स्वगुरून्वृद्धानन्यान्श्रेयोत्तमानपि ॥ पत्रं फलं नीरमन्नमन्यद्वा यद्विमार्जितं ॥ मह्यं नि
वेद्य तदनु भोक्तव्यं स्वस्थमानसैः ॥ यद्यद्यदा यदा प्राप्तं पत्रं वा फलमेव वा ॥ तत्तन्मह्यं निवेद्यैव
भोक्तव्यं स्वस्थमानसैः ॥ क्वचित्फलादिकं भक्ष्यं बहु चेत्प्राप्यते तदा ॥ तद्दिनाशनमात्रं हि गृहीत्वा
न्यद्विसर्जयेत् ॥ कदाचिद्यदि न प्राप्तं कंदमूलफलादिकं ॥ तदा तु जलमन्यद्वा गृहीत्वा संवसे
दृढं ॥ स्वस्यादृष्टानुरोधेन प्राप्यते यद्यदा यदा ॥ तदल्पमस्तु बहु वा तुष्टस्तेन भवेत्सदा ॥ यदा त्व
ल्पात्तु

शि०स्य
॥३३॥

प्यते भक्ष्यं तदा दुःसखी न संवसेत्॥ दुःखेन तपसा नाशो भविष्यति न संशयः॥ सुखार्थं कामभोगा
र्थं कार्यो न स्तूयते जनैः॥ किंतु मोक्षार्थमेवात्र स्तूयते मोक्षकांक्षिभिः॥ पूर्वं मुक्त्यर्थिनः सर्वे निरा
हारा जितेंद्रियाः॥ शैवा स्तत्राः स्थिता स्ते तु मत्स्वरूपमुपागताः॥ इदं प्रात्याहिकं कर्म कार्यं दासर
तैः सदा॥ कर्त्तव्यमतियत्नेन यातनाभीरुभिः शुभे॥ अतीक्रूरं रूपाहीनं मत्वा श्रीकालभैरवं॥ इदं
प्रात्यहिकं कर्म कार्यं कर्तव्यमादरात्॥ उक्तं प्रात्यहिकं कर्म त्यक्त्वा यदिवसेन्नरः॥ स सर्वयातनाभो
क्ता भवत्येव न संशयः॥ आचंद्रार्कं महाघोरे नरके वसतिर्दरो॥ सा सोढुं शक्यते नैव क्षणं भैरवयात
ना॥ कोपदावाग्निना दग्धान् क्षणादेव हि भैरवः॥ करोति कार्यपापिष्ठान् दयामात्रविव
र्जितः॥ कालभैरवपर्यंतं क्व समायांति पापिनः॥ तद्दूतैरेव नीयंते पापिष्ठा यातनाश्रयाः
कालभैरवभक्तानां संरक्षा कर्तुं न शक्यते॥ महाघोरा मदोन्मत्ता दुर्धर्षा स्त्रिदशैरपि॥ क
दाचिद्घृणिकाः संति पांसुसेकृततारकाः॥ कालभैरवदूतास्तु न संरक्ष्या हि सर्वथा॥ का

तत्व
श्रीः॥
॥३३॥

र्यं पापात्मर्त्ये कालभैरवकिंकराः॥ गृहीत्वा यांति दुर्धर्षास्तमविज्ञाप्य भैरवं॥ नीत्वा हसंतो गा
यंतः पापिष्ठं प्रदहंति ते॥ तप्ततैलं पाययित्वा पचयंति पुनःपुनः॥ ताडयंति कशाघातैः शूल
ग्रैः प्रोथयंति ते॥ संतप्तायसपिंडैश्च ताडयंति यथेच्छया॥ कथं वा न कृता दुष्ट नितस्या त्रात तदा पु
रा॥ तत्पापफलमेवाद्य भुंक्ष्वेत्युक्त्वा निहन्यते॥ कथमंतर्गृहयात्रा दुर्बुद्धे न कृता त्वया॥ तत्पाप
फलमेवाद्य भुंक्ष्वेत्युक्त्वा निहन्यते॥ अनर्घ्यैर्वै विश्वेशं कथं भुक्तं त्वया तदा॥ तत्पाप०॥ अस्ना
त्वैव त्वया भुक्तं दानवाप्यं तदा मुदा॥ तत्पाप०॥ श्रीकालभैरवः शास्ता कथं वा नार्चितस्त्वया॥
कथं वा नार्चितस्त्वया॥ तत्पाप०॥ त्वया नाभ्यर्चितः पूर्वं तदा पशुपतीश्वरः॥ तत्पाप०॥ त्वया
वीरेश्वरः पूर्वं सम्यङ्नाभ्यर्चितस्तदा॥ तत्पाप०॥ अंतर्गृहे तदा दुष्ट मूत्रोत्सर्गस्त्वया कृतः
तत्पापफलं०॥ तदा शैवजनो द्रोहस्त्वया दुष्ट पुरा कृतः॥ तत्पाप०॥ विभूतिधारणं त्यक्त्वा तदा
भुक्तं त्वया पुरा॥ तत्पाप०॥ लिंगपूजामकृत्वैव त्वया भुक्तं तदा पुरा॥ तत्पाप०॥ शिवनि

शि०स्प ॥३४॥

दाहृता पूर्वं त्वया पापरतेन हि॥ तत्पाप०॥ तदा जलं त्वया पीतमनिवेद्यैव शंकरे॥ तत्पाप०॥ कथं वा
न कृतः पूर्वं पंचाक्षरतपस्त्वया॥ तत्पाप०॥ कथं त्वया कृतं दुष्ट शिवक्षेत्रस्य दूषणं॥ तत्पाप०॥ पुरा
त्वया दुष्टचित्तेन शिवनिंदा श्रुता कथं॥ तत्पाप०॥ त्वया दुर्भग दुर्बुद्धे काशीनिंदा कथं कृता॥ तत्पाप०॥
पुरा बिल्वदलैः शंभुस्त्वया नाभ्यर्चितस्तदा॥ तत्पाप०॥ शिवस्यैव परं नाम न कथं जपितं त्वया॥ तत्पा
प०॥ अस्नात्वा शिवगंगायां कथं भुक्तं त्वया तदा॥ तत्पाप०॥ कथं त्वया कृतं मूर्ख शैवे निष्ठुरभाष
णं॥ कथं त्वया कृतं मूर्ख बिल्वस्य खंडनं पुरा॥ तत्पाप०॥ सेविता न कथं मूर्ख शैवाः शिवपरायणाः
तत्पाप०॥ नपं चक्रे शैवाश्चापि प्रतिपक्षे त्वया कृता॥ तत्पाप०॥ काश्यां स्थित्वापि सततं न कृतं
सत्यभाषणं॥ तत्पाप०॥ ज्ञानवाप्यां त्वया पूर्वं कथं निष्ठीवनं कृतं॥ तत्पाप०॥ शिवतीर्थम
पीत्वैव कथं भुक्तं त्वया पुरा॥ तत्पाप०॥ प्रदोषे शंकरः पूर्वं कथं नाभ्यर्चितस्त्वया॥ तत्पाप०॥
येवमन्यानि पापानि स्मृत्वा स्मृत्वा पुनः पुनः॥ तमश्शूकादिभिः सम्यक्काडयंत्यतिदारु श्री:॥ ३४

णं॥ पुरा द्विजाधिपः कश्चिच्छिवभक्तिपरायणः॥ शारदामयुतं चक्रे काशीवासे स्वधर्मतः॥ नित्यं
तर्गृहयात्रादि कुर्वन्विजितमानसः॥ निराहारेण सततं न्यवसद्दुःखवर्जितः॥ कदाचित्तद्गुरु
र्वृद्धः शिष्यं वीक्ष्य कृशाकृतिं॥ तमुवाच ततः प्रीत्या प्रणतं नतकंधरं॥ शिष्य जीर्णशरीरं ते न श
क्तिस्त्वयि न दृश्यते॥ न कर्तव्यो निराहारस्त्वयाद्यावधि सत्तम॥ जलानि जीर्णपर्णानि फलं वा
मूलमेव च॥ अयाचितं यदि प्राप्तं तदा तद्भुंक्ष्व सादरं॥ शुद्धरूपोषणैर्दीनं शरीरं जायते तव॥ पथ्ये
पोपभोक्तव्यमलं भुंक्ष्व यथोचितं॥ मलादीन्यपि जायंते जंतूनामत्र भक्षणात्॥ तद्भयं तु
महत्कारुपामप्रसादेन संवस॥ शार्वर्याः पश्चिमे यामे पंचक्रोशाद्बहिर्व्रज॥ कुरु तत्रैव नियतं
मलमूत्रविसर्जनं॥ शौचादिकं यथा शास्त्रं कुरु सत्तम सादरात्॥ ततः काश्यां समागत्य कर्म
श्रात्याहिकं कुरु॥ इत्युक्तो गुरुणा सोपि यथा चक्रे ततः परं॥ एवं निवसतस्तस्य भूयान्कालो
गतस्ततः॥ अंतर्गृहस्य यात्रादि कृत्वा सर्वं कदाचन॥ पपात तत्र गेहे श्रांतो मूर्छितः क्लिन्नविग्र

शि०रह ॥३५॥

ह ः॥ ततस्तैरेव तद्देहात् मलमूत्रादि निःसृतं॥ ततः स चेतनां प्राप्य स्वाश्रमं प्रति तं ययौ॥ स चाथ तत्कृ
तं कर्म स्मृत्वा स्मृत्वा पुनः पुनः॥ रुरोद बहुदुःखेन पापभीतो द्विजोत्तमः॥ तदा प्रभृति विप्रोसौ अ
न्नाहारं सत्यजत्ततः॥ निराहारं तपश्चक्रे तत्कृतपापशमन्वहं॥ प्रदह्यमानस्तत्पापशांत्यै संवत्सरा
न्पुनः॥ वह्निमध्ये स्थितो नित्यमेकपादेन सादरं॥ तेनापि घोरतपसा तावत्कालं कृतेन च॥ न शांतं
तादृशं पापं प्रवृद्धं च क्षणे क्षणे॥ ततः स चायुषि क्षीणे काश्यामेव मृतो द्विजः॥ असह्यदुःखभो
गार्थं बहुकालेषु सर्वदा॥ मृतं विलोक्य तं क्रूराः। कालभैरवकिंकराः॥ गृहीत्वा तं स्वपुः शीघ्रं
दृष्टचित्ता दुरासदाः॥ नीत्वा तमग्नौ निक्षिप्य दग्ध्वा सम्यक् पुनः पुनः॥ तीव्रस्ततः कशाघा
तैर्ददुर्दुःखं मुहुर्मुहुः॥ मलमूत्रादिकं दुष्ट कथमंतर्गृहे कृतं॥ तत्पापनाशको धर्मः कोपि वेदे ॥श्रीः॥ ॥३५॥
न दृश्यते॥ तादृशं हि महत्पापं केन नाशं प्रयास्यति॥ कथं वा यातनादुःखं निवृत्तं ते भविष्यति
अंतर्गृहे तु लिंगानि दिव्यान्यत्यद्भुतानि च॥ निवसंत्यतिसंमर्द संख्या तेषां न विद्यते॥ अंतर्गृ

हे कृतं यत्तु मलमूत्रादिकं नरैः॥ लिंगे पतति तद्घोरं यातनाकारणं सदा॥ त्वया कृतं महत्पुण्यं पूर्वंव
पिस्तदा॥ स धर्मस्तेन पापेन सर्वो नष्टो न संशयः॥ एवं संतर्ज्य संतर्ज्य भैरवस्यैव किंकराः॥ अ
शीति युगपर्यंतं दग्ध्वा तमथ ते भटाः॥ बध्वा पाशैस्ताडयंतः सततं प्राय मस्तं खलं॥ गृहीत्वा भै
रवस्याग्रे विक्षिपुः कुपिता भृशं॥ भैरवोप्यथ तं दृष्ट्वा भृकुटीकृतलोचनः॥ अपृच्छत्कोयमित्येतान्
कुपितः स्वभटान्प्रति॥ भृत्या ऊचुः॥ श्रीकालभैरव श्रीमन्महेशप्रियरुद्रज। पापियत्तोभयं
त्वास्पर्श काश्यपुरारक्षक॥ अयं महापातकिनामग्रगण्यो दुरासदः॥ अनेनांतर्गृहे पूर्वं मलमू
त्रादिकं कृतं॥ इति तद्वचनं श्रुत्वा भैरवो भीमविक्रमः॥ कोपारुणदीर्घाक्षः प्रज्वलन् सर्वतोपमः॥
ततस्तत्कोपजो वह्निरुत्थितः प्रबलो महान्॥ तमग्निमुत्थितं दृष्ट्वा चुक्रोशात्वर्भयाद्द्विजः॥ स
एव ध्वनिरत्युच्चो व्याप्त ब्रह्माण्डादिलोकगः॥ सर्वेषां च भयं चक्रे तत्तल्लोकनिवासिनां॥ तमेवार्त
स्वरं श्रुत्वा तूष्णीं धर्मासमहं तदा॥ विधिः श्रुत्वा तु तं शब्दं ससभः कंपमागतः॥ कोपमार्तस्वरः

शि०रह
॥२६॥

क्रूरः संप्रविश्योदरं मम॥ ततोऽतिदुःखमत्यंतमिति ब्रह्मा रुरोद च॥ मया दुःखकरः शब्दो न श्रुतः
पूर्वमीदृशः॥ कोऽयं कुतः समुत्पन्नः किमेतस्यास्ति कारणं॥ इत्याश्चर्यसमायुक्तो तदा शंकरकिं
करः॥ अपश्यदूर्ध्वलोकेषु संचरंतं शिवप्रियं॥ तमालोक्यातिविनयात्प्रणम्य च पुनः पुनः॥
उपवेश्यासने रम्ये संप्रणम्य कृतांजलिः॥ वाचस्पतिमिव श्रव्यं मधुराक्षरसंयुतं॥ उवाच वच
नं चारु विनयानतकंधरः॥ श्रीमच्छिवप्रियश्रेष्ठ सर्वोत्तम जितेंद्रिय॥ कुतः समागतं कुत्र
संचारः क्रियते सदा॥ अयमार्तस्वरः कस्य सर्वलोकभयावहः॥ किमस्ति कारणं लोके त
त्सर्वं वक्तुमर्हसि॥ शिवकिंकर उवाच॥ पुरा कश्चिद्द्विजः काश्यामंतर्गेहशिवात्मके॥ मल
मूत्रादिकं कृत्वा तत्रैव सततो मृतः॥ कालभैरवभृत्यैस्तु परासं ताडितस्ततः॥ भैरवाग्रे
स्त्वापि[illegible]तोऽस्ति स एव वायोश्च संश्रयः॥ इदानीमपि पापिष्ठो भैरवेण च ताडितः॥ किंतु त
त्कोपसंभूतप्रलयानलताडितः॥ चुक्रोश त्वात्ययमत्युच्चैर्दुःसहानलतापितः॥ दुःखन्ना

श्रीः॥
॥२६॥

मकरोद्धर्मनिर्दग्धस्येह विद्यते॥ अमुं दग्धाति कोपेन भैरवस्तदनुज्ञया॥ पट्टदीर्घकशाघातैस्ताड
यिष्यति दारुणं॥ संतप्ततैलपात्रेषु पाचयिष्यत्यसंतुयां॥ तप्तकृकचशूलाग्रे दारयिष्यति तत्तनुं॥ सं
तप्तभिंडिवालाग्रे पातयिष्यत्यतिदारुणं॥ ततः पुनः पुनर्दग्ध्वा पुनः संताडयिष्यति॥ यातना बहुधानेन भो
क्तव्या बहुकालिकाः॥ यतः शैवं शिवमयं मलाद्यैर्गृहे कृतं॥ इत्युक्त्वा स ततोत्थाय ब्रह्मणा पूजित
स्ततः॥ चचार विविधाल्लोकान्यथेष्टं प्रीतमानसः॥ ब्रह्मा तद्वचनं श्रुत्वा काशीदर्शनलालसः॥ स
भासद्भिः सहश्रीत्या काशीं प्रति समाययौ॥ दुर्गागणान्भैरवांश्च गणेशान्प्रमथाधिपान्॥ काशी
संरक्षकानन्यान्प्रसाद्य च पुनः पुनः॥ काशीं मंदारपुष्पाद्यैरभिपूज्य यथाविधि॥ विवेश काशीं मम
लां सर्वाभीष्टफलप्रदां॥ ततः सशिव गंगायां स्नानं चक्रे यथाविधि॥ तत्राग्नीध्रेश्वरे सम्यक्पू
जयित्वा तदाद्रया॥ स सभासद्भिरनघैः सहैवाग्रे समाययौ॥ विश्वेश्वराभिधं लिंगं दिव्यं लिंगं द्रष्टुं
समुद्यतः॥ मध्ये मार्गे वक्रतुंडमभ्यर्च्य तदनुज्ञया॥ श्रीकालभैरवं द्रष्टुमाप यो भयविह्वलः

शि०रह ॥३१॥

नेदादद् शैवीरं तमुग्ररासनमव्ययं॥ ग्रज्वलद्गिरिसंकाशं विहतास्यं भयानकं॥ दीर्घदंष्ट्रं महाबा
हुं दहंतं तेजसा जनान्॥ घृतदीर्घकरांघ्रीमत्युग्रंशूलधारिणं॥ अनंतकिंकराधीशं संवृतं नील
लोहितं॥ स्वर्गादिलोकानखिलान्दहंतमिव संस्थितं॥ सकालभैरवं दृष्ट्वा दृष्ट्वातत्कोपवह्नि
ना॥ संताडितः क्षणार्धेन न्यपतद्वाविमूर्छितः॥ सभासदोपिन्यपतन् ब्रह्मणोमितविक्रमः
तत्कोपवह्निज्वालाभिराहताः क्षणमात्रतः॥ ते संज्ञां समवाप्यैवं बहुकालेन पीडिताः॥ बहु
प्राप्याथ ते दुःखं शिवगंगां ययुः पुनः॥ नीहारशीतले रम्ये शिवगंगाजलेमले॥ बहुकालं निम
ज्यैव तस्थुस्तद्वह्निपीडिताः॥ ततो विश्वेश्वरं द्रष्टुमन्यमार्गेण ते शुभे॥ ययुराश्चर्यसंपन्नाः
कंपमानाः पुनः पुनः॥ नानाविधोपचारैस्ते दंडपाणिं प्रसादयन्॥ ततस्तदाज्ञया सम्यक् कृत्वा ज्ञा
नवापीं प्रणम्य ते॥ तत्र स्नात्वा विधानेन ज्ञानेशं प्रणिपत्य च॥ विनायकान्समभ्यर्च्य ढुंढिरा
जं प्रपूज्य च॥ मुक्तिमंडपमासाद्य मामजं विश्वतोमुखं॥ विश्वतश्चक्षुषं देवं विश्वतोबाहुमव्य

श्रीः॥ ॥३१॥

यं॥ नानाविधानंतरत्नैर्नानापुष्पैः सुगंधिभिः॥ नानाविधोपचारैश्च संपूज्य तदनंतरं॥ प्रदक्षिणन
मस्कारैर्नृत्यैर्गीतैर्मनोहरैः॥ स्तोत्रपाठैर्मंत्रपाठैः सम्यगाराध्य मां ततः अंतर्गृहादियात्रां च कृत्वा
सम्यग्यथाविधि॥ दिनाष्टकमुषित्वात ब्रह्मलोकमुपागताः॥ ब्रह्माद्याश्च ततः सर्वे भैरवानल
ताडिताः॥ विक्रमं भैरवस्यैव शंसंतो न्यवसंस्तदा॥ धर्मेणैव सदा वसंति मुनयः काश्यां प्रकारं यं मुदा
भीमं भैरवमुग्ररासनमजं मत्प्रसादैर्विना॥ मामेवाराध्यमनंतमव्ययमजं मोक्षप्रदं शाश्व
तं संपूज्यान्वहमंबिके बहुविधैरश्चोपचारैर्मुदा॥ १९२॥ ॥ इति श्रीशिवरहस्ये सप्त
मांशे शिवगौरीसंवादे काशीमाहात्म्ये काशीव० नाम पंचमोध्यायः॥ ५॥ ॥ पार्वत्युवा
च॥ शिवकल्याणद श्रीमन्सर्वज्ञामितविक्रम॥ ज्ञानवापीति संज्ञेयमस्याः कथमभूद्धर॥ सदा
शिव उवाच॥ त्रिशूलाग्रेण सुभगे सा वापी खनिता पुरा॥ आपातलं जलं तत्र तिष्ठत्यतिमनोहरं
कांतमीरमणिभिः शुभ्रैः पुष्परागैर्मनोहरैः॥ रत्नैरन्यैश्च विविधैर्बद्धा सा तदनंतरं॥ तत्राद्भुतं स

शि०स्प मम वक्त्रपद्मं वरानने॥ विचित्रगंधसंबद्धं शतयोजनमायतं॥ सहस्रदलसंसक्तकेसरागररंजितं
॥२८॥ तत्सुगंधेन निर्गंधं सुगंधमभवज्जलं॥ तत्तीरस्थतपीयूषं सुराणामथुवज्जलं॥ तस्मात कल्पतरुव
स्तत्सुगंधसमन्विताः॥ स्वतः सुगंधा इव ते भांति नित्यं वरानने॥ तत्पद्मकरंदेन संयुतं राजते ज
लं॥ तत्तीरस्थतपीयूषं सुराणामपि दुर्लभं॥ सदा विकासमापन्नं सदा त्रैस्थ्यमनुत्तमं॥ कदाचिदपि
तन्म्लानं न भवत्येव सर्वथा॥ कनत्कनकनालाढ्यं तद्धेमकमलं शुभं॥ हेमछत्रमिवाभाति का
रणाः कमललोचने॥ तत्कर्णिकामध्यदेशे सुंदरे मृदुले सदा॥ कदाचिल्लीलया सम्यगुपविश्य
वसाम्यहं॥ संविष्टं तत्र मामेकाकदाचिद्वरवर्णिनी॥ स्तुत्वा तु बहुधा स्तोत्रैः सम्यग्विधिपूर्वकं श्रीः॥
कृतांजलिपुटा तस्थौ पीनवक्षोजभासुरा॥ विद्युल्लतेव विमला कमला मललोचना॥ ततो म ॥२८॥
येव सा पृष्टा का हि त्वमिति सा ततः॥ उवाच वचनं चारु सर्वलोकहितावहं॥ शंकराहमि
ह स्वामिन्नृ तत्तीर्थाधिदेवता॥ मत्प्रार्थितं वरं देहि वरदानविचक्षण॥ इदं जलं महादेव

शैवो यः पातुमिच्छति॥ तस्यास्त्वं वै बलाभक्तिस्त्वपि तत्वमतिस्तथा॥ ज्ञानवापीति मन्नाम प्रसिद्धा
भवतु प्रभो॥ सर्वपापक्षयकरं जलं भवतु सर्वदा॥ इति संप्रार्थितं सम्यक्तया लोकैकसिद्धये
तथास्त्विति वरं दत्त्वा तां तामाश्वास्य पुनः पुनः॥ मया तत्रैव सततं स्थापिते वरवर्णिनी॥ सा चैव वसतिस्त
त्र कमले गंधसंवृते॥ तदिदं तीर्थममलं सर्वलोकेषु दुर्लभं स्नानं कृत्वा प्रयत्नेन द्वादश्यां सोमवा
सरे॥ तत्र देवानृषीन्सम्यक्तर्पयित्वा पितॄनपि॥ तज्जलैः स्वादुभिः सम्यक् ज्ञानेशमभिषि श
च्य च॥ गंधपुष्पाक्षताद्यैश्च पूजयित्वा यथाविधि॥ प्रदक्षिणनमस्कारैराराध्य तदनुज्ञया॥ मु
क्त्यर्थं त्रिः पिबेत्सम्यक् ज्ञानेशं स्तपनोदकं॥ तत्तोयपानमात्रेण शुद्धो भवति मानवः॥ ततस्त
द्धृदये शुद्धे जायते लिंगमुत्तमं॥ अतएव हि तत्तीर्थं तीर्थोत्तममिति श्रुतं॥ तत्तीर्थराजरक्षार्थं दं
डपाणिर्बलोन्नतः॥ मया संस्थापितः शक्र स्तत्तीरे विमले शुभे॥ विना तदाज्ञया लोके येन के
नापि वा शुभे॥ स्प्रष्टुं न शक्यते नूनं तत्तीर्थं मुक्तिसाधनं॥ पुरा ब्रह्मादिभिः साकं विष्णुः का

शादिदृक्षया॥ समायया तेनोद्दृष्टा दूरात्काशी मनोहरा॥ प्रणम्य दंडवद्भूमौ भूयो भूयः कृतांजलिः
अवाप परमानंदं दृष्ट्वा काशीति सादरं॥ इदमक्षियुगं धन्यं पुंडरीकनिभं मम॥ यतः शिवस्वरू
पेयं काशी दृष्टा मयाधुना॥ रक्तपंकजसंकाशमिदं धन्यं करद्वयं॥ येन काशी मया पूज्या महेश्व
रस्य परा तनुः॥ इदं धन्यं शरीरं मे येन काशी शिवात्मिका॥ आलिंगनीयायत्नेन सर्वपापापनोदि
नी॥ धन्योस्म्यहं पुनीतोस्मि भाग्यवानस्मि सर्वथा॥ यतः शिवस्वरूपेयं काशी संप्राप्यते म
या॥ मदन्यो भाग्यवांल्लोके नास्ति नास्त्येव सर्वथा॥ यतो मोक्षप्रदा दिव्या काशी संप्राप्यते म
या॥ कृतार्थोस्मि कृतार्थोस्मि कृतार्थोस्मि न संशयः॥ यतः सांबमयी काशी प्राप्यते पुण्यसं
श्रया॥ महद्भाग्यं महद्भाग्यं महद्भाग्यं ममाधुना॥ यतो मया शिवाकारा काशी संप्राप्यते
शिवा॥ सकृत्काशीति नामैव स्मृत्वा पातकिनः पुरा॥ शिवसारूप्यमापन्नाः सा काशी दृ
श्यते मया॥ यस्यामंबासमेतः सन् दिव्यरूपधरः शिवः॥ करोति क्रीडामनिशं सा काशी

दृश्यते मया॥ यस्यां ज्ञानप्रदा नित्यं ज्ञानवापी मनोहरा॥ तिष्ठत्यमलकल्लोला सा काशी दृ
श्यते मया॥ यस्यां पूर्णं दुदरनापरमान्नप्रदायिनी॥ अन्नपूर्णा स्थितिं चक्रे सा काशी दृश्यते
मया॥ यस्यां तिष्ठति ढुंढीशः सर्वेष्टफलदायकः॥ सर्वविघ्नहरो नित्यं सा काशी दृश्यते मया॥ यस्यां
शिवरतो नित्यं दंडपाणिः शिवप्रियः॥ तिष्ठत्यतीव संतुष्टः सा काशी दृश्यते मया॥ यस्यां वीरेश्व
रः श्रीमान्करुणानिधिरव्ययः॥ कृतानवसतिं नित्यं सा०॥ यस्यां तिष्ठति वेदज्ञः सदा पशु
पतीश्वरः॥ पशुपाशविमोक्षाय सा०॥ यस्यां तिष्ठति सर्वेषां रक्षिता श्रीकालभैरवः॥ भक्त
कल्पतरुः श्रीमान् सा०॥ यस्यामंतर्गृहं नाम क्षेत्रं त्रिगुणमयं शिवं॥ तिष्ठति श्रीगंगावासं सा०॥
यस्यामस्ति विशालाक्षी शिवस्यार्धांगभागिनी॥ भक्ताभीष्टप्रदा नित्यं सा०॥ यस्यां
त्यक्त्वा तनुं मर्त्यः शैवं शिवपरायणः॥ शिवाकारमवाप्नोति सा०॥ यस्यां मोक्षार्थिनः शैवा
निराहाराः शिवार्चकाः॥ निवसंत्यनिशं शुद्धाः सा०॥ यस्यां प्रात्यहिकं कर्म कृत्वा तिष्ठ

शि०स्प०
॥४०॥

तिसादरं॥ पापक्लेशविहीनाश्च सा०॥९०॥ यस्याः प्रभावं वेदाश्च न जानंत्येव सर्वथा॥ किमन्यानि
पुराणानि सा०॥ ययातुलयितुं वस्तु नास्ति ब्रह्मांडगोलके॥ सर्ववर्तिनाशिनी धन्या सा०॥ एवंव
वदन्नयौ विष्णुः काशीनिकटमादरात्॥ ततश्चक्रे प्रणामानि दंडवत्स पुनःपुनः॥ ततो नानाविधैः
पुष्पैर्दिव्यरत्नैर्मनोहरैः॥ नानाविधोपचारैश्च काशीपूजां चकार सः॥ ततो नानाविधान्क्रूरान्
काशीसंरक्षकान्गणान्॥ संपूज्य तदनुज्ञातः काशीमविशद् द्विज॥ ततः स शिवगंगायां यथा
शास्त्रं यथाक्रमं॥ स्नानं कृत्वा प्रयत्नेन चकारोद्धूलनं ततः॥ त्रिपुंड्रधारणं कृत्वा मंत्रपूतेन भस्मना
रुद्राक्षधारणं चक्रे सर्वपातकनाशकं॥ आग्नीध्रेश्वरमाराध्य पूजाद्रव्येण सादरं॥ संपूज्य नानावि
विधैः स्तोत्रैः कृत्वा सदाशिवं॥ ततस्तदाज्ञया विष्णुर्वक्रतुंडमुपागतः॥ तत्र स्नात्वा विधानेन वक्र
तुंडविनायकं॥ सम्यगाराध्य विधिवत्पुनश्चादरपूर्वकं॥ समभ्यर्च्याति यत्नेन कालभैरवमाग
तः॥ कालकुंडे यथाशास्त्रं स्नात्वा विष्णुस्ततः परं॥ क्षीराज्यमधुभिः सम्यगतिपि[?]आदिभैरवं॥

श्रीः॥
॥४०॥

दिव्यमंदारपुष्पाद्यैरुपचारैश्च शोभनैः॥ प्रसाद्य भैरवं देवं प्रणम्य च तदाज्ञया॥ ततोऽनंतदिव्यलिं
गानि पूजयामास सादरं॥ पापभक्षेश्वराख्यं च संपूज्य तदनंतरं॥ ततः संतोषमापन्नो वीरेशं स
मुपागतः॥ तत्र वीरेशकुंडेपि पुनः स्नात्वा विधानतः॥ ततो ददर्श वीरेशं भक्तवत्सलमव्ययं॥ दृष्ट्वा प्र
णम्य बहुधा पूजां चक्रे स सादरं॥ ततस्तदाज्ञां संप्राप्य ययौ पशुपतीश्वरं॥ ततः पाशुपते कुंडे विलो
क्यातिमनोहरं॥ स्नानं चक्रे विधानेन कुंडपालाज्ञया ततः॥ स्नानं कृत्वा विधानेन नत्वा पशुपती
श्वरं॥ चक्रे पूजां विधानेन पूजाद्रव्येण सादरं॥ ततस्तदाज्ञया तुष्टो दंडपाणिमुपागतः॥ दंडपाणिं
समभ्यर्च्य प्रसाद्य तदनुज्ञया॥ ज्ञानवापीं प्रणम्याथ संपूज्य च यथोचितं॥ स्नानं चक्रे ततः सम्यक्
विधिपूर्वकमादरात्॥ ततो ज्ञानेश्वरमभ्यर्च्य नत्वा पंच[?] विनायकान्॥ ढुंढिराजार्चनं चक्रे स विष्णुर्वि
धिपूर्वकं॥ ततः स तदनुज्ञातो मुक्तिमंडपमाययौ॥ ततो नंदीशमभ्यर्च्य द्वारपालानपि क्रमात्॥
चकार तदनुज्ञातो ममाराधनमादरात्॥ आदौ पंचामृतैः सम्यगभिषिच्य यथाविधि॥ कामधे

शि०रह
॥४१॥

नुप्रसादेन संप्राप्ते रम्ये वै नैवैः॥ तीर्थोदकैः समाहृत्य स्वयमेव जनार्दनः॥ अभिषेकं ततश्चक्रे रुद्रसूक्तेन
सादरं॥ ततः परिमलद्रव्यै रभिपूज्य यथाविधि॥ अनर्घ्यरत्नैरकरोत्पूजां तदनुसादरं॥ नैवैः स्वेतहृद्यैः
शुद्धैर्बिल्वपत्रैर्मनोहरैः॥ मंदारपुष्परमलैरन्यैश्च कुसुमैर्नवैः॥ विचित्ररत्नमालाभिः सुवर्णाभ
रणैरपि। भक्त्या संपूजयामास स विष्णुः श्रद्धासमन्वितः॥ ततो मनोहरैर्दिव्यैर्नैवेद्यैरतिशोभनैः
धूपदीपादिभिश्चापि तोषयामास तं शुभैः॥ ततः प्रदक्षिणादीनि कृत्वा नत्वा यथाविधि॥ स्तोत्रै
श्च विविधैः स्तुत्वा चकारांतर्गृहादिकं॥ ७१॥ एवं वर्षायुतं विष्णुर्नित्यं यात्रापरायणः॥ उवास काश्यां
संतुष्टः शृण्वन् शिवकथाः शुभाः॥ शिवेकृपारणे नित्यं स्थितो लिंगार्चने रतः॥ गंतुकामस्ततो विष्णुः
कदाचिदिदमब्रवीत्॥ ज्ञानवापीतटे रम्ये तपः कृत्वा यथाविधि॥ गमिष्ये यत्र कुत्रापि शिवेन प्रे
रितस्ततः॥ स्यकेदानीमियं काशी दुःखदा स्यत्यसंशयं॥ अनंतजन्मतपसा संप्राप्ता शिवरूपि
णी॥ इत्युक्त्वा तदनुप्रीत्या ज्ञानवापीतटे शुभे॥ यासं युगायुतं चक्रे विष्णुर्घोरतरं तपः॥ तं दृष्ट्वा मु

श्री०॥
॥४१॥

नयः सर्वे तपोनिष्ठं जितेंद्रियं॥ तपोनिधिरिति प्रीत्या नामचक्रुरकल्मषाः॥ एवं निवसतस्तस्य
कालो भूयानतिक्रमात्॥ ततस्य तत्तपो विष्णोर्धीस्तस्मरारीकृतस्वकं वपुः॥ प्रज्वाल्य पावकान्
सम्यगेकपादेन संस्थितः॥ पुनर्वीरेशनिकटे तपस्तप्तुं समारभे॥ तपोनिष्ठं तपोभानुः प्रणिपत्य
जनार्दनं॥ उवाच वचनं चारुं संनतांसः कृतांजलिः॥ जनार्दन तपोनिष्ठ सर्वदा सर्वदेहिभिः॥ कः
पूजनीयो यत्नेन को वा देवोत्तमः परः॥ देवानां ब्राह्मणानां च को वा पूज्यो विशेषतः॥ सर्वदेवेषु
विख्यातः सर्वैर्वेदैश्च कः स्तुतः॥ कः स्मर्तव्यो मुक्तिकामैः को वा जप्यो मनुः सदा॥ एतत्सर्वं वि
शेषेण वक्तुमर्हसि सादरं॥ विष्णुरुवाच॥ देवोत्तमो महादेवः पूजनीयः प्रयत्नतः॥ स एव सर्वदेवे
शः स एव जगदीश्वरः॥ न तस्मादधिको देवः स एवाखिलपुंगवः॥ वेदवेदांतसंवेद्यः स एव श्रुति
संस्तुतः॥ स एव सर्वलोकानां मोक्षदो मुक्तिदायकः॥ स एव सर्वभावेन पूजनीयो द्विजामरैः
जगद्गुरुर्यतस्तस्मात्तस्मिन्नेव प्रलीयते॥ तस्यैश्वर्याण्यनंतानि स एव परमेश्वरः॥ शंकरादधि

शि०स्प
॥४२॥

कादेवो नास्ति न श्रूयतेपि च॥ शंकरः सर्वदेवानामधिकः शंकरो ध्रुवं॥ पुनः२पुनर्विचार्यैव वेदशा
स्त्राणि तत्वतः॥ शिव एव सदा पूज्य इति सर्वैर्विनिश्चितं॥ सत्यं सत्यं पुनः सत्यं सत्यमेवोच्यते मया॥
शिव एव सदा सेव्यः सेव्यः सम्यान संशयः॥ शिव एव सदा पूज्यः स्मर्तव्यः शिव एव हि॥ शिव एव स
दा ध्येयो मुक्तिरूपफलेप्सिभिः॥ शिवान्यो मुक्तिदो नास्ति शिव एवैतता जनैः॥ संप्राप्यः सर्वभावेन
यत्नैश्च विविधैर्वरैः॥ वेदैरपि शिवो ध्येयो न शास्त्रलक्षैर्न चेः॥ स एव सर्वदा पूज्यो ध्येयः स्मर्तव्य
एव च॥ शिवो बंधुर्न शिवो बंधुः शिवस्त्राता शिवः पिता॥ शिवः प्रभुः शिवो दाता शिवान्नास्त्यधिकः
परः॥ शिवलिंगं मया पूर्वं मर्त्ये तं बहु साधनैः॥ इदानीमपि पश्यैतल्लिंगं संपूज्यते मया॥ लिंगार्चन
ज पुण्येन काशी संप्राप्यते मया॥ नो चेच्छिवस्वरूपेयं काशी संप्राप्यते कथं॥ शिवलिंगं बिल्व
पत्रैः कोमलैरमलैः शुभैः॥ नित्यं पूजयते यस्तु स धन्यः पुरुषर्षभः॥ अभिषिच्य महादेवं त्रेधा
तत्स्नपनोदकं॥ पिबेत्सर्वार्थसिद्ध्यर्थं सर्वपापोपशांतये॥ लिंगपूजैव कर्तव्या मुमुक्षुभिरह

श्रीः
॥४२॥

र्निशं॥ बहवो मोक्षमापन्नाः शिवलिंगस्य पूजया॥ देवैर्नरैश्च गंधर्वैर्मुनिभिश्च मुमुक्षुभिः॥ अ
प्रमादेन कर्तव्या लिंगपूजैव सर्वथा॥ ऊर्ध्वाय नम इत्यादिमंत्रैर्लिंगस्य पूजनं॥ कर्तव्यमनिशं विप्रै
र्वैश्यैश्च शिवतत्परैः॥ शिवस्य सन्निधिर्लिंगे सर्वकालेषु सर्वदा॥ तिष्ठत्यतो लिंगपूजा कर्तव्या
सततं बुधैः॥ वेदोक्तलिंगपूजैव कर्तव्या सततं द्विजैः॥ वेदमार्गरतैः शुद्धैर्मोक्षरूपफलार्तिभिः॥ शि
वलिंगमनभ्यर्च्य यो भुंक्ते मोहसंगतः॥ स याति नरकं घोरं यावदाचंद्रतारकं॥ आर्यावर्ते पुराक
श्चिद्ब्राह्मणो वेदवित्तमः॥ सर्वसौभाग्यसंपन्नः सर्वशास्त्रविशारदः॥ कलत्रपुत्रपौत्रादिसौख्यवृ
द्धिकरः सदा॥ नित्यं शिवार्चनरतः हृतरुः सर्वसंमतः॥ कदाचित्क्षुधितः श्रीतो विस्मृत्य शिवपू
जनं॥ चकार भोजनं मत्तः प्रदोषे बालवद्धरुः॥ ततः सदैवयोगेन पंचत्वमगमद्द्विजः॥ ततो यमभ
टैर्नीतः॥ शूलैः संताडितो भृशं॥ यमाग्रे सन्निवेश्यैनं पुनः संताडयन्मुदा॥ तानुवाच यमः श्रीत्यातदा
कायमिति स्फुटं॥ यमायं ब्राह्मणः पूर्वं विहाय शिवपूजनं॥ उवासैकदिनं मत्तः शंकरस्मरणं विना॥ अ
यमदूताऊचुः

नेन भुक्तं मत्तेन श्रान्तेन क्षुधितेन च॥ शिवायानर्पितं द्रव्यमन्नं स्वप्रियमादरात्॥ कियत्पर्यंतमेतस्य न
रके वसतिर्मता॥ कीदृशे नरके पापो वदस्वं विशेषतः॥ यम उवाच॥ शिवलिंगार्चनं नित्यं नित्यं
त्यक्तमनेन नहि॥ कदाचिदुतवालक्तं क्षुधितेन भुक्तायम॥ २२॥ इति तद्वचनं श्रुत्वा विचार्य बहुधा यमः
धर्मराज्ञाविरोधेन वचः प्राह विचक्षणः॥ पंचवत्सरपर्यंतं तप्ततैले निरंतरं॥ तिष्ठ त्वं पतनो भू
मौ स्वयमेव पतिष्यसि॥ इति पूर्वं यमेनोक्तं तदा तद्भवत्तथा॥ ततो यत्नेन कर्तव्या लिंगपूजा निरं
तरं॥ स्नानं संध्या लिंगपूजा होमश्चापि तर्पणं॥ स्वाध्यायश्चेति षड्विः कर्तव्या नियमेन हि॥ नित्यत्वेनै
व विधिना नष्टं तल्लिंगपूजनं॥ तद्रूप दीपिन त्याज्यं सर्वथा द्विजपुंगवैः॥ लिंगार्चनविहीनस्य समस्ता
निष्फलाः क्रियाः॥ ततः सर्वार्थसिद्ध्यर्थं लिंगपूजा विधीयते॥ नित्यकर्मसमृद्ध्यर्थं नित्यत्वेन श्रु
तं श्रुतौ॥ शिवलिंगार्चनं कार्यं यत्नेन प्रत्यहं द्विजैः॥ विभूतिधारणं नित्यं नित्यं रुद्राक्षधारणं॥ शि
वलिंगार्चनं नित्यं नित्यमध्ययनं तथा॥ शिवलिंगार्चनं नित्यं कुर्वन्नापि कदाचन॥ यदि त्यक्षति मोहा

न्नरत्यचेति न संशयः॥ सर्वेप्सितार्थदं नित्यं सुलभं लिंगपूजनं॥ त्यक्त्वा वृथा जनाः सर्वे नरके निपतं
ति हा॥ लिंगपूजनमात्रेण बहवो नियमः पुरा॥ ययुः कैलासनिलयमयत्नेनैव दुर्लभं॥ लिंगपूजाप
रं शैवं निरीक्ष्य यमकिंकराः॥ दूरादेव पलायंते स्मारं तोयमस्यासनं॥ न लिंगपूजनादन्यन्निःश्रेयस
करं परं॥ सत्यमेतत्सत्यमेतत्सत्यमेतन्न संशयः॥ इति तद्वचनं श्रुत्वा भानुः संतुष्टमानसः॥ लिं
गार्चनपरो भक्त्या काश्यां न्यवसदादरात्॥ वीरेशानिकटे विश्वेश्वरपादे न सादरं॥ चकारोग्रं तपस्ती
व्रं ज्वलत्पंचाग्निमध्यगः॥ अशीतियुगपर्यंतं तपः कृत्वा पुनर्मुदा॥ इदानीं शिवगंगायां करो
त्युग्रं तपो बिके॥ ब्रह्मादयोपि ते देवास्तेनैव सह सादरं॥ तथैवोग्रं तपः कृत्वा तिष्ठंत्यविकलं सदा
तज्ज्ञानवापीजलमादरेण देवाः समस्ताः सततं वरेण्यं॥ ज्ञानैकरूपं विमलं पिबंति॥ हल्लिंगदृ
ष्टेः शिवलिंगनिष्ठाः॥ १४०॥ ॥ इति श्री शिवरहस्ये सप्तमांशे शिवगौरीसंवादे का
शीमाहात्म्ये ज्ञानवापीप्रशंसा नाम षष्ठोऽध्यायः॥ ६॥ ॥ पार्वत्युवाच॥

विश्वेश्वराखिलाराध्य सर्वशंकरकरुणानिधे॥ मुक्तिमंडपस्थानं तत्प्रमाणं कियन्मतं॥ मुक्तिमंड
पसंज्ञापि कथमस्याभवच्छुभा॥ एतत्सर्वं विशेषेण श्रोतुमिच्छामि शंकर॥ सदाशिव०॥ अतिमिष्ट
मिदं पृष्टमिदानीं वरवर्णिनि॥ मुक्तिमंडपमाहात्म्यं शृणु वक्ष्ये मनोहरं॥ यत्र ज्योतिर्मयं लिंगं मम
विश्वेश्वराभिधं॥ तत्रास्ति रत्नप्रासादः सर्वलोकमनोहरः॥ तत्प्रासादप्रभासंघैर्दिशः प्रतिदि
शस्तथा॥ अधऊर्ध्वे लोकाः सर्वे प्रदीपिताः समलंकृताः॥ प्रासादोपि सरत्नाढ्यो लिंगाकारो विरा
जते॥ तन्मूलमग्रभागो वा नैकेनापि च दृश्यते॥ अनर्घ्यरत्नमालाभिः सर्वदालंकृतः शुभः॥
मुक्तामालापरिवृत्तो मूलभागोस्य सर्वदा॥ प्रासादे दिव्यरत्नानि रात्रौ दीपाइवाभिके॥ तिष्ठंत्य
त्यंतरम्याणि नेत्रोत्सवकराणि च॥ कदाचिदप्यंधकारसंबद्धस्तत्र सर्वथा॥ नास्त्येव रत्नदीपैः
चसंबद्धेनवरानने॥ सहस्ररत्नशृंगाणां राजते तत्र सर्वदा॥ लिंगाकाराणि शृंगाणि शुद्धा
न्यप्रतिमानि च॥ तेजःपुंजइवाभाति प्रासादः सर्वदा शुभे॥ रत्नपुंजमयप्रीतिं सततेरतिनिर

[library stamp]

त्नं॥ राशीकृतमहारत्नप्रमेयमितिधिः सदा॥ सर्वेषां भवतिस्पष्टं तत्प्रासादावलोकनात्॥ विला
ससदनं रम्यं मम तद्दरानविके॥ नान्यत्र दृश्यते भव्यो नित्योत्साहकरं परं॥ सहस्रकोटिगणपैरलु
ग्रैरक्षितापुर्यैः॥ वीरैः संरक्ष्यते नित्यं प्रासादो विमलो मम॥ श्वमोदुंदुभिनिर्ह्रादो जायते तत्र सर्वदा
गायंति गायकानित्यं शिवनामानि सादरं॥ नृत्यंति नर्त्तकाश्चात्र चित्रनृत्यविशारदाः॥ मंदारपु
ष्पसच्छन्नो रत्नतोरणसंवृतः॥ नित्यानंदकरो भव्यः सर्वमंगलसंश्रयः॥ देवैराराधितो नित्यं ध्या
तश्च सकलैः सुरैः॥ तत्प्रासादसमो लोके प्रासादो नैव दृश्यते॥ सर्वेषां मुक्तिदो नित्यं दर्शनादेव
सर्वथा॥ तत्र लिंगं ममास्त्येकं रम्यं विश्वेश्वराभिधं॥ तत्प्रभावेन वेदैश्च शक्यते ज्ञातुमंबिके॥ तल्लिं
गतत्त्वममलैर्वेदैरपि न निश्चितं॥ तत्स्वरूपं कथं ज्ञेयं तदन्यैरल्पबुद्धिभिः॥ वेदैरपि यथाशक्ति
तदेव प्रतिपाद्यते॥ तदेवोपास्यमखिलैस्तदेवाभीष्टदायकं॥ तदनिर्देश्यममलमप्रमेयमना
मयं॥ निष्कलंकं निराकारं तदेव हि निरंजनं॥ तदेव निधनं त्यादिमंत्रवेद्यं परात्मकं॥ दर्शना

शि०रह
॥४५॥

देवस्सर्वेषां मोक्षदं तत्सनातनं॥ अनेन कालमत्युग्रं तपः कुर्वंति सादरं॥ विश्वेश्वराभिधे लिंगे दृ
ष्टुमेव मनीषिणः॥ अनेककल्पपर्यंतं मुपविश्य मयापि वा॥ प्रभावस्तस्य लिंगस्य वक्तव्यः कथ
मंबिके॥ कदाचिदपि तल्लिंगं न दृष्टं केन सर्वथा॥ न तस्य मुक्तिस्तत्सत्यं सत्यं सत्यं न संशयः॥ त
द्दृष्ट्वार्थं मुनयः कुर्वंति बहुधा तपः॥ तद्विश्वेश्वरलिंगं द्रष्टुं बहुयत्नतः॥ यं न्नपश्यंति मुनयो
यं न्नपश्यंति देवताः॥ यं न्न जानंति वेदाश्च तल्लिंगं श्रेष्ठमन्वहं॥ छिद्राण्यतीवरम्याणि बिल्वपत्रा
णि सादरं॥ येनार्पितानि तल्लिंगे येन मुक्तिर्न वाप्यते॥ अस्मिंश्चविधानेन यो मां बिल्वदलैर्मु
दा पूजयिष्यति पुण्यात्मा स मोक्षमधिगच्छति॥ मद्भक्तेन मयि प्रेम्णा पत्रं वा फलमेव वा॥ द श्रीः॥
त्तं स्वीय पदं तं यत्नुत गृहीष्यामि सादरं॥ एवं बिल्वदलं रम्यं मद्भक्तेनार्पितं मयि॥ अनंताघह ॥४५॥
रं नूनं सत्यमेवोच्यते मया॥ मद्भक्तो पि त्यविज्ञेयः सर्वभावेन सर्वथा॥ सर्वं विहाय मामेव
भजते यः सदा मुदा॥ विभूति रुद्राक्षपरो लिंगमेवार्चयन्मुदा॥ मामेव शरणं प्राप्तो यः स

एव मम प्रियः॥ महापाशुपताः शुद्धाः महाशैवाश्च सर्वदा॥ मामर्चयंति मामेव शरणं प्रप्नुवंति च
मद्भक्तवर्यैः सततं मदर्चनपरायणैः॥ अविमुक्तमिदं क्षेत्रमाश्रित्य स्थीयते मुदा॥ शैवैः पाशुपतैः
शुद्धैर्मल्लिंगं पूज्यते सदा॥ तैर्न वहिष्कृता पूजा गृह्यते सादरं मया॥ पत्रं फलं वा पुष्पं वा जलं वा स्वार्जि
तं शुभं॥ मद्भक्तेनार्पितं मह्यमनंताय प्रकल्पते॥ पत्रेणाप्यर्चितं लिंगं मोक्षदं सर्वदेहिनां॥
विश्वेश्वराभिधं तत्तु तत्र सादे धितिष्ठति॥ तत्प्रासादवरस्यैव दक्षिणादिशि भासुरं॥ रम्यं म
णिमयं स्थानमेकं तिष्ठति पापहं॥ तत्सहस्रमणिस्तंभैरत्नमैरत्नैः शुभैः॥ रचितं राजतैः शृं
गैर्हेमशृंगैश्च राजितं॥ क्वचित्स्फाटिकशृंगौघैर्लिंगाकारैर्मनोहरैः॥ स्थानं तद्भ्राजते देवि ने
त्रोत्सवकरं सदा॥ तत्पालकाश्चतुःषष्टिकोटिप्रमथनायकाः॥ उदायुधा महावीरा मम प्रि
यकराः सदा॥ तस्मिन्नेव महास्थाने शैवास्तत्पालकाज्ञया॥ उपविश्याति संतुष्टास्तिष्ठं
ति शिवपूजकाः॥ सादरं भस्मदिग्धांगा रुद्राक्षाभरणप्रियाः॥ रुद्रसूक्तजपासक्तास्तिष्ठं

तिविमलाशयाः॥ शैवं महामनुं नित्यं सर्वपापौघशामकं॥ जपंतः सततं संतो वसंत्यसंतमाद
रात्॥ शुद्धांतःकरणैरत्र जप्तः शैवैर्महामनुः॥ शैवो मोक्षप्रदो नूनं भवत्येव न संशयः॥ एकदाप्य
त्र शैवेन जप्तः शैवो मनुर्मुदा॥ अनंतगुणितो नूनं पापदावाग्निशामकः॥ शैवो मनुः स्वतः
शुद्धः पापतूलाद्रिनाशकः॥ सोप्यत्र जप्तः शैवेंद्रैः सर्वाभीष्टप्रदो ध्रुवं॥ शैव एव महामंत्रो
जप्यः पंचाक्षरः परः॥ शैवैर्मोक्षार्थिभिर्नित्यं मत्रमल्लिंगपूजकैः॥ तन्मध्ये कर्णिकाकार
रत्नराजिविराजिता॥ अस्त्युन्नता वेदिकैका तिष्ठति प्रियदर्शना॥ तन्मध्य एव काश्मीरम
णिरंजितमानसं॥ स्थितं तदुपरि स्पष्टमुपविष्टं मया पुरा॥ तदानीमागता काचिदिंदुबिंब
निभानना॥ विशालपद्मपत्राभनयनानयनप्रिया॥ मंदारमालाममलामम्लानां म
धुपावृतां॥ धृत्वा पद्मानहस्तेन क्षौमांबरविराजिता॥ सा मां दृष्ट्वा नतग्रीवा प्रणम्य मु
हुरादरात्॥ बिल्वैर्मंदारपुष्पैश्च चक्रे पूजां यथाविधि॥ संजपित्वा ततः सा मां कृतांजलिपु

टा तदा॥ इदमेव वचः प्राह सुलालसोत्रैरनेकधा॥ किमत्र शैवैते नित्यं वसति त्वं शंकर॥ विशेषः
कोत्र देवेशः सर्वस्थानविलक्षणः॥ किमस्ति तत्त्वमेतस्य वद सर्वं विशेषतः॥ पृष्टोहमेवं सुभगे तया त
दनुसादरं॥ उत्तरं दत्तवान् स्मितमेव शृणु सादरं॥ काशी यं सर्वलोकेभ्यो मम प्रियकरानघे॥ तत्रा
प्यंतर्गृहं नाम क्षेत्रं रुचिकरं मम॥ तन्मध्यगमिदं रम्यं स्थानं प्रियतरं मम॥ तल्लिंगमयं यस्मात्तत्र श्री
तिर्मिमानघे॥ यथात्र वसतिर्नित्यं तथा नान्यत्र शोभने॥ अनिशं प्रीतिरत्रैव मम तिष्ठत्यनामये॥
किंच काश्यां मृतान्नरान्वा नरिवदेवान्न शिवार्चकान्॥ शिवैककारुण्यान्नत्र समानीय ततः प
रं॥ एतत्सिंहासने सम्यगुपविश्य यथासुखं॥ ममांके विमले शुद्धं शैवं संवेश्य सादरं॥ शैवाय स्वं
त शुद्धाय मुक्त्यर्थं तदनंतरं॥ शैवः पंचाक्षरो मंत्रो मया ह्यत्रोपदिश्यते॥ मुक्तिमंडपसंज्ञास्य स्था
नस्य श्रुतिसंमता॥ यतो मया मनुः शैवो मोक्षायात्रैव दीयते॥ अतः शैवो महामंत्रो मुक्त्यर्थं शि
वतत्परैः॥ जपनीयः प्रयत्नेन शैवैर्मुक्त्यर्थिभिः सदा॥ अतिघोरतपः साध्यं काश्यां मरणमंबिके

शि०स्प ॥४७॥

यतो ऽत्र मरणादेव शैवे मोक्षोऽवाप्यते ॥ पुरा कश्चिद्द्विजाधीशः शिवलिंगार्चनप्रियः ॥ जन्मकोटि
सहस्रेषु तपः कृत्वा हिमालये ॥ अतिश्रांतः क्षुधाक्रांतो जंगमे लिंगमर्चयन् ॥ जगाम हिमव
द्देहं सर्वसौभाग्यसंयुतं ॥ तदागतमागतं दृष्ट्वा हिमवान् शैवपुंगवं ॥ अभ्युत्थाय यथाशास्त्रं पू
जयामास सादरं ॥ प्रीतस्तदनुपूजां ते हिमवंतं नयान्वितं ॥ संवीक्ष्य स्ववनं चारु जगाद द्विजपुंग
वः ॥ हिमवन् सर्वशास्त्रज्ञ सर्वदेवाश्रयानघ ॥ सर्वलक्षणसंपन्न शिवभक्त चरामल ॥ बहुका
लं तपस्तप्तमत्रैव गिरिगह्वरे ॥ लिंगपूजैव सततं यथाशास्त्रं यया कृता ॥ जन्मकोटिसहस्राणि ग
तानि प्रतिजन्मनि ॥ लिंगपूजैव सततं कृत्वा विधिवदादरात् ॥ लिंगपूजाप्रभावेन जन्मान्यं
यन्मम प्राभवत् ॥ तदाप्रभृतिजन्मानि स्मर्यंते नात्र संशयः ॥ तत एवमया नित्यं क्रियते लिं श्री:॥
गार्चनं ॥ पातकानि विचित्राणि विनष्टानि बहूनि मे ॥ काशीप्राप्त्यर्थमुद्योगः क्रियते सर्व ॥४७॥
दा मया ॥ जायंते बहवो विघ्नाः किं कर्तव्यमतः परं ॥ कुत्र कार्यं तपश्चर्या कर्तव्यं कीदृशं

तपः ॥ को वा विघ्नहरो मंत्रो वद सर्वं विशेषतः ॥ हिमवानुवाच ॥ गौरीशृंगमिति ख्यातमेकं शृं
गं वरं मुने ॥ तत्रास्त्येकं सरो रम्यं दिव्योदकविराजितं ॥ तत्तीरे विमलं लिंगमेकं गौर्या विनि
र्मितं ॥ तत्रैकाश्मी गणपः कश्चिद्गौर्या विनिर्मितः ॥ तत्र गत्वा सरस्तीरे स्नानं कृत्वा विधा
नतः ॥ लिंगं संपूजयत्तेन यथाशास्त्रं ततः परं ॥ यथाशास्त्रविधानेन काश्मीरगणनायकं
पूजयित्वा ततस्तेन गणानां त्वेति मंत्रतः ॥ तत्सिद्ध्यर्थं तपश्चर्या तत्र कार्यो निरंतरं ॥ पंचा
ग्निमध्ये पंचास्यपुत्रध्यानपुरःसरं ॥ गणानां त्वेति मंत्रोयं सर्वविघ्नविनाशकः ॥ जपनीयः
प्रयत्नेन सर्वविघ्नोपशांतये ॥ इत्युक्तस्तदनुज्ञातः संतुष्टः शैवपुंगवः ॥ मत्वा कृतार्थमा
त्मानं गौरीशृंगं जगाम च ॥ तस्मिन्सरोवरे स्नात्वा त्वाथ विधिपूर्वकं ॥ गौरीलिंगमिति
ख्यातं तल्लिंगमतिशोभनं ॥ ततो बिल्वदलैः शुद्धैस्तत्सरोविमलैर्जलैः ॥ पूजयामास सुप्री
तात्मा गौरीलिंगमघापहं ॥ ततो गणाधिपं सम्यगभिषिच्य यथाविधि ॥ चकार पूजां

शि०स्त ॥४८॥

विमलैर्बिल्वदूर्वांकुरादिभिः॥ प्रणम्य बहुधा स्तुत्वा मंत्रं विघ्नहरं जपन्॥ पंचाग्निमध्ये संविश्य तप
श्चक्रे दृढव्रतः॥ शैवमुग्रतपोनिष्ठं विलोक्येंद्रादयः सुराः॥ कंपायमाना तिष्ठंति कृतांजलिपुटाः स
दा॥ एवमेव स काले द्विस्त्रिपंचाशद्युगावधि॥ चकारोग्रं तपः सम्यक् कृत्स्नकाहारो भृशं मुदा॥ ततः
प्रसाधितस्तेन गणेशो विघ्ननाशकः॥ विघ्नांधकारमार्तंडः शुंडादंडविराजितः॥ प्रसन्ने स
ति विघ्नेशे स्तुत्वा नत्वा मुहुर्मुहुः॥ ययाचे स वरं स्वेष्टं सर्वविघ्नौघनाशकं॥ गौरीसुत गणाधी
श॥ गजवक्त्र शिवप्रिय॥ विष्णुपूजितपादाब्ज प्रसीद वरदो भव॥ गणेश सर्वविघ्नेश विघ्ना
न्संहर संहर॥ काशीप्राप्तिर्यथा भूयात्तथा कुरु ममानघ॥ काश्यां प्राप्स्ये मुमुक्षुर्यथा मां विघ्नरा
शयः॥ न बाधंते सदा सम्यक् तथा कुरु गणेश्वर॥ इति संप्रार्थितस्तेन गणेशो विघ्ननाशकः॥ श्रीः॥ ॥४८॥
संप्रीतो वरदस्तस्मै ददौ वरमनुत्तमं॥ ततस्तदाज्ञया शैवः संतुष्टस्तं प्रणम्य च॥ काशीं शिवपु
रीं रम्यामाजगाम महामतिः॥ ततः काशीरक्षकांश्च संप्रसाध्य द्विजोत्तमः॥ स्नात्वा च शिव

गंगायां मणिकर्णीशं प्रणम्य च॥ वक्रतुंडेशमभ्यर्च्य नत्वा श्रीकालभैरवं॥ वीरेशमभिवंद्याथ नत्वा
पशुपतीश्वरं॥ दंडपाणिप्रसादेन स्नानवापीजले मले॥ स्नात्वा ज्ञानेशमभ्यर्च्य नत्वा पंचविनायका
न्॥ ढुंढिराजं समभ्यर्च्य सर्वविघ्नौघनाशकं॥ ततो विश्वेश धर्मात्मा महाशैवाश्रयं सदा॥ इदमेव
महत्स्थानं मुक्तिमंडपसंज्ञकं॥ यत्रोपदिश्यते मंत्रः शैवानां मुक्तिकांक्षिणां॥ अनन्यशरणानां तु म
हत्कानामघापहं॥ ततः प्रविश्य धर्मात्मा महाशैवाश्रयं सदा॥ मुक्तिमंडपमत्यंतसुखं प्राप द्विजोत्त
मः॥ ततो ममांतिकं प्राप्य चकाराभ्यर्चनं मुदा॥ मंत्राधिराजममलं जपन्पापौघनाशनं॥ ममैव लिंगे वि
मले मुक्तिदे वेदसंस्तुते॥ ततः प्रणम्य बहुधा स्तुत्वा स्तोत्रैरनेकधा॥ चकार न्यासं बहुधा सादरं भक्ति
पूर्वकं॥ उपविश्य ततो तत्रैव जप्त्वा मंत्रं शिवात्मकं॥ ततो तर्गेहपात्रादि कृत्वा भक्तिपुरःसरं॥ स्ना
नवापीतटे रम्ये निराहारं जितेंद्रियः॥ चकारोग्रं तपः सम्यक् मुक्त्यर्थं शैवपुंगवः॥ शिवैकनि
रतो नित्यं षट्सहस्रयुगावधि॥ मंत्राधिराजममलं जपन्पापौघनाशकं॥ ततः शरीरं
विजहौ स्नानवापीतटे शुभे॥ लिंगपूजां प्रकुर्वाणो वदन् शिव शिवेति च॥ ततो ममांके संविश्य

ममेवानुग्रहाद्द्विजः॥ मंत्राधिराजममलं पापौघवनपावकं॥ शैवं प्राप्य महामंत्रं मोक्षं सप्राप शोभने
इत्युक्ता सा मनोरम्या मुक्तिमंडपदेवता॥ ययौ स्वसदनं रम्यं विवेकवरवर्णिनी॥ ॥ये मुक्तिमंडप
मनर्घ्यममन्यलभ्यं संप्राप्य शैवमनुमप्यतिपुण्यलभ्यं॥ संपूजयंति शिवमेकमुपास्यमीशं ते सर्वे
था सुरवरं शिवमाप्नुवंति॥११५॥ ॥इति श्रीशिवरहस्ये सप्तमांशे काशीमाहात्म्ये मुक्तिमं
डपाख्यानं नाम सप्तमोध्यायः॥७॥ ॥पार्वत्युवाच॥ ॥शिवानंदमयानंत ज्ञानवापीतटे शुभे॥ ये
न पुण्यप्रभावेन दंडपाणिः स्थितस्ततः॥ पुराचीर्णं किमेतेन तपश्चर्यौकं कथं कृता॥ पुत्रस्थितं पुरा
नेन तत्सर्वं वद शंकर॥ शिव उवाच॥ हरिकेशवनं नाम काश्यामेकं वरानने॥ ऋद्धिसिद्धिकरं रम्यं विला
साश्रयमस्ति मे॥ बिल्वमंदारपुन्नागपूगलोध्रद्रुमावृतं॥ आम्रातकार्जुनाश्वत्थकेतकीतरुसंवृ
तं॥ आम्रातकार्जुनाश्वत्थकेतकीतरुसंवृतं॥ नानाविधलताकीर्णं नानाद्रुमविराजितं॥ नानावि
धलताकुंजमंजुलं नयनप्रियं॥ वसंतप्रमुखानेकऋतुभिः संश्रितं सदा॥ नानाविधानेकपुष्प
संकुलं सर्वदा शुभं॥ नानाविधफलाकीर्णं घनच्छायमघापहं॥ एतादृशवने रम्ये हेमराजिविराजि

तं॥ रत्नसोपानसंबद्धं सरः सममसवच्छुभे॥ चलद्विमलकल्लोलकुलसंकुलितं सदा॥ परागपूर्णप
रितः सरः सुरवरार्चितं॥ तस्मिन्देशे सततं शैवाः शिवपरायणाः॥ भस्मोद्धूलितसर्वांगास्त्रिपुंड्रां
कितमस्तकाः॥ रुद्राक्षमालाभरणाः शिवनामामृतोत्सुकाः॥ शिवैकदेवा विमलाः शिवाचाररताः
सदा॥ शिवैकशरणं शुद्धाः पंचाक्षरपरायणाः॥ निष्कल्मषा निरातंका निवसंति शिवार्चकाः॥
शिवाराधनसंसक्ताः शैवशास्त्रविशारदाः॥ पंचाग्निमध्ये सततं काशीमरणकांक्षया॥ तपः
कुर्वंति सततं मनसा विजितेंद्रियाः॥ जीर्णपर्णाशनाः केचित्केचिदंबुकणाशनाः॥ केचिद्वाताशनाः केचि
न्निराहाराः शिवप्रियाः॥ शुद्धांतःकरणाः शुद्धाः शिवतत्वैकचिंतकाः॥ तत्रैव विमलस्थाने दंडपाणिरयं शु
भे॥ पंचवर्षात्मिको बालस्तपश्चक्रे दृढव्रतः॥ उराहिमालये रम्ये नानाधातुविराजिते॥ तपस्तस्म
नेनैव महद्घोरतरं मुदा॥ स्वकोटियुगपर्यंतं पंचाग्निमध्यगः सदा॥ रुद्राध्यायजपासक्तः शिवलिंगैक
पूजकः॥ निमीलिताक्षो नियतो निःसंगः शिवचिंतकः॥ एकेनैवांघ्रिणा स्थित्वा चक्रे घोरतरं त

शि०स्प
॥५०॥

पः॥ सर्वज्ञमिमं वेदवेद्यं सर्वाधारं जगत्प्रभुं॥ ध्यायन्नेव महादेवं गौरीरमणमव्ययं॥ तद्घोरतपसा भीताः
भूताः सर्वे दिवानिशं॥ नत्वा कृतांजलिपुटास्तिष्ठंति नतकंधराः॥ लिंगपूजारतं दृष्ट्वा तस्य वः पुष्पसं
कुलाः॥ कंपितास्तत्पस्तासर्वे स्तत एव नमंति ते॥ प्रज्वलं लग्नयोनित्यं स्वतः कमललोचने॥ तपःप्रभा
वतीतास्तेज्वलिता इव सर्वदा॥ एवं बहुविधं घोरं तपः कृत्वा स्थितं पुरा॥ लिंगार्चनरतेनेत्थं बालके
न वतेनहि ततः कदाचिन्नेदीशा मारुह्य वरवर्णिनी॥ मया गतेन तत्रस्ते नमस्यं पूजा कृता शुभा॥ ब
हुधा च कृतं स्तोत्रं कृतास्य न तपो मुदा॥ वरोऽपि याचितस्तेन शिवे भक्तिर्दृढास्त्विति॥ दत्तो वरो मया
तस्मै सततः सादरं पुनः॥ तपश्चकार विमलो मौनव्रतपरायणः॥ बहुकालं तपस्तप्तं नतः परमेपीं
प्रिये॥ ततः पुनर्मयात्र गतं तेनार्चितप्रिये॥ तदा मया स पृष्टोऽभूस्तपस्वी विजितेंद्रियः॥ शिवैक
शरणं शुद्धः पंचाक्षरपरायणः॥ तपो घोरतरं नित्यं किमर्थं क्रियते मया॥ किं तवाभीप्सितं तद्धि दास्ये
वृणु वरं परं॥ इति पृष्टस्ततः सोऽपि वव्रे वरमनुत्तमं॥ काश्यां प्राप्तिर्मम श्रीमन्नस्त्विति प्रीतमानसः॥

श्रीः॥
॥५०॥

DR BHAU DAJI MEMORIAL

श्रुत्वा तदुक्तं वचनं विविच्य च पुनः पुनः॥ वरो दत्तो मया देवि तस्मै तेषार्थमुत्तमः॥ इतो जन्मसहस्रांते
काश्यां संप्राप्यते त्वया॥ एवमेव महद्घोरं करिष्यसि तपो यदि॥ ततः काश्यां स्वधर्मेण स्थित्वा नियतमान
सः॥ तत्र घोरतरं भूयः करिष्यसि तपो यदि नच॥ इति दत्तो वरस्तस्मै तदनुप्रति जन्मनि॥ जातिस्मर
स्तपो घोरं भूयो भूयश्चकार सः॥ ततः काशीमिमं प्राप्य तपश्चक्रे स बालकः॥ विघ्नैः संविघ्नितो
प्यत्र भक्त्या मृशमनुत्तमः॥ तेनैव लज्जिताः सर्वे मुनयो ब्रह्मवादिनः॥ आश्चर्यं मुनयश्चक्रु
र्दृष्ट्वा बालकमुत्तमं॥ इदं वृत्तं शिवरतं निमीलितविलोचनं॥ तं दृष्ट्वा मुनयः सर्वे प्रणमंति पुनः पु
नः॥ अहिंसा मात्रमविशिष्टांगं लिंगाभ्यर्चनतत्परं॥ दृष्ट्वैव भूताः सर्वेऽपि नमस्यन्ति दिनं मुहुः॥ कृतां
जलिपुटा देवा निवसंति प्रणम्य तं॥ सिद्धगंधर्वयक्षाद्याः पूजयंति मुहुर्मुहुः॥ विघ्नाननेका
न्संहृत्य लिंगपूजनतत्परः॥ तपस्वी व्रतं चक्रे हरिकन्याचने शुभे॥ एवं निवसतस्तस्य पुरः प्रीत्या
गतं मया॥ ततः समागतं दृष्ट्वा मामस्तौषीत्स बालकः॥ दंडपाणिरुवाच॥ विश्वेशाप्रमथा

धीशाय वृषभाधीशवाहन॥ देवदेव जगन्नाथ नमस्ते रुद्रमन्यवे॥ कालकूटहर श्रीमन् कालकालकृ
पानिधे॥ श्रीनीलकंठ कामारि नुतोतद्रुषवे नमः॥ त्रिशूलपाणे सर्वात्मन् दीनबंधो दिगंबर॥ सर्वा
धारसुराधीश नमस्ते भक्तधन्वने॥ पिनाकपाणे देवेश सर्वदेवोत्तम प्रभो॥ अनादिनिधनानंतबा
हुभ्यमुन्नते नमः॥ निरंजन निराधार निरवद्य निरामय॥ निष्कलंक निरातंक नमः सोमाय ते स
दा॥ वेदांतवेद्य त्रिदशैकवंद्य त्रिकाग्निकाल त्रिपुरांतकेश॥ अनंतकल्याणगुणार्णवाय रुद्राय दे
वाय नमोस्तु तुभ्यं॥ अणोरणीयान्महतो महीयांस्त्वमेव नान्यो जगदेकहेतो॥ विश्वाधिकानास्य
परात्परेशात्मनाय देवाय नमो नमस्ते॥ त्वत्तो जगज्जन्म भवत्यनंत त्वत्तो जगद्रक्षणमिंदुमौले॥
त्वय्येव नाशं समुपैति लोकः शंगाय देवाय नमो नमस्ते॥ त्वमेव यज्ञादिफलप्रदाता त्वमेव शै
वोत्तमधर्मगोप्ता॥ त्वमेव नानाविधसृष्टिकर्ता स्तुग्राय देवाय नमो नमस्ते॥ त्वत्तो न किंचित्परम
स्ति लोके त्वामेव देवोत्तममामनंति॥ त्वामेव शांतं शरणं प्रपद्ये भीमाय देवाय नमो नमस्ते॥ त्व

मेव मे नीडमनःसरोजमध्यप्रविष्टः शिपिविष्ट शंभो॥ त्वमेव पूर्णः पुरुषः प्रमाणैर्मयोभवाय प्रण
तोस्मि नित्यं॥ त्वामनंतमनाद्यंतमामनंति महर्षयः॥ त्वमेव कर्मफलदः शंकराय नतोस्मि ते॥ त्वमे
व भक्तमंदारो वृंदारकवरप्रदः॥ त्वमेवाभीष्टदो नित्यं महादेवाय ते नमः॥ त्वामेवानंतमीशानं त्वामेव
जगदीश्वरं॥ वदंति निगमाः सर्वे महेशानतो नतोस्म्यहं॥ यादृशस्त्वं महादेव न जानेतत्वतः शिव॥ वेदैरपि न
ते रूपं ज्ञातमीशानतोस्मि ते॥ त्वदन्यं नाभजामीश त्वदन्यं न शृणोम्यहं॥ त्वदन्यं न स्मरामीश त्वदन्यं
न वदाम्यहं॥ न शिवान्यं पूजयामि शिवान्यः पूज्यएव न॥ न शिवान्यं चिंतयामि शिवान्यश्चिंत्यएव न
कर्मणा मनसा वाचा त्वामेव शरणं गतः॥ प्रत्यक्षेण महादेव मामंगीकुरु शंकर॥ पूतोस्मि पुण्यदे
होस्मि धन्योस्मि परमेश्वर॥ यतस्त्वत्पादकमलं दृष्टमद्य मया शिव॥ सालिंगपूजाफलिताद्य कृ
ता पूर्वमादरात्॥ यतस्त्वत्पादकमलं दृष्टमद्य मया शिव॥ धन्या ममाभवन्मातापिताद्यन्योभवन्म
म॥ यतस्त्वत्पादकमलं दृष्टमद्य मया शिव॥ धन्या मद्बंधुजाः सर्वे धन्यमत्कुलमुत्तमं॥ यतस्त्व

शि०ख ॥५२॥

त्वादकमबंदष्टमद्यमयाश्रिता॥जप्तः पंचाक्षरः शुद्धः फलितः श्रुतिसंमतः॥यतस्त्वत्पाद०॥ पूर्वार्जि
तानिपुण्यानिफलितानिसदाशिव यतस्त्व०॥६५॥ तत्तत्कालकृताः सर्वेधर्माश्चफलिताः शुभाः
यतस्त्व०॥ प्रायश्चोवन्द्ध्यः शीतायथाकालंकृतायथा॥यतस्त्व०॥ ऋषयःपितरः साध्याः प्रीताः
प्रावामरवाअपि॥यतः॥७०॥ नातोस्तिममभाग्यस्यभाग्यमीदृङ्कस्यचित॥यतस्त्व०॥ भाग्यस
परिपाकोयंजातएवहितार्थदः॥यतस्त्व०॥ स्तुत्वैवंवरुधाबालः प्रणम्यचमुहुर्मुहुः॥ कृतांजलि
पुरोभूत्वातस्थौसंतुष्टमानसः॥तस्याश्रिमाञावशिष्टमंगं स्पृष्ट्वमयाततः॥गाणापत्यमतिप्री
त्यादत्तंतस्मैमनोरमे॥ज्ञानवापीरक्षणार्थं तत्तटेस्थापितोमया॥वरोन्योपिमयादत्तः संतुष्टेनततः
परं॥ त्वत्कृतंस्तोत्रमसलंयःपठेत्सततंशुचिः॥काशीवासोनिरंतस्य भवत्वितिवरानने॥तदाप्र
भृतितत्तीरेदंडकांचनमुद्वहन॥तिष्ठत्ययंततसंतुष्टः पूर्णभद्रसुतःशिशुः॥तेनैवतात्ततेलोकः
शिवद्वेषकरःसदा॥ब्रह्मादेयोपितंपूर्वे मर्दयंत्यथुनाशुभे॥काशीवियोगतनुतेसएवकुपितः

श्रीः॥ ॥५२॥

सदा॥मुनीश्रांमानवानांचदेवानामपिशिक्षकः॥दंडपाणिकृपायस्मिन्नभविष्यतिसर्वथा॥सवि
हायतदाकाशीं यातिदेशांतरंप्रति॥पूजनीयःप्रयत्नेनदंडपाणिर्ममप्रियः॥काशीवासरतैर्नित्यम
प्रमत्तैर्यथोचितं॥दंडपाणिप्रसादेनस्तानेभवतिधीमतां॥ज्ञानवापीजलस्पर्शसर्वपापप्रणोदकः॥
शिवप्रियोदंडपाणिः पूर्णभद्रसुतानघः॥यक्षेशःकरुणासिंधुर्धूतपापोगणेश्वरः॥८०॥एतन्नाम
ष्टकेनैवत्र्यस्यदंशिवतत्परः॥पूजनीयःप्रयत्नेन काशीवासिभिरादरात॥दंडपाणिप्रसादार्थंका
शीवासरतैर्नरैः॥भोजनीयस्त्रयोदश्यां शैवःक्षीरादिसाधनैः॥नमंतिऋषयःसर्वे पूजयंतिच
तंद्विजाः॥तस्यैवानुग्रहाःसर्वेकान्यांतिष्ठंत्यनाकुलाः॥अयंयक्षकुलोत्पन्नोबालोपिमदनु
ग्रहात॥सामर्थ्यमीदृशंप्राप्य तिष्ठत्यतिबलान्वितः॥पूर्वपूर्वभवेष्वेवमनेनोग्रंतपःकृतं॥ मामुद्दिश्य
निशंसम्यकृतत्फलंजातमीदृशं॥यःकश्चिदस्तिसुभगोमद्भक्तोमत्परायणः॥ससर्ववंद्यःश्रेष्ठश्च
भविष्यतिनसंशयः॥इदंमत्वैवमुनयोदेवायक्षानरोत्तमाः॥लिंगरूपिणमेकं मामर्चयंतिदृढव्र

ताः॥ धृतत्रिपुंड्रा जितमानगर्वा मनुष्यदेवर्षिवरा निरीहाः॥ मामेकमीशं शरणं प्रपन्ना स्तिष्ठंति लिं
गार्चनसक्तचित्ताः॥ १२॥ ॥ इति श्री शिवरहस्ये सप्तमांशे शिवगौरीसंवादे काशीमाहा
त्म्ये दंडपाणि इतिहासकथनं नामाष्टमोध्यायः॥ ८॥ ॥ शिव उवाच॥ कथामन्यां प्रवक्ष्ये
हं श्रोत्रानंदकरां करीं॥ शृणु यत्नेन विमलामंबिके पापहारिणीं॥ पुरा कश्चिद्द्विजाधीशः पूर्वजन्मत
पोबलात्॥ काशीं संप्राप्य मामर्च्य मत्पर्च्ये विधिपूर्वकं॥ उषित्वैकदिनं दीनः क्षुधार्त्तो स्तंगते रवौ
वीरेश्वरालये रम्ये निद्रां कर्त्तुं समाययौ॥ गत्वा तत्र मनोरम्यं रत्नस्तंभविराजितं॥ नानामणि
गणाकीर्णं ददर्श शिवमंदिरं॥ तत्र शैववरो दृष्टः कश्चिल्लिंगार्चनप्रियः॥ भस्मरुद्राक्षबद्धांग
स्तेनैव च नवर्णिनी॥ तं प्रणम्य महाशैवं कृतांजलिपुटो द्विजः॥ उवाच वचनं चारु मत्यं शैवजन
प्रियं॥ ब्राह्मण उवाच॥ विप्रशैववर श्रीमन् काशीवासरतानघ॥ काशीप्रभवः कः को दृश्यो दे
वः पूज्योसि कः प्रभुः॥ किमेतल्लिंगमाहात्म्यं किंनामास्येश्वरस्य च॥ इदमेतन्मया पृष्टं विचार्य वद

सादरं॥ शैवद्विज उवाच॥ इदं विश्वेश्वरं नाम लिंगं मंगलदायकं॥ विश्वेश्वरात्म भूतं च सर्वपापभ
यापहं॥ पुरात्र विष्णुनाघोरं तपस्तप्तमनेकधा॥ आब्रह्मकल्पमेकांघ्रिःस्थितः पंचाग्निमध्यगः॥
कुंडमेतस्य कमलमत्राम्बुज[illegible]लावृतं॥ तज्जलस्नानमात्रेण नरो याति परां गतिं॥ पुरा द्विजा
धमः कश्चिदस्मिन्कुंडे मनोहरे॥ स्नानं कृत्वा महालिंगमिदं दृष्ट्वा प्रणम्य च॥ काशीं त्यक्त्वा स्वदे
शाय ययौ स तदनंतरं॥ स्वदेशे ब्रह्महत्यादिपातकानि चकार च॥ ततः कदाचित्सर्पेण दष्टो भूमौ
पतद्द्विजः॥ काशी वीरेश्वरे स्येवं वदन्प्राणान्मुमोच सः॥ ततो यमभटाः क्रूरा बध्वानिन्युर्यमांति
कं॥ तं दृष्ट्वा शमनः क्रूरश्चित्रगुप्तमुवाच च॥ अनेन किं कृतं कर्म पुण्यं दुष्कृतं वा विचारय॥ अतः
पापानुरोधेन दंडनीयः प्रयत्नतः॥ इति तद्वचनं श्रुत्वा चित्रगुप्तो विचक्षणः॥ पूर्वं तत्कृतपापानि
जगाद शमनं प्रति॥ ततो वीरेशकुंडस्य स्नानं वीरेशदर्शनं॥ वीरेश काशीस्मरणं जगाद स्मृति
कालिकं॥ वीरेशदर्शनादीनि श्रुत्वा कालस्ततः परं॥ प्रदक्षिणीकृत्य विप्रं दंडवत्प्रणिपत्य च॥ अ

मूल्यात्तेरखचितस्वासने विमले शुभे॥ उपवेश्यार्घ्यपाद्याद्यैरर्चयामास सादरं॥ ततो यमसभाः
सद्भिरर्चितः सकलैरपि॥ पूजितो यमभृत्यैश्च चित्रगुप्तेन चार्चितः॥ इंद्रलोकं ययौ तत्र देवेंद्रेणा
पि पूजितः॥ ततो विमानमारुह्य ब्रह्मलोकं जगाम सः॥ तमागतं समालोक्य ब्रह्मा तत्त्वविदां वरः
स सभासत्समुत्थाय दंडवत्प्रणिपत्य तं॥ स्फुरद्रत्नासने रम्ये भक्तिश्रद्धासमन्वितः॥ उपविष्टं द्वि
जं सम्यगर्चयामास सादरं॥ ततो ब्रह्मा सभासद्भिर्विनीतैर्नतकंधरैः॥ पृष्टः कार्यमिति प्री
त्या बभाषे सर्वसंसदि॥ ब्रह्मोवाच॥ अनेन काश्यां दृष्टानि विश्वेशाः पूजिताः पुरा॥ स्नानं वी
रकुंडेऽपि वीरेशो वीक्षितो मुदा॥ अंतकाले स्मृता काशी वीरेशोऽपि स्मृतः पुरा॥ यमेन पूजितः
सम्यगिंद्रेण च मयाप्ययं॥ अत्राति युगपर्यंतं देवमानेन सर्वदा॥ पूजितोऽत्र मया सम्यक् प्रत्य
हं निवसिष्यसि॥ ततः परमयं विप्रो भूमौ चवतरिष्यति॥ वेदशास्त्राण्यधीत्यैव महदैश्वर्यसंयुतः
तत्वज्ञानं परं प्राप्य ततः काशीं गमिष्यति॥ काश्यां न्यायार्जिते वित्ते स्तर्पयित्वा सुरान् द्विजान्॥

ततः सर्वं परित्यज्य निराहारो जितेंद्रियः॥ पंचाग्निमध्ये नियतं लिंगपूजापरायणः॥ एकनैवांघ्रि
णा स्थित्वा मौनेन नियतो व्रती॥ षट्कोटियुगपर्यंतं तपश्चर्यां करिष्यति॥ ततः शिवप्रसादेन शि
वांकमधिरुह्य च॥ शैवपंचाक्षरं लब्ध्वा शुद्धो मुक्तिं गमिष्यति॥ इति तद्वचनं श्रुत्वा सर्वब्रह्मसभास
दः॥ तस्मै प्रणम्य विधिवत्पूजां चक्रुर्यथोचितं॥ तदन्यापि कथा तेन तदैवात्र समुदाहृता॥ अत्याश्च
र्यकरा श्रव्या पृष्टस्तैर्देवतान्प्रति॥ ब्रह्मा उवाच॥ वीरेश्वरे पुरा कश्चित्शैवः शिवजनप्रियः॥ लिंगार्च
नरतो नित्यं शांतो निर्जितमानसः॥ पंचाग्निमध्यसंविष्टः पंचाक्षरपरायणः॥ पंचीकृता
त्मा पंचात्मा बभूव विजितेंद्रियः॥ तस्यैव निकटे कश्चिन्मयूरश्चित्रचंद्रकः॥ वीरेशकुंडपानीयं पि
त्वा पीयूषसन्निभं॥ दीर्घपिच्छाग्रभागेन देवालयरजः कणान्॥ दूरीकुर्वन्वीजमानो न्यवसत्प्र
तिवासरं॥ ततः कदाचित्तत्रैव भिल्लः कश्चित्समागतः॥ तं दृष्ट्वा स मयूरोऽपि भीतो दूरं गतो रुदन्
किं तु तं समयं दुष्टः प्राणग्राही समागतः॥ किं कर्तव्यं क्व गंतव्यं हा काशी त्यज्यते मया॥ प्राणात्ययेपि

शि०स्प ॥५५॥

काशीयं न त्याज्या सर्वथा जनैः॥ तादृशीयं मया काशी त्यज्यते किं करोम्यहं॥ अनेकजन्मतपसा स्व
च्छा काशी शिवात्मिका॥ यासेयं दुरदृष्टेन त्यज्यते किं करोम्यहं॥ काशी मुक्तिप्रदा रम्या सर्वपापवि
नाशिनी॥ त्यज्यते दुरदृष्टेन किं करोमि क्व याम्यहं॥ काशी पुण्यैकनिलया सर्वार्तिभयनाशिनी॥
पापौघपरिपाकेन त्यज्यते किं करोम्यहं॥ महापद्यपि काशीयं न त्याज्या मुक्तिकांक्षिभिः॥ त्यज्यते
सा यमेवाद्य महापातकिना मया॥ कानि पापानि दुष्टानि कृतानि बहुधा मया॥ विश्वेश नगरी का
शी त्यज्यते किं करोम्यहं॥ अपराधाः कृताः केवा मया काशीवियोजकाः॥ आनंदवनदेशेन वि
योगो जायते मम॥ कदापि न कृतं प्रायो दंडपाण्यर्चनं मया॥ नोचेत् काशीवियोगोद्य कथं वा जायते
मम॥ श्रीकालभैरवस्यापि कोपो जातो भविष्यति॥ नोचेत् कथं वियोगः स्याद्विश्वेशेन मयाधुना॥
हा काशीश महादेव हा करुणानिधे॥ रुद्रावासवियोगोद्य मया सोढुं न शक्यते॥ भक्तवत्सल वि
श्वेश विश्ववंद्य जगत्प्रभो॥ काशीवियोगजं दुःखं निवारय निवारय॥ हा वीरेश कृपासिंधो हा भक्तज

श्रीः॥ ॥५५॥

DR BHAU DAJI MEMORIAL

नवत्सल॥ ममापराधाः क्षंतव्या देहि काश्यां सदा स्थितिं॥ अपराधिषु भक्तेषु क्षमायुक्ता महात्मनां॥
इदं विचार्य वीरेश काशीवासं प्रयच्छ मे॥ मनोवाक्कायजन्यानि पातकानि क्षमस्व मे॥ प्रयच्छ वासं गौरी
श त्वं नित्यमानंदकानने॥ शिवेति नाम दावाग्निः करोत्यघवनक्षयं॥ कृपातः कस्मात् स्वीशा काशीवा
सं प्रयच्छ मे॥ अन्नपूर्णे कृपापूर्णे तूर्णपूर्णे शुभे॥ काशीनिवासभिक्षान्नं देहि देहि शिवप्रिये
इति प्रलपमानं तं मयूरं शुष्कतालुकं॥ विलोक्य करुणासिंधुर्वीरेशो भक्तवत्सलः॥ शैववर्येषु रूपस्तु
शूलपाणिरदभुतः॥ श्रममार्तिहरं वाक्यमुवाच कृपया द्विजं॥ वीरेश्वर उवाच॥ रे मयूर मा रोदी
र्मा रोदीर्भीतिमुत्सृज॥ अभयं तव दास्यामि दुःखं मा कुरु सर्वथा॥ स्वजातिधर्ममाश्रित्य त्वया मा
रोपितं करे॥ धृत्वा तिष्ठति भिल्लोयं॥ हिंसां नैव करिष्यति॥ काश्यां धर्मार्थमायांति पुरुषाः पुण्यत
त्पराः॥ नाधर्मार्थं च हिंसार्थं लोक कदा नार्थमेव च॥ अतो दुःखं न कर्तव्यं मयूरायाहि माशुच॥ सु
खेन संवसात्रैव काश्यां धर्मेण सर्वदा॥ काश्यां दुःखप्रदो मर्त्यो यस्य कस्यापि देहिनः॥ स्यात्स्व

नरकं घोरं यावदाचंद्रतारकं॥ वरवराणि लिंगानि काश्यां तिष्ठंत्यनेकधा॥ तेषु सर्वेषु पूजैव कर्त्त
व्या विधिवज्जनैः॥ तत्र चैव शरीराणि रम्याणि विमलानि च॥ वरलिंगानि दिव्यानि विज्ञेयानि महा
त्मभिः॥ किन्नरा मनुजा यक्षा गंधर्वा वामरा पि वा॥ तत्र चैव शरीरेषु दुःखदा याति यातनां॥ शैव
दुःखप्रदो मर्त्यो विष्ठायां जायते कृमिः॥ तेनोत्कृष्टं पुनर्जन्म नारं नावाप्यते ध्रुवं॥ अरण्ये निर्जने
देशे जलघासविवर्जिते॥ सूकरो जायते नूनं शैवदुःखकरः सुरः॥ अमेध्यभक्षणासक्तो नानाव्र
णविदूषितः॥ रासभो जायते नूनं किन्नरः शैवदुःखदः॥ शैवदुःखकरो यक्षो सृगालो जायते व
ने॥ गंधर्वो जायते गृध्रः शैवदुःखकरो ध्रुवं॥ शैवदुःखप्रदो दुष्टः काश्यां देवान्मृतो नरः॥ अ
घोरयातनां प्राप्य तिष्ठत्याचंद्रतारकं॥ शैवं शरीरं मम तच्छिवाख्यमुदाहृतं॥ तस्य दुःखप्रदाने
न दुःखितोहं न संशयः॥ सर्वे देवा नमंति त्वमपि दुःखप्रदो जनः॥ अघोरनरके नित्यं दुःखि
तानि वसिष्यति॥ स एव धन्यः पुण्यात्मा स एव जगतां गुरुः॥ स एव देवपूज्यः स्याद्यस्मिंस्तु

ष्टो भवाम्यहं॥ स सर्वयातनाभोक्ता स एव नरकालयः॥ स एव दुर्भगो भाग्यो यस्मिंरुष्टो भवाम्य
हं॥ मामन्यदेवसदृशं मनुते यदि मानवः॥ सोपि घोरतरे तीक्ष्णे नरके निपतिष्यति॥ देवोत्तमोहमज
रो निष्कलंको निरंजनः॥ न मत्तोभ्यधिको देवो न मया सदृशोपि वा॥ मद्भक्तसदृशो लोके नास्ति ना
स्त्येव सर्वथा॥ मद्भक्त एव पुण्यात्मा धन्यो मद्भक्त एव हि॥ मद्भक्ते पूजिते सम्यगहमेवास्मि पूजितः॥ म
द्भक्तपूजनेनैव संतुष्टोस्म्यहमादरात्॥ त्वयापूर्वे भवे सम्यक् ज्ञात्वा स्वर्थं तपः कृतं॥ तदेतज्जन्मविग
मे मुक्तिरत्र भविष्यति॥ तवाप्यव्याहता भक्तिर्मयि तिष्ठति सर्वदा॥ सुखेन संवसात्रैव भिल्ला
द्दीक्षितेन ध्रुवं॥ इति दत्वाभयं शंभुः प्रीणयित्वा शिवार्चकान्॥ तत्रैवांतर्दधे लिंगे श्रीमहीश्वरा
भिधे॥ ईदृशः करुणासिंधुर्वीरेशो भक्तवत्सलः॥ तद्दृष्टं न कृतं पूर्वमनेन द्विजजन्मना॥ इदं
शरीरमेतस्य वा लिंगं न संशयः॥ शिवलिंगार्चकानि त्वं पूर्वं सर्वं भवेवयं॥ भवद्भिस्त्वेव शैवस्य
पूजा कार्या प्रयत्नतः॥ शिवशैवार्चनादेव तुष्टो भवति सर्वथा॥ इत्युक्त्वा स पुनः स्त्वष्टा स

सभासद्यथाविधि॥ शिवलिंगमथियात्तस्मै प्रजांचक्रे मनोरमं॥ इदं वीरेश्वरं क्षेत्रमीदृशं सर्वकामदं
सेवितं सर्वदा सम्यं मुक्तिरूपफलार्थिभिः॥ तथाप्यत्रैव सततं स्थातव्यं शिवमंदिरे॥ काशीत्यागो
न कर्तव्यो मोक्षेच्छा यदि सर्वदा॥ कल्याणनिलया नित्यमन्नपूर्णा वरानना॥ मिष्टमन्नं यथेच्छं ते
दास्यत्येव न संशयः॥ इति तद्वचनं श्रुत्वा ततः संतुष्टमानसः॥ उवास काश्यामनिशं सतपश्चरणे र
तः॥ कालेन समृतो नैव हानवापीतटे शुभे॥ तस्मै मुक्तिर्मया दत्ता शैवमंत्रोपदेशतः॥ वीरेश्वरस्त
नामिदं मनोहरं स्थानप्रदं शैवजनाभिसंमतं॥ यतो मयूरोपि विहाय दुःखमुवास वीरेशकृपाकटाक्ष
तः॥ ६३॥ ॥ इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे काशीमाहात्म्ये वीरेश्वरेतिह
सकथनं नाम नवमोऽध्यायः॥ ९॥ ॥ श्रीसदाशिव उवाच॥ अन्यामपूर्वामनघां कथां वक्ष्ये
शुभप्रदां॥ यत्कथाश्रवणात्सद्यो मुच्यते कर्मबंधनात्॥ काश्यां पशुपतीशस्य स्थानमस्त्युत्तमं शुभे
नित्यं संनिहितस्तत्र निवसाम्यहमादरात्॥ महापाशुपतैस्तत्र वसतिः क्रियते सदा॥ शैवशास्त्रप्र

णेतारः संति तत्रैव कोटिशः॥ भस्मदिग्धकराग्रांगास्त्रिपुंड्रांकितमस्तकाः॥ रुद्राक्षमालाभरणा दी
र्घपिंगजटाधराः॥ अघोरमूर्तिमनिशं ध्यायंतो मामजं शिवं॥ अघोरमंत्रविन्यासजपनिष्ठा निराकुलाः॥
निष्कलं निर्गुणं शांतं शिवमक्षरमव्ययं॥ तुरीयमनघं मत्वा भजंति शिवमेव मां॥ त्यक्त्वा पशुपतीशस्य
स्थानमन्यत्र सर्वथा॥ न गच्छंत्येव नियताः शैवदीक्षापरायणाः॥ नित्यं शिवकथासक्तास्ततः करणमु
दा॥ शिव नाम विहायान्यं न वदंत्येव सर्वथा॥ तत्र पाशुपतं नाम कुंडमस्ति वरानने॥ तत्काश्मीरमणि
श्रेष्ठरचितं निर्मलोदकं॥ तत्र कुर्वंति ये स्नानं भक्त्या ते सर्वथा शुभे॥ नारकीं यातनां प्राप्य नरो न
ति कदाचन॥ तत्र स्नात्वा च पीत्वा च तज्जलं पापनाशकं॥ सुधानिभं मणिच्छायासमाक्रांतमहर्निशं
स्पृष्ट्वापि यांति मल्लोकं निर्धूतापा न संशयः॥ पुनरावृत्तिरहितं सर्वकाम्यमनामयं॥ तस्मिन्नेव
मवकुंडे मंडूकः कश्चिदुत्तमः॥ स शिवान्नान्यदस्तीति वदन् तिष्ठति सर्वदा॥ स मंडूकस्तु काके
न कदाचिद्दैवयोगतः॥ पंचक्रोशाद्बहिर्नीतः पातितश्च क्वचिद्ध्रदे॥ ततश्च क्रोशावधि मंडू

वः शोककर्षितः ॥ हा हा पशुपते शेतिवदन्नेवमुहुर्मुहुः ॥ धिक् शरीरमिदं काशी वियुक्तं जन्मधि
ग्मम ॥ धिग्जीवनमिदं धिग्धिक् शिवेत्येवं वदन्मृतः ॥ तं तथा मृतमालोक्य सुराः संतुष्टमानसाः ॥
मंदारकुसुमैः शुद्धैश्च कुर्वृष्टिं मनोहरां ॥ ससंभ्रमा सत्सदेवेंद्रा दुंदुभिध्वनिपूर्वकं ॥ ब्रह्मा समाय
यौ तत्र यमेनापि समन्वितः ॥ तदा मदाशां संप्राप्य शिवदूताश्चकोटिशः ॥ ययुस्तत्र संतुष्टा मे
ढूकानयनोत्सुकाः ॥ ततः शिव शिव शेति महादेवेति वादिनः ॥ तदेशं प्रापुरमलाः कंपयंतो
महीतलं ॥ ब्रह्मा ददर्श तान् शुद्धान् त्रिपुंड्रांकितमस्तकान् ॥ रुद्राक्षमालाभरणाञ्छिवनामजपो
त्सुकान् ॥ त्रिशूलतोमराद्यस्त्रसंयुतानग्निलोचनान् ॥ व्याघ्रचर्मपरीधानान् गरकंठानकल्म
षान् ॥ दृष्ट्वा भीतः कंपमानः प्रणिपत्य पुनः पुनः ॥ प्रत्येकं शिवभक्तानां चक्रे पूजां चतुर्मुखः ॥ तत
कृतांजलिपुटो मधुरं मधुराक्षरं ॥ जगाद वचनं प्रीत्या विनीतो नतकंधरः ॥ कोमलानि शरीराणि भव
तां शिवपूजकाः ॥ श्रांतानि स्वाद्यवेगेन गाम्यते गमनोत्सुकाः ॥ किमीदृशं महाकार्यं मन्या साध्यमुप

स्थितं ॥ मत्साध्यं चेदहं तत्र प्रेषणीयोस्मि सादरं ॥ विनाभाग्येन भवतां मादृशां कारितमस्य तु ॥ कथं भवि
मद्भाग्यफलमेतन्न संशयः ॥ भवतां श्रांति नाशार्थं यत्कार्यं मयाधुना ॥ भवतां चेत्तु खमत्तस्त
दा धन्योस्मि संशयः ॥ शिवभक्तशरीरं तु वरलिंगमनोमयं ॥ शिवतुष्ट्यर्थमत्रैव पूजा कार्या विशे
षतः ॥ शिवभक्तशरीरास्ये वरलिंगे सदाशिवः ॥ नित्यं संनिहितः सांबो मोदते भक्तवत्सलः ॥ त
तः शैवशरीरास्य लिंगे दत्तं धनं प्रियं ॥ गृह्णाति सादरं शंभुर्भक्तदेहाश्रयः सदा ॥ धन्यास्ते वै जनाः स
र्वे शिवनामैकजीवनाः ॥ यत्पूजया महादेवस्तुष्टो भवति सानुगः ॥ शैवमुत्सृज्य यो न्यस्मिन् पूजनं
चेत्करिष्यति ॥ सा पूजा तत्कृतान्यत्र भस्मसाद्भवति ध्रुवं ॥ प्रज्वलद्वह्निमुत्सृज्य यथान्यत्र कृतं ह
विः ॥ वृथा भवति सा पूजा तथान्यत्र कृता वृथा ॥ पुरा कश्चिद्द्विजाधीशो हिमवद्देशसंस्थितः ॥ संपा
द्य वहुधा द्रव्यं नानाविधमनुत्तमं ॥ पप्रच्छ ब्राह्मणान् शिष्टान् निर्लोभान् रागवर्जितान् ॥ दान
पात्रं स्थलं कीदृग्वदंत्विति धनार्जकः ॥ ब्राह्मणा ऊचुः ॥ शैवद्विजवरे दत्तं धनमल्पमपि प्रभो

प्रवर्धते न संदेहो मे रवत्त दिने दिने॥ शिवंपाचवरं त्यक्त्वा दत्तमन्यत्र तद्धनं॥ अत्यहं रोदनं कृत्वा तत्र दुः
खेन तिष्ठति॥ शैवं कथं विहायात्र दत्तं पातकिना धने॥ इति दुःखं विहायैव न तोनत्र्यति तद्धनं॥ इत्यु
दीरितमाकर्ण्य स पूज्य द्विजपुंगवान्॥ बहुकालं ततस्तस्थौ शैवागमनकांक्षया॥ ततः शैववराणां
तु भवतां पूजनं मया॥ क्रियते पूजनेनैतत्तु स्वीकार्यं कृपया मयि॥ इत्युक्त्वा स पुनः स्रष्टा तुष्टांतः
करणस्तदा॥ मंदारपुष्पमालाद्यैश्चक्रे पूजां यथाविधि॥ विधाय पूजाममलां नतांगं विनया
न्वितं॥ विधातारं विलोक्यैते प्राहुर्वचनमादरात्॥ शिव ग॥ महादेवे सदा भक्तिस्त्वयास्तु चतुरान
न॥ श्रद्धयाया कृता पूजा त्वया सा स्वीकृता मुदा कार्यांतरं न चास्माकमत्रैवागतमादरात्॥ मंडू
कोयं महानेष शैवः शंकरसंमतः॥ काश्यां पशुपतीशस्य कुंड एव स्थितः सदा॥ कदाचिद्दैवयोगेन
काकेनात्र निपातितः॥ एतदानयनार्थं तु शिवेन प्रेषिता वयं॥ अस्मिन्विमाने संस्थाप्य नेयोयं
शिवसंमतः॥ इति तद्वचनं श्रुत्वा तुतोष चतुराननः॥ शिव एव सदा पूज्यः कृपानिधिरिति प्रभुः

ततो विमाने विमले स्थापनीयस्तिति प्रियात्॥ चक्रुर्मंडूकदेहस्य स्पर्शं दूता मदर्चकाः॥ तदन्वेव स मंडूकस्त्यक्त्वा
निजं तनुं मुदा॥ दिव्यं शरीरं संप्राप शैवस्पर्शेन सादरं॥ तमादित्यप्रभं दृष्ट्वा सर्वे ब्रह्मादयः सुराः॥ सं
तोषं परमं जग्मुः पुष्पवृष्टिरभूत्तदा॥ दुंदुभिध्वनिभिः पूर्णं सर्वं च पृथिवीतलं॥ रंभाद्याननृतुस्तत्र गं
धर्वाश्च जगुर्मुदा॥ सुगंधाः शीतलाः शांताः वायवश्च ववुस्तदा॥ दिशः प्रसन्नाः संभूताः भूतास्तस्थुः
सुखं तदा॥ ततस्तत्क्षणमेवाभ्रे विमले पुष्पसंकुले॥ समारोप्य मुदा सर्वे तमेव चलिताः शुभे॥ यमः
प्रचलितं दृष्ट्वा स्वर्लोकोपरि संभ्रमात्॥ चक्रे नानाविधां पूजां तस्मै सम्यग्यथाविधि॥ शिवदूतानपि
प्रीत्या यथायोग्यं यथाक्रमं॥ पूजयामास शमनो विधिं सेंद्रं च सादरं॥ पुष्पवृष्टिरभूत्तत्र पुनर्दिव्या
मनोहरा॥ ततः सर्वे स्वर्गलोकं जग्मुरिंद्रोपि सादरं॥ पूजयित्वा विमानस्थमासनाद्यैर्यथाविधि
शिवभक्तान्यथायोग्यं पूजयामास सादरं॥ चतुर्मुखं च विमलं पूजयामास सादरं॥ पुनस्तत्राप्य
भूद्रम्या पुष्पवृष्टिर्वरानने॥ ततो जग्मुर्ब्रह्मलोकं ब्रह्मा तत्र पुनर्मुदा॥ चकार पूजाममलां सर्वेभ्यः स

यथाविधि च तत्रापि श्रम्य संस्रीताञ्जलणाश्रहृतेततः॥ विष्णुलोकं ययुः सर्वे दिव्यं नेत्रमनोहरं॥ विष्णुरा
लोक्य तान् सर्वान् द्रुतमुत्थाय सादरं॥ कृतांजलिपुटो भूत्वा प्रणम्य च मुहुर्मुहुः॥ रत्नासने पुरो वेद्यां नुपवे
श्य यथाक्रमं॥ चकार विविधां पूजां धन्योस्मीति वदन्मुहुः॥ विष्णुनापि कृतां पूजां स्वीकृत्य तदनंतरं
सर्वे लोकोत्तरं रम्यं कैलासमगमन्मुदा॥ त्रिषष्टिकोटिप्राकार रत्नच्छायाविभूषितं॥ शतकोटि
मनोरम्य रत्नद्वार समन्वितं॥ नानानर्घ्यमणिश्रेष्ठ गुणैरंजितमुत्तमं॥ रत्नप्रासादनिकरैर्गोपुरा
द्यैर्विराजितं॥ विलास सदनं रम्यं ममायुस्तदनंतरं॥ विमानादवतीर्याथ सर्वेव: सादरं मुदा॥ प्रण
म्य बहुधा सम्यक् ज्ञामनंतमजं विभुं॥ कृतांजलिपुटस्तस्थौ कंपमानोनताननः॥ ततो दत्तं मयात
स्मै गाणपत्यमनामयं॥ दुःखमात्रं विहायात्र संतिष्ठति यथासुखं॥ इदं काशीनिवासस्य फल
मीदृशमुत्तमं॥ इतोप्यन्ये शिवरताः कीटास्तत्कुंडवासिनः॥ कालेन काश्यां मनिशं वसंतः
शिवसंमतः॥ शैवं पदमवाप्यंते स्थास्यंति सुखिनः सदा॥ धर्म संपादिते नैव काशीवासेन स

र्वदा॥ काशी पाशुपतं क्षेत्रं महापाशुपताश्रयं॥ सा पाशुपत वर्याणां मोक्षदा नात्र संशयः॥ शैवाः
पाशुपताः शुद्धाः यत्र तिष्ठंति सर्वदा॥ लिंगार्चन रताधीरा स्तत्रैव निवसाम्यहं॥ मन्नामजपसंस
क्ता मल्लिंगार्चन तत्पराः॥ यत्र कुर्वनति ध्वंतु तत्र सन्निहितोस्म्यहं॥ शंभो शंकर विश्वेश त्वन्नि
शं पत्र नृत्यति॥ शैवः शिवरतस्तत्र निवसामि वरानने॥ यत्र पाशुपता धर्माः शिवधर्मास्त्व संततं
वसंति तत्र सततं निवसाम्यहमादरात्॥ महापाशुपतं शैवं महाशैवं शिवप्रियं॥ इष्ट पूजा यथाश
क्तिः कर्तव्या सर्वथा जनैः॥ शैवान पूजयित्वैव योगच्छत्यभिमानतः॥ सयाति नरकं घोरं सत्यमेवो
च्यते मया॥ शिवदीक्षापरैः शैवैः शैवेभ्यः कदाचन॥ नमस्कारो न कर्तव्यो यतः शैवजनोत्तमाः
शैवैरन्योन्य पूजा तु कर्तव्या विधिवत्सदा॥ अन्योन्यं पूजकाः पूज्या स्ते भवंत्य नघाः शुभे॥ न काशी
सदृशं क्षेत्रं न शंकर समः सुरः॥ न शैव सदृशो विप्रो न मत्तोन्योपि मोक्षदः॥ श्रीमत्पशुपतीश
स्य सन्निधौ पत्रिणोपि मां॥ ध्यात्वा शिवशिवेत्येवं वदंत्यनिशमादरात्॥ धन्यं पाशुपतं स्थानं ध

न्याः पाशुपता जनाः॥ धन्याः पशुपतीशस्य पूजकाः सर्वदा मुदा॥ यस्मिन्पाशुपतस्थाने वसतं
पत्रिणामपि॥ शिवतत्वमतिः शुद्धा वर्त्तते बुध दुर्लभा॥ काश्यां पशुपतीशस्य सन्निधाने स्थितिः
सदा॥ पूर्वोक्तधर्मनिरतैः कर्त्तव्या यत्नतः शुभे॥ निराहाररतैः शुद्धैर्निरहौः शिवार्चकैः॥ स्थेयं
पशुपतीशस्य क्षेत्रे यत्नेन सर्वथा॥ तत्र जप्यो महामंत्रः शैवः शीघ्रफलप्रदः॥ भवत्येव न संदेहो जपनी
यः प्रयत्नतः॥ शैवदीक्षा शुभा तत्र शैवेभ्यो दीयते मया॥ ततः पंचाक्षरो मंत्रः शैवैस्तत्र जप्यो निरंतरं
पुरा कश्चिन्नृपश्रेष्ठः सर्वभूचक्रपालकः॥ सामंतनृपवंद्यांघ्रिर्बलवान् हिमवानिव॥ अमितानेकवसुमान्कुबेर इव सर्वदा॥ धीरो मरुन्निव श्रीमान् श्रीबलेशइवानिशं॥ पितेव सर्वलोकानां
मातेवासंतरक्षकः॥ कांतेव हितकृन्नित्यं नेंदुर्निवतोषकः॥ सदा विद्याधारूढः सूर्यमंडलसन्नि
भः॥ क्रीडारतो ययौ भूपो यमलोकाय वीर्यवान्॥ तमायातं नृपं दृष्ट्वा तेजिष्टमनलप्रभं॥ भीतोभ्युत्था
य रामनो नृपप्रत्युज्जगाम च॥ ततः सिंहासने रम्ये संवेश्य नृपमुत्तमं॥ चकार पूजां विधिवदर्घ्यपा

DR BHAU DAJI

द्यादिभिः क्रमात्॥ ततो मम कृतां पूजां गृहीत्वा नृपतिर्मुदा॥ रथमारुह्य वेगेन स्वर्गलोकं जगाम
सः॥ तमागतं नृपं दृष्ट्वा देववृंदः सहसा मुदा॥ प्रणम्य विधिवत्पूजां चकार विनयान्वितः॥ ततः स राज
प्रबलो देवेंद्रादिभिरन्वितः॥ विमानवरमासाद्य ब्रह्मलोकं जगाम च॥ ततः शतधृतिर्दृष्ट्वा तमेव नृ
पतिं मुदा॥ प्रणम्य पूजयामास पूजाविधिविशारदः॥ ततः सभासदः सर्वे कृतांजलिपुटा विधिं॥ को
यमित्यूचिरे मंदं कंपमाना नतानना॥ ब्रह्मा उवाच॥ शृण्वंतु सावधानेन प्रभावोस्य मयोच्यते॥ यत्प्र
भावस्य कथनाद्रोमांचो जायते मम॥ काश्यामंतर्गृहे रम्ये शैवे पशुपतीश्वरः॥ शैवपाशुपताराध्य
लिंगस्याघविनाशकः॥ तत्र कुंडमभूद्दिव्यं तत्तीर्थे सुरसेवितं॥ बिल्ववृक्षो महानासीन्नवपल्लव
संयुतः॥ तन्मूले सर्वदा शैवाः शिवमंत्रजपोत्सुकाः॥ शिवपूजापराः शुद्धा तिष्ठंति विगतस्पृहाः
शिवप्रियकरे रम्ये तस्मिन्नादित्यसोदरे॥ अयं तु शकुनिर्भूत्वा न्यवसन्क्रीडसंश्रयः॥ तत्रायं
निवसन्नित्यं स्वचंचूपुटसंचितैः॥ कोमलामलशाखाग्रबिल्वपत्रैः शिवप्रियैः॥ तत्कुंडोदकसं

शि०स्प ॥६२॥

लुब्धैरम्लानैरघ्यना शकैः॥ पूजयत्यतियत्नेन तिष्ठति प्रीतमानसः॥ स्वपक्षधूननोद्भूतवायु
भिश्चानिशं मुदा॥ तत्रांऽन्यत्रैव स्वेदानी निवारयति सादरं॥ एवमेव स्थितस्तत्र कदाचिद्दैवयमु
द्गतः॥ वकारयुद्धमन्येन विहगेन बलान्वितः॥ युध्यमानेन तेनैव पंचकोशाद्बहिर्गतं॥ ततस्तत्र
किरातेन केनचिन्निहतो मृतः॥ ततो यमभटैर्नीतः स एव शकुनिस्तदा॥ यमः कोऽयमिति प्रीत्या पप्रच्छ
स च किंकरान्॥ यमदूताः॥ यमायं शकुनिर्भव्यः सदा बिल्ववनाश्रयः॥ काश्यां पशुपतीशस्य पू
जकश्च विशेषतः॥ दैवादनेन काशी सा त्यक्ता मोक्षप्रदायिनी॥ किरातेन हतोऽन्यत्र दुष्टेन पापपा
णिना॥ अयमस्माभिरानीतं काशीवासरतः सदा॥ पूजनीयोऽतियत्नेन शैवोयं शिवसंमतः॥
इति तद्वचनं श्रुत्वा सादरं प्रणिपत्य तं॥ पूजयामास शमनः सिंहासनवरस्थितं॥ ततः स्वर्ग
समासाद्य देवेन्द्रेणापि पूजितः॥ मल्लोकमगमत्सर्वं मया यं पूजितः शुचिः॥ ततोऽन्यवसदत्रैव
युगानामयुतं मुदा॥ स एव ततो गत्वा विचचार वनीतले॥ ततः कश्चित्प्रजाधीशः परंत

श्रीः॥ ॥६२॥

प इतिश्रुतः॥ ददर्श नमतिप्रेम्णा वंद्यमच्छिन्नवित्रियं॥ दृष्ट्वैनं नृपतिः सम्यक् पूजां कृत्वा यथाविधिः
उवाचैवमतिप्रीत्या कृतांजलिपुटस्तदा॥ इष्टदेवो भवानेवं नमस्कारस्ते न संशयः॥ प्रसीद करुणासिंधो
भक्तार्तिभयनाशक॥ शरीरं जीर्णमभवत्केशाश्च पलिता मम॥ पुत्रो न जातो राज्यस्य रक्षको नास्ति सर्व
था॥ पितॄणामृणमस्त्येव मनिस्तार्यमनामयं॥ तदृणापहकर्माणि न दृश्यंते सुतं विना॥ विवेकी धर्मनिपु
णो वेदशास्त्रार्थपारगः॥ यस्य नास्ति सुतस्तस्य व्यर्थं जन्म न संशयः॥ पुन्नाम नरकं घोरमस्त्येकमति
दुःखदं॥ पतितं तत्र मामन्यस्तं विना नोद्धरिष्यति॥ वंशवृद्धिकरः पुत्रो यस्मिन्वंशे न जायते॥ तद्वंश
नाशस्तीव्रेण भविष्यत्येव सर्वथा॥ पुत्रहीनमिदं जन्म धिग्जन्मापि जराहतं॥ धिक्पुत्राननुभूतं च राज्य
मेतदकंटकं॥ सर्वदुःखापहा काशीति छत्से काशिवात्मिका॥ तत्रापि साधनं सर्वं तमेव नमयान्तपः॥
दुःखपीडितचित्तस्य मम दुःखनिवारकः॥ नास्त्येव सर्वथा लोके पुत्रान्यस्तोषकारणः॥ पुत्रदा
नं कुरुष्वाद्य त्वदन्यः पुत्रदः सुरः॥ नास्त्येव सर्वथा लोके यस्माद्भवानसि महेश्वरः॥ शिव एव हि

शि०स्प ॥६३॥

मर्थकाममोक्षप्रदश्शुनः॥ तदन्यस्तत्प्रदो नेति श्रुतिर्वदति शंकरः॥ इत्येतद्वचनं श्रुत्वा तमुवाचायमादरा
त्॥ खेदं मा कुरु राजेंद्र पुत्रस्ते भवितेति सः॥ तवोत्तमांगादुत्तुंगादहमेव नृपोत्तम॥ इतः षष्टितमे मासि
संभवामि न संशयः॥ इत्येतद्वचनं श्रुत्वा प्रणिपत्यैनमादरात्॥ दुःखं विहाय संतुष्टो जगाम सदनं नृ
पः॥ ततः षष्टितमे मासे संप्राप्ते स्वप्रभाववतः॥ तस्योत्तमांगादमलादाविर्भूतोयमादरात्॥ तदाऽदुं
भयो नेदुः पुष्पवृष्टिरभूच्छुभा॥ राजा बभूव संतुष्टश्चंद्रोदय इवांबुधिः॥ बालकेनाथ स्तदा राजपुत्रो
त्सवसमन्वितः॥ हिरण्यगोगजाश्वानां ददावर्बुदमादरात्॥ उत्तमांगसमुद्भूतमेवं वीक्ष्य सुतं नृपः॥ उत्त
मांगज इत्येतन्नाम दिव्यं चकार सः॥ जातिस्मरोयं बाल्येपि नवबिल्वदलैः सदा॥ लिंगपूजां प्रयत्ने
न करोति नियमान्वितः॥ रुद्राक्षमालाभरणो भस्मोद्धूलनतत्परः॥ श्रीमत्पशुपतीशेति नाम दि
व्यं जपत्ययं॥ अत्याश्चर्यकरं कर्म क्रियते बालक त्वया॥ किमेतदिति तेनैव पृष्टो राज्ञायमर्भकः॥ त
तो जगाद वृत्तांतं स्वपूर्वभवसंचितं॥ तच्छ्रुत्वा विस्मितो राजा तमुवाच सुतं प्रति॥ शिवपूजाप्रभावेन स

श्रीः॥ ॥६३॥

र्वज्ञातं त्वयात्मज॥ कोहं पूर्वभवे सम्यग्विचार्य वद सादरं॥ इति पृष्टः क्षणं ध्यात्वा बालकः स्मितपू
र्वकं॥ जगाद सर्ववृत्तांतं तस्यैव नृपतेस्तदा॥ तव जन्मान्यतीतानि संख्या तेषां न विद्यते॥ तथैव पाप
संघेन बहुकुत्सितयोनिषु॥ उत्पत्तिरभवत्सर्वमतिदुःखभयावहं॥ तव मूत्रपुरीषाद्य गर्भेषु बहु
धा स्थितिः॥ सारमेयोदरे पूर्वं तव जन्म सहस्रधा॥ बभूव जन्मनाऽनेन दुःखं भुक्तं त्वया सदा॥
तदनंतरमेवाभूत्तव रासभजन्मनां॥ अतिदुःखप्रदं नित्यं सार्धकोटिचतुष्टयं॥ ततः कोटिद्वयाष्ट
कं जातं सार्धं तु शुकजन्मनां॥ पंचाशल्लक्षमभवं माघमाजन्मनां तव॥ ततो लक्षाष्टकमभूद्घूकु
बंभरजन्मनां॥ सार्धकोटिद्वयं जातं ततस्तेदंशजन्मनां॥ सार्धलक्षत्रयं जातं ततस्ते मेषजन्मनां
ततः कोटिशतं जातं तव राजलजन्मनां॥ सार्धकोटित्रयं जातं ततस्ते बर्हिजन्मनां॥ जन्मस्वेते
ष्वपि सदा दुःखं भुक्तमनेकधा॥ एतज्जन्मान्यवहितं जन्म पूर्वं प्रदर्शिते॥ तस्मात्पूर्वमभूज्जन्म बहु
बर्हविराजितं॥ त्वयामपूर्वदेहेन श्रीशैले संस्थितं पुरा॥ दिव्यलिंगसमाक्रांते शिवभक्तविराजिते

शि०रह
॥६४॥

शर्वमिपूर्देहेन त्वया लिंगस्य सन्निधौ॥ नृत्यं कृतं त्वया सम्यक् शिवसंतोषकारणं॥ तेन पुण्यप्रभावेन
श्रीशैले वसतिस्तव॥ बभूव भाग्यदा भूयो जन्मांते भोगकारणं॥ मयूरजन्मनान्येन मम सेवां क
रोत्त्वयं॥ ततो राज्याधिपत्यं च भवत्वस्य सुखप्रदं॥ भुक्त्वा मनुष्यदेहेन भोगमंतेततः परं॥ मांप्रयो
स्यतिदेवशाद्दत्तौ पूर्वं वरं शिवः॥ ततो जन्माभवत्पूर्वं कस्मिंश्चिद्दिपिनांतरे॥ मयूरस्य ततो देवाच्छ्री
शैलेपि स्थितं त्वया॥ तस्मिन् शैले यरेरम्ये त्रिपुरांतकसंज्ञकं॥ लिंगमेकमभूद्दिव्यं भानुतमम नाच
ते॥ तत्र नित्यं स्वपिच्छेन कृतमुल्लनिवारणं॥ सायं तत्रैव निरतं नर्त्तनं क्रियते त्वया॥ एवं मासशतं
सार्द्धं संस्थित्य निपतं त्वया॥ स्वछयैव नराधीश संस्थितं पूर्वजन्मनि॥ ततः कालांतरे राजन् श्रीशै ॥ श्रीः॥
लान्यभुवि त्वया॥ ~~एवं मासशतं सार्द्धं संस्थित्य निपतं त्वया~~ शरीरं त्यक्तं ममलपविं शिवसेव ॥६४॥
या॥ तदा देववरोत्सृष्टा पुष्पवृष्टिरभून्नृप॥ विमानवरमारुह्य देवेंद्रोपि समागतः॥ देवेंद्रेण
तदा दत्तं विमानं तुभ्यमुत्तमं॥ तदारुह्य स्वर्गलोके गतं तेन सह त्वया॥ तत्र मंदारसंवीते क्रीड

स्थानमभूत्तव॥ तत्रैव तत्संतोषार्थं रंभा नृत्यं चकार च॥ देवेंद्रः प्रत्यहं तुभ्यं चकाराभ्यर्चनं मुदा॥ तदन्ये
पि सुरा नित्यं पूजां कुर्वंति सादरं॥ कल्पवृक्षैश्च पुष्पाणि सुगंधीन्यमलानि च॥ स्वत एव समानीय
दत्तानि प्रत्यहं मुदा॥ एवमेवानिशं तत्र मोदमानेन हि त्वया॥ वत्सरायुतपर्यंतं संतोषेण स्थितं पु
रा॥ ततो भूचक्रनाथस्य संभूतमुदरे त्वया॥ महदैश्वर्यमनिशं भुक्तमीशप्रसादतः॥ शिवस्यैव प्र
सादेन तवशोकापहारकः॥ उत्तमांगाद्दहं जातो वंशवृद्धिकरो नृप॥ इदं शिवप्रसादेन मया ज्ञातं नृपा
धिप॥ यथाज्ञातं तथैवोक्तं विपरीतं न किंचन॥ तवास्त्यगणितं सर्वं द्रव्यं संतिरत्नानि भूपते॥ शिवाल
शै यस्य निर्माणं कुरु रत्नविजृंभितं॥ कुरु बिल्ववनं रम्यं शिवोन्मोषय सर्वदा॥ शृणु शैवपुराणानि सर्वदा
नृपसत्तम॥ कुरु यत्नेन संप्रीतो लिंगपूजामहर्निशं॥ पंचाक्षरजपं नित्यं कुरु पापौघनाशकं॥ बिल्व
पत्रैर्महादेवमर्चय स्वानिशं मुदा॥ कुरु यत्नेन सततं लिंगस्यैव निरीक्षणं॥ भस्मधारणसंसक्तः कु
रु रुद्राक्षधारणं॥ गृहाण मोक्षदां नित्यं शैवदीक्षां महापहां॥ शिवप्रीत्यर्थमनिशं वनेपं चाग्निम

ध्यगः॥ शिवप्रसादपर्यंतं तपः कुरु नृपोत्तम॥ प्रसन्ने सति गौरीशे का शीघ्रात्तिर्भविष्यति॥ कामी
प्राप्स्यन राधीग्रामोक्षप्राप्तिर्भविष्यति॥ कथं तत्र्यमतियत्नेन मया राज्यस्य पालनं॥ न राज्यविषये
दुःखं त्वया कार्यं नराधिप॥ तवद्वूद्वारी रक्ष्य नाहं तूष्णीं मवस्थितिः। सर्वभावेन सततं कुरु शंक
रपूजनं॥ शंकरं शंकरं नित्यं निःशंकं समुपाश्रय॥ शंकरस्तारको नूनं भविष्यति न संशयः॥ अत्या
श्चर्यं तद्वचनं श्रुत्वा सभपस्तदनंतरं॥ शिवलिंगाढ्यं पंचकेरलं रत्नभविराजितं॥ हेमप्राकारमसकं शि
वलिंगार्चनो नृपः॥ शिवलिंगाढ्यपत्रं तेचकारो न्नतमादरात॥ ततो रत्नमयं लिंगं तस्मिन्नेव शिवा
लये॥ तेन संस्थापितं लिंगं दिव्यं भूपेन सत्कलार्थदं॥ तस्मिन्मणिमये लिंगे विश्वव्यापी सदाशिवः
नित्यं सन्निहितः सांबः पूजां गृह्णाति सादरं॥ प्रत्यहं स्वर्णपुष्पाणां सार्धकोटित्रयं नृपः॥ ददाति शं
भवे प्रीत्या लिंगरूपाय सादरं॥ त्रिकालमप्रमादेन नृपस्तल्लिंगपूजनं॥ करोत्यद्यापि शैवाश्च बहव
स्तेन पोषिताः॥ बिल्ववृक्षाश्च बहवः स्थापितास्तेन भूभुजा॥ तद्बिल्वतरुमूलेषु लिंगानि स्थापिता

न्यिव॥ बिल्वकंटकतीक्ष्णाग्रैर्विद्धहस्तोपि भूपतिः॥ स्वयमेवानयत्यद्धा बिल्वपत्राणि शंभवे॥ चंदना
गरुकस्तूरीविलेपनरतोपि सः॥ त्यक्त्वा तद्भस्मना नित्यमंगलेपं करोति च॥ प्रियारत्नमालोपि
भूपालस्त्यानि सर्वथा॥ त्यक्त्वा रुद्राक्षमालाभिश्चकारांगविभूषणं॥ नारीजप न मिष्टेषु शुष्येपि
नृपतिस्तदा॥ न संत्यक्त्वा भस्मशय्यायां तिष्ठत्यनिशमादरात॥ गानप्रियोपि नृपतिस्त्यक्त्वा गानादि
सदा॥ शैवानेव कथां भूपः शृणोति प्रीतमानसः॥ शैवदीक्षापि यत्नेन गृहीता शैवसत्तमात॥ शैवव्र
तानि सततं क्रियंते तेन सादरं॥ २००॥ पूजयत्यतियत्नेन शैवमेवानिशं मुदा॥ शैवमेवोत्तमं तंत्रं जप
त्यनुदिनं नृपः॥ अर्थं शिवप्रसादेन रात्वा सर्वोत्तमं शिवं॥ अबाल्यमतियत्नेन शिवपूजापरोभ
वत॥ नित्यं मृन्मयलिंगानां सहस्रं पूजयत्ययं॥ शैवद्विजार्बुदस्यापि ददात्यन्नं सदा नृपः॥ काश्यां प्र
त्यहमागत्य विश्वेश्वरं नृपः॥ पूजयत्यतियत्नेन रत्नाद्यैः शुद्धसाधनैः॥ ततः सादरमागत्य श्री
मत्पशुपतीश्वरं॥ बिल्वादिभिः समभ्यर्च्य नत्वा वीरेश्वरं ततः॥ नित्ययात्रादिकं कृत्वा शैवानभ्यर्च्य

शि०स्य ॥६६॥

सादरं॥ ततः स्वनगरं याति प्रजापालनतत्परः॥ रत्नलिंगान्यनेनैव काश्यां मणितानि हि॥ स्था-
पितान्यतियत्नेन काशीभैरवसन्निधौ॥ शिवपूजाप्रभावेन सर्वलोकेषु सर्वदा॥ अविघ्नितगति यी
ति सोयं कामगया नगः॥ न शिवाराधनादन्यल्लोके सर्वार्थसाधकं॥ न शिवात्परमो देवः सर्वाभी-
ष्टप्रदायकात्॥ सभासदा ऊचुः॥ कोयं पूर्वभवे ब्रह्मन् किमनेन कृतं पुरा॥ प्राप्तानेन कथं काशी
देवानामपि दुर्लभा॥ संप्राप्तापि कथं काशीत्यक्ता मोक्षप्रदायिनी॥ इदं विचार्य सकलं वद संतोष-
कारणं॥ ब्रह्मोवाच॥ अयमासीत्पुरा विप्रः शिवव्रतपरायणः॥ शिवैकदेवः सततं हिमवच्छिखरा-
श्रयः॥ तत्र श्वासानिलान्सर्वान्निरुध्य दृढमानसः॥ पंचाग्निमध्यगो नित्यं चकारोग्रमयं
तपः॥ सहस्रयुगपर्यंतं तथा कृत्वा तपस्ततः॥ चकार युगपर्यंतं धूमपानमधोमुखः॥ ततः
समुद्रपर्यंतं पृथिव्याश्च प्रदक्षिणं॥ सहस्रवारं यत्नेन कृतमासीदनेन हि॥ ततः कृतमनेनै-
व श्रीशैलस्य पृथक् मुदा॥ प्रदक्षिणं शिवप्रीत्यै शतवारं प्रयत्नतः॥ ततः श्रीशैलशिखरे

श्रीः॥ ॥६६॥

निराहारेसंणेततं॥ तपश्चकार यत्नेन सार्धकोटियुगावधि॥ ततः स तपसो भीमान्निवृत्तः शोक-
कर्शितः॥ चकार दुःखं बहुधा प्रलपन्पतितो भुवि॥ न श्रीशैलाख्यं क्षेत्रं तपःसिद्धिकरं परं॥ अ-
त्रापि तपसः सिद्धिर्न जाता किं करोम्यहं॥ काशीप्राप्त्यर्थमेवात्र तपो घोरतरं कृतं॥ तथापि का-
शी न प्राप्ता नेशः प्रत्यक्षतां गतः॥ यद्यत्र म्रियते नूनं मोक्षो मम भविष्यति॥ तथापि काशी
दृष्टव्या सुराणामपि दुर्लभा॥ काशीप्रयाणकालेषु बहुधर्मा नरैः सदा॥ कर्त्तव्यास्ते न केनापि
शक्यते कर्तुमन्वहं॥ कृतेनानेन तपसा विहंगस्याथवा तनुं॥ यदि दास्यति विश्वेशस्तदा काशी
प्रयाम्यहं॥ येन केनापि रूपेण काशीप्राप्तिरपेक्षिता॥ तादृशं भाग्यमेतस्य कुजीवस्य भविष्य-
ति॥ शिवमुद्दिश्य बहुधा पूर्वं पूर्वभवेष्वपि॥ तपस्तप्तं शिवो मह्यं न प्रसीदति सत्वरं॥ कथं वा
दुरदृष्टानि मय्यमे याति संतिमे॥ काशीप्राप्तिर्यतो नित्यं विघ्नितैवाधितिष्ठति॥ किं कर्मका-
र्ययत्नेन दुरदृष्टनिवारकं॥ किं करोमीति निपतन्भुवि निर्विण्णमानसः॥ एतस्मिन्नंतरे जाता

पि

शि०रह
॥६७॥

तदा तत्राशरीरवाक्॥ आनंदामृतदा रम्या सर्वदुःखविनाशिनी॥ इतः सहस्रजन्मांते काशी संप्रा
प्स्यते त्वया॥ विहंगस्यैव रूपेण खेदं माकुरु सर्वथा॥ प्रतिजन्मनि सर्वेशं शंकरं तपसा सदा॥ स
माराधयतीव्रेण काशीप्राप्त्यर्थमादरात्॥ इति संतोषदं रम्यमशरीरवचस्तदा॥ श्रुत्वा संतोषमग
मज्जहौ दुःखं ततः परं॥ सहस्रजन्मनां चांते काशीप्राप्तिर्ममास्त्विति॥ तपो घोरतरं भूयश्चकार द्वि
जसत्तमः॥ तत्र कृत्वा तपो घोरं किंचित्कालं तपः परं॥ श्रीशैलान्यभुवं प्राप्य तनुं तां विजहौ द्विजः॥
ततो ऋषिकुले रम्ये जन्म संप्राप्य पावनं॥ भूयो घोरतरं चक्रे तपः शिवपरायणः॥ सहस्रजन्म
पर्यंतमेवमेव पुनः पुनः॥ ऋषिजन्मैव संप्राप्य तपः कृतमनेन हि॥ ततः काश्यां बिल्ववृक्षे विहं
गस्यैव कस्यचित्॥ गर्भात्संप्राप जन्मायं सर्वाभिलषितं मुदा॥ निर्गतस्तीव्रमनघो यदायं विहं
गोदरात्॥ तदापपात रुधिरं किंचिच्छैवस्य मूर्धनि॥ तदा प्राप तदृष्ट्वा रुधिरं शैवपुंगवः॥ यस्यैतद्रुधि
रं तस्य काश्यां मास्त्विति संततिः॥ उत्पन्नो विहगस्यैव रूपेणापि सदाशिवं॥ जातिस्मरो बिल्व

श्रीः॥
॥६७॥

पत्रैरभ्यर्चयति शंकरं॥ ततः काश्यां भृष्टेम्हृतो दैवात्ततः परं॥ स्थित्वात्रैव ब्रह्मलोके भूपतिश्चाभ
वत्ततः॥ अयं कदाचिदायाति मामिंद्रादिसुरादपि॥ संभावयितुमेवात्र शिवलिंगार्चनप्रियः॥ एता
दृशानां शैवानां विश्वेशः करुणानिधिः॥ काश्यां मरणमात्रेण निर्वाणं हि प्रयच्छति॥४१॥ अतः
परमयं पुत्रे राज्यं विन्यस्य सादरं॥ काश्यां शिवप्रसादार्थं करिष्यति तपो मुदा॥ एतस्य तनुरत्येक्त
नुर्नान्या भविष्यति॥ एतच्छरीरविगमे मुक्तिरस्य भविष्यति॥ धन्योयं सर्वथा धन्या वयमप्यस्य
दर्शनात्॥ ईदृशस्य हि शैवस्य दर्शनं दुर्लभं ध्रुवं॥ ईश्वर०॥ इति ब्रह्मवचः श्रुत्वा ते तमेव नृपोत्त
मं॥ प्रणम्य पूजयामासुः परमं विस्मयं गताः॥ तत्पूजितो नराधीशो ब्राह्मणान्पूजितः पुनः॥ ययौ
स्वनगरं रम्यमिलावत्याभिधं मुदा॥ पुरा पशुपतीशस्य सन्निधाने शिवालये॥ कश्चिदासीद्द्वि
जः श्रेष्ठः सर्वदा शिवपूजकः॥ तस्यैव निकटे कश्चिच्छकुंतः कणभक्षकः॥ न्यवसद्भूरितपसा काशीं
प्राप्य शिवात्मिकां॥ स कदाचिद्द्विजस्यांके निविष्टो दोहदाकितः॥ तं विलोक्य कुशाग्रेण जघा

शि०स्य
॥६८॥

नद्विजसत्तमः॥ तदानीमेवसम्भूतः शकुंतःप्रलपंल्लपः॥ तद्गर्भान्निर्ययौसूक्ष्मं शकुंतोदुःखकर्शि
तः॥ सकुंतोजातमात्रः प्रलपन्नतिदारुणं॥ गलदश्रुकणः शीघ्रंतमुवाचद्विजंतदा॥ द्विजाध
मकथंमातानिहताममसा त्वया॥ बालपुत्रान्वद्भर्त्रीपतिदेवापतिव्रता॥ बालानांपोषणंम
त्वाकृत्वमतिपतितः॥ तस्यैवजीवनंसम्यग्बालानांभवतिध्रुवं॥ अद्यैवभर्त्तुरेतस्यामृतिर्नूनंभवि
ष्यति॥ पोषणेनविनानास्तिवृद्धानामपिजीवनं॥ मदन्योपिमरिष्यंतिवास्याएवहिबालकाः॥
तेषांमातृविहीनानांकथंस्यात्प्राणधारणं॥ वयंधन्याभविष्यामः कात्र्यंमरणमात्रतः॥ तवैवपात
नाघोराभविष्यतिनसंशयः॥ अस्माभिःपूर्वपूर्वेषुजन्मसुप्रबलंतपः॥ कात्र्यांतनुवियोगार्थं
कृतमुद्दिश्यशंकरं॥ काश्यामंतर्गृहेशैवेजीवहत्याकृतात्वया॥ तेनपापेनदुष्टात्मायातनातेभवि
ष्यति॥ अनेकयुगपर्यंतंघोरदुःखौघसंश्रयं॥ पैशाचींतनुमाश्रित्यवसदुर्भगदुर्मुख॥ क्षुत्तृद्द
रीतःसततंनिर्जनंवनमाश्रितः॥ निवससदुराचारपिशाचतनुसंश्रयः॥ एवंप्रलपमानंतं

श्रीः॥
॥६८॥

दृष्ट्वात्रस्तोविहंगमं॥ विलोक्यतंद्विजंवाथबभाषेस्वनंतदा॥ एतस्यमातानिहताकिमर्थंसाद्विजत्वया
कृत्वाकात्र्यंवृथापापंकिमर्थंक्लीयतेत्वया॥ एतन्मरणमात्रेणपतरस्याःसुतादरः॥ मरिष्यत्यद्य
वाश्वोवासंदेहोनात्रवर्त्तते॥ पिशाचतनवःप्राप्यामृततज्जीवसंख्यया॥ त्वयावनेनसंदेहोनिर्जनेनि
र्जनेसदा॥ किंचकात्र्यांत्वयापूर्वंपरार्थमतिपत्ततः॥ द्रव्यलोभेनदुष्टात्मन्रुद्राध्यायजपःकृतः॥
तेनरुद्रपिशाचत्वंत्वयादुःखदमन्वहं॥ प्राप्तव्यंनात्रसंदेहोभैरवस्यापितर्जनैः॥ रुद्राध्यायजपंकात्र्यं
यःपरार्थंकरिष्यति॥ सवेदराशिपूर्णोपिपिशाचोभवतिध्रुवं॥ अल्पस्याप्यस्यधर्मस्यविक्रेत्यासर्व
थाद्विजः॥ भविष्यतिनसंदेहःपिशाचःपर्वताकृतिः॥ अनंतफलदंधर्मंरुद्राध्यायजपार्जितं॥ कःप्र
यच्छतिमूढात्मापरस्मैधनलोभतः॥ शरीरमपिदेयंस्यान्नदद्याद्धनलोभतः॥ फलंनदेयमन्यस्मैरुद्रा
ध्यायजपार्जितं॥ श्रीरुद्रजपमन्यार्थंयःकरोतिधनेच्छया॥ सपतत्येवनरकेयावदाचंद्रतारकं॥ पुराधन
निधिर्नामकश्चिद्ब्रह्मकपालकः॥ वेदशास्त्रपुराणज्ञोब्राह्मणोभवदुत्तमः॥ तेनघोरतरंतप्तंतपःपूर्व

शि०स्य ॥६९॥ भवेसदा॥ हिमवद्गिरिशृंगाग्रे काशीप्राप्त्यर्थमादरात्॥ कोटिजन्मावधिप्रीत्या हिमवंतमुपाश्रितः॥ सच
कारतपोघोरं काशीप्राप्त्यर्थमेवहि॥ ततः शिवप्रसादेन धनमार्जित्य धर्मतः॥ काशीमाप्तुमनास्तेन तुरंग
धनसंवृतः॥ संप्राप्य काशीं विश्वेशं संपूज्य विधिवद्द्विजः॥ मेने कृतार्थमात्मानं शिवैकशरणः सदा॥
ततः स्वकं धनं सर्वं द्विजेभ्यो दातुमुद्यतः॥ प्रणम्य विप्रान्नम्रो नुवाच विनीतवत्परान्॥ धननिधिरुवाच
कान्यापापराधमनघो। रुद्राध्यायजपो द्विजः॥ कथं कार्यः प्रयत्नेन वदास्माभिर्धनेच्छया॥ परार्थं धनलो
भेन रुद्राध्यायजपः कृतः॥ द्वित्रैस्तैस्तु तनुः प्राप्ता पैशाची दुःखदा सदा॥ किं धनेनाद्य बहुना किं का
र्येतेन सादरं॥ किमेतद्धनपुष्टेन शरीरेणापि तद्वदा॥ अस्माभिः पूर्वपूर्वेषु जन्मसु प्रत्यहं तपः॥ कृतं तेने श्रीः॥
व काशीयं प्राप्ता माहेश्वरी शुभा॥ अतः परं द्विजास्माभिः कर्तव्यं नास्ति सर्वथा॥ न धनेच्छा न शरीरेच्छा ।६९॥
न चान्येच्छा न संशयः॥ अतः परं द्विजा स्वल्पकाले नैवात्र सर्वथा॥ विश्वेशकृपया सम्यक् तनुत्यागो भ
विष्यति॥ ततो विश्वेश्वरः स्वांके निवेश्यास्मान्प्रमादरात्॥ शैवं पंचाक्षरं दिव्यं तारकं दास्यति ध्रुवं॥ त

तोनेकमहादुःखसंगत्यागो भविष्यति॥ ततः प्राप्यमस्माभिः स्वरूपं प्रकास्यहि॥ धर्मेणैव सदा स्थे
यं त्वया कार्यः प्रयत्नतः॥ मोक्षं दास्यति विश्वेशो देहांते सर्वथा द्विज॥ इत्युक्त्वा ते द्विजाधीशा निवृत्ता ध
नलोभतः॥ शिवलिंगार्चकास्तस्थुः पंडुपर्णजलाशिनः॥ ततः स विप्रः स्वधनं विलोक्यात्यंतदुः
खितः॥ रुरोदैवं धनत्यागो पात्रे नासीदिति द्विजः॥ तदानीमागतः कश्चिद्ब्राह्मणो वेदपारगः॥ मा रोदीः
किमभीष्टं ते तत्करोमीति सोब्रवीत्॥ इत्युक्तं तं द्विजश्रेष्ठं प्रणम्य द्विजसत्तमः॥ कृतांजलिपुटो नम्रो
बभाषे वचनं मुदा॥ द्विजवर्योत्तमाश्वानामस्ति कोटियुतं मम॥ मत्तमातंगकोटीनामस्ति ल
क्ष चतुष्टयं॥ सुवर्णरत्नरवितत्ताम्राणां तु द्विजोत्तम॥ संख्या नास्ति न संदेहो गवामपि ममैव हि
इदं धनं मया देयं मदर्थं यः करिष्यति॥ रुद्राध्यायजपं सम्यक् तस्मै नास्त्यत्र संशयः॥ एकवारं कृते
नापि रुद्राध्यायजपेन हि॥ एकनैव द्विजेनेदं प्राप्तमेव धनमुत्तमं॥ इदं धर्मार्जितं वित्तं श्रीरुद्राध्या
यजापके॥ निधाय तदनुप्रीतो भवाम्यत्र न संशयः॥ इत्युदीरितमाकर्ण्य स एव द्विजपुंगवः॥ उवा

शि०म्प ॥३०॥

वक्ष्य वनं चारुतरं धननिधिं प्रति ॥ एकवारं द्विजश्रेष्ठ त्वदर्थं सावधानतः ॥ रुद्राध्यायजपं सम्यक्करि
ष्ये मुक्तिमंडपे ॥ इत्युक्त्वा तदनुज्ञातो मुक्तिमंडपमाश्रितः ॥ एकवारं चकाराथ रुद्राध्यायजपं द्विजः
३० ॥ समाप्ते तु जपे तस्मै धनं धननिधिर्मुदा ॥ ददौ बहुविधं सर्वं गजाश्वादिकमादरात् ॥ ततो धन
निधिः काश्यां अल्पैरेव दिनैर्मृतः ॥ अवाप शिवसायुज्यं शिवस्यैव प्रसादतः ॥ द्विजोपि स धनग्राहीत
नः संतप्तमानसः ॥ वशिष्ठं प्रणिपत्याथ कृतांजलिपुटो वचः ॥ परार्थं धनलोभेन रुद्राध्याये ज
पः कृतः ॥ मया पूर्वं प्रयत्नेन धर्मशास्त्रविचक्षण ॥ परार्थं कृततद्रुद्रजपसंचितपातकं ॥ केन नश्यति
किं वात्र साधनं वद सादरं ॥ वशिष्ठ० ॥ रुद्राध्यायजपं पुण्यं परार्थं यः करिष्यति ॥ स पितृभिर्वा भव
त्येव नास्ति तत्पापनिष्कृतिः ॥ वेदपारायणैर्धर्मैरनंतैरपि सर्वदा ॥ उग्रानंततपोभिश्च तत्पापं न विन
श्यति ॥ काश्यां रुद्रजपं कृत्वा परार्थं यस्तु जीवति ॥ धिग्धिग्धिक् तस्य धिग्जन्म धिग्धिग्धिक् तस्य जीव
नं ॥ परार्थं रुद्रविक्रेता भवानप्यतिदारुणं ॥ द्विज रुद्रपिशाचत्वं प्राप्नोष्यत्र न संशयः ॥ महापर्वतसं

श्रीः ॥ ॥३०॥

काशं शरीरं ते भविष्यति ॥ सूक्ष्मग्रासदरी वक्त्रं भविष्यति तव स्फुटं ॥ सहस्रयुगपर्यंतं क्षुत्पिपासातुरो
निशं ॥ वसिष्यति न संदेहो निर्जने निर्जले वने ॥ कारुण्यामेतच्छरीरं ते दैवात्स्वत्कंपदित्वया ॥ तदा रुद्र
पिशाचत्वं प्राप्य दुःखमवाप्स्यसि ॥ कोटिशस्तव पार्श्वस्थाः कालभैरवकिंकराः ॥ दीर्घतप्तोरुखड्गाये
स्ताडयिष्यंति दुर्मदाः ॥ सहस्रयुगपर्यंतमेवं स्थित्वा ततः परं ॥ प्राप्नोषि दुःखदां नित्यं कालभैरवयात
नां ॥ एकवारं कृतोन्यार्थं रुद्राध्यायजपो द्विज ॥ एवं दुःखप्रदः सोयं किं पुनर्बहुधा कृतः ॥ रुद्राध्यायो
न जप्तव्यः कांम्यमुद्दिश्य सर्वथा ॥ स्वार्थेपि स्वार्थमनघैः कदाचिदपि यत्नतः ॥ शिवार्थमेव कर्तव्यो
रुद्राध्यायजपः सदा ॥ निष्कामैरनघैः शुद्धैर्मर्त्यैः शिवार्चितैः ॥ रुद्राध्यायस्य माहात्म्यं ब्रह्मणा
पि न बुध्यते ॥ किंतु तच्छंकरेणैव ज्ञायते तत्त्वतो ध्रुवं ॥ रुद्राध्यायजपः सम्यक्कर्तुमेव न शक्यते ॥ ब्रह्मणा
पि न संदेहः सत्यमेवोच्यते मया ॥ रुद्राध्यायजपप्रोक्ता नियमा बहवो मताः ॥ ते कथं नियमाः कर्तुं
शक्यंते मादृशैर्द्विजैः ॥ यथाविधि कृतः सम्यक् रुद्राध्यायजपो द्विजैः ॥ मोक्षप्रदो भवत्येव पापा

शि०स्क
७१

रण्यद्दावानलः॥ रुद्राध्यायजपं कर्तुं न ज्ञानासि ततं त्वया॥ कथमन्यार्थमनघ रुद्राध्यायजपः कृतः॥
रुद्राध्यायजपं कर्तुं यथाविधि यथाक्रमं॥ मयापि प्रयत्नः क्रियते न भवत्येव सर्वथा॥ अष्टकोटिमहान्या
साः संति शंकरवेदिताः॥ रुद्राध्यायस्य विमलास्तज्ज्ञानं तु कथं भवेत्॥ इति तद्वचनं श्रुत्वा द्विजो दुः
खादिकर्षितः॥ जगाम निलयं स्वीयं नानाधनविराजितं॥ तं दृष्ट्वा मुनयः सर्वे भानुप्रत्ययतिसादरं
प्रशंसंति च पापिष्ठे स्यनिंद्यं प्रवदंति च॥ सर्वसन्निहितं क्रूरं नायं पश्यन्ति भैरवं॥ अनेन कथमन्या
र्थे कृतो रुद्रजपो मुदा॥ अत्रायास्तिमप्यन्नं बहूयास्यं न सर्वथा॥ कथं बहुविधं द्रव्यं गृहीतं बहु सादरं
अनेनान्यार्थमनघः कथं रुद्रजपः कृतः॥ स्वल्पग्रहे जपोऽप्यत्र कर्तुमेव न शक्यते॥ कथं कार्यमपि
स्थित्वा क्रियते पातकं जनैः॥ न श्रुता श्राप द्रोणूनं घोरा भैरवयातना॥ अयं हि लोकस्ते काश्यामेकः
पातकसंश्रयः॥ कदा गच्छत्ययं नाम्नी काशीमन्यत्र वा त्रपी॥ पापिष्ठाल्लोकनानुष्ण्यं नश्यत्येव प्र
तिक्षणं॥ कदा काशीमयं त्यक्त्वा गच्छत्यन्यत्र सत्वरं॥ एवमुक्त्वा स्थिताः सर्वे काश्यामेव ततो द्विजः

श्री०भा
७१

DR BHAU DAJI MEMORIAL

मृतो रुद्रपिशाचत्वं प्राप घोरं क्षणेन सः॥ हिमवत्पर्वताकाशात् तनुस्तस्याभवत्तदा॥ सहस्रमात्रमभवद्दद
नं चभयानकं॥ असत्यं नैव जानंति भाविभैरवयातनां॥ यः कालकूटं तद्देवकोटिशो वीराः कालभैरवकिंक
राः॥ शास्त्रास्त्रैस्ताडयंत स्तं पीडयंतः स्थितः सदा॥ क्षुत्पिपासातुरो नित्यमिदानीमपि तिष्ठति॥ अग्रे भ
विष्यत्यनिशं भैरवस्य पियातना॥ काशीमन्यपुरीतुल्यां मत्वा कुर्वंति पातकं॥ असत्यं नैव जानंति भा
विभैरवयातनां॥ यः काश्यां पातकं कृत्वा मृतोऽन्यत्र भविष्यति॥ तेन घोरतरा नित्यं प्राप्यायामी यया त
नां॥ पुनर्जन्मांतरं प्राप्य काशीं प्राप्य मृतस्ततः॥ प्राप्नोत्यघोरामनिशं भैरवस्यापि यातनां॥ काश्यां तु कृ
तपापानां दुःखस्यांतो न विद्यते॥ हा दुराचारसंपन्नाः काश्यां तिष्ठंति किं वृथा॥ तादृशानां तु दुष्टानां का
शीवासो न युज्यते॥ गच्छंतु ष्टविहायैनां काशीमन्यत्र दुर्भगा॥ येन केनापि रूपेण जीवः शिवमतः स्थितः
पूजनीयः प्रयत्नेन देवगंधर्वमानवैः॥ अयं शिवमयः पत्री पूर्वं पूर्वमभवद्यपि॥ एतद्दुःखप्रदानेन प्राप्य
भैरवयातनां॥ अनेन पूर्वं बहुधा काशीप्रास्यधर्मादरात्॥ तपः कृतं महादेवमुद्दिश्य हिमव

शि०रह
५२

द्रिरे॥ तपोनिष्ठममुं दृष्ट्वा हिमवान्कंपमागतः॥ देवाश्च कंपितानेन तपोनिष्ठेन सर्वदा॥ चचाल च
निरेवैनं दृष्ट्वैव तपसां निधिं॥ समुद्राः क्षुभिताः सर्वे क्षुभितोहमिति स्फुटं॥ सहस्रकोटिजन्मानि सं
हृानि तपसा भृशं॥ गतानि काशीसंप्राप्त्यै कृतेनास्य बलेन हि॥ अयं भूचक्रनाथोभत्सूर्यकोटिकरस्फु
या॥ अनेन मत्तमातंगाः स्थिताश्चैतद्गृहांगणे॥ उच्चैःश्रवसमानाश्वाः कनकाभरणान्विताः॥ अन
तानन्तमप्यन्नं पालितानित्यमनेनैव हि लीलया॥ प्रत्यहं शिवभक्तानां सार्धार्बुदचतुष्टयं॥ दिव्यान्न
दिव्यवस्त्राद्यैरनेनैव हि तोषितं॥ सार्धार्बुदानि लिंगानि स्थापितानि हिमालये॥ अनेनैव हिरण्या
नि मोक्षदानि शुभानि वा॥ अनेनैव शिवस्थानं श्रीशैले कृतमुत्तमं॥ हेमरत्नमयं दिव्यं रत्नशृंगविराजितं
तत्रैव हेमप्राकारं चकारैकं मनोहरं॥ स्वर्णकोटि बृहच्छृंगं रत्नपंक्तिविराजितं॥ तस्मिन्नेव शिवस्थाने
लिंगं रत्नमयं शुभं॥ स्थापयामास विधिवन्मोक्षदं रत्ननामकं॥ तत्र रत्नमयं दिव्यं चकार वृषभेश्वरं॥
अयमेव शिवप्रीत्यै शिवपूजनतत्परः॥ गोदानानि चकारायं तत्रैव विधिपूर्वकं॥ कोटिशः शिवतुष्ट्य

श्रीः॥
५२

र्थं रत्नदानानि चानघ॥ नित्यं पार्थिवलिंगानां सहस्रं सार्धमुत्तमं॥ कृत्वा संपूज्य विधिवद्दपमश्नात्य
यस्ततः॥ अनेन स्वर्गलोकेपि संचारो बहुधा कृतः॥ बहुधा सम्यगेवास्मिन्देवेंद्रेणार्चनेकृते॥ तूर्णं
करोति देवेंद्रमयमेव शिवार्चकः॥ करोति सेवामेतस्मै देवेंद्रोपि कृतांजलिः॥ रुद्राद्याश्च सुराः सर्वे
कृतांजलिपुटास्तदा॥ कुर्वंति सेवामेतस्मै कंपमाना नतानना॥ सर्वभाग्यसमेतोपि नित्यमुद्धू
लनप्रियः॥ चकारायमतिप्रीत्या भक्त्या रुद्राक्षधारणं॥ भस्मन्येवानिशं शय्यामयं प्रत्यहमादरा
त्॥ करोति सुखशय्यायामपि सर्वदा शिवचिंतकः॥ शिवेति नामविमलं जपत्ययमहर्निशं॥
नृत्यत्ययं शिवस्याग्रे विचित्रं नृत्यविशारदः॥ नित्यं राजतलिंगानां सार्धकोटित्रयं मुदा॥ ददाति शिव
भक्तेभ्यः सदक्षिणमयं द्विज॥ दिव्यं मणिमयं लिंगमेकमस्याभवत्पुरा॥ तस्मिन्नृत्यति देवेशः शि
वो गौरीमनोहरः॥ अयं शिवैकशरणो विष्णुमामपि सर्वथा॥ कदाचिदपि गर्वेण गणयत्येव न ध्रु
वं॥ अनेनैतादृशी पूजात्रांकारस्य कृता मया॥ शिवान्यदेवाः शक्यं ते कर्तुं यवसवत्सदा॥ द्विज०

शि०स्य
७२

ईदृशो न शकुं तस्य रूपं प्राप्तं कथं वद॥ सर्वज्ञोसि यतो ब्रह्मन् भवन्ने शंकरपूजया॥ ब्रह्मोवाच॥
अनेन काशीयात्रार्थमुद्युक्तं पूर्वमादरात्॥ श्रुताश्च काशीयात्रायां नियमाः श्रुतिचोदिताः॥
श्रुत्वा तान्नियमान्कर्तुमदक्षः शोककर्शितः॥ रुरोद विविधं वत्स काशीप्राप्त्यानतिमुहुर्मुहुः॥
नियमेन विना नेयं काशीयात्राफलप्रदा॥ नियमाचरणं कर्तुं मनुष्यैर्नैव शक्यते॥ धर्मो हि नि-
यमभ्रंशात्सर्वो निष्ठो भविष्यति॥ धर्मनाशेन रोरित्तो भविष्यत्येव सर्वथा॥ तपःक्लेशके-
तं पूर्वं मया यद्दुःखं धा मुदा॥ तत्सर्वं नियमभ्रंशात् क्षणेनैव विनश्यति॥ न मानुषेण देहेन काशी-
प्राप्तो मया ततः॥ कर्तव्या नियमाचारा दक्षेणात्र न संशयः॥ काशीप्राप्तिर्मो हन्त्याकाश्यं
च मरणं ततः॥ तच्च स्वविहितेनैव धर्मेणैव रक्षितस्य मे॥ धर्मास्तु विहिताः शास्त्रे मनुष्याणां न
पक्षिणां॥ ततः पक्षितनुं लब्ध्वा काश्यां त्यक्षे तनुं ततः॥ काश्यां मरणमात्रेण मह्यं शुद्धाय शं-
करः॥ शैवं पंचाक्षरं दत्वा मोक्षं दास्यत्यसंशयं॥ इति सम्यग्विचार्यायं त्यक्त्वा पूर्वतनुं ततः॥ अ-

श्रीः॥
७३

नैवशाकुनिर्जातो योगमार्गविचक्षणः॥ इदानीं मरणासन्नः प्राणान्मुंचत्ययं खगः॥ सायुज्यरूपमो-
क्षश्च भविष्यति शिवेच्छया॥ फलितानि तपांसि स्युर्दानान्यद्भुतानि च॥ काश्यां मरणमापन्नः
शाकरोयं यतो मुदा॥ धर्मान्फलोन्मुखः सर्वे पूर्वपूर्वभवार्जिताः॥ काश्यां मरणमापन्नं यतो-
नेनाद्य मुक्तिदं॥ सर्वमनोरथाः पूर्णाः काश्यां मरणमात्रतः॥ पापलेशविहीनोयं धन्यः शंकर-
संमतः॥ ईदृशं मरणं काश्यां दुर्लभं मुक्तिसाधनं॥ अनेन धर्मसंघानां परिपाकोयमद्भुतः॥ धन्या-
नां मरणं काश्यामेवमेव हि जायते॥ शिवार्थं कृतधर्माणां शैवानां मोक्षदायकं॥ एवमुक्त्वा द्विजं
शाह्यान त्वा पशुपतीश्वरं॥ कालभैरवपूजार्थं ययौ ब्रह्मा ततः परं॥ ततः समरणप्राप्तस्तस्मै पंचा-
क्षरो मया॥ दत्तस्ततः स मोक्षं च प्राप देवर्षिदुर्लभं॥ पुरा पशुपतीशस्य कुंडे स्नानार्थमुत्तमे॥
युवा शैववरः कश्चित् आगतः सूर्यसन्निभः॥ जलमध्ये निविष्टं तं स्नानार्थं शैवपुंगवं॥ सुंदरं
मन्मथाकारं ददृशुर्नागकन्यकाः॥ ततस्तमतिवेगेन निन्युः शेषालयं च ताः॥ तं दृष्ट्वा सहसो-

थाय शेषो नत्वा कृतांजलिः॥ नानामणिगणाकीर्णमृदुसिंहासने शुभे॥ उपवेश्य ततश्चक्रे पूजां
तस्मै यथाविधि॥ ततः प्रसन्नवदनं शैवं वीक्ष्यासितासनं॥ उवाच वचनं वा रुशेषो नत्वा पुनः पु
नः॥ कुतः समागतः श्रीमन्देवः कः पूज्यते त्वया॥ सर्वदेवोत्तमः को वा तत्सर्वं वद सादरं॥
शैव उवाच॥ काशीति नगरी काचित्सर्ववेदेषु विश्रुता॥ नागलोकोपरि स्वच्छा तिष्ठत्येका शिवा
त्मिका॥ सा काशी सर्ववेदैश्च पूजिता सादरं सदा सा चानेन तपोधर्मफलप्राप्त्याहि दुर्लभा॥ त
तः समागतं नित्यं मया संपूज्यते शिवः॥ यन्नैव दा विजानंति स शिवः स्मर्यते सदा॥ यस्यांतं न विदु
र्देवा ब्रह्मविष्ण्वादयः सुराः॥ तस्यैव शंकरस्याहं लिंगं संपूज्यते मया॥ यल्लिंगपूजनं नित्यं सर्ववेदेषु
विश्रुतं॥ यन्मोक्षदं मनायासात्तदेव क्रियते मया॥ शिवोस्मत्कुलजैः सर्वैराबालैः पूज्यते सदा॥ शिवपू
जां विहायांबु पीयते न कदाचन॥ नित्यमस्मत्कुलस्त्रीणां व्रतं हि शिवपूजनं॥ शिवनाम निगायंति कल
कंठाः स्त्रियः सदा॥ बालाः क्रीडनकालेपि लिंगमृन्मयमुत्तमं॥ कृत्वा बिल्वदलैः शुद्धैः पूजां कुर्वंति

सादरं॥ ४०॥ लिंगमनोहरं हैलौ दृष्ट्वा प्रणमंति स्तुवंति च॥ नृत्यंति बहुधा बालाः शंभो शिव शिवे
ति च॥ नाहं भोक्ता शिवो भोक्ता शिवोस्मीति बालकाः॥ कुर्वंति भोजनं शुद्धं प्रतिग्रासेपि सर्वदा॥
शिवायानर्पितं भोज्यं भुज्यते न कदाचन॥ शिवायानर्पितं नव्यं वस्त्रं न परिधीयते॥ शिवायान
र्पितं दिव्यं चंदनं पुष्पमेव वा॥ नैवास्मदुपभोगार्थे क्रियते स्मत्कुलोद्भवैः॥ उद्धूलनं त्रिपुंड्रं च
तथा रुद्राक्षधारणं॥ सर्वपापहरं नित्यं क्रियते स्मत्कुलोद्भवैः॥ शैवमंत्रं विहायान्यो मंत्रो नैव हि
जप्यते॥ सर्वैरस्मत्कुलोत्पन्नैः शिवशास्त्रपरायणैः॥ शंकरध्याननिरताः सर्वेप्यस्मत्कुलोद्भवाः
शिवान्यस्य न कुर्वंति ध्यानं स्वप्नेपि सर्वथा॥ आबालवृद्धमप्यस्मत्कुलजैः शिवदैवतैः॥ शिवना
मान्यनामापि गृह्यते न कदाचन॥ अज्ञातलिंगतत्त्वस्य मोक्षो न भवति ध्रुवं॥ ततः कुरुष्व यत्नेन
तपो घोरतरं मुदा॥ इत्युक्तो विष्णुना ब्रह्मा ततः पंचाग्निमध्यगः॥ त्रिकोटियुगपर्यंतं चकारोग्रं
तपो मुदा॥ तदा तत्तपसा क्षुब्धाः सर्वभूताः सुरास्तथा॥ त्वकंपे भूमिरखिला सशैलवनकान

शि०रह ७५

ना॥ ततोनंतेषु बहुषु देवकल्पेषु शंकरः॥ आविरासील्लिंगरूपी तयोर्मध्ये सदाशिवः॥ तल्लिंगमन
लप्रख्यमनाद्यंतविधिहरी॥ दृष्ट्वा बभूवतुः शीघ्रं तत्तेजोनिहतप्रभौ॥ ज्वलद्दिग्गणकारं तल्लिंगप्रभया
दिशः॥ प्रदीप्ताः प्रभासैव जगद्व्याप्य स्थिता तदा॥ तदा विधिरुवाचैवं विष्णुं प्रतिहतप्रभं॥ कंपमानः स्व
यं धैर्यान्मा भैषीरिति सादरं॥ ज्योतिःस्वरूपममलं शिवलिंगमिदं शुभं॥ प्रलयानलसंकाशं संपूज्यं
सर्वसाधनैः॥ मूलाग्रभागौ लिंगस्य द्रष्टव्यौ चालियत्नतः॥ यद्दर्शनेन मोक्षोपि करस्थो यो भविष्यति
लिंगमूलं विदित्वैव शीघ्रमायाहि माधव॥ मया लिंगाग्रभागोपि दृष्ट्वा गम्यते ध्रुवं॥ इत्युक्त्वा हंसरू
पेण ययावूर्ध्वं विधिस्तदा॥ विष्णुर्वराहवपुषा पातालमगमत्ततः॥ विदार्य सप्तपातालान्वाराहवपुषा
हरिः॥ ययौ तीक्ष्णाग्रदंष्ट्राभ्यां वायुवेगमुपाश्रितः॥ ततो ददर्श विपुलं लोकाधारमवस्थितं॥ कूर्मं
जलमये लोके दृढपृष्ठमनाकुलं॥ तमप्यतीत्य सहसा प्रविश्य च महाजलं॥ सहस्रयुगपर्यंतं संचा
र जलमंडले॥ ततः श्रांतः क्वचिद्विष्णुः किंचित्कालं जले स्थित॥ पुनर्बभ्राम बहुधा बहुकालं जले ब

श्री॥ ७५

ली॥ तल्लिंगमूलममलमदृष्ट्वैव ततो हरिः॥ चिरकालेन संप्राप्तुं कामं न मनोरथः॥ तदा विधिरपि भ्रां
त्वा बहुकालमनाकुलः॥ सदा सर्वोर्ध्वलोकेषु तल्लिंगाग्रदिदृक्षया॥ लिंगाग्रभागममलमदृष्ट्वा शांत
विग्रहः॥ छिन्नचित्तोपि वंप्राप छिन्नवीर्यस्त्वरागः॥ ततो ब्रह्मा स्वकं रूपं समास्थाय शिवं मुहुः॥ प्र
णम्य बहुधा चक्रे स्तोत्रमेतदघापहं॥ ब्रह्मोवाच॥ नमस्ते देवदेवाय नमस्तेनंतमूर्तये॥ नमो लोकै
कनाथाय नमस्ते सर्वसाक्षिणे॥ नमस्ते निर्विकाराय नमस्तेनंतचक्षुषे॥ नमस्तेनंतहस्ताय
नमस्तेऽनंतरूपिणे॥ नमस्ते निर्गुणानंत नमस्ते सगुणप्रभो॥ नमस्ते जगदाधार नमस्ते विश्वभा
वन नमस्ते सत्वरूपाय नमस्ते लोकरूपिणे॥ नमस्ते सर्वरूपाय रूपातीताय ते नमः॥ नमस्ते शुद्ध
बुद्धाय नमस्ते परमात्मने॥ नमस्ते लिंगरूपाय नमस्ते विज्वरानघ॥ नमो वेदांतवेद्याय नमस्ते
वेदरूपिणे नमस्ते ज्ञानरूपाय नमस्ते ज्ञानदायक॥ नमस्ते निष्प्रपंचाय निरीहाय नमोस्तु ते॥ नि
र्द्वंद्वाय नमस्तेस्तु निर्मलायास्तु ते नमः॥ निरवद्य नमस्तेस्तु निरामय नमोस्तु ते॥ निष्कलंकन

मस्तेस्तु व्यापकाय नमोस्तु ते॥ नमस्ते यज्ञरूपाय यज्ञकर्त्रे नमोस्तु ते॥ नमस्ते भूरिरूपाय नमस्ते शा
र्मदायते॥ नमो हिरण्यहस्ताय सेनान्ये ते नमो नमः॥ नमो दिक्पतये तुभ्यं वृक्षाणांपतये नमः॥ न
मः सस्पिंजराया च नमस्तेस्तु त्विषीमते॥ नमः पथीनांपतये कुलुंचाय नमोस्तु ते॥ विव्याधिने न
मो न्नानांपतये ते नमो नमः॥ नमस्ते हरिकेशाय नमो भव्याय वीतिहोत्रे॥ पुष्टानांपतये तुभ्यं नम
स्ते पुष्टिदायते॥ जगतांपतये नित्यं नमो रुद्राय ते नमः॥ परातताचिने नित्यं नमस्ते गूढरूपिणे॥ क्षेत्रा
णांपतये नित्यं। नमः सूताय ते नमः॥ नमो हंत्याय दाढ्योय विश्वगुप्ताय ते नमः॥ वनानांपतये नि
त्यं रोहिताय नमोस्तु ते॥ नमः स्थपतये नित्यं वृक्षाणांपतये नमः॥ नमस्ते मंत्रिणे नित्यं वाणिजा
य नमोस्तु ते॥ कक्षाणांपतये नित्यं नमस्तेस्तु भुवंतये॥ तेवारिवस्कृताय शं नमस्ते वारिरूपिणे॥ उच्चै
र्घोषाय वीराय नित्याक्रंदयते नमः॥ पत्तीनांपतये नित्यं कृत्स्नवीताय ते नमः॥ नमस्ते धावते नित्यं
पत्त्नांपतये नमः॥ नमस्ते सहमानाय मानातीताय ते नमः॥ नमो हराव्याधिनीनांपतये शान

नंचक्षुषे॥ नमस्ते ककुभाय शं कामरूपाय ते नमः॥ निषंगिणे नमस्तेस्तु दिव्येषुधिमते नमः॥ नम
स्ते तस्कराणांचपतये नीतिदायिने॥ नमस्ते वंचते नित्यं नमस्ते परिवंचते॥ स्तायूनांपतये नित्यं नम
स्तेस्तु निचेरवे॥ नमः परिचराय शं परात्मा नमोस्तु ते॥ अरण्यानांचपतये नमो विश्वात्मकाय ते
मुष्णतांपतये नित्यं नमस्ते पापनाशक॥ प्रकृंतानांचपतये नीलोष्णीषाय ते नमः॥ नमो गिरिच
राय शं गिरिवर्यप्रियाय ते॥ कुलुंचानांचपतये नमस्ते सिद्धरूपिणे॥ नमो विचित्रवेषाय वेदखेटक
ते नमः॥ वेदमार्गाय दुर्गाय नमस्ते पाशधारिणे॥ नमः परशुहस्ताय नमस्ते शूलधारिणे॥ नमोभ
वाय रुद्राय नमः शार्वाय सर्वदा॥ पशुपाशहराय शं नमः पशुपतीशते॥ नमोग्राय नमो नित्यं भीमा
याभयदायते॥ अग्रेवधाय भूताय नमो दूरेवधाय ते॥ हंत्रे हनीयसे नित्यं नमस्ताराय ते नमः
नमस्ते शंभवे नित्यं नमस्तेस्तु मयोभवे॥ शंकराय नमस्तेस्तु सर्वज्ञाय नमोस्तु ते॥ नमो मयस्क
राय शं नमो मेशाय ते सदा॥ नमः शिवाय देवाय नमः शिवतराय ते॥ नमस्तीर्थ्याय कूल्याय न

शि॰ स्प
७७

मः पार्याय ते नमः॥ नमो वार्याय देवाय नमः प्रतरणाय ते॥ नमउत्तरणायेशा आतार्याय च ते
नमः॥ आलाद्याय नमस्तेस्तु नमः शष्प्याय ते मृड॥ नमः फेन्याय देवाय सिकत्याय च ते नमः॥ प्र
वाह्याय नमस्तेस्तु इरिण्याय नमोस्तु ते॥ प्रपथ्याय नमस्तेस्तु किंशिलाय नमोस्तु ते॥ नमस्ते
स्तु सदा देव च क्षयणाय कपर्दिने॥ पुलस्त्याय नमस्तेस्तु नमो गोष्ठ्याय ते सदा॥ नमो गृह्याय त
ल्प्याय गेह्याय च नमोस्तु ते॥ काट्याय गह्वरेष्ठाय ह्रदय्याय च ते नमः॥ निवेष्प्याय नमो नित्यं पां
सव्याय ते नमः॥ रजस्याय नमो नित्यं शुष्क्याय च नमोस्तु ते॥ हरित्याय नमो देव नमो लोप्या
य ते सदा॥ उलप्याय नमस्तेस्तु नमऊर्व्याय ते नघ॥ नमः सूर्म्याय पर्ण्याय पर्णशद्याय ते नमः॥
नमोपगुरमाणाय नमस्तेभिघ्नते सदा॥ नमआखिदते नित्यं नमः प्रखिदते सदा॥ नमो
विश्वस्वरूपाय गुणातीताय ते नमः॥ नमस्ते घोररूपाय नमस्ते शतधन्वने॥ गिरिशाय नम
स्तेस्तु शिपिविष्टाय ते नमः॥ मीढुष्टमाय देवाय मध्याय षुमते नमः॥ नमो ह्रस्वाय देवाय वामनाय

यनम

श्री॥
७७

DR BHAU DAJI MEMORIAL

नमो नमः॥ नमोस्तु बृहते नित्यं नमो वर्षीयते सदा॥ नमो वृद्धाय देवाय नमः संवृद्धनाय ते॥ नमोग्रिया
य सूराय प्रमथाय नमो नमः॥ आशवे ते नमो नित्यमजराय च ते नमः॥ शीघ्राय च नमो नित्यं शीभ्याय
महते नमः॥ नमऊर्म्याय नेव्याया वस्वन्याय नमो नमः॥ स्रोतस्याय नमो नित्यं द्वीप्याय च नमो नमः॥
नमो ज्येष्ठाय सूराय कनिष्ठाय च ते नमः॥ पूर्वजाय नमस्तेस्तु नमस्तेपरजाय च॥ मध्यमाय नमस्ते
स्तु कूष्मांडाय च ते नमः॥ नमः परंतपायेशा तारायसकलात्मने॥ जघन्याय नमस्तेस्तु बुध्नियाय न
मो नमः॥ सोभ्याय प्रतिसर्याय नमो याम्याय ते नमः॥ नमः क्षेम्याय चर्याय उर्वर्याय नमो नमः॥
श्लोक्याय चावसान्याय नमो मंगलरूपिणे॥ नमो वन्याय कक्ष्याय श्रवाय च नमो नमः प्रतिश्रवा
य शांताय शरण्याय नमो नमः॥ नमः सदाशुषेणाय नमश्चाशुरथाय च॥ नमः शूरस्वरूपाय
भेत्रे च भयदायिने॥ नमोस्तु वर्मिणे तुभ्यं नमो नित्यं वरूथिने॥ बिल्मिने ते नमो नित्यं नमः कवचि
ने सदा॥ श्रुताय श्रुतसेनाय दुंदुभ्याय च ते नमः॥ नमस्ते आहनन्याय धृष्णवे प्रमृशाय च॥ तीक्ष्ण

षवे नमस्तुभ्यं नम आयुधिने सदा॥ नमो गोत्रेभ्य हं त्रेव स्वायुधाय सुधन्वने॥ नमस्तुत्याय प
थ्याय नमः सुद्यायते नमः॥ सारस्याय नमो नित्यं नमो नाद्यायते सदा॥ वैशंताय नमस्तुभ्यं
मग्र गण्याय ते नमः॥ ५०॥ नमो स्त्वमेय रूपाय नमः कूप्याय ते सदा॥ नमो वद्याय वर्ष्या
य वर्ष्या यामृत रूपिणे॥ नमो मेघ्याय भीमाय विद्युत्याय नमो नमः॥ ईध्रियाय नमस्तेस्तु आतप्या
य नमो नमः॥ नमो वात्याय रेष्म्याय वास्तव्याय नमो नमः॥ वास्तुपाय नमस्तेस्तु नमः सोवायसर्व
दा॥ नमश्चंद्र किरीटाय निपताय नमोस्तु ते॥ नमो ब्रह्मण्यदेवाय देवेशाय नमो नमः॥ नमो विश्वै
कबंधाय सर्वाधाराय ते नमः॥ नमोनंत गुणोपेत सोमसर्वोत्तम प्रभो॥ नमस्त्र्यंबक श्रीमनन्त
मस्ताम्नाय ते नमः॥ नमो विश्वैक निलय नमो विश्वैक संस्तुत॥ नमो विधूतपापाय महादेवाय ते
नमः॥ नमस्ते पार्वती नाथ नमस्ते त्रिपुरांतक॥ नमस्ते करुणासिंधो नमस्ते भक्तवत्सल॥ न
मस्त्रिकाग्नि कालाय कालकालाय ते सदा॥ नमस्ते काल रूपाय नमस्ते वरदायक॥ नमः स

र्वात्मनः श्रीमन्सदाशिव नमोस्तु ते॥ हिरण्यरूप चिद्रूप हिरण्य निलयामल॥ नमस्तेस्तु हिरण्यात्मन्
हिरण्यपतये नमः॥ न त्वदन्यो महादेव लोकनाथो जगन्मय॥ न त्वदन्यः सुराराध्यो न त्वदन्यो ज
गत्प्रभुः॥ नमो भवाय भीमाय भर्गाया भयदायते॥ देवता सर्वभौमाय शंभवे प्रभवे नमः॥ त्वदन्यो
विद्वेद्यो न त्वदन्यो न सुरेश्वरः॥ त्वदन्यो न्यः सदासेव्यो न त्वदन्यो जगत्पिता॥ त्वमेव भूषणं रम्यं
त्वमेव मम जीवनं॥ त्वमेव मम मातासि त्वमेव हि पिता मम॥ त्वमाराध्यतमः शंभो मम देवोत्तम
प्रभो॥ न त्वदन्य पदद्वंद्वं मर्थयामि कृपानिधे॥ न शृणोमि कथामन्यां शिवनाम विवर्जितां॥ शि
व नामान्य नामानि न वदामि महेश्वर॥ शिवलिंगं विहायान्यं न पश्यामि च सादरं॥ शिवलिंगं वि
हायान्य ध्यानं च न कदाचन॥ अपराधान् क्षमस्वेशा समशंकर सर्वग॥ स्वरूपं तव विज्ञातुं ब्रा
क्यमेव न सर्वथा॥ वेदैः सर्वैरपि श्रीमंस्तव रूपं सदाशिव॥ न ज्ञातं तादृशं रूपं मया ज्ञेयं कथं प्रभो
लिंगस्याग्रमथा ज्ञातुं मज्ञा त्वागतमीश्वर॥ अपराधं क्षमस्वाद्य त्वमेवं अंबिकापते॥ अन्येपि मत्ल्

ताः सर्वे क्षंतव्याः परमेश्वर॥ अपराधाः कृपासिंधो दीनवत्सल शंकर॥ प्रणतं पाहि मां शंभो
करुणारसवारिधे॥ मां नमस्व महादेव पाहि पाहि सदाशिव॥ इति स्तुत्वा महादेवं प्रणम्य बहुधा
विधिः॥ कृतांजलिपुटो भूत्वा निवसन्नतकंधरः॥ श्रीविष्णुः॥ ॥ महेशानंताद्य त्रिगुणर
हितामेय प्रथम अमल स्वराकारापारामित गुणगणाकार निवृते॥ निराधाराधारामरवर निराका
र परमप्रभापूराकारावरपर नमो वेद्य शिववते॥ नमो वेदावेद्याखिलजगदुपादान नियत
स्वतंत्रासामंतानवधृत निजाकारविरते॥ निवर्त्तंते वाचः शिवमजरमप्राप्यमनसा यतो
शक्ताः स्तोतुं सकृदपि गणातीत शिववते॥ त्वदन्यं वस्त्वेकं नहि भुवि समस्तं न भवतो विभि
न्नं विश्वात्मन्नव परममस्ति ईश भवतः॥ ध्रुवं मायातीतस्त्वमसि सततं नात्र विशयो नतेहं त्वं
सत्यं क्वचिदपि नमो वार्थशिववते॥ ~~जगत्सृष्ट्वा पूर्वं यदभवदुमाकांतसततं~~ त्वयैवेमं लोकं निखिल
ममलं व्याप्य सततं तथैवान्यल्लोकं स्थितमनघ देवोत्तम विभो॥ त्वयैवतत्सृष्टं जगदखिल

मीशान भगवन् विलासोयं किंचिन्नव शिव नमो मे ध्यशिववते॥ जगत्सृष्ट्वा पूर्वं यदभवदुमाकांतसततं त्वया ली
लामात्रात्तदपि सकलं रक्षितमभूत्॥ तदेवाग्रे भालप्रकटनयनाग्न्युद्गतकणैर्जगद्दग्ध्वा स्वास्थ्यस्यज
हर नमो वद्यशिववते॥ विभूती नामंतो भवन भवतो भूतिविलसन्निजाकार श्रीमन्नतवगुणसीमा
ध्यवगता॥ अतद्व्यावृत्त्याद्धा त्वयि सकलवेदाश्च चकिता भवंत्येवासामप्रकृतिक नमो वर्ष्यशि
वते॥ विराड्रूपं यत्ते सकलनिगमागोचरम भू तदेवेदं रूपं भवति किमिदं भिन्नमथवा॥ न जानेदे
वेशात्रिनयन सुराराध्यचरण त्वमोंकारो वेदो त्वमसि हि नमो घोरशिववते॥ यदंतस्तत्त्वज्ञा मुनि
वरगणा रूपमनघं तवेदं संचिंत्य स्व मसि सदा संगविहताः॥ यमुद्दिश्यानंदं तदिदमथवा किंनु त
तथा किमेतज्जानेहं शरणदमनः शर्वशिववते॥ यथा शक्त्या सृष्ट्वा जगदवसं रक्षसि बहुधा तमः
तसंहृत्यैतन्निवससि तदाधारमथवा॥ रदं ते किं रूपं निरुपम न जाने हर विभो निसर्गः को वा ते तम
पि हि नमो भव्य शिववते॥ तवानंतान्याहुः श्रुतिपरम रूपाणि निगमास्तदंतर्भूतं सत्सदं निरुक्तं त्वमिद
सद

शि० स्त
८०

मपि॥ निरस्तं छेदोभिर्निलयनमिदं चानिलयनं नविज्ञातं ज्ञातं सरूदपि नमोऽव्यक्तशिवते॥ नवाभूतस्संवृ
तमपिच सत्यं रूतमार्द्रं तं सत्यसत्यं रूतमुभयथा रूपमकलं॥ यतः सत्यसत्यं सममपि समस्त
तवृविभो रूतं सत्यंसत्यं रूतमपि नमो रुद्रशिवते॥ नवामेयामेयं यदपि नवमेयं विरचितं नवामेयं
मेयं रचितमपि मेयं विरचितं॥ नमेयं मेयं च त्वं खलु परमेयं परमयं नमेयं नामेयं वरमपि नमो देव
शिवते॥ नवाहारं हारं विदितमपि हारं विहरसे नवाहारं हारी हरसि हरहारं नहरसि॥ नवाहारं
हारं परतरविहारं परतरं परंपारं जाने नहि खलु नमो विश्वशिवते॥ यतस्तत्त्वं तेसकलमपि तत्त्वेन
विदितं नतत्त्वं तत्त्वं विदितमपि तत्त्वं न विदितं॥ नचैतत्तत्त्वं चेन्नियतमपि तत्त्वं किमु भवेन्न तेतत्त्वं तत्त्वं
तदपि च नमो वैष्णवशिवते॥ इदं रूपं रूपं सदसदमलं रूपमिति चेन्न जाने रूपं ते नरतमविभिन्नं
परतरं॥ यतो नान्यद्रूपं निरतमपि वेदैर्निगदितं नजानेसर्वात्मन्क्वचिदपि नमो नंतशिवते॥ मह
द्भूतं भूतं यदपि च नभूतं तव विभो सदाभूतं भूतं किमु नभवतो भूतविषयेः॥ यदाभूतं भूतं भवति च न
श्रीः॥
८०

भूतं चभवतुः प्रभाभूतं भूतं भवति हि नमो यक्षशिवते॥ वशीभूता भूताः सततमपि भूतात्मकतया
नेते भूता भूतास्तव यदपि भूता विभुतया॥ यतो भूताभूतास्तव खलु नहि भूतात्मकतया नवाभूताभू
ताः क्वचिदपि नमो भूतशिवते॥ नेते माया माया सततमपि मायामयतया ध्रुवं माया माया त्वयि वरन
मायामयमयी॥ यदा माया माया त्वयि नखलु सा मायमतया नमायामायावा परमियतं तत्ते शिव
नमः॥ यदंतः संवेद्यं विदितमपि वेदैर्नविदितं नवेद्यं वेद्यं चेन्नियतमपि वेद्यं नविदितं॥ तदेवेदं वेद्यं
विदितमपि वेदांतनिकरैः करावेद्यं वेद्यं जितमिति नमो तर्क्यशिवते॥ शिवं शैवं भावं शिवमपि शिवा
कारमशिवं मसत्यं शैवं तच्छिवमिति शिवं शैवम निशं॥ शिवं ज्ञातं मत्वा शिवपरमतत्त्वं शिवमयं न
जानेतत्तत्त्वं शिवमिति नमो मेध्यशिवते॥ यदज्ञातात्तत्त्वं सकलमपि संसारपतितं जगज्जन्मावृत्तिं वह
ति सततं दुःखनिलयं॥ यदेतज्ज्ञाते वा वहति च निवृत्तिं परतरां नजाने तत्तत्त्वं परमिति नमोऽरूप्य शिवते॥
नवेदं यद्रूपं निगमविषयं मंगलकरं नदृष्टं केनापि ध्रुवमिति विजाने शिवविभो॥ नतस्त्विन्नेशं भो

शि०स्त
८१

नहिममविषादोह्यविकृतिः अपत्वाल्पभ्योस्मिन्नकिमपि नमः पूर्णशिवते॥ तवाकर्णगूढं यदपरमवपुः श्रु
तिपारं तदेवापादं सन्नयनपदवीं नात्र तनुते॥ कदाचित्किंचिद्वास्फुरतु रूपपदचेतसि तव स्फुरद्रूपं भवभ
वहर नमो नाद्यशिवते॥ त्वमिंदुर्भानुस्त्वं हुतभुगसि वायुश्च सलिलं त्वमेवाकाशोसि क्षितिरसि तथात्मा
सि भगवन्॥ ततः सर्वाकारस्त्वमसि भवतो भिन्नमणुवा न तत्त्वं सत्यं त्रिनयन नमोनंतशिवते॥ विधुं
धत्से नित्यं शिरसि मृडकंठेपि गरलं नवं नागाहारं भसितममलं भासुरतनो॥ करे शूलं भाले ज्वलनम
निशं तत्किमिति ते न तत्वं जानेहं भवहर नमः कृष्णशिवते॥ तवापांगस्पंदो यदि भवति भव्यः शुभकरः
कदाचित्कस्मिंश्चिल्लघुतरनरेपि प्रभवति॥ सरवैकं तल्लोकान्विरचयितुमल्पोपि समहान्नृपाधारोयन्ते
सुरवर नमोनंतशिवते॥ भवंतं देवेशं शिवमितरगीर्वाणसदृशं प्रमादाद्यः कश्चिद्यदि वदति विज्ञोपि
मनुते॥ सुदुःखं लब्ध्वांते नरकमपि याति ध्रुवमिदं ध्रुवं देवाराध्यामितगुण नमोनंतशिवते॥ प्रदो
षे रत्नाद्ये मृदुलतरसिंहासनवरे भवानीमारूढ्यामसकृदपि संवीक्ष्य भवता॥ कृतं सम्यक्नाट्यं प्रथि

श्रीः॥
८१

तमिति वेदोपि वदति प्रभावः कोवायं तदहर नमो दीप्यशिवते॥ स्मशाने संचारः सकिल न ते कापि गम
ने यतो विश्वं व्याप्याखिलमपि सदा तिष्ठसि भवान्॥ विभुं नित्यं शुद्धं शिवमपहतं व्यापकमिति श्रु
तिः साक्षाद्वक्ति स्वयमपि नमः सुधिशिवते॥ धनुर्मेरुः शेषो धनुवरगुणो यानमवनिस्तवेनेंदू चक्रे
निगमनिकरा वाजिनिकराः॥ पुरो लक्ष्यं यत्ता विधुरिपुरमुष्येति निगमः किमेवं त्वय्येषो निगदित
मनः पर्ण्यशिवते॥ महुं सत्वोपेतं भवमनघयुक्तं च राजसा तमोयुक्तं शुद्धं हरमपि शिवं निष्कलमि
ति॥ वदत्येषो वेदस्त्वमपि तदुपास्यं ध्रुवमिदं त्वमेकाराकारो ध्रुवमिति नमोनंतशिवते॥ जगत्सुप्तिं
बोधं व्रजति भवतो निर्गतमपि प्रवृत्तिं व्यापारं पुनरपि सुषुप्तिं च सकलं॥ त्वदन्यं त्वत्प्रेर्यं व्रजति शर
णं नेति निगमो वदत्यद्धा सर्वं शिव इति नमः सुत्यशिवते॥ त्वमेको लोकानामधिपतिरुमाना
थ जगतां शरण्यः प्राप्यस्त्वं जलनिधिरिवानंतपयसां॥ त्वदन्यो निर्वाणं न वितरति निर्वाण
पतिरप्यतः सर्वोत्कृष्टस्त्वमसि हि नमो नीप्यशिवते॥ त्वयैवाशोभानुस्तपति विधुरप्येति पवनः

पवत्येषोवह्निर्ज्योतिरिति सलिलं च प्रवहति॥ तदा शाकपुरीं लंघकमुरगेस्य सततं त्वमेकः स्वांतं त्रं
वहसि हि नमोनंतशिवते॥ त्वत्तंत्रोयं सोमः सकलभुवनैकप्रभुरयं नियंतानियंता देवानामपनि
हनियंतास्य न परः॥ शिवः शुद्धो मायारहित इति वेदोपि वदति स्वयं त्वामाज्ञास्यं मयहर नमो र
स्यशिवते॥ नमो रुद्रानंतामरवर नमः शंकरविभो नमो गौरीनाथ त्रिनयन नरण्यो त्रिकमल
नमः शर्व श्रीमन्ननघमहदैश्वर्यनिलय स्मरारे पापारि नजयजय नमः सेव्यशिवते॥ महादेवामे
यानघगुणगणग्राम सततं नमो भूयो भूयः पुनरपि नमस्ते पुनरपि॥ पुरारातिन शंभो पुनरपि
नमस्ते शिवविभो नमो भूयो भूयः शिवशिव नमोनंतशिवते॥ कदाचिद्दुर्ण्यते निबिडनिपतदृष्टिक
णिकाः कदाचिन्नक्षत्राण्यपि सिकततलेशाः कुशलिना॥ अनंतैराकल्प्यं शिवगुणगणाश्चारस
नैर्न शक्यं ते नूनं गणयितुमुषित्वापि सततं॥ मया विज्ञाय ज्ञानिशामपि कृतायेनु मनसा सकामेना
मिषाः सततमपराधा बहुविधाः॥ तरवक्षंतव्याः क्वचिदपि शरीरेण वचसा कृता नैते नूनं शिववि

वकृपासागर विभो॥ प्रमादाद्ये केचिद्दितनमपराधा विधिहताः कृताः सर्वेतेपि प्रशममुपयांतु स्फुरतां
शिव श्रीमन् शंभो शिव शिव महेशेति च जपन् क्वचिल्लिंगागारे निवहन वसामि स्थिरतां॥ इति स्तुत्वा
शिवं विष्णुः प्रणम्य च मुहुर्मुहुः॥ निर्विण्णो न्यवसत्तत्र कृतांजलिपुटस्थिरः॥ तदा शिवः शिवं रूपमादा
योवाच सवेगः॥ पीयूषयन्निव हठान्मृतानघनगंभीरया गिरा॥ मदीयं रूपममलं कथं शेयं भवादृशैः
यन्नो वेदैरपि ज्ञातमिस्तु त्वां अंतर्दधे शिवः॥ ततः पुनर्विधिस्तत्र तपस्तनुसमारभेत॥ विष्णुश्च शिवतत्वस्य
ज्ञानार्थमतियत्नतः॥ तादृशं शिवमेवाच्छा पूजयित्वा वसाम्यहं॥ नान्योममार्चादिकेषु विनाशंभुं
सनातनं॥ त्वयापि शांकरं लिंगं पूजनीयं प्रयत्नतः॥ विहायैवान्यदेवानां पूजनं शेषसर्वदा॥ इत्युक्तो शे
षवर्यंतं संपूज्य भुजगाधिपः॥ काश्यां त्राप सतनैव सहपूजापुरःसरं॥ शैवः पशुपताचारः पुनः पशु
पतीश्वरं॥ दृष्ट्वा संतोषमापन्नस्तत्रैवो वास सादरं॥ एतन्मया पशुपतीश्वरसन्निधानवासस्य सम्यग
मलफलमुक्तमद्य॥ सेयं कथा सकलपापघनाग्निभूता श्रव्या सुधारसमयी शिवभक्तवर्यैः॥ ५७॥

DR BHAU DAJI

श्री
८२

इति श्री शिवरहस्ये सप्तमांशे शिवगौरीसंवादे शिवगौरीसंवादे पशुपतीश्वरेतिहासकथनं नाम द
शमोध्यायः ॥१०॥ ॥ शिव उवाच ॥ ॐकारं नाम विमलं क्षेत्रं कारुण्यावरानने ॥ सर्वपापक्षयक
रं तिष्ठत्येकं शुभप्रदं ॥ तत्र बिल्ववनं रम्यं नित्यं नवदलान्वितं ॥ नक्षत्रलोकदिक्शाखाग्रं घनच्छायमभ्रस्पृ
शं ॥ तस्मिन्बिल्ववने रम्ये क्रीडार्थं गम्यते मया ॥ किंचित्कालं विहृत्याहं वसामि प्रत्यहं शुभे ॥ विघ्नो
नेमपि प्रोक्ता कदाचिद्बिल्ववने महान् ॥ समागतस्ततस्तेन कंपितास्तनवोत्कराः ॥ कंपितं न्यपतद्भूमौ
बिल्वशाखाग्रमुत्तमं ॥ नवारुणदलाक्रांतं विततलिमितमंबिके ॥ तद्दृष्ट्वा नमयारम्यं तदा प्रभृति सर्वे
दा ॥ तद्बिल्ववनरक्षार्थं यक्षः संस्थापितो मया ॥ वेदमूर्तिधरास्तत्र नवबिल्वदलैः शुभैः ॥ ॐकार
रूपिणं नित्यं मामेवाभ्यर्चयंति च ॥ शिवतत्त्वमविज्ञाय तत्र नाद्य मुनीश्वराः ॥ देव्यश्च सततं तत्र
तपः कुर्वंति सादरं ॥ तत्रैव वाग्निनिरताः निराहारा जितेंद्रियाः ॥ तपो घोरतरं कृत्वा तिष्ठंति विमला
शयाः ॥ एकपादेन संस्थाप्य ज्वलदग्निमध्यगाः ॥ चक्रे विष्णुरत्रैव तपो घोरतरं पुरा ॥ अनेना

पितपस्तमं महद्दातारं मुदा ॥ इंद्रादिभिर्लोकपालैस्तपस्तप्तमिहैव हि ॥ अन्यैश्च ऋषिभिः शुद्धैर्मुनिभि
र्ब्रह्मवर्यादिभिः ॥ तपस्तप्तं पुरा नित्यमत्रैवोंकारसन्निधौ ॥ सायमोंकारनाथस्य दर्शनं पापनाशकं
कर्तव्यं नियतं यत्नात्पूजाकार्यं निरंतरं ॥ प्रतिशुक्लचतुर्दश्यां पूजाकार्या विशेषतः ॥ तस्मिन्स्वर्थं महा
शैवो भोजनीयः प्रयत्नतः ॥ ॐकारकुंडममलं तत्र तिष्ठति निर्मलं ॥ तत्र प्रतिदिनं स्नानं कर्तव्यं ज्ञानवृद्ध
ये ॥ तत्र श्राद्धं च कर्तव्यं पितृनुद्दिश्य सादरं ॥ कर्तव्यं तत्र यत्नेन प्रत्यहं तिलतर्पणं ॥ तत्र श्राद्धे कृते सर्वे
पितरो नरकस्थिताः ॥ प्रयांति ब्रह्मसदनं मोदमानाश्च संति च ॥ पुराकेन विदत्रैव कृतं श्राद्धं यथा
विधि ॥ तेन तत्पितरः सर्वे नरकाद्धृतमुद्यताः ॥ तदा यमभटाः सर्वे यमशासनकारिणः ॥ प्रगृह्य
व पितॄन्सर्वान्यपुर्यमनिकेतनं ॥ यमभटाः ॥ प्रयांति नरकादेते यमभीमपराक्रम ॥ विचार्यैतानिति ते
यम ऊचुर्यमस्ततः ॥ उवाच चित्रगुप्ताख्यं धर्माधर्मविचारकं ॥ किमेतैः कृतमस्तीति बभाषे रवनं
मुदा ॥ चित्रगुप्तः ॥ कालयामोंकारनाथस्य कुंडे पापौघनाशके ॥ शैवेनैतद्द्विजेन कृतं श्राद्धं यथावि

धि॥ कृतं पिंडप्रदानं च तर्पणं च तिलैः कृतं॥ तेनैव घोरनरकादुद्धृताः पितरोऽखिलाः॥ आब्रह्मकल्प
मनिशं ब्रह्मणा पूजिता मुदा॥ ब्रह्मलोके निवासं च करिष्यंति न संशयः॥ इति तद्वचनं श्रुत्वा यमः शी
घ्रं समुत्थितः॥ प्रत्येकमासनं दत्वा पूजां चक्रे यथाविधि॥ ततो विमानमारुह्य ब्रह्मलोकं ययुर्मुदा॥ इं
द्रेण पूजिताः सम्यक् तथा दिक्पालपूजिताः॥ अभ्यागतान्पितॄन्दृष्ट्वा संपूज्य विधिवद्विधिः॥ स्वलोके वि
मलान्सर्वान्स्थापयामास सादरं॥ अतो विधिवच्छ्राद्धं कर्तव्यं पितृमुक्तये॥ ॐकारेश्वार्चनं चात्र
कर्तव्यं प्रतिवासरं॥ त्रिलोचनाख्यममलं क्षेत्रं कारुण्यावरानने॥ तिष्ठत्येकं ममात्यंत विलासास्प
दमुत्तमं॥ हेमप्राकारशृंगाग्र राजमानमहर्निशं॥ किन्नरामरगंधर्वसेवितं प्रतिवासरं॥ पिलिपि
लाख्यं तत्रास्ति कुंडमेकं वरानने॥ तत्र स्नात्वा यथाशास्त्रं श्राद्धं कृत्वा यथाविधि॥ त्रिलोचनाख्यलिंग
स्य पूजा कार्या यथाविधि॥ पुष्पैर्नानाविधैर्दिव्यैर्बिल्वपत्रैस्तिलाक्षतैः॥ तानि त्रयोदशी देवी भविष्य
ति यदा तदा॥ तस्मिन्पिलिप्पिलाकुंडे स्नानं कार्यं प्रयत्नतः॥ तर्पयित्वा पितॄन्सर्वान्प्रदोषे समुपस्थिते

त्रिलोचनेश्वरं सम्यगभिषिच्य शुभोदकैः॥ गंधैस्तिलाक्षतैः पुष्पैर्बिल्वपत्रैश्च कोमलैः॥ पूजयित्वा विधा
नेन धूपदीपादिभिः क्रमात्॥ समासव्यविधानेन ततः कार्यं प्रदक्षिणं॥ प्रणम्य बहुधा सम्यक् स्तु
त्वा स्तोत्रैरनेकधा॥ स्वस्वतोक्तप्रकारेण प्रतिष्ठाप्य कृताशनं॥ परमान्नं गोघृतं च संपाद्य न च मादरा
त्॥ तथा बिल्वसमिद्भिर्बिल्वदलान्यानीय सादरं॥ होमः कार्यः प्रयत्नेन ऋत्विग्भिः सह वैदिकैः॥ मोक्षा
र्थिभिः सार्धकोटिहोमः कार्यः प्रयत्नतः॥ पुत्रार्थिभिः सार्धलक्षं होमः कार्यो यथाविधि॥ वि
द्यार्थिभिस्त्रिलक्षं तु होमः कार्यो यथाविधि॥ स्वर्गार्थिभिस्तु कार्यः स्याद्धोमो लक्षचतुष्टयं॥ एवं
कृत्वा हविः सम्यग्दत्वा चैवाथ दक्षिणां॥ कृतं होमादिकं सर्वं शिवायाभिनिवेदयेत्॥ भोजनीया
स्ततो विप्राः यथेष्टं स्वादुभोजनैः॥ सुवासिन्योऽभजनीयाः देवीप्रीत्यर्थमादरात्॥ विध्युक्तेन
प्रकारेण कृतहोमादिना शिवः॥ प्रीतोऽभीष्टं यथायोग्यं प्रयच्छति न संशयः॥ शनि त्रयोदशीं
प्राप्य कार्यं स्थित्वा त्रिलोचनं॥ योनार्चयति मूढात्मा स भवत्यघसंश्रयः॥ उपोष्यासायमन

धैः स्नात्वा तत्र त्रिलोचनः॥ शनिपुत्र त्रयोदश्यां पूजनीयः प्रयत्नतः॥ पुरा कश्चिद्द्विजः शिशुर्दारि-
द्र्यव्याधिपीडितः॥ शनित्रयोदशीं प्राप्य चकारोपोषणं मुदा॥ ततः पिलिपिलाकुंडे स्नात्वा बिल्वदलैर्ज-
लैः॥ पूजां कृत्वा प्रणम्याथ ननर्त्त च पुनः पुनः॥ ततः पर्णकुटीं प्राप्य निद्रां चक्रे स बालकः॥ त्रिलोच-
नोपि संतुष्टस्तद्बालकृतपूजनात्॥ सर्वाभरणसंपन्नो दिव्यमंगलविग्रहः॥ प्रत्यक्षोभूत्कृपासिंधु-
स्तमुत्थाप्य द्विजार्भकं॥ प्रीतोस्मि पूजनात्तुभ्यं वरं वृणु तवेप्सितं॥ वरदोहं वदास्य माभैषीर्धैर्यमावह
इत्युक्तो बालकः शीघ्रं प्रययाचे वरमुत्तमं॥ देव देहि ममानंदमविच्छिन्नमनामयं॥ जन्मादिदुःखरा-
मय गर्भवासं विनाशय॥ देहि मुक्तिं कृपासिंधो त्रिलोचन जगत्प्रभो॥ इत्युक्त्वा प्रणिपत्यैवं देवदेवंमु-
हुर्मुहुः॥ कृतांजलिपुटो भूत्वा निवसन्नतकंधरः॥ ततस्तस्मै महादेवः कृपाब्धिर्भक्तवत्सलः॥ गाणा-
पत्यं ददौ प्रीतः सत्वरं त्रिलोचनः॥ कृत्तिवासेश्वरं नाम क्षेत्रमस्त्येकमुत्तमं॥ तत्रापि बिल्वतरवस्ति-
ष्ठंति नवपल्लवाः॥ तत्रापि मुनयः शांता निराहारा जितेंद्रियाः॥ तिष्ठंत्यत्यंतसंतुष्टाः शिवध्यान-

परायणाः॥ अधोमुखा धूमपाने केचित्कुर्वंति सादरं॥ केचिदेकांघ्रिणा स्थित्वा तपः कुर्वंत्यनाकुलाः
केचिदभ्यर्च्य मामीशं नृत्यं कुर्वंति यत्नतः॥ केचिल्लिंगार्चनं कृत्वा प्रणमंति पुनः पुनः॥ केचिन्मा
हृदि संस्थाप्य ध्यानं कुर्वंति सादरं॥ केचिद्गायंति सततं शिवनामानि पावनाः॥ तत्रापि कुंडमस्त्ये-
कं कृत्तिवासेशसन्निधौ॥ स्नानं प्रयत्नतः कार्यं तस्मिन्कुंडे शुभावहे॥ तत्र स्नात्वा विधानेन कृत्तिवा-
ससमर्चय॥ तत्तु मोक्षप्रदं लिंगं दर्शनादघनाशकं॥ मुक्तिकामैर्मुनींद्रैस्तु सर्वदा सेवितं मुदा॥ मु-
निभिः संस्तुतं नित्यं स्तुतं वेदैश्च सर्वथा॥ माघकृष्णचतुर्दश्यामुपोष्य नियतेंद्रियैः॥ तत्र जागरणं
कार्यं कृत्तिवासेशसन्निधौ॥ प्रतियामे यथायोगं पूजा कार्या प्रयत्नतः॥ दीपप्रदानं कर्त्तव्यं गोघृते-
न मनोहरं॥ नवबिल्वदलैः शुद्धैः पूजा कार्या विशेषतः॥ उपोष्यात्र प्रदोषे तु लिंगपूजापरायणैः॥ स-
र्वघोराघनाशं स्यात्तीर्थकोटिजन्मतपोधिकं॥ सम्यग्जागरणं कार्यं तद्दिने समुपस्थिते॥ शिवरात्रिव्रतं य-
स्तु मोहेन न करिष्यति॥ स धर्मप्रच्युतो नित्यं नरके निवसिष्यति॥ पुरा हिमालयप्रांते कश्चिदासी

शि०स्य ८६

न्नराधिपः॥ तेन रम्याः शिवकथाः श्रुताः सर्वमुदावहाः॥ शिवरात्रिव्रतस्यापि माहात्म्यं श्रुतमेकदा॥
तत्रैव कृत्तिवासेशमाहात्म्यमपि संश्रुतं॥ तपः काशीप्रयाणार्थमुद्युक्तोभून्नराधिपः॥ ततो विघ्नो महा
नासीत्तथात्राप्रतिबंधकः॥ ततो विघ्नविनाशार्थं स राजा दृढनिश्चयः॥ तपः कर्तुं समारेभे तत्रैव गि
रिशालये॥ ज्वलत्पंचाग्निमध्यस्थो निराहारो जितेंद्रियः॥ शिवलिंगार्चनं कुर्वन् चकारोग्रं तपो नृ
पः॥ स लक्षयुगपर्यंतं कृत्वा घोरतरं तपः॥ ततो दुःखेन संतप्तः स्वस्य सो निर्विण्णमानसः॥ रुरोदाश्र
तिक्लिन्नः शिरः संताड्य पाणिना॥ पाषाणमपि संगृह्य ताडयन्नुरसस्थलं॥ कथं काशी मया प्राप्या
द्रक्ष्ये विश्वेश्वरं कथं॥ कृत्तिवासेशलिंगं च कथं द्रक्ष्ये मतः परं॥ आयः पर्वतसंकाशान्यतिघोराणि
संति मे॥ पातकानि बहून्येव किं कर्तव्यमतः परं॥ इति कृत्वा महद्दुःखं तपश्चक्रे पुनर्नृपः॥ सहस्र
युगपर्यंतं जलमध्यगतः सदा॥ ततः कदाचित्तद्धैर्यं द्रष्टुकामश्चतुर्मुखः॥ वृद्धब्राह्मणरूपेण ग
तस्तन्निकटे शुभे॥ तमागतं द्विजं दृष्ट्वा प्रणम्य द्विजसत्तमं॥ चकार विधिवत्पूजामुवाच वचस्त

श्रीः॥ ८६

दा॥ वेदशास्त्राश्रय श्रीमन् द्विजवर्याघनाशक॥ काशीप्राप्तिकरं पुण्यं किमस्ति वद तत्वतः॥ ब्राह्मण॰
नृपोत्तम शिवाकाशा काशी प्राप्तुं न शक्यते॥ मनुजैः सा कथं प्राप्या देवानामपि दुर्लभा॥ नाल्पेन तपसा
प्राप्या काशी विश्वेश्वराश्रया॥ बहुकालं तपः केन कर्तव्यं घोरमुत्कटं॥ किंच राज्ञामयं धर्मो न भवि
ष्यति सर्वथा किंतु कर्तव्यमनिशं प्रजानां परिपालनं॥ निःकंटकमिदं राज्यं त्यक्त्वा किं तप्यते तपः॥
इदानीमखिलं राज्यं नष्टमेव भविष्यति॥ शरीरं चाभवत्क्षीणं नृपवर्य मनोहरं॥ काशीप्राप्तिक
रं घोरं तपः कर्तुं न शक्यते॥ अनेकजन्मनामंते कृत्वा कृत्वा तपो मुहुः॥ अंते शिवप्रसादेन सा काशी
लभ्यते जनैः॥ क्व भवांश्च तपो घोरं तादृशं शिवतुष्टिदं॥ क्व मानुषमिदं रूपं क्व काशीप्राप्तिसाधनं॥
मोरुग्रमाकुरु राजेंद्र त्यज व्रतमतः परं॥ त्वं पालय प्रजाः सर्वा धर्मेणैव परंतप॥ इति तद्वचनं श्रुत्वा धै
र्येवानमितप्रभः॥ विप्रं विसृज्य भूयोपि तपस्तेपे दुरासदं॥ स लक्षयुगपर्यंतमेकपादेन संस्थितः॥
चकार दुःसहं घोरं तपो महतीति साधनं॥ ततश्च मत्प्रसादेन निवृत्तविघ्नराशयः॥ ततः काशी

त्रि०स्य
८७

यथौ राजा दृष्टांतः करणः शुभे॥ तेन घोरं तपस्तप्तं पूर्वपूर्वभवेष्वपि॥ बहुकालं प्रयत्नेन काशीप्रा
प्त्यर्थमादरात्॥ काश्यां विशेषतीर्थेषु स्नात्वा प्रत्यहमादरात्॥ नित्ययात्रादिकं कृत्वा न्यवसन्निर्जि
तेंद्रियः॥ ततस्तत्रैव निवसन्माघकृष्णचतुर्दशीं॥ संप्राप्य परमं लेभे संतोषं नृपतिस्तदा॥ ततः स
नृपतिस्तस्मिन् शिवरात्रिदिने शुचिः॥ कृत्वा यात्रादिकं सर्वं उपोष्य नियतो व्रती॥ पूजोपकरणं
सर्वं संपाद्य दृढमानसः॥ कृत्तिवासेश्वरं सम्यक् संपूज्य विधिपूर्वकं॥ कृत्वा गोघृतदीपांश्च चकार स
मनोहरां॥ तद्दीपप्रभयालोकादीपिताः सर्व एव हि॥ स्तोत्रपाठैश्च नृत्यैश्च पुराणश्रवणादिभिः
चक्रे जागरणं राजा कृत्तिवासं समर्चयन्॥ ततस्तत्रैव पूतात्मा शिवलिंगार्चने रतः॥ पंचाग्निम
ध्यदेशस्थश्चकारोग्रं तपो नृपः॥ कालेन संमृतः सोपि ममांके सन्निवेशितः॥ मया पंचाक्षरोद
त्तो मुक्तिमाप नृपोत्तमः॥१०७॥ ईदृशं कृत्तिवासस्य क्षेत्रं सर्वार्थसाधकं॥ तत्रान्वहं पूजनीयः
कृत्तिवासेश्वरो जनैः॥ तत्प्रांते संति लिंगानि कोटिशः कमलानने॥ तान्यप्येतादृशान्येवमु

श्री॥
८७

क्तिदानि न संशयः॥ तीर्थमस्त्येकममले ऋणमोचननामकं॥ तत्तीर्थस्नानमात्रेण ऋणेभ्यो मुच्य
ते जनाः॥ तत्र श्राद्धविधानेन कर्त्तव्यं यत्नतः शुभे॥ तेन मुक्ता भवंत्येव पितॄणां ऋणबंधनात्॥ पिशा
चमोचनं नाम तीर्थमस्त्येकमुत्तमं॥ तत्र स्नात्वा पिशाचोपि मुच्यते सर्वपातकैः॥ श्राद्धं च विधिवत्त
त्र कर्त्तव्यमतियत्नतः॥ पिशाचभूताः सर्वेपि मुच्यंते पितरस्ततः॥ तत्रापि संति लिंगानि भक्ता
भीष्टप्रदानि च॥ पूजनीयानि यत्नेन तानि काशीनिवासिभिः॥ तदग्रे यातनास्तंभो योजनार्बुद
मुन्नतः॥ जाज्वल्यमानः सततं तिष्ठत्यनलसन्निभः॥ कारयंतिष्ठंति यमत्योः पातकादपरा
ङ्मुखाः॥ तानग्निश्टं खलैर्बध्वा पाचयत्यत्र भैरवः॥ नित्यांतर्गृहयात्रादिविमुखान् शिवनिं
दकान्॥ दंदह्यमानान्स्तंभेस्मिन्पाचयत्यत्र भैरवः॥ अंतर्गृहेमलादीनि विसृजन्यो वसेन्नरः॥
तमानीयात्र बध्वैव पाचयत्यत्र भैरवः॥ जाज्वल्यमानान्यनिशं वह्निकुंडानि संति च॥ तेषु पात
यति क्रूरस्तानेवानीय भैरवः॥ तप्ततीक्ष्णासिकुंडानि घोराणि विविधानि च॥ तिष्ठंतु तेषु तानेव

पावयिष्यति भैरव ॥ मामनभ्यर्च्य ये भुंक्ते काश्यां स्थित्वापि मानवः ॥ तमानीयात्र तीव्रेण पातयिष्य
ति भैरव ॥ काश्यां कृतानि पापानि वृद्धिं यांति क्षणे क्षणे ॥ तन्नाशो न भवत्येव विना तां हि यातनां ॥ वि
विधा यातनाः सृष्टा भैरवेण यदृच्छया ॥ तासु तान् क्रोधसंविष्टः पातयत्येव भैरवः ॥ द्वात्रिंशद्युग
पर्यंतमेकैका घफलं जनैः ॥ काश्यामधर्मयो भोक्त्यं कार्यं तु कृतपातकैः ॥ भ्रमेणाप्येकदा त्यक्त्वामू
त्रमंतर्गृहे नरः ॥ त्रिकोटियुगपर्यंतमग्निकुंडे पतिष्यति ॥ पुरीषोत्सर्गकस्यैतत्त्रिगुणं विधिचोदितं
द्वितोप्यधिकमेवात्र मनवो पिक्रियिष्यति ॥ प्रमादेन कदाचिच्चेदंतस्या यातनाशुभे ॥ नोत्सृजन्ति संविसृज
तो मलादीनि न निष्कृतिः ॥ घोराणि यातनास्थानान्यनेकानि वरानने ॥ तद्यातनास्तंभपार्श्वे तिष्ठ
ति कठिनानि हि ॥ द्रष्टुं न शक्यते घोरं यातनास्थलमीदृशं ॥ सा यातना कथं सह्या बहुदुःखप्रदा
यिनी ॥ प्रज्वलद्यातनास्तंभं दूरे दृष्ट्वैव केवन ॥ बद्धाः पलायनाशक्ताः हाहाहेति रुदंति ते ॥ सहस्र
बाहवः केचित् केचित् खड्गान्विताः ॥ केचिल्लक्षकराः क्रूराः कालभैरवकिंकराः ॥ हस्तयुतान्विताः

केचित्कोटिसुतबाहवः ॥ केचित्कोटिकराः क्रूराः केचिन्नियुतबाहवः ॥ केचित्तवर्बुयुतकराः केचिद
र्बुदबाहवः ॥ केचिन्महाखर्वहस्ताः केचिद्वामितबाहवः ॥ सर्वेपि पर्वताकारा वीर्यमानमदोन्नताः ॥
घनोन्नतोरुविषमतीक्ष्णदंष्ट्रास्त्रबाहवः ॥ सन्नद्धाः सर्वदा भीमाः शूरा भैरवकिंकराः ॥ ईदृशोद्धत
दूतानां संख्या कर्तुं न शक्यते ॥ पार्वतीवाहवेवायस्यना नानास्त्रान्विताः सदा ॥ तावद्भिर्बहवो दूता निघ्नं
त्येकैकमुद्धताः ॥ तद्यातनास्थलं दृष्ट्वा ब्रह्मविष्ण्वादयः सुराः ॥ रुदंतः कंपमानाश्च तिष्ठंति स्वस्वध
र्मतः ॥ काश्यां ये न कृतं पापं तेनेयं घोरयातना ॥ भोक्तव्या नात्र संदेहः सत्यमेवोच्यते मया ॥ अंतर्गृहे
मलादीनि ये कुर्वंति नराधमाः ॥ ते यातनामिमां क्रूरां प्राप्नुवंति न संशयः ॥ अस्त्रहस्तादिकं काश्यां ये
कुर्वंति नराधमाः ॥ ते यातनामिमां क्रूरां प्राप्नुवंति न संशयः ॥ शैवं शिवरतं काश्यां ये द्विषंति नराध
माः ॥ ते यातना० ॥ ये शैवविप्राधिक्कारं काश्यां कुर्वंति दुर्जनाः ॥ ते यातनां० ॥ ये शैवमान्यमन
घं नार्चयंति नराधमाः ॥ ते यातनां० ॥ काश्यां वसंति ये दुष्टाः शैववित्तापहारकाः ॥ ते यातनां०

येमामन्यसमं मत्वा काश्यां तिष्ठंति शंकरं ॥ ते यातनां० ॥ शिव एव सदापूज्य इति मां नार्चयंति ये ॥ ते० ॥
न शिवादधिको देव इति मां नार्चयंति ये ॥ ते यातनां० ॥ शिव सर्वस्व शिवाराध्य इति मां न वदंति ये
ते० ॥ शिवात्परतरं वस्तु नेति मां नार्चयंति ये ॥ ते यातनां० ॥ ये मामनभ्यर्च्य काश्यां तिष्ठंति मानवाः ॥
ते० ॥ त्यक्त्वा तिष्ठंति ये काश्यां भस्मरुद्राक्षधारणं ॥ ते० ॥ ये विहाय वसंत्यत्र शिवलिंगस्य पूजनं ॥ ते०
ये नित्यां तर्गेहयात्रां त्यक्त्वा तिष्ठंति मानवाः ॥ ते० ॥ ये काशीक्षेत्रमनघमन्यक्षेत्रसमं विदुः ॥ ते० ॥ ये रु
द्रजपमन्यार्थं कुर्वंति धनलोभतः ॥ ते० ॥ शैवदीक्षां विहायास्यां काश्यां तिष्ठंति ये जनाः ॥ ते० ॥ रुद्रा
ध्यायजपं त्यक्त्वा काश्यां तिष्ठंति ये जनाः ॥ ते० ॥ शैवं पंचाक्षरजपं त्यक्त्वा तिष्ठंति तिष्ठंति ये जनाः ॥ ते० ॥
ये मल्लिंगार्चनं त्यक्त्वा तिष्ठंति शिवनिंदकाः ॥ ते० ॥ कालभैरव मामाराध्य मनाराध्य वसंति ये ॥ ते० ॥ श्रीः॥
ये पंचक्रोशयात्रां च त्यक्त्वा तिष्ठंति मानवाः ॥ ते० ॥ ये काश्यां शिवशास्त्रस्य निंदां कुर्वंति दुर्जनाः ॥ ॥८१॥
ते० ॥ अन्यतुल्यतया येतु शैवं जानंति दुर्जनाः ॥ ते० ॥ शिवरात्रिव्रतं काश्यां ये न कुर्वंति दुर्जनाः ॥ ते० ॥

दुष्प्रतिग्रहासक्ता नित्यं काश्यां वसंति ये ॥ ते० ॥ ये शूद्रपतितव्रात्यवित्तपोषितविग्रहाः ॥ ते० ॥ ये धत्त्या
पकरं कर्म कुर्वंत्यत्र हि ये जनाः ॥ ते यातना इमां क्रूरां प्राप्नुवंति न संशयः ॥ इदं मत्वा सदा काश्यां स्व
स्वधर्मेण सर्वदा ॥ स्थातव्यं यत्नतः सर्वैः यातनाभीरुभिर्जनैः ॥ अंतर्गेहे कृतं पापं यन्मलोत्सर्गनार्जितं
समूत्रोत्सर्जनं चात्र न नश्यति दुःखदं ॥ द्वित्रां तर्गेहे पूर्वं मूत्राद्युत्सर्जनं कृतं ॥ तैरिदानीमपि क्रूरा या
तना भुज्यते शुभे ॥ शैवोप्यंतर्गृहे कुर्यान्मूत्राद्युत्सर्जनं यदि ॥ भैरवस्तमपि क्रूराः पातयत्यत्र मंड
ले ॥ यस्त्वंतर्गृहमाराध्यं मूत्राद्यैर्दूषयिष्यति ॥ स यातनामवाप्नोति पुनरावृत्तिवर्जितां ॥ इदं मत्वै
व मुनयः तिष्ठंत्यंतर्गृहाद्बहिः ॥ पंचक्रोशाद्बहिर्यांति मूत्राद्युत्सर्जनाय ते ॥ ६४ ॥ प्राणिदुःखकरं कर्म न
कार्यं सर्वथा जनैः ॥ काश्यां शिवत्वाविशेषेण न कार्यं सत्यमुच्यते ॥ अंतर्गेहाद्बहिः काश्यामंतर्गेह
पि वा जनैः ॥ न कार्यं सर्वथा यत्नान्मूत्राद्युत्सर्जनं शुभे ॥ अंतर्गेहाद्बहिः कुर्याद्यदि मूत्रविसर्जनं ॥ पुरी
षोत्सर्जनं वापि तत्प्रायश्चित्तमुच्यते ॥ पंचगव्यं यथाशास्त्रं प्राश्यं मुंडनपूर्वकं ॥ ततोंतर्गृहयात्रेका

शि०रह ॥९०॥

कर्तव्याविधिपूर्वकं॥ ततः पंचक्रोशयात्रा निराहारेण सादरं॥ कर्तव्याविधिवद्विप्रा भोजनीयाश्च
यत्नतः॥ इदं मूत्रोत्सर्जनस्य प्रायश्चित्तमुदाहृतं पुरीषोत्सर्जने कार्यमेतद्द्विगुणं क्रमात्॥ एकमेव
हि विज्ञेयमुभयत्रापि मुंडनं॥ ब्राह्मणाश्च यथाशक्ति भोजनीयाः प्रयत्नतः॥ त्यक्त्वैकदा मलं मर्त्यैरेक
दा मूत्रमेव वा॥ एवं कार्यं प्रयत्नेन प्रायश्चित्तं वरानने॥ मलमूत्रादिकं कार्यं त्यक्त्वा तु बहुधा जनैः
बहुधैव तथा कार्यं प्रायश्चित्तं यथाविधि॥ तादृशैर्यत्नतः कार्यं प्रायश्चित्तं क्रमेणोदितं॥ अन्यथा
यातनां घोरां प्राप्नुवंति न संशयः॥ श्रीकालभैरवप्रांते कुंडमस्त्येकमुत्तमं॥ कालाष्टमीदिने तत्र
स्नानं कार्यं विधानतः॥ तत्कुंडनिकटे रम्ये लिंगं कालेश्वराभिधं॥ भैरवस्थापितं तिष्ठत्येकं पा
पौघनाशकं॥ तत्पूजनं यथाशास्त्रं कार्यं बिल्वदलादिभिः॥ ततः पूजा यथाशास्त्रं कर्तव्या भै
रवस्य सा वा॥ प्रदक्षिणनमस्काराः कार्याश्चाष्टोत्तरं शतं॥ जागरेणोपवासेन प्रीणनीयो हि भैर
वः॥ ८०॥ सुविभिस्तैलपक्वान्नैः शैवा ब्राह्मणपुंगवाः॥ भोजनीयाः प्रयत्नेन भैरवप्रीतिकाम्यकैः

श्रीः॥ ॥९०॥

पार्वत्युवाच॥ कथं कालाष्टमी शंभोः सा कालस्य प्रिया कथं॥ जागरस्योपवासेन कथं तुष्यति भैरवः
शिव उ०॥ कालाष्टमीति विख्याता कार्तिकस्यासिताष्टमी॥ तस्यामुपोषणं कार्यं तथा जागरणं निशि॥ पुरा
रथंतरे कल्पे वसिष्ठाद्या मुनीश्वराः॥ देवाश्चेंद्रादयः सर्वे कार्त्तिक्यां संप्रपूज्य मां विभुं॥ नित्ययात्रादिकं कृ
त्वा मध्याह्ने संस्थिते रवौ॥ कृत्तिवासेश्वरं प्रापुर्बिल्वपत्रादिसाधनाः॥ कृत्तिवासेश्वरं सम्यक् पूज
यित्वा ततः परं॥ ध्यायंतः शंकरं नित्यमुपविष्टाः स्थिरासनाः॥ तदानीमागतो ब्रह्मा कृत्तिवासेश्व
रालयं॥ रिक्तपाणिरनभ्यर्च्य शिवं मां स तु संस्थितः॥ तदानीं विस्मिताः सर्वे वसिष्ठाद्या मुनीश्व
राः॥ तमूचुर्भीतमनसः स्मयाविष्टमदं प्रभुं॥ ऋषय ऊ०॥ किं ब्रह्मन्देवदेवेशं शंकरं सांबमव्ययं
अभ्यर्च्यैतमनभ्यर्च्य रिक्तपाणिरुपस्थितः॥ बिल्ववृक्षाः करप्राप्याः संति काश्यां तु भूरिशः॥
तथापि बिल्वपत्राणि नानीतानि कथं त्वया॥ बिल्वस्कंदे फल्गीत्या किं पत्रं तन्नार्जितं त्वया॥ किमे
नं रक्ष्यते नाथ शरीरेण तवाधुना॥ बिल्वकंटकसंविद्धकरा बिल्वार्जनप्रियः॥ भुक्त्वा भोगांश्च विपु

लान् शिवलोकं प्रयांति हि॥ धर्मसिद्धिर्विना क्लेशं धर्मस्तु क्लेशसाधितः॥ क्लेशाधिक्यात्फलाधिक
मिति न ज्ञायते त्वया॥ हे सतीर्थमिदं पुण्यं कृत्तिवासेशसन्निधौ॥ ततो जलं घटेनानीतं किं देवार्थं त्व
याधुना॥ अपामार्गस्य पत्राणि सुलभानि बहूनि च॥ संत्यक्तानि वा जलं न नानीतानि कथं त्वया॥ रिक्तह
स्तो महादेवं यो याति स महानपि॥ विनश्यति न संदेहो नरकं चाधिगच्छति॥ पूजा स्यादेवदेवस्य शंकरस्य महा
त्मनः॥ न करोति च यः पूजां स याति नरकं ध्रुवं॥ प्रमादेनाभिमानेन तथा गर्वेण वा भ्रमात्॥ प्राप्य शंभुं परि
त्यक्तहस्तो नष्टधर्मो भविष्यति॥ नष्टधर्मस्ततो याति यावदाचंद्रतारकं॥ नरकं तस्य नरकान्निर्गमो नास्ति
सर्वथा॥ प्रणामश्च त्वया ब्रह्मन्न कृताः पापनाशकाः॥ महादेवस्यतेरीशः प्रीणाति भगवान् शिवः
२००॥ शुभं न दृश्यते ब्रह्मन् त्वया ह्यात्र न संशयः॥ अनार्चितमहेशस्य कश्शुभं त्वशुभं ध्रुवं॥ इत्युक्तास
स्थितान् देवीं ब्रह्मा तानृषिसत्तमान्॥ उवाचातीव संक्रुद्धः पापाश्रय इवानिशं॥ ब्रह्मोवाच॥ अहमेवा
खिलैः पूज्यः पूज्यो मम न सर्वथा॥ किं शूली मम संपूज्यः पूज्योहं शूलिनो ध्रुवं॥ वेदाः सृष्टा मया सर्वे

सृष्टा लोकाम्मया पुरा॥ मदन्यः सर्जको लोके नास्ति पूज्योपि सर्वथा॥ भ्रांता यूयं न संदेहः शूलीपूजा
परायणाः॥ पूजा ममैव विहिता वेदास्तत्र तु साक्षिणः॥ प्रलपन्नेवमेवान्यदपि भ्रांतस्तथा विधिः॥ त
स्थौ तत्र महाविष्णुरर्घ्यपाणिरुपागतः॥ ततोभिषिच्य मां विष्णुः क्षीराद्यादिभिरादरात्॥ चकार पूजां
विविधां बिल्वपत्रादिभिर्मुदा॥ धूपदीपांश्च नैवेद्यं क्षीराज्यदधिमिश्रितं॥ दत्वा पुनर्ददौ दीपान्पुनः पु
ष्पांजलिं ददौ॥ प्रदक्षिणनमस्काराश्चकार तदनंतरं॥ ततः पंचाक्षरं शैवं जजाप स जनार्दनः॥ ततस्तु
ध्याननिरतो विधिर्दृष्ट्वा हरिं तदा॥ उवाचैवं वचनं भ्रांतः क्रोधमुत्पादयन् हरेः॥ असंपूज्येव पूज्योहं मामप
विष्णुरद्यतः॥ शूलीपूजां करोत्यत्र भ्रांतोयं नात्र संशयः॥ इत्युदीरितमाकर्ण्य वचनं तद्विधेर्हरिः॥ पूजां स
माप्य तदनुजगादेवं वचनं तदा॥ विष्णुः॥ हा हा दुर्भग दुर्बुद्धे किमेवं वक्तुमर्हसि॥ वर्धितो चातोद्य जातोसि शुभं
नाद्यतु दृश्यते॥ सर्वदेवोत्तमः सांबः शंकरो भक्तवत्सलः॥ सर्वेषामपि संपूज्यस्तस्य पूज्यो न दृश्यते॥
तस्यैव पूजा विहिता सर्वदेवेषु सर्वथा॥ तत्पूजयैव संप्राप्यो मोक्षो मोक्षप्रदः शिवः॥ शिवपूजा मया
सर्वं बहुधैव कृतं मुहुः॥ शिवपूजाप्रभावेन पालयाम्यखिलं जगत्॥ इत्युक्तवंतं तं विष्णुं भ्रांतो सौ

त्रि०ख
॥९२॥

त्रिजगादसः॥ मत्तोन्यो न हि संपूज्यः पूज्योहं नात्र संशयः॥ भ्रांताः सर्वे कथं जाताः पूजं मां सर्वसाधनैः॥
न पूजयंति दुर्वृत्ताः मामिमं सर्वं वदनस्थितः॥ तदा ह्येतान्विलेखविष्णुः शंकरं लोकशंकरं॥ तुष्टाव विविधैः स्तो-
त्रैरेवाचेदं वचस्तदा॥ शंभो प्रसीद देवेश हे शंकर हरी कुरुष्व मे॥ अत्रोवं संहराश्चैनं मधर्मस्य प्रवर्त्तकं॥ अ-
धर्मवृद्ध्या सर्वेपि यास्यंति नरकं ध्रुवं॥ कृपालुरसि देवेश विधिमेनं विनाशय॥ अशेषोयं दुराचारः॥
स्थापनीयो न सर्वथा॥ अस्यैव निक्षा कर्त्तव्या देवेशस्य पुरांतकः॥ नोचेद्धर्मवृत्तिस्तु भविष्यति न सं-
शयः॥ अधर्मवृद्ध्या देवानां दुःखवृद्धिर्भविष्यति॥ इत्युक्त्वा प्रणतो विष्णुः सऋषिः ससुरस्तदा॥
प्रसीदेश प्रसीदेश प्रसीदेति वदन्मुहुः॥ ददौ च रूपादनघान्मतः श्रीकालभैरवः॥ आविरासीत्तदा
लोकानभिविष्यन्नखिलानपि॥ व्याप्याथ सप्तपातालान नंतचरणैः स्वयं॥ भूर्भुवः स्वरादींश्च
शिरोभिर्व्याप्य संस्थितः॥ दिशो दशाप्य हस्तैरनंतैर्विहृताननः॥ अनंतसूर्यप्रतिमा कालानल-
समप्रभ॥ नानाशस्त्रावृतकरो नानागंधानुलेपनः॥ नानामाल्यावृतो नानारत्नाभरणसं-
वृतः॥ अनंतरोमकूपेषु वहन्नग्निगणान्बहून॥ विश्वासपवनैरस्मिन्विमृजनरक्तलोचनः॥

श्री:ग
॥९२॥

अकांडप्रलयाग्नीनां समूहइव संस्थितं॥ दृष्ट्वा तं विस्मिताः सर्वे देवाः सऋषिपुंगवाः॥ चचालावनिरुद्वि-
ग्नाचेलुश्च कुलपर्वताः॥ शेषश्च सर्पैः सकलैः फणिभिश्च समावृतः॥ तन्निश्वासमहावायुरुत्पातपव-
नोद्भवत्॥ तत्कराघातमात्रेण पेतुरर्कादितारकाः॥ पपात मूर्छितो विष्णुः तं दृष्ट्वा भीमविक्रमं॥ पेतुर्मुनि-
वराः सर्वे देवाश्चेंद्रपुरोगमाः॥ क्षुब्धाः समुद्राः सर्वे पक्षीराद्विप्रमुखास्तदा॥ उद्वेलाश्च बभूवुस्ते महाक-
ल्लोलसंहताः॥ ततः सर्वे देवा लोकानभीक्ष्य न्नखिलानपि प्रणम्य मामुवाचेदं वचनं विनयान्वि-
तः॥ शंभो किं कर्तव्याण्यद्य कार्यं ते किमुपस्थितं॥ शोषणीयाः समुद्राः किं क्षणेनैवाद्य लीलया॥ किं
वा कुलाचलाः सर्वे पेषणीयास्तदाज्ञया॥ भस्मीभूताश्च कर्त्तव्या देवाः सर्वे किमीश्वर॥ किं भस्मतामुपै-
ती शासशैलवनकानना॥ पृथिवी सनदी सर्वा मामाज्ञापय शंकर॥ मा विलंबं कुरुष्वाद्य किं विलंबे-
न शंकर॥ त्वत्प्रसादेन सर्वेषां नाशकश्च भवाम्यहं॥ मया यत्तररूपेण तल्ली स्थातुं न शक्यते॥ देवात्तमम हा-
देव हराज्ञापय मां विभो॥ एवमुक्तो भैरवेण प्रणतश्च मुहुर्मुहुः॥ तदा ब्रह्मशिरश्छेदं कुरुष्वेत्युक्तवानहं

शि॰ स्प
॥९३॥

ततो विधिं भैरवस्तं दृष्ट्वा प्रस्फुरिताधरः ॥ नखाग्रेणैव चिच्छेद शिरांसि सपपात च ॥ ततस्तस्य विधेश्छिन्नं
प्रथमं तु शिरस्तदा ॥ जगाम नागनिलयं ब्रह्मपन्सत्वरं शिव ॥ तदा तस्य शिरो दृष्ट्वा ब्रह्मणः फणिराट् तदा
विस्मितोभूत्किमेतस्य शिरश्छेदस्य कारणं ॥ इदं ब्रह्मशिरो नूनं मया तु परिवीयते ॥ ब्रह्मणो न शिवाद
न्यः शास्तादेवेषु विद्यते ॥ प्रयात्रोप्देवदेवस्य महादेवस्य पूजनं ॥ न कृतं ब्रह्मणा तस्माच्छिवेन निहितो विवि
धिः ॥ प्रयात्रो ब्रह्मणा शंभोर्धिक्कारो वा कृतो ध्रुवं ॥ नंदिकेशस्य वान्यस्य शिवभक्तस्य वा ध्रुवं ॥ शि
वं वा शिवभक्तं वा नंदिकेशं शिवप्रियं ॥ यो धिक्करोति तस्यैव यं गतिर्भवति सर्वथा ॥ अन्यथा ब्रह्मणे
कांडे शिरश्छेदः कथं भवेत् ॥ नायं प्रलयकालस्तु ब्रह्मविष्ण्वादिनाशकः ॥ समयः प्रलयस्यास्तु मा स्तुवा
पतथाप्यहं ॥ काशीं प्रति गमिष्यामि यत्र प्रलयभीर्न मे ॥ महाप्रलयकालेपि काशीस्थो न विनश्यति
ततः काशीमहं यास्ये यत्र न प्रलयाद्भयं ॥ दग्धा भवंतु ब्रह्माद्या लोका दग्धा भवंतु च ॥ यास्येहं सर्व
थानित्यां काशीं माहेश्वरीं पुरीं ॥ इत्युक्त्वा फणिराट् शीघ्रं काशीं प्रति समाययौ ॥ पाहि पाहि महादेव

श्रीः॥
॥९३॥
ग्धा

प्रलयादिति संवदन् ॥ संप्राप्य काशीं पूतात्मा प्रहृष्टहृदयः फणिः ॥ अमन्यत तदात्मानं कृतार्थं भाग्यसंश्र
यं ॥ दृष्ट्वा काशीपुरीं शैवीं शैवमोक्षप्रदायिनीं ॥ साक्षाच्छिवस्वरूपं यं देवानामपि दुर्लभं ॥ रूपाम
पि महेशस्य संपूर्णा तिष्ठति ध्रुवं ॥ यतोति दुर्लभा काशी सुलभा द्य ममाभवत् ॥ अतः परं भयं नास्ति
मत्यैरपि मम ध्रुवं ॥ यतः प्राप्ता मया काशी यां मृत्युर्नाव पश्यति ॥ ततः स रत्नपुष्पाद्यैर्विश्वेशं मा स नात
नं ॥ संपूज्य नित्यया चादि सर्वकर्म चकार सः ॥ आदिभैरवमभ्यर्च्य धूपदीपादिभिस्ततः ॥ कृत्तिवासेश्वरं
द्रष्टुं पुष्पपाणिरुपाययौ ॥ तत्र श्रीभैरवं दृष्ट्वा भीमरूपं भयानकं ॥ चकंपे मूर्छितः शेषः पपात पृथिवी
तले ॥ ततस्थो स्थापितो विष्णुम पार्श्वे स मूर्छितः ॥ रुद्रादयः सऋषयो मयैवे स्थापिताः शिवे ॥ विष्णुरिं
द्रः फणिपतिर्देवाश्चान्ये मुनीश्वराः ॥ ददृशुश्छिन्नशिरसं विधिं तं पतितं भुवि ॥ ततो विष्णुः सदेवेंद्रः
स ऋषिः स फणिस्तदा ॥ स्तोत्रैरनेकैस्तुष्टाव भीमं श्रीकालभैरवं ॥ देवा ऊ॰ ॥ नमस्ते कालनाथाय न
~~मः प्रसमरूप नमो विश्वात्मक श्रीम नमस्ते रुद्रसंभव नमस्ते शम्भुतानंद नमस्ते भूतभावन~~

मस्ते कामरूपिणे॥ नमो भीमाय चोग्राय नमस्ते शूलपाणये॥ नमस्ते कालकालाय नमस्ते कालभ
क्षक॥ नमो दिगंबरानंत नमः परमपूरुष॥ नमो विश्वात्मक श्रीमन्नमो विश्वैकजीवन॥ नमस्ते सुस
हस्राक्ष सहस्रकरते नमः॥ सहस्रचरणामेय नमस्ते भैरवप्रभो॥ नमस्ते रुद्र रुद्रात्मन् नमस्ते रुद्र सं
भव॥ नमस्ते शाश्वतानंद नमस्ते भूतभावन॥ नमस्ते सर्वलोकेश सर्वाधारामरार्चित॥ नमस्ते दि
क्स्वरूपाय नमस्ते भूस्वरूपिणे॥ नमस्ते सूर्यरूपाय चंद्ररूपाय ते नमः॥ नमस्ते ग्रहरूपाय रूपा
तीताय ते नमः॥ नमः सकलकल्याणभाजनायामितात्मने॥ नमः परमवीराय नमः परशुधारिणे॥
नमो डमरुहस्ताय नमः खट्वांगधारिणे॥ नमोनंतगुणाधार नमोनंतस्वरूपिणे॥ नमो विभूतिकक्व
व्योमकेश नमोस्तु ते॥ नमस्त्रिशूलकरवर नमस्ते मुंडमालिने॥ नमः श्वेतासनासीन जपावर्ण नमो
स्तु ते॥ नमो ब्रह्मण्यरूपाय विधिनाशकृते नमः॥ अनेनैव स्वरूपेणाद्य शिवद्रोहि विनाशक॥ शिव
भक्तप्रिय श्रीमन्नमः श्रीकालभैरव॥ शरण्यमूर्ते सर्वात्मन्नमस्ते भक्तवत्सल॥ शिवनेत्रानल

श्री॰॥ ॥९४॥

श्रीमन् नमस्ते शिवपूजक॥ नमो रक्तांबर श्रीमन्नमस्ते रक्तचंदन॥ नमस्ते रक्तकेशाय नस्ते रक्तयह्वेव
नमस्ते रक्तमालाय नमो रक्तनखायते॥ निर्विकार निरीहेश निरंजन निराश्रय॥ निरुपप्लव निर्द्वंद्व निरव
घ निरामय॥ व्यालोपवीतिन् शुद्धात्मन् महाप्रलयकारण॥ अनेकसोमसूर्याग्निगणाकार नमोस्तु ते॥
दृष्ट्वा तवेदमत्युग्रं रूपं भीतादिवौकसः॥ भीतोस्म्यहं कृपासिंधो भीताश्च ऋषिपुंगवाः॥ द्रष्टुं न शक्यते
घोरं तवेदं रूपमीदृशं॥ सौम्यं रूपं वहस्वेश प्रसीद करुणाकर॥ दुष्टस्यैवं मताधीशा शिवद्रोहरतात्मनः
शिक्षेयमेवं सर्वेषामस्रौवानां दुरात्मनां॥ उत्साहोद्य महानासीन्मम श्रीकालभैरव॥ दुरात्मायं शिव
द्रोही निहतोद्य यतस्त्वया॥ यदा मखेमहेशो न विघ्नस्त्वेदनमादरात्॥ तदापि भैरवः श्रीमन्मन्ने
तोषेन दृष्टो ध्रुवं॥ अनेनैव निहंतदुष्टेध मेंपि स्थिरतां गतः॥ अन्यथा धर्मके शास्याप्यवस्था
नेतु दुर्लभं॥ परंतु भवभैरवश्रीमन्शिक्षास्य हितकारिणी॥ जाता मरणमात्रेण मुक्तिरेव भवि
ष्यति॥ ततोस्य मरणं येन न भविष्यति भैरव॥ तथा शिरांसि ग्रीवासु योजयामि त्वदाज्ञया॥

एवंगतं शिरोस्यैव पपाताले प्रति सत्वरं॥दुःखमेवमशैवानां भावीत्याख्यापनायतत॥तेनोनःशिरस
ब्रह्मा दुःखितस्तिष्ठति प्रभो॥मरणे तस्य दुःखं नि नैव दृश्यतीतिमन्महे॥स्मरन्स्वकृतकर्माणि दुः
खहेतून्यपंविधिः॥तिष्ठत्याकल्पमत्यंतं दुःखितःप्रलपन्सदा॥अपराधिनमालोक्य नृपाश्च क्रूर
शासनाः॥कुर्वंतिपादहस्तान्यतरलूनं दुरासदाः॥एनमालोक्य शिरसा हीनमन्ये नराः सुराः॥
शिवद्रोहं दुःखहेतुं न करिष्यंति सर्वथा॥ब्रह्मणोपीदृशं दुःखं शिवद्रोहरतात्मनः॥ किमुतान्यस्मा
कमित्यन्येभीतास्थास्यंतिभैरव॥शिक्षेयं महतीनूनं ब्रह्मणो मितविक्रम॥शिक्षैवमेव कर्तव्या शि
वद्रोहरतात्मनां॥अशैवानारके घोरे पातनीयाः प्रयत्नतः॥यथा तेषां दुःखवृद्धिस्तोषवृद्धिस्तथाम
म॥प्राणैः संयोजयास्वैनं स्वत्वरं दुःखितात्मनं॥दुःखप्राणवियोगस्य कथं भवति भैरव॥ किंवा
स्यतृणतुल्यस्य वधार्थं त्वमीदृशं॥ किमर्थं धृतमीशान कल्पक्षयकरं परं॥ महाकल्पस्य नाशोपि
नधृतं रूपमीदृशं॥प्रायश्चोभैरव श्रीमन्कृपांतकर प्रभो॥कुटिलेनाक्षिपातेन सर्वं लोका

नपि क्षणात्॥भस्मीकर्तुं समर्थोसि भैरवात्र न संशयः॥ प्रसंगे नापि देवेशा तव रूपं सनातनं॥ दृष्टम
यकृतार्थोस्मि कैतद्रूपस्य दर्शनं॥ ३००॥ आद्यं तदृष्टमेतन्न रूपं भैरव सर्वथा॥ इदं किंचिदपि द्र
ष्टुं न शक्यं सत्यमुच्यते॥इत्युक्त्वा स ऋषि विष्णुर्भैरवं भीमशासनं॥ मुहुर्मुहुः प्रणम्यास्य पादमू
लेपपात सः॥ सौम्यरूपधरः श्रीमांस्ततः श्रीकालभैरवः॥ उत्थाप्य विष्णुं वचनं जगादेनं तथास्थिति
ततः परं भैरवस्य भीमरूपस्य केशवः॥ आज्ञां मूर्ध्नि समादाय हृष्टचित्तो भवच्छिवे॥ ततो विधिकबंधे
नतच्छिरस्य वनीतत्राताग्रहीत्वा योजयामास यथास्थानं यथाक्रमं॥ ततः स भैरवस्यैव प्रसा
दात्प्राणवानभूत्॥ ततश्च दुःखं संप्राप्य गतोन्यत्र सलज्जया॥ ततो ववुः सुखावाताः पुष्पवृष्टिर्ब
भूव च॥प्रसन्नाश्च दिशः सर्वा बभूवुर्धूसराः पुरा॥ सिंधवोपि यथास्थानं तस्थुः शैलस्य पर्वती॥ पृ
थिवी व जहौ कंपं शेषः स्वस्थानमाययौ॥ एतस्मिन्नंतरे देवाः सूर्योप्यस्तंगतः शिवे॥ ततः संध्यादि
कं कृत्वा शिवध्यानपरा बभुः॥ ततः काशीपालनार्थं भैरवः स्थापितो मया॥ कृत्तिवासेश्वरस्यैव दक्षि

णादिशिसादरं॥ततःसायंविष्णुमुख्याःकृत्वापूजांममप्रिये॥भैरवाभ्यर्चनार्थायजग्मुर्भैरवसन्निधौ
ततस्तेभैरवंदेवमुपचारैश्चषोडश॥ संपूज्यार्घप्रदानानिचक्रुर्भक्तिसमन्विताः॥उपोषणस्यांगभूतम
र्घ्यदानमिहस्मृतं॥तथाजागरणंरात्रौपूजायामचतुष्टये॥भैरवायोग्रभूपाययस्त्वर्घ्यंनप्रयच्छति॥
तस्योपवासजनितंनफलंजागरार्जितं॥पात्रेपुष्पाणिसजलान्यादायार्घ्यमनुत्तमं॥जपेतोदृढुरघ्या
णिभैरवायामितात्मने॥भैरवार्घ्यंगृहाणेशभीमरूपाव्ययानघ॥अनेनार्घ्यप्रदानेनतुष्टोभवशि
वप्रिय॥सहस्राक्षिशिरोबाहोसहस्रचरणाजर॥गृहाणार्घ्यंभैरवेदंसपुष्पंपरमेश्वर॥पुष्पांज
लिंगृहाणेशावरदोभवभैरव॥पुनरर्घ्यंगृहाणेदंसपुष्पंयातनापह॥इतिकृत्वार्घ्यदानानिनिशिवि
ष्णुपुरोगमाः॥चक्रुर्जागरणंरूपंशांतंतेतत्रभैरवस्यते॥भैरवस्यतुकर्त्तव्यापूजायामचतुष्टये॥कार्यं
शिवकथालापैर्निशिजागरणंसदा॥जागरंचोपवासंचकृत्वाकालाष्टमीदिने॥प्रयतःपापनिर्मुक्तः
शैवोभवतिशोभने॥योदेविभैरवाष्टम्यामुपवासंप्रयत्नतः॥नकरिष्यतिमोहेनसयास्येवहियात

ना॥तस्मात्पूजाभैरवस्यकर्त्तव्यासततंबुधैः॥यातनाभीरुभिर्मर्त्यैर्मुनिभिश्चामरैरपि॥यथाहमन्वहं
पूजास्तथापत्यहमादरात्॥पूजनीयाप्रयत्नेनभैरवोभीमशासनः॥पुराविष्णुरनेनेवभैरवेणहि
भक्षितः॥निष्कासितश्चतेनैवपुनःसंस्थापितोहरिः॥पुराक्षीराब्धिमध्यस्थोविष्णुर्लक्ष्मीसम
न्वितः॥सायंकालेपिसंश्लिष्यलक्ष्मींतस्थौप्रहर्षितः॥तदाविलोक्यतंलक्ष्मीर्विष्णुंप्रोवाचसादरं
रविरस्तंगतोमुंचशय्यांमांचरतिंमपि॥सायंकालेशयानस्यलक्ष्मीर्नष्टाभविष्यति॥विशेषतः
स्त्रीरतस्यत्यक्तसंध्यादिकर्मणः॥सायंकालेमहादेवःपूजनीयोखिलैरपि॥कुरुभस्माद्दूलनादिस
र्वपापविनाशकं॥बिल्वपत्रादिसंपाद्यपूजदेवोत्तमंशिवं॥प्रणमानिकुरुत्प्रीत्याशरणंव्रजशंकरं॥सर्वेष्व
पिप्रदोषेषुपूजनीयःसदाशिवः॥इदानींसप्तमीयोगोविशेषेणाद्यवर्त्तते॥यःसप्तमीप्रदोषेषुशंकरं
पूजयिष्यति॥नतस्यनरकावासोदारिद्र्यंचनसर्वथा॥प्रदोषकालेभगवन्महादेवःसुराधिपः॥करो
तितांडवंदेवीमुपविश्यशुभासने॥तांडवाभिरतंदेवंग्रहनक्षत्रमालिनं॥हृदिध्यात्वामहादेवंपूजयस्व

शिवस्य
॥९७॥

सुरोत्तमं॥अभिषिच्य महादेवं लिंगरूपिणमव्ययं॥क्षीरेणानेन शुद्धैश्च जलैर्नीहारसन्निभैः॥गृहीत्वा
चंदनं रम्यं शिवलिंगं समर्चय॥एतैर्नैवेद्यबिल्वपत्रैरभ्यर्च्य महेश्वरं॥धूपदीपादिकं कृत्वा नैवेद्यं च समर्प
य॥प्रणामानि कुरु प्रीत्या शैवं पंचाक्षरं जप॥कुरु नृत्यं महादेवप्रीत्यर्थं करताडनैः॥प्राणयत्नं महा
देवं शरणं पाहि शंकरं॥शिवपूजार्थमालस्यं यः करिष्यति मूढधीः॥स विहाय क्षीरमुत्तमं त्रं पिबति सर्व
था॥यदि त्यक्ष्यसि सायाह्नि महादेवस्य पूजनं॥तदा त्वया मयाप्यद्य दुःखं प्राप्यं न संशयः॥पत्रैर्जलै
र्वा मंत्रैर्वा पूजितः परमेश्वरः॥तुष्टो भवति गौरीशस्तस्मेवार्चय शंकरं॥धत्तूरकुसुमेनापि पूजितः
शंकरः स्वयं॥ददाति परमं स्थानं योगिनामपि दुर्लभं॥तस्मादुत्थाय यत्नेन पूजयस्व सदाशिवं॥संपू
ज्य सायं विश्वेशं निःपापो भव सत्वरं॥सायंकाले महादेवं यो नार्चयति शंकरं॥स एव सर्वपापानामा
श्रयो भवति ध्रुवं॥सायं त्यक्त्वा शंकरस्य देवदेवस्य पूजनं॥यस्तिष्ठत्यापदां प्राप्ते सतिष्ठति न संशयः॥
ऐश्वर्यं तु त्वया प्राप्तं शंकरस्यैव पूजया॥तादृशेन कथं त्याज्यं त्वया शंकरपूजनं॥ऐश्वर्ये मोक्षकामे

श्रीः॥
॥९७॥

न मोक्षकामेन वानघ॥कर्तव्यमतियत्नेन शंकरस्यैव पूजनं॥महापातकयुक्तो वायुक्तो वा सर्वपातकैः
मुच्यते पातकैः सर्वैः प्रदोषे शिवपूजया॥ हितमेव मयोक्तं ते नाहितं वच्मि सर्वथा॥अविलंबेन यत्नेन पू
जयस्व महेश्वरं॥इत्युक्त्वा संस्थिता लक्ष्मीर्भ्रांतचित्तो हरिस्तदा॥उवाच वचनं लक्ष्मीं कंपयन्कुपिता
ननः॥को वा मम मास्ति संपूज्यः पूज्योहं सर्वदेहिभिः॥क्व शंकरः क्व वा तस्य पूजने मुक्तिहेतुता॥इत्यु
क्तं तद्वचः श्रुत्वा लक्ष्मीर्विष्णुमुवाच सा॥हाहा विष्णो भ्रांतचित्तः कथं जातोसि तद्वद॥ते वाशुभस्य
कालोयं सत्वरं समुपस्थितः॥नो चेन्महादेवनिंदा कथं कार्या त्वयाहरे॥दृश्यंते दुष्टचिह्नानि शुभचि
ह्नं न किंचन॥भ्रष्टं च मम धम्मिल्लमुत्तरीयमधोगतं॥त्रुटिता कंठमाला च भ्रूव्यथापि समुत्थिता
क्षणार्धे नैव संप्राप्यमशुभं नात्र संशयः॥महादेवस्य यो निंदां करिष्यति सुरोपि वा॥स चंडाल इति द्रे
यो भवत्यग्रेपि सोंत्यजः॥एवमुक्त्वा स्थिता लक्ष्मीस्तदानीमेव भैरवः॥क्षीराब्धिप्रमुखानब्धीन् पपौ स
हापि लीलया॥पंचाशद्युगपर्यंतं समुद्रास्तस्य तुंदरे॥ स्थिता विष्णुः स्थितो लक्ष्मीसहितः संकटं च

हत्। ततश्चिक्षेपसकलान्वल्लीनमितविक्रमः॥ तदादुःखमभूद्विष्णोर्नेत्राणामपिशोभने॥ ततःपप
तगहने विष्णुर्जलविवर्जितं॥ पपातान्यत्रलक्ष्मीःसादुःखिताभयविह्वला॥ पतिताशोकसंविष्टा स्मरं
तीशंकरंतदा॥ क्वासिशंभोमहादेवपाहिपाहीतिचावदत्॥ एतस्मिन्नंतरेकाले विष्णुर्लक्ष्मीमुपाययौ॥ वि
ष्णुंदुःखितमालोक्य लक्ष्मीर्दुःखपराप्यभूत्॥ लक्ष्मीरुवाच विष्णुस्त्वमयातवस्वःपुरा॥ नश्रुतंतत्फ
लंजातमाशुदुःखमुपागतं॥ शंकराभ्यर्चनंत्यक्त्वा सायंस्थितमनेनमया॥ प्राप्तंतुदुःसहंदुःखमत्संबंध
त्त्वयापितत्॥ आपदामाश्रयाभ्रांताः भ्रांतोहमपिदुःखभाक्॥ मयाभ्रांतेननकृतं सायंशंकरपूज
नं॥ विध्युक्तकर्मनिरतैर्दुःखंनप्राप्यतेबुधैः॥ तदन्यैःसर्वथाप्राप्यंदुःखंनूनंक्षणेक्षणे॥ सायंशिवा
र्चनंकार्यमप्रमादेनपावनैः॥ तस्मात्प्रमदोभूयादितिवेदोपिवर्तते॥ अतःपरंपूजयामि शंकरंलो
कशंकरं॥ अतिपत्तेनकमले गतोमोहोममाधुना॥ आयाहियामोनिलयं वैभवंदुःखनाशकं॥ य
त्वंकरार्चनंलब्धंपदंसर्वार्थदायकं॥ सदाशिव०॥ इत्युक्तंतद्वचःश्रुत्वा विष्णुर्लक्ष्मीरुवाचतं॥ कै

वैष्णवपदंविष्णो किमयाप्यस्तितत्पदं॥ तत्पदंरिटिनाप्राप्तंदत्तंतन्नंदिनापुरा॥ तस्मैतेनकथंदेयं तत्प
दंसर्वसौख्यदं॥ अतःपरंकदानंदीप्रसन्नस्तेभविष्यति॥ तुष्टिस्तुनंदिकेशस्यभूयसातपसापिना
पद्यत्पदंतुदेवानांधिक्कारेणमहेशितुः॥ सुतंतुतत्पदंसर्वंनंदिकेशोनगृह्णते॥ शिवःकदाचित्तपसा
प्रीतोल्पेनभवत्यथ॥ नंदिस्तुनभवत्येव सहसाप्रीतमानसः॥ शिवधिक्कारनिरतं नंदिकेशोबला
न्वितः॥ शस्त्रैःसताडयत्याशु दुःखाक्षेपातयत्यपि॥ अनेकेषुविचित्रेषुबहुदुःखप्रदेषथ॥ अशेषा
न्पातयत्येव तेषांदुःखप्रदोमुहुः॥ यस्यकस्यापिवाविष्णो महादेवस्यशासनं॥ नलंघनीयंसर्वेषांशा
स्तायस्मान्महेश्वरः॥ सर्वेषामपिदेवानां यतःशास्तामहेश्वरः॥ ततस्तदाशाकुटिलंदेवानामुन्वितं
हरेः॥ इंद्रःपुरास्वर्गलोकेस्थितःशच्यासमन्वितः॥ प्रदोषेनार्चयामास भ्रांतोदेवोत्तमंशिवं॥ तमु
वाचशचीदेवी पूजयस्वेतिशंकरं॥ तदावगणनातेन कृतातद्वचनस्यतु॥ स्वर्गलोकस्यनाथोहंपू
ज्योहमखिलैःसुरैः॥ ममपूज्यनमोलोकेकस्तिष्ठति वदप्रिये॥ इत्युक्त्वाभोगनिरतः शचीमालिं

न्यसादरं॥ तस्थाविंद्रः कल्पपुष्पशय्यायां मदनातुरः॥ तदानीं नंदिकेशस्य भृत्यः कश्चित्समागतः॥
शिवावगणनावाक्यं शुश्राव द्रमुखोद्भवं॥ ततः सोप्यतिरुष्टः सन् शूलं जग्राह पाणिना॥ इंद्रं ततः स
शूलाग्रे प्रोथयामास सत्वरं ततश्च भ्रामयामास शूलाग्रे संनिवेश्य तं॥ द्वात्रिंशद्युगपर्यंतं चक्रवद्भ
गनांतरे॥ ततस्तं पातयामास स तु दर्दुरपर्वते॥ पतित्वा तत्र देवेंद्रस्तिष्ठत्यद्यापि दुःखितः॥ नंदिकेशस्य
भृत्येन स्वर्गलोकः समावृतः॥ इंद्रोपि सततं पश्चात्पर्वतं भूत्वाधितिष्ठति॥ शंकरस्यावगणनात् ततः
स्वभ्रंशोपि सर्वथा॥ सर्वदेवाधिदेवस्य न कर्तव्या जनार्दन॥ शिवं त्वनन्यसदृशं योन्यदेवसमं विदुः॥
न ते पतिव्रताजाता जारजास्ते न संशयः॥ अन्यदेवसमं मत्वा शिवं देवोत्तमं प्रभुं॥ आचंद्रार्कमघो
रेषु नरकेषु पतिष्यति॥ स मध्यपः स चंडालः स महापातकाश्रयः॥ मनुते योन्यसदृशं देवदेवोत्त
मं शिवं॥ प्राप्तं शिवप्रसादेन विष्णुत्वं च त्वया पुरा॥ ततस्त्वं सर्वभावेन शंकरं शरणं व्रज॥ नान्य
देवसमः शंभुः शिवो देवोत्तमः प्रभुः॥ तस्यावगणना विष्णो सर्वनाशाय जायते॥ ततः शंभुं

तं प्रीणयस्व तपसोग्रेण सादरं॥ प्रसन्नः पार्वतीनाथस्तुभ्यमिष्टं प्रदास्यति॥ शिवयाइत्युक्तः स तथा
विष्णुस्तत्रैव घोरं तपस्तदा॥ तपंसमाभे देवी पंचप्रज्वाल्य पावकान्॥ त्रिकोटियुगपर्यंतं तपस्तप्तं च वि
ष्णुना॥ जिताहारेण तेनैव श्वासान्सम्यङ्निरुध्य च॥ प्रसन्नोस्मि ततो विष्णोस्तदुग्रतपसा शिवे॥ प्रस
न्नेसति मां विष्णुस्तुष्टाव बहुधा स्तवैः॥ ततः परं दापि न च विष्णुर्वेरिटितो मया॥ तत्रोवास महाविष्णुः
स्यत्काउः खानि सर्वथा॥ तदाप्रभृति विष्णुर्मां मम प्रसादेन सादरं॥ पूजयत्यतियत्नेन सर्वकालेषु तत्
द्गतः॥ ततस्त्रिंशत्सहस्रांते कल्पे विष्णुः प्रतापवान्॥ नारसिंहं परं रूपमुग्रं संधारयिष्यति॥ योजना
नां शतं व्याप्य भानुमंडलसन्निभः॥ कृत्वा स देवकार्याणि देवैः संपूजितस्तु तः॥ नमत्तोभ्यधिको लोके
न मया सदृशोपि वा॥ नास्तीति सुरवर्गेषु पश्यन्सु सर्वदृप्यति॥ तदानु शारभं रूपं धृत्वा तं संहराम्यहं
नखाग्रे प्रोथयित्वा तं भ्रामयामि न संशयः॥ ६००॥ हरिं हरं त्वमीशानं विश्वस्य सकलस्य च॥ अनुयास्य
ति मां देवा मतीनां रूपभंगं शंभुं॥ ततो विदार्य तद्देहं घोररूपं वहाम्यहं॥ भीतास्तदानीं मां देवा स्तोष्यति

त्रि॰स्य ॥१००॥ बहुधा स्तवैः॥ विदारितं नृसिंहेन त्रैलोक्याय तु भैरवः॥ पेषयिष्यति पाषाणे पुनर्जीवनशंकया॥
तदा प्रभृति देवानां नारसिंहनिपातनं॥ प्रजयिष्यंति तन्नाम्ना सर्वपापभयापहं॥ अत्रैवं भैरवो वीक्ष्य
दावानलसमप्रभः॥ दहिष्यति न संदेहस्तमनैवं दुरासदं॥ अत्रैव नाम्ना नाथाय कामरूपाश्री कालभै
रवः॥ स्थापितोस्ति मया देवी त्रिपुरे गंधर्वपूजितः॥ दृश्यते भैरवः कामरूपे शैवप्रलयानलः॥ च
तुर्दशसु भुवनेषु तत्तुल्यो न शासकः॥ हंसपंजरस्ति विष्णवादीन् क्रोधसंकुलितेक्षणः॥ महाका
लानलप्रख्यो दुराधर्षो महाप्ययं॥ पातना स्तंभनिकटे यदा शूलधरः स्थितः॥ तदा ममापि सुभ
गे दुर्निरीक्ष्यो हि भैरवः॥ एकोप्यनेकधा भूत्वा विश्वरूपोतिभीषणः॥ संहर्त्तास्य स्वहस्तोयं पातन श्रीः॥
ना स्तंभवीपिषु विग्रहाः कालनाथस्य प्रज्वलद्बुधराइव॥ पातनास्तंभपार्श्वेषु दृश्यते विवि ॥१००॥
धाः शिवे॥ अवपु भैरवं कुंडपुरा विष्णुपुरोगमाः॥ तेन क्रोधानलहतानि पतुर्भुवि मूर्छिताः॥
ततस्ते युगपर्यंतं पतिताः पुनरुत्थिताः॥ शांते क्रोधानले नोचे घ्यास्यंत्येव हि भस्मतां॥ प्रत्यास्र

मं प्रतिगृहं प्रविश्यायं तु भैरवः॥ अत्रैवान्यत्पतिव्राज्ञा शिवार्चनपराङ्मुखान्॥ भस्मोद्धूलनरुद्रा
क्षधारणादिपराङ्मुखान्॥ लिंगपूजाविहीनांश्च दृष्ट्वा क्रुद्धो भवत्ययं॥ क्रोधोस्य विफलो नैव भविष्य
ति कदाचन॥ यस्मिन् क्रोधोस्य तं घोरं पातयत्यस्त्रमंडले॥ देवानामपि सर्वेषां शास्ता श्रीकालभैरवः
तदन्ये तृणभूतास्तु गंधर्वा मुनयो नराः॥ भैरवो भीमवेषोयं दुर्निरीक्ष्यः सुरैरपि॥ यदा क्रोधसमा
क्रांतस्तदा द्रष्टुं न शक्यते॥ अत्रैव ज्ञामकं क्रूरं प्राप्य श्रीकालभैरवं॥ सुखेन संवसाम्यत्र काश्यामिनि
त्यं वरानने॥ यदा तु शैवधर्माणां संक्षयः संभविष्यति॥ तदायं शांभवं धर्मं स्थापयिष्यति भैरवः॥ शै
वधर्मक्षयं यस्तु कर्त्तुमिच्छति पार्वती॥ सा मित्रं तं भैरवोयं नरके पातयिष्यति॥ अत्रैवानांतु दुष्टानां
दुःखदो भैरवोपरः॥ अत्रैवानां तदन्यस्तु शासको न भविष्यति॥ माहात्म्यं भैरवस्येदं समाख्या
तं मया शिवे॥ सर्वपापक्षयकरं पठतां शृण्वतामपि॥ येनेदं पठ्यते प्रातर्माहात्म्यं भैरवस्य तु॥ न त
स्य सर्वथा दुःखस्वप्नेपि कमलानने॥ इदं माहात्म्यममलं मादित्याभिमुखोपदि॥ पठति प्रीत

शि०स्य १०१ हृदयो न समाप्नोति यातनां ॥ बालग्रहादि रोगेषु रक्षाकरमनुत्तमं ॥ कुष्ठापस्माररोगादिविनाशकम
पि प्रिये ॥ भूर्जपत्रे लिखित्वेदं माहात्म्यं प्रत्यहं शिवे ॥ यः पूजयिष्यति शश्वत् दुःखानि न पश्यति ॥ ए
तन्माहात्म्यमंत्रैस्तु प्रत्यहं भैरवार्चकैः ॥ प्रीणनीयो भीमरूपो भैरवो भीमविक्रमः ॥ कालाष्टम्यां वि
शेषेण कालभैरवसन्निधौ ॥ तत्प्रादुर्भावमाहात्म्यं पठनीयं प्रयत्नतः ॥ शृण्वन् श्रीभैरवस्येमां प्रादुर्भा
वकथां नरः ॥ भैरवार्चारतः शैवो यातनां नैव पश्यति ॥ नित्यं भैरवमाहात्म्यमंत्रावर्तनपूर्वकं ॥ प्रद
क्षिणादिकं कार्यं भैरवे यातनापहं ॥ श्रीकालभैरवे भक्तिः सदा कार्या प्रयत्नतः ॥ पूजनीयो न्वहं
पूज्यो देवानामपि शासकः ॥ देवाश्च सर्वदा भीताः शासकं कालभैरवं ॥ पूजयंत्यति यत्नेन प्रत्यहं भी
मविक्रमं ॥ भैरवान्चेकं दृष्ट्वा भरवाप्रेषितान्यपि ॥ तन्नाशकानि शस्त्राणि स्वत एव प्रयांति हि श्रीः॥ १०१
भैरवो ब्रह्मविष्ण्वादीनपि संतर्जयत्पुरा ॥ तदन्यगणनातेन कथं कार्या वद प्रिये न भैरवादुग्ररूपा
दन्यः कारयां प्रशासकः ॥ अत्रैवादपरः काश्यां शास्योपि नवराननेः ॥ अत्रैवं मृतमालोक्य काश्यां

भैरवार्किकराः ॥ दीर्घतमा यमास्त्राग्रे ताडयत्युरुविक्रमः ॥ प्रलयानलसंकाशो ज्वालामालासमावृतः ॥
कालभैरवकोपाग्नी रौरवेवनदाहकः ॥ ततः काश्यां विशेषेण शिवेकपरदेवतैः ॥ शैवैः स्नातव्यमनि ८
शमशैवैर्न कदाचन ॥ कपाली कुंडली भीमो भैरवो भीमविक्रमः ॥ व्यालोपवीती कवची शूली शूरः शि
वप्रियः ॥ एतानि दशनामानि पठन्यः प्रणमेत्सदा ॥ शैवः शिवार्चकस्तस्य नास्ति भैरवयातना ॥ क
र्कोटकश्चकारात्र तपो घोरतरं पुरा ॥ सहस्रयुगपर्यंतं काश्यां पंचाग्निमध्यगः ॥ तत्र कर्कोटकाख्यं च ॥
लिंगं संस्थापयन्मुदा ॥ तल्लिंगस्य पुरोभागे कुंडमेकं ससर्ज च ॥ यदा घोरं तपस्तप्तं तेन तल्लिंगसन्नि
धौ ॥ तदा तल्लिंगतः शंभुराविरासमहं शुभे ॥ ततः संवीक्ष्य मां नागः प्रणिपत्य पुनः पुनः ॥ कृत्वा पूजां
यथाशास्त्रं चकार स्तोत्रमादरात् ॥ ततस्तेनैव नागेन याचितो वरोत्तमे ॥ एको महेश्वरो भक्तिर्दृढास्त्वि
ति वरः परः ॥ अन्योन्यभः शुक्लपक्षे पंचम्यां योजनामुदा ॥ स्नानं कुर्वंत्यत्र कुंडे तेषां रोगादि मास्त्विति
ततो दत्तं मया तस्मै वरद्वयमनुत्तमं ॥ ततः परमपि प्रीत्या तप्तं घोरतरं तपः ॥ विषदोषादिशांत्यर्थं तद्दि
ने सर्वभजनैः ॥ स्नानं कार्यं प्रयत्नेन श्राद्धं च विधिपूर्वकं ॥ कर्कोटकुंडनिकटे संति शैवाः सहस्रशः

तैरपि स्वस्वनाम्नैव लिंगानि स्थापितान्यपि॥ कर्कोटकस्तपस्त्यक्त्वा शैवैः सह कदाचन॥ स्नानार्थं
शिवगंगायां गतः शिवपरायणः॥ तत्र स्नात्वा यथाशास्त्रमाग्नीध्रेश्वरमव्ययं॥ सादरं पूजयामास स
शैवः शिवतत्परः॥ ततः पंचाग्निमध्यस्थं ऊर्ध्वबाहुं जितेंद्रियं॥ जटाभस्मितवीतांगं ददर्श स जनार्दनं॥ दृ
ष्ट्वा प्रणम्य बहुधा कृतांजलिपुटस्ततः॥ उवाच वचनं चारु शिवभक्तहितावहं॥ किं नाम सर्वदा सर्वै
र्जपनीयं प्रयत्नतः॥ कुत्र स्थातव्यमनिशं कथं ध्येयो महेश्वरः॥ काश्मीरादीनि लिंगानि संति नाना
विधानि वा॥ तेषु श्रेष्ठतरं लिंगं किमीष्टफलदायकं॥ कुत्र वा देवदेवस्य महादेवस्य सन्निधिः॥ केन
रूपेण कर्तव्यं शिवलिंगस्य पूजनं॥ इदं सर्वं विशेषेण निश्चित्य वद सादरं॥ कृपया शिवभक्तानां हि
ताय शिवपूजक॥ विष्णु० कर्कोटक त्वया पृष्टं सम्यगेव यथोचितं॥ यथाशास्त्रं यथाज्ञानं तथा वक्ष्ये
शृणु प्रियात॥ वेदोपगीतो बहुधा यश्च शैवः षडक्षरः॥ स एव सर्वथा जप्यः शिवमंत्रो मुमुक्षुभिः॥
शिवमंत्रजपासक्ता मुक्ताः पूर्वं मुनीश्वराः॥ न शैवमंत्रादपरो मंत्रो मुक्तिप्रदायकः॥ शैवं मंत्रं विहा
यान्यं मंत्रं यः समुपासते॥ स मणिं करगं त्यक्त्वा काचार्थं यतते ध्रुवं॥ प्रभावः शैवमंत्राणां ज्ञायते न

मया ध्रुवं॥ तत्त्वं तु शिवमंत्राणां जानाति शिव एव हि॥ पुरा हिमालयप्रांते कश्चिद्विप्रो द्विजाधमः॥ ब्रह्म
हत्यादिपापानि चकार क्रूरमानसः॥ हता मृगवराः शुद्धाः मृगमांसमनेकधा॥ भक्षितं गोसहस्रा
णि निहतान्यशितानि च॥ स एव क्रूरसर्पेण दंशितोऽभूत्कदाचन॥ ततः शिव शिवेत्येतदुक्त्वा नाम मृतो
द्विजः॥ तदानीं कोटिशः क्रूरा यमदूताः समागताः॥ ततस्तेऽगं समुद्धृत्य बध्वा पाशैर्द्विजाधमं॥ त
दा कश्चिद्धिमागेरो संचरन् शिवकिंकरः॥ तदुक्तं मृतकालीनं नाम सुश्राव शांकरं॥ श्रुत्वा तन्नाम वि
मलं धन्यं मत्वा च तं द्विजं॥ याम्यकिंकरान् दृष्ट्वा जगाद वचनं मुदा॥ शिवकिंकर उवाच॥ रे यमभटाः
क्रूराः शृण्वंतु वचनं मम॥ अनेनोच्चरितं दिव्यं शिवनाम श्रुतं मया॥ अयं शैववरो धन्यो नास्य याम्यपय
तना॥ देयमस्मै महेशेन गाणपत्यं न संशयः॥ शिवेति नाम विमलं यदानेनोक्तमादरात्॥ तेनैवा
खिलपापानि नष्टान्यस्य न संशयः॥ तदनंतरमुक्तं च शिवनामाघनाशनं॥ मुक्तिर्दत्ता भवत्येवमा
कुर्वंत्यत्र संशयं॥ नेनेयायं भवद्भिस्तु गंतव्यं भवतां यदि॥ जीवनेच्छा तदा नो चेद्धनिष्यामि न संशयः॥

शि०स्य
१०३

इति तद्वचनं श्रुत्वा मत्तास्ते यमकिंकराः। अनादृत्यैव तद्वाक्यं तं बध्वा गंतुमुद्यताः॥ तदाभवन्महद्युद्धं दे
वदानवदुःसहं। देवगंधर्वयक्षाणां दुर्निरीक्ष्यं भयप्रदं॥ सार्धकोटिसहस्रं ते दुर्जयायमकिंकराः॥ तैः सह
कश्चकाराथ जन्म सशिवकिंकराः। युद्धभूमिगताः क्रूरा यावंतो यमकिंकराः। तावंत एव संसत्र शैवा
इति विदुः सुराः। शैवेन प्रेषितं शूलं एकमेव कदा तदा॥ सार्धकोटिसहस्राणि शूलानि समजायत। शैवो
विभूतिकवचः शूलमात्रकरः शुचिः॥ चित्रं युद्धं चकारैकः सहतैर्यमकिंकरैः एकमेवाग्रवीर्यं तं दृष्ट्वा
शिवकिंकराः। देवदानवगंधर्वा ययुः प्रति दिशं प्रति। तदाभवच्छोणितस्य प्रवाहो मांसकर्दमः। वसाफे
नगणाकीर्णः संकीर्णो यमकिंकरैः। ततः शैवस्य घोरं तं युद्धं श्रुत्वा वार्त्तां यमस्तदा॥ सर्वसैन्याहयुक्तः
सन्ययौ युद्धभुवं प्रति॥ तमागतं समालोक्य यमं स शिवकिंकरः। रहिरहियमेसुत्का शूलजया
हपाणिनः। ततो यमः शूलहस्तं रुद्राक्षवलयावृतं॥ विभूतिकवचं शैवं ददर्श शिवकिंकरं॥ दृष्ट्वा
कृतांजलिपुटः कंपमानो भयाकुलः। प्रणम्य दंडवद्भूमौ पूजां चक्रे यथाविधि। पुनः प्रणम्य बहुधा

श्रीः॥
१०३

प्रसाद्य शिवकिंकरं। जगाद वचनं चारु विनयान्नयकोविदः। शिवभक्तवर श्रीमन् कोयं तव
विदांवर। त्वयि तस्मिन्नीदृशी भक्तिस्तव जाता कथं वद। अनेन ब्रह्महत्यादिपापानि विविधानि च
कृतानीति वदत्येव चित्रगुप्तो विशारदः॥ अनालोचित वक्तारं न भवत्येव सर्वथा॥ विश्वासो बहु
धास्त्यस्मिन्ननृतं न वदत्ययं। ईदृशः पापनिरतः कथं वा रक्षितस्त्वया। कथं मम हतं सैन्यमवि
चार्य त्वयाधुना। प्रायशः पुण्यवानेव भविष्यत्ययमीदृशः॥ ततः शैवोत्तमो नात्र सन्निधानं कृ
तं त्वया॥ शिवलिंगार्चकाः शैवा रुद्राक्षभसिताहताः॥ बहुपुण्यापकल्पर्णेदृशं ते शिवसंमताः
यस्मिन्देशे महाशैवास्तिष्ठंति शिवपूजकाः। तद्देशवासिनः सर्वे कृतार्था नात्र संशयः। शैवां
गसंगमात्रेण पिशाचः पूर्वमुद्धृतः। स्यपि शावतनुं त्यक्त्वा गंधर्वो भवदुत्तमः। यस्मिं स्तुष्यति शै
वेंद्र यस्मिं स्तुष्यति शंकरः॥ शिवभक्तप्रसादोयं प्रसादः शांकरो ध्रुवं। यत्र शैवोत्तमस्यास्ति

सन्निधानमघापहं।।यस्यास्तिशंकरस्यैवसन्निधानेनसंशयः।।शैवःशिवातःशांतःशिवस्यापरविग्रहः
तस्मिन्दृष्टेमहादेवोदृष्टएवनसंशयः।।अयंतुभाग्यवान्धन्यःपुण्यवानितिसर्वथा।।त्वत्सन्निधान
लिंगेनसम्यगेवानुमीयते।।क्षमांकुरुजगद्वंद्यशैवोत्तमशिवार्चक।।नतोस्मित्वत्पदद्वंद्वेकोपंसंहरसंह
र।।इतितद्वचनंश्रुत्वासशैवोवीतमत्सरः।।निजगादततोवाक्यंयममुद्दिश्यकोविदः अनेनब्रह्मह
त्यादिकृतंतत्सत्यमुच्यते।।तत्पातकमभून्नष्टंमत्यकालेशिवस्मृतेः अयंशिवशिवेत्युक्त्वाजहौ
प्राणानिहाधुना।।आद्योक्तशिवशब्देनदग्धंपातककाननं।।तदनंतरमुक्तेनशिवशब्देनसर्वथा
अयंशिवप्रसादेनभविष्यतिगणाधिपः।।इतितद्वचनंश्रुत्वाकंपमानोयमस्ततः।।पूजयामास
विधिनाशैवंमृतमपिद्विजं।।तदानीमेवविश्वेशप्रेषिताःशिवकिंकराः।।दिव्यरत्नविमानानिसम
रुह्याययुर्मुदा।।तदानींपुष्पवृष्टिश्चबभूवसुरनिर्मिता।।नेदुर्दुंदुभयोदिव्याःप्रसन्नाश्चदिशोब

भुः।।ततस्तानागतान्दृष्ट्वाशमनःशिवकिंकरान्।पूजयामाससविधिवद्भक्तिश्रद्धासमन्वितः ततोमृतं
द्विजंशैवंपस्पर्शुःशिवकिंकराः ततःसमभवद्विप्रोदिव्यरूपधरस्तदा ततोविमानेतंविप्रंस्थापयित्वा
शिवार्चकाः ययुश्चवायुवेगेनकैलासंप्रतिशंकराः।।ततस्तस्मैमहेशेनगाणापत्यमनामयं।।दत्तंत
देवनागेंद्रंतत्रतिष्ठतिसाधुनः।।ईदृशाबहवःपूर्वंमहापातकिनोजनाः।।मृतिकालेनविश्वेशास्मर
णान्मोक्षमाययुः।।नृणांमरणकालेतुशिवइत्यक्षरद्वयं।।नायातिसहसानूनंशंकरानुग्रहंविना
शिवनामस्मृतिःकालेवक्तुमेवनशक्यते।।मादृशोरास्थिरस्तातेःशंकरेणविनाध्रुवं।।अतःपंचाक्षरःशै
वाजपनीयस्त्वयासदाःशैवःपंचाक्षरोभव्योमुक्तिदोजप्यतेमया।।शैवःपंचाक्षरोमंत्रःशिवरूपःशि
वप्रदः।।काश्यामंतर्गृहस्थित्वाजपनीयःप्रयत्नतः।।नकाशीसदृशक्षेत्रंतत्राप्यंतर्गृहंवरं।।तत्राप्य
त्युत्तमंदेशंशानवापीतटेशुभे।।तत्रजप्तोमहामंत्रःशैवोयंमोक्षदायकः।।तस्मान्मंत्रवरःशैवस्तत्रज
प्योमनुःसदा।पंचवक्त्रोदशभुजःसर्वदेवोत्तमःप्रभुः।वेदोपगीतसर्वज्ञःसोमसूर्याग्निलोचनः

शि०स्प
१०५

गौरीभूषितवामांगः कल्याणगुणसागरः॥ सर्वलोकपतिः श्रीमान्सर्वदेवार्चितो विभुः॥ नि
ष्कलो निर्गुणो नित्यो निर्लेपो निरुपाधिकः॥ निरंजनो निराकारो निरवद्यो निरामयः॥ ज्योतिःस्व
रूपो विमलश्चिद्घनः सकलात्मकः॥ एकपूर्णः शिवः शांतो मायातीतोऽक्षरः परः॥ इति ध्येयः सदा शं
भुरीश्वर प्रमत्त हर्निशं॥ पूजनीयः प्रयत्नेन प्रत्यहं विधिवज्जनैः॥ गंडकी नाम विमला नदी यत्र
मनोहरा॥ तत्र सोमेश्वर नाम क्षेत्रमस्त्येकमुत्तमं॥ तत्रैव शिवनाभाख्याः शिलाः संति शिवात्मकाः
शिलाश्चैतादृशाः संति विविधाः शिवसंमताः॥ ताः सर्वा अपि संपूज्या लिंगाकाराः शिवात्मकाः॥ तत्पूज
या महादेवः स साक्षात्पूजितो भवेत्॥ उन्मत्तमहिषाक्षाख्याः शिलाः संति शिवात्मकाः॥ तास्तु य
त्नेन लब्धव्याः साक्षान्मोक्षप्रदायकाः॥ तत्रैव शिवकुंडाख्यमेकमस्ति शिवालयं॥ तत्रैव शिवरूपा
स्ताः शिलाः संति मिताः शुभाः॥ कपिलं तच्छिलामूलं पार्श्वे श्यामेव सा शिला॥ उपर्युन्मत्तमहिष
नेत्रसन्निभमुत्कटं॥ सैव पदरणाभख्या लिंगदेशे मनोहरा॥ तत्र शंकरसान्निध्यं भवान्याश्च सदा

श्री:॥
१०५

ध्रुवं॥ तादृशी यत्नतः साध्या शिला शंकरसंश्रया॥ तत्रार्चितो महादेवः प्रीतो भवति सर्वथा॥ तत्राल्पा
पि कृता पूजा श्रद्धया तु शिवार्चकैः॥ सर्वपापहरा भव्या सेवानंताय कल्पते॥ शुद्धेन भस्मना निस्तं नव
बिल्वदलैरपि॥ पूजा कार्या प्रयत्नेन तत्र शैवैः शिवार्चकैः॥ तत्सदा शिवनामाख्यमिति वेदेश्च गीय
ते॥ तदेव विमलं लिंगं मया संपूज्यते सदा॥ यस्त्वेतल्लिंगपूजायां प्रयतोऽत्र वसेन्नरः॥ न तस्य यात
ना घोरा भवेन्नवी सा भविष्यति॥ काश्मीरलिंगप्रमुखान्यनेकान्यमलान्यपि॥ संति तान्यपि पू
ज्यानि मुक्तिकामैर्यथोचितं॥ मम तत्रैव सततं प्रीतिस्तिष्ठत्यनामय॥ मयैतद्देवि विमलं पूज्य
ते लिंगमुत्तमं॥ ईदृशं दुर्लभं लोके लिंगं मोक्षप्रदं वरं॥ मयाप्यत्यंतयत्नेन लब्धं लिंगमयं पुरा॥ ईदृ
शं प्राप्यते लोके न क्वचित्तपसो बलात्॥ ईदृशानि तु लिंगानि दुर्लभान्येव सर्वथा॥ यैतल्लिंगस्य
पूजायामधिकारी जितेंद्रियः॥ शिवैकशरणः शैवस्तदन्यो नैव सर्वथा॥ अत्राभिषेकः कर्तव्यो रु
द्रसूक्तैरघापहैः॥ बिल्वपत्रैर्नवैः शुद्धैः पूजा कार्या प्रयत्नतः॥ धूपदीपादिकं सर्वं स्वशक्त्या कार्य

मन्वहं ॥ पूजांते जपनीयोयं शैवः पंचाक्षरः सदा ॥ ईदृशं लिंगमभ्यर्च्य यत्र तिष्ठति शंकरः । तत्र विश्वेश्वरो
नित्यं नृत्यत्यंबासमन्वितः ॥ एवं विष्णुवचः श्रुत्वा नागः कर्कोटकाभिधः ॥ ययौ सोमेश्वरस्थानं शि
वनाभिशिलाश्रयं ॥ शिवकुंडे ततः शुद्धे प्रविश्य तपसो बलात् । बहुकालसमालोऽभ्यांतो ना
गाधिपस्तदा ॥ अलब्ध्वा तादृशं लिंगमुक्तलक्षणसंयुतं ॥ चकारोग्रं तपस्तत्र मामेवोद्दिश्य सादरं ॥
ततश्च मत्प्रसादेन लिंगं लब्ध्वैव तादृशं ॥ आजगाम पुनः काशीं नागः पूर्णमनोरथः ॥ ततः स वि
ष्णुनासाकं नागस्यांतर्गृहे शुभे ॥ तपः कर्तुं समारेभे पंचाक्षरपरायणः ॥ वीरेशाद्दक्षिणे भागे वि
ष्णुर्बलसमन्वितः ॥ चकार कुंडममलं निर्मलोदकमुत्तमं ॥ सोपानानि चकारात्र रत्नै रत्नमनोहरैः ॥
ततस्तेनैव तत्तीरे कृता च मणिवेदिका ॥ यत्र रत्नमयं लिंगं सर्वाघौघविनाशकं ॥ विधिवत्स्थाप
यामास विष्णुः शिवपरायणः ॥ ततस्तत्रैव विमलं लिंगपार्श्वे जनार्दनः ॥ पंचाग्निमध्ये सततं त
पः कर्तुं समारभे ॥ षट्कोटियुगपर्यंतं ~~तपश्चक्रे बलान्वि~~ चकारोग्रतरं तपः ॥ तल्लिंगपार्श्वे संविश्य

निराहारो रटासनः ॥ पुनोकांघ्रिणा स्थित्वा प्रज्याल्य वसपावकान् ॥ षट्कोटियुगपर्यंतं तपश्चक्रे ब
लान्वितः ॥ ततोधोमुखमासाद्य तपस्तप्तं दुरासदं ॥ षष्टिवत्सरपर्यंतं ब्रह्ममानेन विष्णुना ॥ तत
स्तत्स्थापिते लिंगे प्रादुर्भूतोस्म्यहं शिवे ॥ ततो मां पूजयित्वैवं स्तोत्रमेतच्चकार सः ॥ ६६ ॥ विष्णु०
नमामि विश्वेश्वरमादिदेवं नमामि विश्वोत्तममीशमेकं ॥ नमामि सर्वाधिकमप्रमेयं नमामि शं
भुं गिरिजासहायं ॥ नमामि कालांतकमुग्रमीशं नमामि खट्वांगधरं महेशं ॥ नमामि सोमान
लभास्कराक्षं नमामि वाहीकृतसन्महोक्षं ॥ नमामि सर्पाधिककंठभूषं नमामि नानाविधदि
व्यवेषं ॥ नमामि शुद्धोत्तमभूतिभूषं नमामि संरक्षितभूतशेषं ॥ नमामि सर्वागमवेद्यमाद्यं नमा
मि मायारहितं विशुद्धं ॥ नमामि लोकैकनिदानभूतं नमामि नानाविधसृष्टिहेतुं ॥ नमामि नाकेश्वरा
र्चितांघ्रिं नमामि शुद्धेंदुकलावतंसं ॥ नमाम्यनेकं द्युविभ्रमासं नमामि निस्सकरणादिभावं ॥
नमामि रम्योत्तमचंद्रवक्त्रं नमामि दीर्घोरुहिरण्यबाहुं ॥ नमामि शांतात्महिरण्यरूपं नमामि दि

शि०रह १०७

व्योमहिरण्यवर्णं॥ नमामि सोमं वृषराजकेतुं नमामि शर्वं वृषधर्मकेतुं॥ नमामि भीमं जगदेकनाथं न
मामि रुद्रं जनमोक्षहेतुं॥ नमामि वीरेश्वरमुग्रवीर्यं नमामि देवं पटुनीलकंठं॥ नमामि सर्वार्त्तिहरं
सुरेशं नमामि दीर्घोरुजटाकलापं॥ शिव एव शरण्य पुण्यमूर्त्तिः शिव एवाखिलदेवचक्रवर्ती॥
शिव एव विडंबितामरार्त्तिः शिव एवामितदिग्वगीतकीर्त्तिः॥ त्वदन्यं शरण्यं वरेण्यं न जाने न जाने
शिवामेयकुंभेदुजाने॥ त्वदन्यो न देव स्त्वदन्यो न देव स्त्वदन्यो न देव स्त्वदन्यो न देवः॥ त्वमेव प्रभुः
सर्वलोकैकनाथ स्त्वमीश स्त्वमाद्य स्त्वमाराध्यभूतः॥ त्वदन्यो न पूज्य स्त्वदन्यो न सेव्य स्त्वमेवा
सि पूज्य स्त्वमेवासि सेव्यः॥६७॥ त्वदन्यत्परं वस्तु नास्त्येव लोके त्वदन्या न वेदांतवेद्यापरेशाः॥ त्व
मेवासि सर्वं त्वदन्यं न किंचिद्भवं सत्यमेतद्भवं सत्यमेतत्॥ शिवात्परं नेति वदंति वेदाः शिवात्परं
नेति वदंति देवाः॥ शिवात्परं नेति वदंति सिद्धाः शिवात्परं नेति वदंति शुद्धाः॥ शिव एवाखिलाराध्यः
शिव एव जगत्प्रभुः॥ न शिवात्परमस्त्येकं सत्यं सत्यं मयोच्यते॥ शिवाज्ञयैव सूर्योयं तपति प्रति

वासरं॥ शिवाज्ञयैव चंद्रोयं दीप्यत्यखिलादिशः॥ शिवाज्ञयैव शैलेंद्र फणिदिक्करिणं सदा॥ धृत्वा
तिष्ठति पृथिवीं कंपमानादिवानिशं॥ शिवाज्ञयैव सततं प्रज्वलत्यनलः सदा॥ शिवाज्ञयैव वांत्येते
वायवः सुखहेतवः॥ शिवस्यैव प्रसादेन देवेंद्रः स्वर्गपालकः॥ शिवस्यैव प्रसादेन स्रजकोभूत्प्र
जापतिः॥ एवं स्तुत्वा हरिः शंभुं मामेव शिवमव्ययं॥ भूयः प्रणम्य बहुधा तस्थौ सनतकंधरः॥ त
तश्च बहुकालीन। घोरोग्रतपसा कृतं॥ विष्णुप्रस्तुतममलमेतदेववचो मया॥ त्वत्कृतेनोग्रत
पसा संतुष्टोस्मि जनार्दन॥ वृणु दास्ये वरं श्रेष्ठं स्तोत्रेणानेन चाच्युत॥ इति पृष्टस्ततो विष्णुः
प्रणम्यैनं कृतांजलिः॥ ययाचे वरमुत्कृष्टं शिवभक्तिर्दृढास्त्विति॥ वरोत्तमं वरं देहि वरदोत्तम
शंकर॥ अचंचला शिवे भक्तिर्ममास्त्विति पुनः पुनः॥ अक्षमेण मयादेव स्वल्पमेव तपः कृतं॥
प्रसन्नोसि कथं शंभो करुणाकर शंकर॥ दीनबंधो दयासिंधो प्रसन्नोसि कथं मम॥ मया प्र
जाविधिः सम्यक्तव न ज्ञायते शिव॥ तव स्वरूपं न ज्ञातं तत्वतो मे यविक्रमः॥ ताटृशस्य मम

श्रीः॥ १०७

Dr BHAU DAJI

शि०स्य
१०८

वैवप्रसन्नः कथमीश्वर।। वेदैरपि न ते तत्वं ज्ञातमस्ति महेश्वर। तादृशं शिव तत्वं ते कथं ज्ञेयं मयाधुना।।
त्वदन्यः करुणासिंधुर्लोके नास्त्येव सर्वदा।। यदल्पेनापि तपसा प्रीतोसि भगवान् शिव।। त्वदन्यं शरण
नास्ति त्वमेव शरणं मम।। रक्ष रक्ष महादेव रक्ष रक्ष शिवापते।। त्वदीयं पादकमलं निधेयं मम मूर्धनि
यन्नध्येयामवाम्यध्यधन्यं कुरु सदाशिव।। यन्न वेदपुराणाद्यैर्दृष्टं तत्पदपंकजं। तदेवाद्य मया दृष्टं भाग्य
स्यांतो नमे शिव।। यन्नासिद्धैर्मुनिवरैः कपिलाद्यैर्निरीक्षितं।। तादृशं शंकरस्यैतद्दृष्टं पादांबुजं मया।। इत्यु
क्त्वापतितं सम्यक् पादमूले जनार्दनं।। उत्थाप्यांगं विमृश्याथ दत्ताश्च बहवो वराः। वैकुंठाख्यं महत्स्था
नं सृष्टं पूर्वं मया शुभं।। तदाधिपत्यं सुखदं तदा दत्तं मया शुभे।। लोकान् धर्मेण सततं पालयेति वरः
परः।। दत्तस्तदैव संतोषाद्देयो दुर्लभो मया।। तदानीं पूजयामास कमलैरमलैः समं।। सहस्रनाम
मंत्रैस्तैः प्रतितं नामसंख्यया।। तद्भक्तिदर्शनार्थाय तदेकं कमलं मया।। हृतं तत्तदेकोना नामसं
ख्या बभूव च।। तदा विचार्य कमलममलं ब्रातीव्रमादरात्।। स्वनेत्रकमलेनैव नामसंख्यामपूरयत्

श्री:।।
१०८

तदास्यं तमभत्प्रीतिर्मम तस्मिन्वरानने।। ततो नेत्रं मया दत्तं पुंडरीकनिभं शुभं।। पुंडरीकाक्ष इत्येकं नाम
लब्धं च विष्णुना।। अनेनुघारतां तत्संतपस्तस्फलमीदृशं।। तेनैव विष्णुना तत्र चक्रं लब्धं वरानने।। सुदर्शना
ख्यममलं कोटिसूर्यसमप्रभं।। तेनैव सर्वशत्रूणां विनाशं स करिष्यति।। पुरा मदंघ्रिलेखाभिः सृष्टं त
च्चक्रमुत्तमं।। वरोन्यो यावितस्तेन सर्वलोकहितावहः।। इदं पापहरं भूयात्कुंडमस्त्विति सादरं।। ६०
इदं मणिगणाकीर्णं मणीकर्णीसमन्वितं मणिकर्णीतिविख्यातिं कुंडं यातिजगत्प्रभो।। अत्रैव
मज्जनादेव मुक्ता यांतु जनाः सदा।। स्मरणेनापि पापानां विनाशो भवतु प्रभो।। यः करोति पि
तृश्राद्धमेतत्तीरे मनोहरे।। यांतु तत्पितरः सर्वे ब्रह्मलोकं प्रतिप्रभो।। यस्त्वत्र शैवः पुण्यात्मा तनुत्या
गं करिष्यति।। शैवः पंचाक्षरस्तत्त्वः स समाप्नोतु शंकर। ततश्च त्वत्प्रसादेन स मोक्षमवगच्छतु।। अ
त्रैव नैव देवेश पुनरावृत्तिदुर्लभं। इति प्रार्थितवरास्तेन सर्वे दत्ता मया वराः।। तदा मंदारकुसुमैरभ
हृष्टिर्मनोहरा।। वैकुंठलोकं संप्राप्य तदनुज्ञीतमानसः। पूजयित्वैव मां सम्यगभिवाद्य पुनः पुनः
पूजयित्वैव मां सम्य अंतर्गृहे वासमनन्यलभ्यं लब्ध्वा तपस्यां यदि सावधानं। करोति यः कश्च

नशैवबर्यस्तस्यैवरोदीपतएवमिष्टः ६०८॥०॥०॥ इतिश्रीशिवरहस्येसप्तमांशेशिवगोरीसं
वादेकाशीमाहात्म्येएकादशोऽध्यायः॥११॥०॥०॥० शिवउवाच॥ काश्यामन्यन्महत्स्थानंके
दाराभिधमुत्तमं॥ तत्रापिलिंगमस्त्येकंकेदारेश्वरनामकं॥ कुंडमस्त्येकममलंतत्रैवविमलोदकं
तत्रस्नात्वाविधानेनकेदारेशंसमर्चयेत्॥ तत्रापिमुनयोभक्त्याकृत्वामल्लिंगपूजनं॥ तिष्ठंतिको
टिशः शुद्धास्तपोध्यानपरायणाः॥ तत्कुंडस्नानमनिशंकर्त्तव्यंप्रीतिपूर्वकं॥ तिलैस्तुपितरोनित्यंत
र्पणीयाः प्रयत्नतः॥ तत्कुंडकुहरान्नित्यंसोत्साहंनागकन्यकाः॥ कर्कोटकोपितेनैवमार्गेणा
यातिसादरं॥ अन्येपिबहवोनागाः समायांत्यनिशंमुदा॥ तत्कुंडद्वारिसततंतीक्ष्णशूलासिपा
णयः॥ सार्द्धाष्टकोटिगणपास्तिष्ठंतिक्रूरविक्रमाः॥ तानप्येपूजयित्वैवप्रसाद्यतदनंतरं॥ नागलो
कात्समायांतिसर्वेशेषादयः सदा॥ मामभ्यर्च्ययथाशास्त्रंकृत्वाचांतर्गृहादिकं॥ कुर्वंतिकालना
थस्यपूजनंभक्तिपूर्वकं॥ नृत्यंतिनाट्यनिपुणाः सर्वास्तानागकन्यकाः॥ कुर्वंतिगानममलंगान
शास्त्रानुरोधतः॥ नागचंपकपुन्नागरत्नबिल्वादिसाधनैः॥ मामभ्यर्च्यपुनर्यांतिपुनरायांति

यांतिच॥ तस्यकेदारनाथस्यश्रावणीसोमवासरे॥ पूजाकार्याविशेषेणसाधनैर्विविधैः शुभैः॥ सोम
वारव्रतंकार्यंप्रयत्नेनयथाविधि॥ रात्रैनेपोषणंकार्यमन्यथानिशिभोजनं॥ तस्यदक्षिणदिग्भागे
तिष्ठत्यर्कविनायकः॥ तस्मिन्नेवदिनेसोपिपूजनीयः प्रयत्नतः॥ सर्वविघ्नानिहत्यर्थंपूर्वकर्मणसाद
रं॥ तपस्तत्समहद्वारमेकपादेनसंततं॥ अर्कर्णेवहतंकुंडमेकंतिष्ठतिनिर्मलं॥ तत्तुरत्नौघरचितंपुरा
तनैवधीमता॥ ओंकारेश्वराभिधंलिंगंतत्रास्तिसकलार्थदं॥ तत्पूजाविधिवत्कार्याभानुषष्ठीदिने
शुभे॥ तत्प्रांतेसंतिलिंगानिसर्वाभीष्टप्रदानिच॥ तेषामपियथायोगंपूजाकार्याप्रयत्नतः॥
सिद्धेश्वराभिधंलिंगंकाश्यांतिष्ठतिकामदं॥ तत्रपूजाप्रयत्नेनकर्त्तव्याप्रत्यहंजनैः॥ तत्रैवदुर्गा
विमलातिष्ठत्यमलोचना॥ सर्वदुर्गहरानित्यंस्वभक्ताभयदायिनी॥ तत्राश्विनीशुक्लपक्षप्र
तिपद्यवधिप्रिये॥ नवमीदिनपर्यंतंपूजाकार्याप्रयत्नतः॥ सप्तवर्त्तिहरादेवीनित्यंकाशीनिवा
सिनां॥ पूजिताभक्तवरदाभवत्येवनसंशयः॥ तत्रैवामृतकुंडाख्यंतीर्थमस्त्येकमुत्तमं॥ तत्रस्ना

नेन दुःखानि न भविष्यंति सर्वथा ॥ कामाक्षीस्थानमनघमेकमस्ति वरानने ॥ तत्र कुंडमभूद्दिव्यं
तज्जलं चामृतोपमं ॥ तत्रापि श्रावणे मासि प्रत्यहं विधिवज्जनैः ॥ पूजा कार्या विशेषेण सर्वथा भौम
वासरे ॥ तत्रापि शिवलिंगानि संति कोट्यवधि प्रिये ॥ कुंडान्यपि मनोज्ञानि निर्मलानि वसंति हि ॥ ता
न्यपि श्रद्धया नित्यं पूजनीयानि यत्नतः ॥ निर्मलेषु च कुंडेषु स्नानं कार्यं यथाविधि ॥ आदिदुं
ढीश्वरो नाम गणेशस्तिष्ठति प्रिये ॥ सर्वविघ्नहरो नित्यं सर्वाभीष्टप्रदायकः ॥ प्रतिशुक्लचतुर्थ्यां
तु सद्दूर्वालड्डुकादिभिः ॥ पूजनीयः प्रयत्नेन काशीवासेप्सुभिर्नरैः ॥ कालेश्वराभिधं लिंगमेकम
स्ति वरानने ॥ तत्पूजा सर्वथा कार्या प्रत्यहं विधिवज्जनैः ॥ गोकर्णाभिधमस्त्येकं लिंगं पापौघनाशकं
तत्रापि कुंडमस्त्येकं तत्र स्नानमघापहं ॥ शिवरात्रिदिने तत्र स्नानं कार्यं प्रयत्नतः ॥ तल्लिंगपूजनं
चापि कर्तव्यं तद्दिने शुभे ॥ दिव्यलिंगान्यनंतानि काश्यां तिष्ठंति सर्वथा ॥ तेषां प्रभावः केनापि व
क्तुमेव न शक्यते ॥ अन्येपि ऋषिभिर्दिव्यैर्भौमेश्वरकमलानने ॥ स्थापनीयानि लिंगानि काश्याम

मन्यैरपि ध्रुवं ॥ कुंडान्यपि च कार्याणि तैरेव ऋषिसत्तमैः ॥ तपश्चर्यां करिष्यंति तएवात्र सदा शुभे ॥ ग
तः शतोत्तरे कल्पे कन्या हिमवतः शुभे । भविष्यत्यमला साध्वी रूपलावण्यशोभिता ॥ शिवपत्नी भ
वामीति मामुद्दिश्यैव सा शुभा ॥ पंचाग्निमध्यसंस्थिता तपश्चर्यां करिष्यति ॥ द्वात्रिंशल्लक्षपर्यंतं तपः
कृत्वातिदारुणं ॥ तद्धिमध्यगता साध्वी जलं कृत्वा तपः पुनः ॥ ततः कदाचिद्यत्नेन ब्रह्मलोकं गमि
ष्यति ॥ ब्रह्मादयोपि तां दृष्ट्वा भविष्यंत्येवमोहिताः ॥ ततस्तेभ्योतिविमला शापं दास्यति दारुणं ॥ शि
वसायुज्यरूपो वा मोक्षो मास्त्विति सा प्रिये । मदीयं रूपममलं सर्वेषां मोहकारणं ॥ त्यक्ष्याम्यतदिति
प्रीत्या जलरूपा भविष्यति ॥ ततस्तज्जलमालोक्य ब्रह्मा विस्मयसंयुतः ॥ वारुणैर्बंधुभिः पाशैर्नि
रोधं च करिष्यति ॥ ततः पूर्वकृतामत्यतपसा तदनुग्रहात् ॥ जलरूपवसा भव्या काशीमायास्यति
प्रिये ॥ स्वतः प्रचलितां दृष्ट्वा तदा ब्रह्मादयः सुराः ॥ गंगा गंगेति सर्वेपि प्रवदिष्यंति तां शुभां ॥ त
दाप्रभृति गंगेति नाम तस्या भविष्यति ॥ पावयिष्यति सा लोकान्स्मृताप्यघविनाशिनी ॥ सापि

शि०स्य काश्यां स्वनाम्नैव लिंगं संस्थाप्य सादरं । ज्ञानवापीतटे रम्ये तपश्चर्यां करिष्यति ॥ काशीं संप्राप्य विमला
१११ मनघ्नीं शिवरूपिणीं ॥ तपश्चर्यां विना लोके कः स्यात्स्वपितवरानने ॥ तत्काशीक्षेत्रमालोक्य बालक
स्यापि सर्वथा । तपश्चर्यारतिः शुद्धा भवत्येव न संशयः ॥ काश्यां तु बहवो विघ्नाः काशीवासवियोज
काः ॥ तच्छांत्यर्थं ढुंढिराजः पूजनीयः प्रयत्नतः ॥ अष्टोत्तरशतैर्दिव्यैर्गणेशस्यैव नामभिः ॥
कर्तव्यमतियत्नेन नवदूर्वांकुरार्पणं ॥ हिरण्मयतनुं शुद्धं सर्वार्तिहरमव्ययं ॥ वरदं गणपं ध्यात्वा पू
जाकार्या प्रयत्नतः ॥ ऋषिर्विघ्नेश इत्यादि नाम्नां सर्वेश्वरः शिवः ॥ देवता विघ्नराजोत्र छंदोनुष्टुप्
शुभप्रदः ॥ सर्वप्रत्यूहशमनं फलं शक्तिः सुधात्मिका ॥ कीलकं गणनाथस्य पूजाकार्येति कामद
दा ॥ ५४ ॥ विघ्नेशो विश्ववदनो विश्वचक्षुर्जगत्पतिः ॥ हिरण्यरूपः सर्वात्मा ज्ञानरूपो जगन्मयः ॥ ऊ श्रीः॥
र्ध्वरेता महाबाहुरमेयोमितविक्रमः ॥ वेदवेद्यो महाकायो विद्यानिधिरनामयः ॥ सर्वज्ञः सर्वगः १११
शांतो गजास्यो विगतज्वरः ॥ विश्वमूर्तिरमेयात्मा विश्वाधारः सनातनः ॥ सामगानप्रियो मंत्री

सत्वाधारः सुराधिपः ॥ समस्तसाक्षी निर्द्वंद्वो निर्लिप्तोऽमोघविक्रमः ॥ नियतो निर्मलः पुण्यः का
मदः कांतिदः कविः ॥ कामरूपी कामवेषः कमलाक्षः कलाधरः ॥ सुमुखः शर्मदः शुद्धो मूषकाधि
पवाहनः ॥ दीर्घतुंडधरः श्रीमाननंतो मोहवर्जितः ॥ वक्रतुंडः शूर्पकर्णः परमः पावनो वरः ॥ योगी
शो योगिवंद्यांघ्रिरुमासूनुरघापहः ॥ एकदंतो महाग्रीवः शरण्यः सिद्धसेवितः ॥ सिद्धिदः करुणा
सिंधुर्भगवान्भव्यविग्रहः ॥ विकटः कपिलो ढुंढिरुग्रो भीमोदरः शुभः ॥ गणाध्यक्षो गणाराध्यो
गणेशो गणनायकः ॥ ज्योतिःस्वरूपो भूतात्मा धूमकेतुरनाकुलः ॥ कुमारगुरुरानंदो हेरंबो वेदसं
स्तुतः ॥ नागोपवीती दुर्धर्षो बालदूर्वांकुरप्रियः ॥ भालचंद्रो विश्वधामा शिवपुत्रो विनायकः ॥ ली
लावलंबितवपुः पूर्णः परमसुंदरः ॥ विघ्नांधकारमार्त्तंडो विघ्नारण्यदवानलः ॥ सिंदूरवदनो नि
त्यो विभुः प्रमथपूजितः ॥ शरण्यदिव्यपादाब्जो भक्तमंदारभूरुहः ॥ रत्नसिंहासनासीनो मणिकुं
डलमंडितः ॥ भक्तकल्याणदोऽमेयः कल्याणगुणसंश्रयः ॥ एतानि दिव्यनामानि गणेशस्य म

शि०स्य
११२

हात्मनः॥ पठनीया नियत्नेन सर्वदा सर्वदेहिभिः॥ नाम्नामेकैकमेतेषां सर्वसिद्धिप्रदायकं॥ सर्ववि
घ्नेशनाम्नां तु फलं वक्तुं न शक्यते॥ एकैकमेव तन्नाम दिव्यं जप्त्वा मुनीश्वरः॥ प्रसूत्रमात्ररहिता
स्तिष्ठंति शिवपूजकाः॥ दूर्वायुग्मानि संगृह्य नूतनान्यतियत्नतः॥ पूजनीयो गणाध्यक्षो नाम्ना
मेकैकसंख्यया॥ नभस्य शुक्लपक्षस्य चतुर्थ्यां विधिपूर्वकं॥ वक्रतुंडशकुंडे तु स्नानं कृत्वा प्रयत्नतः॥
वक्रतुंडशमाराध्यं सर्वाभीष्टप्रदायकं॥ ध्यायेद्घहरं शुद्धं कांचनाभमनामयं॥ ततः पूजां यथा
शास्त्रं कृत्वा दूर्वांकुरैर्नवैः॥ पूजा कार्या विशेषेण नामोच्चारणपूर्वकं॥ ततश्च मोदकैर्दिव्यैः सुगंधैर्घृ
तपाचितैः॥ नैवेद्यं कल्पयेदिष्टं गणेशाय शुभावहं॥ अन्यैश्च परमान्नाद्यैर्भक्ष्यैर्भोज्यैर्मनोहरैः॥ श्रीः॥
तोषणीयः प्रयत्नेन वक्रतुंडविनायकः॥ प्रदक्षिणानमस्कारादि तन्नामसंख्यया॥ कर्तव्या ११२
नियतं शुद्धैर्मौनव्रतपरायणैः॥ ततः संतर्प्य विधिवद्देवान् ब्राह्मणसत्तमान्॥ पुनरभ्यर्च्य विघ्नेश
मिमं मंत्रमुदीरयेत्॥ वक्रतुंड सुराराध्य सूर्यकोटिसमप्रभ॥ निर्विघ्नेनैव सततं काशीवासं प्रयच्छ मे

MEMORIAL

इति संप्रार्थ्य विधिवत्पूजां कृत्वा पुनर्मुदा॥ नमस्कृत्वा प्रसाध्यैनं गच्छेद्ढुंढिविनायकं॥ ढुंढिराजार्चनं स
म्यक्कर्तव्यं विधिपूर्वकं॥ मत्रैवाचाविशेषेण पूजां कृत्वा ततः परं॥ पूजनीयाः प्रयत्नेन सर्वदा मोदकप्रि
याः॥ शिवप्रीतिकराणि सं शुद्धाः पंचविनायकाः॥ क्षिप्रसिद्धिप्रदं क्षिप्रगणेशं सुरवंदितं॥ संपूज्य पूर्वव
त्सम्यग्गच्छेदाशाविनायकं॥ आशाविनायकं सम्यक् पूजयित्वा ततः परं॥ अर्कविघ्नेश्वरः सम्यक् पूजनी
यः प्रयत्नतः॥ पूर्ववत्पूजनीयस्या ततः सिद्धिविनायकः॥ पूजनीयस्ततः सम्यक् चिंतामणिविनायकः॥
सेनाविनायकोऽप्येवं संपूज्यस्तदनंतरं॥ दुर्गविनायकस्यापि पूजा कार्या ततः परं॥ एवं संपूज्य विधिव
द्भक्तिश्रद्धासमन्वितैः॥ शैवाः शंकरतत्त्वज्ञा भोजनीयाः प्रयत्नतः॥ एवं संपूजितः सम्यक् प्रीतास्ति
गणनायकाः॥ काशीवासं प्रयच्छंति निर्विघ्नेनैव सादरं॥ आज्येन कापिलेनैव सार्धलक्षत्रयाहुतीः॥
कृत्वैतन्नामभिः सम्यक् सर्वविद्याधिपो भवेत्॥ एतानि दिव्यनामानि प्रातर्वा सरमादरात्॥ पठि
त्वा गणनाथस्य पूजा कार्या प्रयत्नतः॥ यस्य कस्यापि संतुष्टो गणपः सर्वसिद्धिदः॥ अतएव सदा पू

ज्यो गणपः सर्वसिद्धिद नाथो विचक्षणैः ।। गणेशादपरो लोके विघ्नहर्ता न विद्यते ।। तस्मादन्वहमाराध्यो
गणेशः सर्वसिद्धिदः ।। काशीनिवाससिद्ध्यर्थं विष्णुना पूजितः पुरा ।। पुरा विघ्नेश्वरः सम्यक् पूजितो द
ण्डपाणिना ।। कर्कोटकेन नागेन गणेशः पूजितः पुरा ।। शेषेण पूजितः पूर्वं गणेशः सिद्धिदायकः ।।
काशीयात्रार्थमुद्युक्तो विधिर्विघ्नकुलाकुलः ।। पूजयामास विघ्नेशं विधिवद्भक्तिपूर्वकं ।। सूर्येणाभ्य
र्चितः पूर्वं चन्द्रेणेन्द्रेण वज्रिणा ।। दैवैरन्यैश्च विधिवत्पूजितो गणनायकः ।। मर्त्यानाममराणां मुनीनां
वा वरानने ।। न सिध्यन्त्येव कार्याणि गणेशाभ्यर्चनं विना ।। काशीयात्राविधिं वक्ष्ये शृणु सादरमम्बिके
नियमा बहवः सन्ति काशीयात्रारतात्मनां ।। ब्रह्मक्षत्रियविट्शूद्रैः स्वस्ववृत्त्या यथोचितं ।। न्यायेन
वधने सम्यगर्जनीयं प्रयत्नतः ।। ब्राह्मणैः शुक्लवृत्त्यैव वृत्त्या धनसंग्रहः ।। शूद्रद्रव्यं न गृह्णीयाद्रा
जद्रव्यं च विद्वनं ।। अयाचितं च विप्रेश्च ग्राह्यं याजीविभिर्द्विजैः ।। दत्तमल्पमनल्पं वा ग्राह्यं विप्रं द्वि
जोत्तमैः गृहीत्वा तत्त्रिधा कृत्वा भागेनैकेन सादरं ।। श्राद्धकार्यं प्रयत्नेन ततो मुण्डनपूर्वकं ।। कालु

भैरवमुद्दिश्य तदन्ये द्युद्विजोत्तमाः ।। भोजनीयाः प्रयत्नेन शैवाश्च शिवप्रियाः ।। भोजनीयाः प्रयत्नेन
मदर्थमपि शांकराः ।। ततो गणेशमुद्दिश्य भोजनीयाः शिवद्विजाः ।। ततश्च दुर्गां संपूज्य सर्वदुर्गविना
शिनीं ।। पुनर्मल्लिंगममलं पूजनीयं प्रयत्नतः ।। द्विजेभ्यो बंधुवर्गेभ्यः प्रतिगृह्याशिषस्ततः ।। शिष्टंध
ने गृहीत्वैवं द्विजः संतुष्टमानसः ।। पूर्णकुंभद्वयं लिंगं पूजितं कन्यकाद्वयं ।। दध्यक्षीरफलान्नादि कृ
त्वा प्रयत्नपूर्वकं ।। ततस्त्वयं समुच्चार्यो मंत्रः सर्वार्थसाधकः ।। पूजयित्वा विशेषेण लिंगरूपिणमीश्व
रं शिव गौरीपते श्रीमन्भक्तवत्सल शंकर ।। काशीयात्रां करिष्येऽहं निर्विघ्नं कुरु सर्वदा ।। विघ्नेश भ
क्तिवरद विघ्नराज गणाधिप ।। काशीयात्रां करिष्येऽयं निर्विघ्नं कुरु सर्वदा ।। कालभैरव सर्वात्मन् का
लनाथ जगत्प्रभो ।। काशीयात्रां करिष्येऽहं निर्विघ्नं कुरु सर्वदा ।। जय दुर्गे जगद्वंद्ये जय दुर्गे शिवप्रिये
काशीयात्रां करिष्येऽहं० ।। ततो मां वृषभारूढं दिव्यमंगलविग्रहं मुक्तादामपरीतांगं मंगलप्रदमु
त्तमं ।। गौरीभूषितवामांगमभयप्रदमुत्तमं ।। ध्यात्वा सम्पूज्य तो गच्छेदन्यग्रामं शुभे दिने निरा

शि०स्व
११४

।हारेण निर्गते मौनव्रतपरायणः।।अगृहीत्वोपानदादीन्कीटानस्पृश्यभूगतान्।।शिवगौरीपतेश्री
मन्विश्वनाथसदाशिव।।कल्याणदेतिसततं स्मरन्मंत्रमिमं जपन्।।अदूरग्राममाश्रित्य प्रथमेदिवसेशु
चिः।।पुनःशैववरान्सम्यक्भोजयित्वा यथाविधि।।भोक्तव्यं नियमेनैव स्वेनशिष्टं ततः परं।।सायमप्य
न्यविधिनाशैवं संध्यादिपूर्वकं।।याममात्रं शिवध्यानं कर्तव्यं विधिपूर्वकं।।ततो निद्रा यथायोगं कर्त
व्या विधिपूर्वकं।।संप्रोक्ष्य पुनर्वमत्यल्पान्कुशानास्तीर्य सादरं।।एकाकी नैव नियमान्निद्रा कार्या प्रय
त्नतः।।ततश्च पश्चिमे यामे निद्रां त्यक्त्वा ततः परं।।कृत्वा शौचादिकं सम्यग्ध्यात्वा त्वां परमेश्वरं।।स्ना
नादिकं ततः कार्यं लिंगपूजा विशेषतः।।विघ्नेशं भैरवं दुर्गां संपूज्य तदनंतरं।।शैवान्संपूज्य विधिव
त्ततो गच्छेद्यथाविधि।।ध्यात्वा हृदि शिवं सम्यक्जपन्पंचाक्षरं शुभं।।क्रोशी मार्गरतैर्मर्त्यैर्न ग्राह्या
नपादुका।।यात्राफलचतुर्थांशो नष्टः स्यात्पादुकैर्यतः।।अर्धं नश्यत्यश्वयानाद्यात्राफलमनुत्तमं
काष्ठखट्वादियानैस्तु सर्वं नश्यति तत्फलं।।मार्गे विलोक्य कीटादीन्गंतव्यं पथि यत्नतः।।नोचेद्यात्रा

श्री०।।
११४

फलं न्यूनं भविष्यति न संशयः।।यात्राकाले विशेषेण यस्यकस्यापि देहिनः।।न देयान्येव दुःखानि विचा
र्य विधिमादरात्।।मौनमेव सदा कार्यं कर्तव्यं शिवचिंतनं।।अनृतं नैव कर्तव्यं कदाचिदपि सर्वथा।।निंदान्य
स्य न कर्तव्या न श्रोतव्या च सर्वथा।।नग्नां स्त्रियं न वीक्षेत स्वीयामपि कदाचन।।ऋतुकालेपि संप्राप्ते
स्वस्त्रिया सह सर्वथा।।नैकत्र शयनं कार्यं ब्रह्मचर्यव्रतं चरेत्।।प्रतिग्रहो न कर्तव्यो यात्राकालेषु सर्वथा
नाशैवैरभिभाषेत प्रमादेनापि सर्वथा।।कदाचित्तु प्रमादेन यदि दृष्टो नराधमः।।सदाशिव शिवेत्यु
क्त्वा भानुं पश्येद्यथाविधि।।प्रमादेन कदाचित्तैः स्पृष्टश्चेद्वसनान्वितं।।स्नानं कार्यं विधानेन मृ
त्तिकास्नानपूर्वकं।।रुद्राध्यायस्य चावृत्तिः कर्तव्या विधिपूर्वकं।।भालं विशोध्य सलिलैः पश्चात्कार्यं त्रि
पुंड्रकं।।प्रातस्तु सजलं भस्म मध्याह्ने गंधमिश्रितं।।ततो रुद्राक्षभस्मादि धृत्वा गच्छेद्यथासुखं।।
एवं प्रयत्नतो नित्यं गंतव्यं विधिपूर्वकं।।यात्राफलेप्सुभिर्मर्त्यैः शैवैः शिवपरायणैः।।कालत्रयेपि क
र्तव्यं शिवलिंगस्य पूजनं।।मध्याह्ने शिवतुष्ट्यर्थं भोजनीयाः शिवार्चकाः।।ततः शिवकथा श्रव्याः

शि॰ रह
११५

श्रोतव्याः पापनाशकाः।। आसाद्य मतिपत्नेन ततः संध्या शिवार्चनं।। एवं प्रकारैः शैवैः मद्व्रतैस्तु पदे प
दे।। अश्वमेधफलं पूर्णं प्राप्यते नात्र संशयः।। तथाप्यत्रापरं शैवं दृष्ट्वा नत्पितरः शिवे।। अत्यंतमोदमाना
स्ते नृसे कुर्वंति पततः।। नरके पतितानस्मानुद्धरिष्यत्ययं सुतः।। काश्यां श्राद्धं विशेषेण करिष्यति
न संशयः।। ज्ञानवापीजले रम्ये धिकृत्वा मृतमुत्तमं।। दास्यत्यस्मभ्यममलमयं नास्यत्र संशयः।। स्ना
त्वायं कालकुंडेपि नरके मुक्तिसाधनं।। श्राद्धं कृत्वा विधानेन पिंडदानं करिष्यति।। ज्ञानवापीतटे रम्ये
सोयमस्मभ्यमादरात्।। श्राद्धं कृत्वा विधानेन पिंडदानं करिष्यति।। मणिकर्णीजले स्नात्वा श्रा
द्धं कृत्वा विधानतः।। पिंडदानमयं सम्यक् करिष्यति न संशयः।। वीरेशकुंडे विमले पापनाभयनाशके
श्राद्धं करिष्यति प्रीत्या तर्पणं च करिष्यति।। श्रीमत्पशुपतीशस्य कुंडे स्नात्वा यथाविधि।। श्राद्धं कृत्वा
विधानेन पिंडदानं करिष्यति।। अयं कर्कोटके कुंडे विश्वदुःखविनाशके।। स्नात्वा श्राद्धं पिंडदानं क
रिष्यति न संशयः।। श्रीमदोंकारकुंडेपि स्नात्वा श्राद्धं करिष्यति।। पिंडदानमयं कृत्स्नैस्तिकैः श्राद्धं

श्रीः॥
११५

करिष्यति।। केदारकुंडे विमले पिंडदानं करिष्यति।। जलं कृत्वा तिलैः सार्द्धं बद्धदास्यत्यसंशयं।। पश्चात्वायं
जलं स्पृष्ट्वा काशीस्थं दुःखनाशकं।। दास्यत्यस्मभ्यममलं दुःखं त्याज्यमतः परं।। काश्यां तुलीलयाव
यं मृत्पिंडं वा कदाचन।। दास्यत्येव न संदेहः पितृनुद्दिश्य दुःखहं।। अस्माद्गोत्रे समुत्पन्नः काशीं यास्य
त्ययं मुदा।। अस्माभिः सावधानेन रक्षणीयः प्रयत्नतः।। एतस्य कंटकादिभ्यो यथा दुःखं न जायते
तथा प्रयत्नतः सम्यग्रक्षणीयोयमादरात्।। अत्यल्पैरेव दिवसैर्घोरनरकादयं।। उद्धरिष्यति द
त्वास्मान्काशीस्थजलमेव वा।। कघोरयातनाभीतिर्यमसत्कुलोद्भवः।। काशीं गच्छति तत्रायं
सम्यक् श्राद्धं करिष्यति।। नास्मन्मार्गे समायांतु यमदूता भयानकाः।। अयं गच्छति मद्रूपाः का
शीं प्रति शिवार्चकः।। मायं तु सर्वथास्माकं निकटे यमकिंकराः।। अयमस्मत्कुलोद्भूतः काशीं प्र
ति गमिष्यति।। कस्यचित्पितरः पूर्वं नरके पतिता स्थिताः।। घोराण्यनंतपापानि तैः कृतानि पुराब

शि० स्य ११६ लात्।। केनचिद्वो सहस्राणि निहतानि दिने दिने।। गोमांसमेव बहुधा भक्षितं तेन सादरं।। ब्रह्म
हत्या सहस्राणि गोहत्याशतकानि च।। अश्वहत्या सहस्राणि पुरा तेन कृतानि हि।। यावज्जीवं कदा
चिद्वा तेनैव हि दुरात्मना।। विप्रजन्मापि संप्राप्य न स्नानं तीर्थवारिणा।। संध्या न वंदिता तेन सर्वपापाप
पनोदिनी।। न जप्तैव हि कैः गायत्री निर्मला सा शिवात्मिका।। सर्वपापहरं शुद्धं भस्मितं सितमुत्तमं
न धृतं विधिवत्तेन शिवमंत्राभिमंत्रितं।। क्षणे क्षणेपि रुद्राक्षा धृताः पापविनाशकाः।। तेन पापा
त्मना शुद्धाः कौतुकेनापि न ते धृताः।। सर्वार्थदायकं नित्यं विहितं लिंगपूजनं।। सर्वाघनाशकं कृतेन न कृ
तं च कदाचन।। बिल्वैर्मनोहरैः शुद्धैः कोमलैः शिवसंमतैः।। न कृतं पूजनं शंभोस्तेनैव हि कदाचन श्री:॥ ११६
धूपदीपादिभिः सम्यक्तेन नाभ्यर्चितः शिवः।। अर्चितं शिवलिंगं च तेनैव न निरीक्षितं।। प्रणा
मो दंडवद्भूमौ विकोवा पापनाशकः।। शिवार्थं न कृतं तेन कदाचिदपि सादरं।। नृत्यप्रदक्षिणाद्यै

श्च सर्वपापविनाशकैः।। नाराधितो महादेवस्तेनैव हि दुरात्मना।। वेदोपगीतममलं मोक्षप्रद
मनुत्तमं।। शिवनाम शिवाकारं न जप्तं तेन सर्वथा।। स्वहृत्सिंहासनारूढं कृत्वा देवोत्तमं शि
वं।। ध्यानं च न कृतं तेन कदाचिदपि सर्वथा।। ७४।। दिव्याः शिवकथाः श्रव्याः सर्वपापप्रणोदकाः।।
तेनैव पापरूपेण कदाचिदपि न श्रुताः।। शिवलिंगार्चकैः शुद्धैः शैवैः शिवपरायणैः।। प्रीतिश्च न कृ
ता तेन शैवा नाभ्यर्चिताः पुरा।। शिवतीर्थाटनं शुद्धमघहं च क्षणे क्षणे।। कदाचिदपि तेनैव न कृतं
पापकारिणा।। शिवालयस्याभिनिर्माणं स्वर्गादिफलसाधनं।। न कृतं तेन दुष्टेन धनिनापि
कदाचन।। ईदृशा बहवो नष्टास्तस्यैव पितरास्थिताः।। तेषामघोरनरके वासः क्षणमभूत्पुरा। आ
चंद्रार्कमघोरेषु नरकेषु सदा स्थितिः।। अनेककल्पकल्पैर्वा न भविष्यति सर्वथा।। बहुकालम
नेकेषु नरकेष्वेव सर्वदा।। वसतिः संमता तेषामशैवानां दुरात्मनां।। ततः स दुर्दशाजः शुद्धः शै
वः शिवपरायणः।। अयाचितव्रतेनैव वसन्नियमपूर्वकं।। न्यायेनालब्धधनं शुद्धं संपाद्य तदने

शि०स्य
११७

तरं॥ काशीं गंतुं समुद्युक्तो व्रती नियम मास्थितः॥ काशीमुद्दिश्य नियमात्क्रोशार्धं समुपागतः॥
तदा तत्पितरः सर्वे नरकेभ्यो विनिर्गताः॥ तेन काश्यां ज्ञानवाप्यां पिंडदाने कृते ततः॥ ते न तत्पि
तरः सर्वे ब्रह्मलोकं ययुर्मुदा॥ अस्माभिः स्मर्यते तत्तु भवतां किं न सा स्मृतिः॥ वितर्यं तु न सं
स्कारो लुप्तः स भवतां ध्रुवं॥ मा यांतु निकटे यूयमस्माकं यम किंकराः॥ तद्दिवार्यैव बहुधा दू
रं यांत्यति शीघ्रतः॥ यद्यस्मिन्निकटे यूयमायास्यंति तदा मयः॥ भवतां रक्षणाशा स्तान
न करिष्यति सर्वथा॥ यांति दूरं यमभटाः सशास्ताः क्रूरविग्रहाः॥ काशीं गच्छति तीव्रेण मद्दरय पु
रुषर्षभः॥ मा दर्शयंतु शास्त्राणि तूष्णीं तिष्ठंतु दूरतः॥ अयं मद्दराजो धन्यः काशीं प्रति गमिष्यति
वक्तव्यो यमोस्माभिर्मद्दरयः शैवपुंगवः, काशीं गच्छति तीव्रेण त्यतो यांतु यम प्रियः॥ यमोप्य
स्मद्वचः श्रुत्वा भीतिं यास्यत्यसंशयं॥ भवंतो दूरतो यांतु प्राणेच्छा यदि वस्तदा। इदानीमेव शमनः
समायास्यति सादरं॥ पूजामस्याप्यमरूः करिष्यति न संशयः॥ शैवो मद्दराजः सम्यक्काशीं गच्छति

श्री:॥
११७

सादरं। पूर्वमस्मत्कृताः सर्वे दग्धाः पातककोटयः॥ इति तत्पितरः सर्वे वदंतः सादरं मुदः॥ नत्यं कुर्वं
ति सततं प्रस्तुवंति च सादरं, एवं नियममासाद्य काशीं संप्राप्य सादरं, काशीं संपूज्य विधिवत्कुर्यात्त द
नु मुंडनं। दंडपाणिप्रसादेन तस्मिन्नेव दिने शुभे॥ स्नानं कार्यं प्रयत्नेन ज्ञानवापीजले शुभे, आमद्रव्ये
ण विधिवच्छ्राद्धं कर्तव्यमादरात्॥ हिरण्येनाथवा श्राद्धं कुर्यात्तद्दिनं एव हि। हव्यश्यामाकनीवारयव
चूर्णादिभिः क्रमात्, पिंडदानं यथाशास्त्रं कर्तव्यं नियमेन हि॥ २००॥ पितुः पिंडत्रयं देयं मातुरप्याद
रात्तथा॥ अन्येषां तु यथायोगमेकैकं स्याद्यथाक्रमं। ततः कृष्णतिलैः शुद्धैः कृत्वा तु तिलतर्पणं॥ ज्ञा
नवापीं समभ्यर्च्य ततो ज्ञानेशमर्चयेत्॥ विनायकं ढुंढिराजं समभ्यर्च्य ततः परं, मुक्तिमंडपमा
साद्य ध्यात्वा मामजमव्ययं। नंदिकेशं समभ्यर्च्य द्वारपालानपि क्रमात्॥ ततो मत्पूजनं कार्यं स्व
शक्त्या वै यथाविधि। ततो वीरेशकुंडादौ स्नानं कृत्वा यथाक्रमं। श्राद्धपिंडप्रदानादि कर्तव्यं वि
धिपूर्वकं। श्राद्धावशिष्टान्नं हि त्वान्नाभक्षयित्वाति कांस्तथा तु, कुर्याज्जागरणं सम्यक् निराहा

DR. BHAU DAJI MEMORIAL

शि०रह रेण सादरं ।ततस्तु पश्चिमे यामे पंचक्रोशाद्बहिर्व्रजेत् ॥ कृत्वा मौंजादिकं तत्र यथाशास्त्रमनुक्रमात्
११८ ततः काश्यां समागत्य स्नात्वा तीर्थोदके शुभे ॥ संध्यादिनित्यपात्रं तं कर्म कृत्वा यथाक्रमं ॥ शैवान् द्विज
वरान् श्रेष्ठान् नाकृपण्यशिवविग्रहान् ॥ तेषामामंत्रणं देयं यथाशास्त्रं यथाक्रमं ॥ ततः स्नात्वा विधानेन
श्राद्धं कार्यं प्रयत्नतः ॥ स्वाद्वन्नैः शिवभक्तास्ते भोजनीया यथाविधि ॥ शैवं भोक्तारमुत्कृष्टं निकृष्ट
स्थमनुत्तमं ॥ त्यक्त्वा यः कुरुते श्राद्धं तद्व्यर्थं नात्र संशयः ॥ अष्टदिक्ष्वष्टतीर्थानि ज्ञानवाप्यां वसं
ति च ॥ तेषु स्नानं यथाशास्त्रं कर्तव्यं प्रीतिपूर्वकं ॥ अष्टदिक्ष्वपि कर्तव्यमेकैकत्र यथाक्रमं ॥ पंचधा श्रा
द्धमनघैरन्नैनैव यथाविधि ॥ पूर्वदिग्भागमारभ्य सव्येनैव यथाक्रमं ॥ स्नानं श्राद्धादि कर्तव्यम
प्रमादेन सर्वथा ॥ वेदगौरी ज्ञानधर्ममोक्षपुण्यकराणि च ॥ पितृवारुणतीर्थानि ज्ञेयान्यष्टौ श्री:॥
शुभानने ॥ चत्वारिंशद्यथाशास्त्रं ज्ञानवापीतटे शुभे ॥ श्राद्धादिनियमेनैव कर्तव्यानि न संशयः ११८
एतेषु च समाप्तेषु तदनंतरमादरात् ॥ पंच श्राद्धानि कार्याणि विधिवन्मुक्तिमंडपे ॥ एकैकं श्रा

द्धमेकैकदिने कार्यं यथाक्रमं ॥ नैकस्मिन्दिवसे नैकश्राद्धकर्म विधीयते ॥ श्राद्धान्येवंविधान्येव ज्ञानवापी
तटे शुभे ॥ मणिकर्णीतटे कुर्यात्ततः श्राद्धं यथाविधि ॥ वीरेशकुंडनिकटे ततः कार्यं प्रयत्नतः ॥ ततः प
शुपतीशस्य कुंडप्रांते मनोहरे ॥ कालकुंडतटे कार्यं तदनंतरमादरात् ॥ शिवगंगातटे कार्यं ततः स
म्यग्यथाविधि ॥ ततः कर्कोटकस्यापि कुंडप्रांते मनोहरे ॥ ततः पिशाचतीर्थेपि कर्तव्यं विधिपूर्व
कं ॥ ॐकारकुंडप्रांतेपि कर्तव्यं तदनंतरं ॥ ततः पिलिप्पिलाकुंडे कर्तव्यं विधिपूर्वकं ॥ हंसतीर्थतटे
कार्यं तदनंतरमादरात् ॥ वक्रतुंडेशकुंडेपि ततः कार्यं प्रयत्नतः ॥ ततः केदारकुंडेपि कर्तव्यं विधि
पूर्वकं ॥ अर्ककुंडे ततः कार्यं चंद्रकुंडे ततः परं ॥ ततः सिद्धेशकुंडेपि दुर्गाकुंडे ततः परं ॥ कामाक्षी
कुंडनिकटे ततः कर्तव्यमादरात् ॥ सार्धाष्टकोटिलिंगानि कुंडान्यपि वरानने ॥ श्रीमदंतर्गृहे हर
म्ये संति दिव्यानि भूरिशः ॥ अंतर्गृहाद्बहिर्देवी लिंगसंख्या न विद्यते ॥ कुंडानामपि दिव्यानां सं
ख्या नास्त्येव सर्वथा ॥ तेषु सर्वत्र कर्तव्यं श्राद्धं यद्यपि सर्वथा ॥ तथापि शक्तिहीनैस्तु श्राद्धं कार्यं क्र

शि०स्प

११९

चिंतकश्चित ॥ उक्तस्थलेषु कर्त्तव्यमवश्यं पितृतत्परैः ॥ श्राद्धमन्नेन विमले यथाशास्त्रं यथाक्रमं ॥ उक्त
स्थलेषु सर्वत्र पंचवारं यथाक्रमं ॥ श्राद्धं कर्त्तव्यमन्नेन सर्वथैवाप्रमादतः ॥ अशक्तैस्तु त्रिवारं वा
श्राद्धं कर्त्तव्यमादरात् ॥ द्विवारमधमेनापि कर्त्तव्यं नात्र संशयः ॥ श्राद्धान्येवं यथाशास्त्रं कृत्वा तदनु
सादरं ॥ स्वशक्त्या शैववर्याणां पूजा कार्या प्रयत्नतः ॥ शैवक्षेत्रमिति ज्ञात्वा काश्यां शैवजनाश्रयं ॥ शैवा
नुरागः कर्त्तव्यो धनधान्यादिभिः शुभैः ॥ काश्यां शैवोत्तमे दत्तमेकं वा ग्रासमुत्तमं ॥ अनंतफलदं नूनं
भवत्येव न संशयः ॥ दुर्लभेयं यथा काशी तथा शैवोपि दुर्लभः ॥ अनेकजन्मतपसा शैवो भवति मा
नवः ॥ यथा सदाशिवादन्यो नास्ति देवोत्तमः शिवे ॥ तथा शैवद्विजादन्यो नास्ति विप्रोत्तमो भुवि ॥ यथा
काशीसमं क्षेत्रं नास्ति ब्रह्मांडगोलके ॥ तथा शैवसमो विप्रो नास्ति ब्रह्मांडगोलके ॥ चरलिंगाय शैवा
य यः पूजां न करिष्यति ॥ स एव पातनाभोक्ता स एवाघकुलाश्रयः ॥ तस्मात्काश्यां विशेषेण शैवाः
शिवपरायणाः ॥ पूजनीयाः प्रयत्नेन शिवप्रीत्यर्थमादरात् ॥ पुरा कश्चिद्द्विजवरो विश्रुद्धः शैवपुं

श्रीः ॥

११९

गवः ॥ शिवैकशरणो नित्यं लिंगपूजापरायणः ॥ दीर्घपिंगजटाधारी सदा रुद्राक्षभूषणः ॥ भ
सितोद्धूलितवपुस्त्रिपुंड्रांकितमस्तकः ॥ शैवशास्त्रार्थतत्त्वज्ञः शिवतत्त्वैकचिंतकः ॥ निर्मलो निर्म
मः शांतो वीतरागो विचक्षणः ॥ मलयाचलदेशेषु निवसन्स कदाचन ॥ क्व स्थातव्यं मया नित्यमि
ति चिंतापरो भवत् ॥ क्व वा मुक्तिप्रदं क्षेत्रं क्व वा सर्वार्थसाधकं ॥ क्व सर्ववेदवेदांतवेद्यमाद्यंतवर्जितं
क्व वा बहूनि लिंगानि संति दिव्यानि सर्वदा ॥ क्व वा तीर्थोदकं रम्यं स्नानयोग्यमघापहं ॥ क्व वा शिव
पराः शैवाः शिवलिंगार्चनप्रियाः ॥ क्व वा शिवकथालापाः श्रव्याः पापविनाशकाः ॥ क्व वा शि
व शिवेत्येव ध्वनिः संश्रूयते सदा ॥ क्व वा बिल्ववनं रम्यं शिवप्रियकरं परं ॥ क्व वा रम्यं शिवस्थाने नै
त्रोत्सवकरं परं ॥ क्व वा शिवेशशर्वेति वदंतः संति साधवः ॥ क्व वा पाशुपताः शुद्धाः शिवैकपरदेव
ताः ॥ क्व वा कर्णगलभ्राजच्छुद्धरुद्राक्षभूषणाः ॥ क्व वा भस्मलसद्भालशालोकोचनपूजकाः
क्व वा ब्रह्मादयो देवाः पूजयंति सदा शिवं ॥ क्व वा गंधर्वयक्षाद्याः पूजयंति महेश्वरं ॥ क्व वा वसंति

सर्वेपि वामदेवाद्यो द्विजाः ॥ क्व वा तिष्ठति शैवेंद्रः कपिलः सिद्धसेवितः ॥ क्व वा घोरं तपस्तप्तं विष्णुना सर्व
सिद्धिदं ॥ क्व वा पूर्वं तपस्तप्तं सर्वैरपि मुमुक्षुभिः ॥ क्व वा पंचाक्षरो मंत्रो महेशेनोपदिश्यते ॥ क्व वा मरणमा
त्रेण मुक्तिः शैवैरवाप्यते ॥ क्व वा लीलां महादेवः करोति शिवया सह ॥ क्व वा श्रीनंदिकेशादि गणनाथाः
शिवप्रियाः ॥ क्व वा धर्मरताः सिद्धाः शिवलिंगार्चनप्रियाः ॥ उक्तं सर्वगुणोपेतमन्यक्षेत्रं न सर्वथा ॥ उक्ता
सर्वगुणोपेता काशी तिष्ठति साध्रुवं ॥ शीर्णशरीरमेतन्मे पादे नास्ति बलं मम ॥ मया दूरस्थिता काशी
प्राप्तव्या कथमुत्तमा ॥ अदूरस्थमपि स्पष्टं वस्तु नैव हि दृश्यते ॥ मया दूरस्थिता काशी प्राप्तव्या कथमु
त्तमा ॥ निकटोच्चरितोपीष्टः शब्दो न श्रूयते तथा ॥ मया दूरस्थिता० ॥ भुज्यते स्वल्पमप्यन्नं तन्न जी
र्यति सर्वथा ॥ मया दूर० ॥ व्यक्तवाक्यानि नायांति मार्गप्रश्नार्थमाशुभे ॥ मया० ॥ वित्तं नास्त्येव भि
क्षार्थं न पूर्वं धनमर्जितं ॥ मया० ॥ काशीयात्रार्थमुद्योगो यौवनेन कृतो मया ॥ अतः परं कथं
प्राप्या काशी मोक्षप्रदा शुभा ॥ काशीप्रभावो न मया पूर्वं ज्ञातः कदाचन ॥ इदानीं जीर्णदेहेन का

शी प्राप्या कथं मया ॥ यावदंघ्रिबलं यावच्छ्रोत्रनेत्रबलं परं ॥ यावद्वाक्बलं तावत्काशी प्राप्या नरोत्तमैः ॥
यावन्नाशो न देहस्य यावन्नाप्यार्जितं धनं ॥ तावदेव नरैः काशी प्राप्तव्या मुक्तिदा परं ॥ यावत्पुष्टिः शरीर
स्य यावन्नो व्याधिपीडनं ॥ यावद्दृष्टं तत्संतोषस्तावत्काशीं समाश्रयेत् ॥ येन नालोकिता काशी स नरो
न नरः स्मृतः ॥ किंतु विड्भक्षणप्रीतः सारमेयो न संशयः ॥ येन नाभ्यर्चितं लिंगं श्रीमद्विश्वेश्वराभि
धं ॥ सकुलीनोपि तज्जन्म व्यर्थं नास्त्यत्र संशयः ॥ कोवा यदि तु यद्देशो काशीं प्रति न गच्छति ॥ तत्कुलं पुल्क
सकुलं भवत्येव न संशयः ॥ येन नालोकिता काशी येन नाभ्यर्चितः शिवः ॥ सोपि किं मनुजः किं
तु कृमिर्विष्ठागतो ध्रुवं ॥ सर्वराष्ट्राधिपो राजा जितशत्रुरपि सर्वदा ॥ न काशीदेशकीटेन सदृशः स
त्यमुच्यते ॥ अधीतवेदशास्त्रोपि काशीदर्शनवर्जितः ॥ न काशीदेशकीटेन सदृशः सत्यमुच्यते
वरं भिक्षाटनं काश्यां नात्र राष्ट्रेशता वरं ॥ वरं शाकाशनं काश्यां नात्र शाल्यशनं वरं ॥ जलपानं व
रं काश्यां सर्वपापविनाशकं ॥ वरं नात्रामृतस्यापि पानं सत्यं न संशयः ॥ अत्र पुष्टिकरं भिक्षान

त्रिं०स्य १२१

वरं घृतपाचितं। देहक्षयकरं कस्मै जीर्णपर्णाशनं वरं॥ मां नयाखिलदेवेश काशीं विश्वेश्वर प्रभो॥ दी
नानाथैकशरण करुणाकर शंकर। हरधीरामराधीर मामनाथारमुद्धर॥ अपाराघोरसंसारपारा
वारादतिलवरं। नोपेक्षा मयि कर्तव्या सर्वथा सर्वथा प्रभो। काशीं प्रापय मामीश शरणागतव
त्सल॥ कदा काशीं गमिष्यामि द्रक्ष्ये विश्वेश्वरं प्रभुं॥ कदा धन्यो भविष्यामि कदा शंभुः प्रसीद
ति॥ कदा वाशेषपापौघविनाशकरमुत्तमं॥ श्रीविश्वेश्वरलिंगस्य पार्श्वे निर्णेजनोदकं॥ दंड
पाणिप्रसादेन ज्ञानवाप्यां कदा मुदा। एकं वा मज्जनं सम्यक् करिष्याम्यघशांतये॥ कदा वधीरितसुधे
शैनवापीजले रहं॥ पितृमुक्तिप्रदैः शुद्धैः करिष्ये तर्पणं मुदा॥ प्रदक्षिणत्रयं वापि कृत्वा सम्यग्य
थाविधि॥ कदा वा विश्वनाथस्य प्रणामं करवाण्यहं॥ कदा शिवप्रसादेन मणिमंडलमंडिते। मुक्तिमं
डपमासाद्य वसामि क्षणमादरात्। कदा ढुंढीशं मम कुसुमापुत्रमघापहं॥ नवदूर्वांकुरैः सम्यक् पूज
यामि मनोहरैः॥ श्रीमद्विश्वेश्वरोलिंगे ब्रह्मविष्ण्वादिपूजिते॥ कदा पूजां करिष्यामि बहुबिल्वद श्रीः॥ १२१

लैः शुभैः॥ वीरेश्वराभिधं लिंगं कदा द्रक्ष्ये मनोहरं। कदा पशुपतीशं च पश्यामि सकलार्थदं। श्रीका
लभैरवं देवं देवानामपि शासकं॥ कदा पापौघशमनं सर्वं द्रक्ष्ये यक्षादिसेवितं॥ विघ्नांधकारमार्तंडमं
डलोपममुत्तमं॥ वक्रतुंडेशमनघं कदा द्रक्ष्ये शिवप्रियं॥ शिवगंगाजले रम्ये सन्नोगलकरे शुभे॥
कदा स्नानं करिष्यामि तर्पणं च यथाविधि। अशेषविषशांत्यर्थं जन्मरोगौषधे परे। कदा कर्कोटकेती
र्थे करिष्ये स्नानमादरात्। श्रीमदोंकारनाथं च कदा पश्यामि सादरं। ओंकारतीर्थे च कदा करिष्ये स्ना
नमादरात्। कदापि लिप्पिलातीर्थे स्नात्वा संतर्प्य पूर्वजान्। त्रिलोचनेशमाराध्य कदा द्रक्ष्ये मनो
हरं। कदा स्नात्वाहं सप्ततीर्थे कृत्तिवासेश्वरं प्रभुं। पूजयित्वा विधानेन ध्वस्तपापो भवाम्यहं। कदा केद
रकुंडेपि स्नात्वाभ्यर्च्य पितॄन्मुदा॥ केदारेश्वरमभ्यर्च्य तुष्टचित्तो भवाम्यहं॥ स्नात्वा लोलार्ककुंडेपि
लोलार्केशं प्रणम्य च। कदा पुण्यप्रभावेन द्रक्ष्याम्यर्कविनायकं॥ नत्वा सिद्धेश्वरं सम्यक् दुर्गाकुंडम
नोहरं। स्नात्वा दुर्गां जगद्वंद्यां कदा द्रक्ष्ये शिवप्रियां॥ ३०१ सर्वसिद्धिप्रदैः शुद्धैः कामाक्षीतीर्थ
वारिभिः। स्नात्वा तत्र करिष्यामि कदा तर्पणमादरात्॥ नवबिल्वदलैः शुद्धैः कामाक्षीं सादरं मुद

कदा समर्चयिष्यामि सर्वाभीष्टप्रदायिनीं ॥ अन्नपूर्णामनन्तानामन्नदात्रीं भयापहां ॥ कदा द्रक्ष्या
मि सुभगां वरदानविचक्षणां ॥ कदा तपः करिष्यामि ज्ञानवापीतटे शुभे ॥ शिवभावं प्रपद्यामि शंक
रानुग्रहात्कदा ॥ कदा शिव महेशान पार्वतीरमण प्रभो ॥ महादेवेति विलपन्काश्यां त्यक्ष्ये तनुं मु
दा ॥ एवमुक्त्वा स हृष्टोपि कृत्वा शंकरपूजनं ॥ शनैः शनै राजगाम काशीं प्रति शिवार्चकः ॥ काशी
मागत्य स ततो दंडपाणिप्रसादतः ॥ ज्ञानवापीजले शुद्धे चकार स्नानमादरात् ॥ मृतश्च कारवि
मलः श्राद्धमामेन सादरं ॥ पिंडदानं वसिष्ठेन चकार विधिपूर्वकं ॥ तदा तत्पितरः पूर्वं मघोरनर
कस्थिताः ॥ नरकादुत्थिताः सर्वे साश्चर्ये दर्शितास्तदा ॥ तदा यमभटाः सर्वे यममूचुर्भयानकाः ॥
विनैव कारणं किंचिन्नरकादुत्थिता इति ॥ ततो विलोक्य तान् शुद्धान्नरकादुत्थितान्पितॄन् ॥
यमः प्रोवाच वचनं कृतांजलिपुटास्तदा ॥ किं भवद्वंशजैः शैवैः पुण्यं कृतमघापहं ॥ कथ
मुद्धरणं जातं भवतामिति सादरं ॥ पितर ऊचुः ॥ शैवनामास्मद्वंशजेन काशीं प्रति समागतं ॥ ज्ञा
नवाप्यां कृतं श्राद्धं यथाशास्त्रं यथाक्रमं ॥ तेवातमेनतेनैव वयं पापकुलाश्रयाः ॥ उद्धृता

DR BHAU DAJI

यम सर्वे शयास्यामो ब्रह्मणः पदं ॥ इति तद्वचनं श्रुत्वा यमः संतुष्टमानसः ॥ पूजां चकार सर्वेभ्यो यथाक्र
ममतंद्रितः ॥ ततो रत्नविमानानि दत्वा तेभ्यो यमः स्वयं ॥ देवेंद्रलोकपर्यंतं तैः सहैव जगाम सः ॥ तदा
कोलाहलो भूयानभूदत्यद्भुतस्ततः ॥ पुष्पवृष्टिरभूद्दिव्या दिव्यगंधसमन्विता ॥ ततस्तानमला
न्दृष्ट्वा देवेंद्रः प्रीतमानसः ॥ रत्नासने धूपविश्य चक्रे पूजां यथाक्रमं ॥ ततस्ते पूजितास्तेन देवेंद्रेणापि
संयुतः ॥ पितॄन्दृष्ट्वा विमानस्थान्ब्रह्मा प्रत्युज्जगाम तान् ॥ ततोतिश्रद्धया युक्तो ननाम विधिवत्क्रमा
त् ॥ रत्नासने धूपवेश्य पूजां द्रव्येण सादरं ॥ चकार पूजां विधिवद्विधिज्ञो विधिरुत्तमः ॥ ततो ब्रह्मा सभा
सद्भिरतिविस्मयपूर्वकं ॥ एते क इति संपृष्टो जगाद वचनं मुदा ॥ अतिघोरतपोलभ्यो ब्रह्मलोकः इति प्र
था ॥ सर्वमासीत्तु सेदानीं किं वक्तव्यमतः परं ॥ वनपर्णकुटीवासं ब्रह्मलोको कोमदाश्रयः ॥ सुलभो
ऽभून्मनुष्याणामतिपातकिनामपि ॥ एतत्कृताघसंघानामियत्ता नास्ति सर्वथा ॥ तादृशान्यपि
घोराणि कृतान्यघकुलानि हि ॥ सिकतावर्षधाराणां तारकाणां कदाचन ॥ शक्यते गणनां कर्तुं

नैतेषां पातकस्य तु॥ आब्रह्मकल्पपर्यंतं नरके यदि संस्थितिः॥ तथापि नैतत्पापानां नाशो भवति स
र्वथा॥ ईदृशानां तु नरके क्षणमात्रमपि स्थितिः॥ अतिदुःखकरा घोरा नजातेव कदाचन॥ ये तेषां भू
रिभाग्येन कश्चिच्छैवो भवत्कुले॥ तेन विध्युक्तमार्गेण काशीयात्रा कृता शुभा॥ ज्ञानवाप्यां विशेषेण पि
तॄनुद्दिश्य शंकरः॥ चकार विधिवच्छ्राद्धं पिंडदानं च सादरं॥ तिरस्कृता मृतैर्दिव्यैर्ज्ञानवापीजलैस्त
तः॥ चकार तर्पणं शैवः शुद्धस्फटिकान्वितैः॥ तेनैव पुण्यलेशेन तस्यैते पितरस्ततः॥ अघोर
नरकोत्तीर्त्वा मल्लोकं समुपागताः॥ काश्यां शैवकृते श्राद्धं ज्ञानवाप्यां विशेषतः॥ पितृमुक्तिप्रदं
नूनं सत्यमेवोच्यते मया॥ काश्यां स्वकुलजातेन कृतं श्राद्धमघापहं॥ पितॄणां मुक्तिदं श्रेष्ठं महापा
तकिनामपि. देवगंधर्वमनुजयक्षाणामपि सर्वथा॥ काश्येव मुक्तिदा नान्या मुक्तिदं जगतीतले॥ का
श्यां मृदा वा यः कुर्यात्पिंडदानं पितॄन्प्रति॥ सोपि धन्यः पितॄन्स्वीयानुद्धरिष्यत्यसंशयं॥ काश्यां
पादेन वा यस्तु जलं दास्यति मानवः॥ पित्रर्थं तेन स पितॄनुद्धरिष्यत्यसंशयं॥ काश्यां पिंडप्रद

नेन पितॄणां ऋणबंधनात्॥ मुक्तो भवति पुण्यात्मा स न तद्दणभाग्भवेत्॥ यः काश्यामतियत्नेन
स्वपितृभ्यो यथाविधि॥ श्राद्धदो भवति प्रीत्या सर्वदः सर्वदा सुरैः॥ यः पुत्रः पितृमुक्त्यर्थं काश्यां
श्राद्धं करिष्यति॥ यथाविधिप्रयत्नेन स पुत्रः पुत्र उच्यते॥ पुत्रः श्राद्धविधानेन यः काश्यां न करिष्य
ति॥ स पुत्रो न भवत्येव पुत्रलक्षणवर्जितः॥ अस्मद्गोत्रसमुद्भूतः काश्यां यः कश्च नादरात्॥ न करि
ष्यति किं श्राद्धं स्याद्धन्नैर्भक्तिपूर्वकं॥ काश्यामत्कुलजो मर्त्यः पितॄणां मुक्तिकारणं॥ सतिलं वि
मलं भक्त्या जलं वा किं न दास्यति॥ काश्यां भोजनकाले वा स्वपितृभ्यः स्वधास्त्विति॥ मुष्टिमा
त्रमपि प्रीत्या किमन्नं नैव दास्यति॥ काश्यां क्रीडारतो वापि मद्वंश्यः कश्चिदुत्तमः॥ मृद्गोलकेव
स जलं किं न दास्यति सादरं॥ अस्माभिर्दृष्टेन नरके स्थीयते सदा॥ काश्यां पिंडप्रदानेन को
वास्मानुद्धरिष्यति॥ अघोरयातनामध्ये स्थीयते स्माभिरन्वहं॥ कश्चित्काश्यां जलं दत्वा कि
मस्मान्नोद्धरिष्यति. अतिघोरतरे क्रूरे नरके पतिताः सदा.. वदंति पितरः सर्वे तृप्ता भवंति

पितरः॥ काशीसलिलतर्पणात्॥ विनातेन नहिप्रीतिः सुधापानेपि सर्वथा॥ येते पूज्यतमा
नित्यं भवतामपि सादरं॥ मयातु नित्यमेतेषां पूजा कार्या यथाक्रमं॥ ततस्तत्रैव. इत्युक्त्वा तेपित
दा कार्या पितॄणां तु यथाक्रमं॥ प्रजा चक्रुर्यथाशास्त्रं तत्तत्रैव तस्थिताः॥ अतो नियमतः कार्या काशी
यात्रा वरानने॥ काशीतपःप्रभावेन यतो लभ्या नरोत्तमैः॥ शृणु वक्ष्ये विधिं सम्यक्पंचक्रोशा
प्रदक्षिणे॥ यत्प्रदक्षिणमात्रेण नश्यत्यघकुलं क्षणात्॥ उपवासः प्रयत्नेन कार्यो मुंडनपूर्वकं
पंचगव्यं ततो प्राश्यं स्नात्वा ज्ञानेन सन्निधौ॥ ततो तद्गृहयात्रापि कर्तव्या विधिपूर्वकं॥ मुक्ति
मंडपमासाद्य ततः संकल्पमाचरेत्॥ करिष्ये विश्वनाथाहं पंचक्रोशाप्रदक्षिणं॥ आज्ञां देहि
कृपासिंधो सर्वपापापनुत्तये॥ निष्ठीवनं कृतं काश्यां दत्तश्च चरणो मया॥ लिंगेष्वेव सदा शंभो
तत्पापं शांतिमेष्यतु॥ काश्यां जलचराः केचित्पादपातेन संहताः॥ शिवरूपा महादेव तत्पा
पं शांतिमेष्यतु॥ काश्यां जलचराः कीटाः पादघातेन संहताः॥ करेण निहताः केचित्तत्पापं०

काश्यामन्नार्थिनामन्नं शक्तेनापि मया शिव॥ नदत्तं लोभमासाद्य तत्पापं०॥ अशक्तेनैकदा सम्य
गंतर्गेहप्रदक्षिणं॥ मया न कृतमीशान तत्पापं०॥ कदाचिदनृता वाणी निसृता मन्मुखाच्छिव॥
सर्वपुण्यहरा शंभो तत्पापं०॥ कदाचिन्न कृतं देवाछेववर्यस्य वंदनं॥ सर्वपापहरं शंभो त०॥ कदा
चिदुदकं प्रीतः मकृत्वा भस्मधारणं॥ प्रमादेन महादेव त०॥ कदाचिच्छिवलिंगस्य निर्णजनज
लं शुभं न पीतं पार्वतीनाथ त०॥ कदाचिद्बिल्वपत्रेण प्रमादेवाहि सर्वथा॥ लिंगं नाभ्यर्चितं शं
भो त०॥ ज्ञानवापीजले रम्ये भ्रमणेव कदाचन॥ स्नानं न कृतमीशान त०॥ कदाचिन्न कृतं शंभो
दंडपाण्यर्चनं मया॥ नार्चितो ढुंढिराजोपि त०॥ वीरेश्वरो भ्रमणेव कदाचिन्नार्चितो मया॥ सर्वा
र्थदः कृपासिंधो तत्पापं०॥ श्रीमान्पशुपशुपतीशोपि पशुपाशविमोचकः॥ कदाचिन्नार्चितः
शंभो त० श्रीकालभैरवः शास्ता भ्रमणेव कदाचन॥ नाराधितो महादेव त०॥ प्रचंडविघ्नसंह
र्ता वक्रतुंडेश्वरो मया॥ कदाचिन्नार्चितः शंभो०॥ शिवगंगाजले स्नानं कदाचिन्न कृतं मया॥

शि०स्प अलसेन विरूपाक्षतः॥ ॐकाराख्यमहालिंगं ज्ञातेनैव कदाचन॥ मया नाभ्यर्चितं शंभो तः॥ केदा
१२५ रेश्वरमाराध्य मनाराध्यैव संस्थितं॥ मया कदाचिद्विश्वेश तः॥ एवमुच्चार्य सकलानपराधान्यथा
क्रमं॥ ततः स्नात्वा ज्ञानवाप्यां पुनः संपूज्य मागतः॥ वीरेश्वरादिस्थानेषु गत्वा संपूज्य सादरं॥
पुनरभ्यर्चनं कार्यं मयि भक्तिपुरःसरं॥ ततो मौनेन नियमात्कृतांजलिपुटैर्नरैः॥ दंडपाणिप्रण
म्यैव गंतव्यं मुक्तिमंडपात्॥ दिनाष्टकेन विधिवत्पंचक्रोशप्रदक्षिणं॥ कर्तव्यमतियत्नेन भ
क्तिश्रद्धासमन्वितैः॥ मध्ये सर्वेषु तीर्थेषु स्नात्वा सम्यग्यथाविधि॥ श्राद्धं कार्यं प्रयत्नेन स्वाद
नैरतिशोभनैः॥ पूजनीयाः प्रयत्नेन पंचक्रोशस्य रक्षकाः॥ यात्राविघ्नहराः सर्वे वंदनीयाः
प्रयत्नतः॥ सहस्रकोटिलिंगानि दिव्यान्यत्यद्भुतानि च॥ पंचक्रोशमहामार्गे तिष्ठंति कमलान श्री:॥
ने॥ बिल्वपत्राक्षताद्यैस्तु तानि यत्नेन सर्वथा॥ पूजनीयानि लिंगानि यथाशक्ति यथाक्रमं १२५
भैरवानां गणेशानां दुर्गाणां च वरानने संख्या न वर्त्तते तेषां दर्शनं चापि दुर्लभं॥ निराहारेण

कुर्वंति देवगंधर्वमानवाः॥ केचिन्मुनीश्वरादिस्याः पंचक्रोशप्रदक्षिणं॥ पंचक्रोशस्य यात्रायां तिल
मात्रमपि प्रिये॥ नातिक्रमेद्यथामार्गं गंतव्यमतियत्नतः॥ करसंचलनं त्यक्त्वा कृतांजलिपुटैः सदा॥
मौनेनैव हि कर्तव्यं पंचक्रोशप्रदक्षिणं॥ मामेव सर्वदा ध्यात्वा शिवमक्षयमव्ययं॥ मत्कथाश्रवणा द
सक्तैः सत्कर्त्तव्यं प्रयत्नतः॥ रात्रौ जागरणं कार्यं आदिनाष्टकमादरात्॥ भोजनीयाः प्रयत्नेन शैवा
ब्राह्मणपुंगवाः॥ ततो ममांतिकं प्राप्य मामभ्यर्च्य सदाशिवं॥ यात्रां निवेद्य शुभदां ततः स्वगृ
हमाविशेत्॥ प्रतिपक्षेपि कर्तव्यं पंचक्रोशप्रदक्षिणं॥ एवमेवातियत्नेन काशीवासरतैर्जनैः॥
एवं तु स्थूलमार्गेण पंचक्रोशप्रदक्षिणं॥ यथाकथंचित्कर्तव्यं मनुजैरल्पसाधनैः॥ यथाशास्त्रं
तु तत्कर्तुं देवैरपि न शक्यते॥ यथाशास्त्रं तु सा चेत्स्यान्मोक्षः स्यादेव तत्क्षणात्॥ ब्रह्मविष्ण्वाद
यो देवाः पंचक्रोशप्रदक्षिणं॥ एकवारं यथाशास्त्रं कर्तव्यमिति निर्ययुः॥ सांगप्रत्येकमेकैकं
लिंगं संपूज्य सादरं॥ भैरवान्गणपान्सम्यक्पूजयाम इति प्रिये॥ पंचक्रोशस्य यात्रार्थं

शि०रह
१२६

संकल्प्य विधिवत्ततः॥ निर्ययुश्चामराः सर्वे ब्रह्मविष्णुपुरोगमाः॥ प्रत्येकं दिव्यलिंगानां कुर्वंतः पू
जनंमुदा॥ ऋषिरुक्ता क्षगंधर्वाप्सरःपूर्वं गातिवत्सौर॥ ४००॥ ततोतिश्रांतचित्तास्तप्रत्येकं विस्मयंगतो
यात्रेयं विधिवत्कर्तुं न शक्यत इति प्रिये॥ स्थितानि पश्चाल्लिंगानि स्वल्पान्येव पुरः परं॥ बहूनि संति लिं
गानि दिव्यान्यद्भुतानि च॥ गणेशाभिनवादीनां गणनैव न सर्वथा॥ प्रत्येकं पूजनात्कालो भूया
नेव गमिष्यति॥ कृतावदायुरस्माकं कृतावत्पादयोर्बलं॥ एवं देशं यथाशास्त्रं पूजनं मोक्षसाधकं
यथाशास्त्रं कृतं चेत्स्यात्पंचक्रोशप्रदक्षिणं॥ मोक्षो भवति शीघ्रेण तत्तु कर्तुं न शक्यते॥ संकल्प
स्तु कृतः पूर्वं किं कर्तव्यमतः परं॥ संकल्पस्य च वादन्यत्पातकं च समागतं॥ घोरं पंचाग्निमध्ये पित
पः कर्तुं हि शक्यते॥ पंचक्रोशस्य यात्रेयं कर्तुमेव न शक्यते॥ इत्युक्त्वा दुःखिताः सर्वे पंचक्रोशप्रद
क्षिणं॥ स्थूलमार्गेण सर्वे ते कृत्वा काशीमुपागताः॥ एकवारं कृतं पूर्वं पंचक्रोशप्रदक्षिणं॥ शा
स्त्रेण नंदिकेशेन यथाशास्त्रं यथाक्रमं॥ गणेशेनापि यत्नेन यथाशास्त्रं यथाक्रमं॥ कृतं तद्भैरवे

श्री०॥
१२६

णापि पंचक्रोशप्रदक्षिणं॥ काशीनिवासिनां धर्मा विहिताः संति भूरिशः॥ तान्कृत्वा विधिवत्का
श्यां वासः कार्यो नरोत्तमैः॥ अनाचाररतैः काश्यां स्थातव्यं धर्मतत्परैः॥ अन्यैर्न स्थेयमनले सत्यं स
त्यं न संशयः॥ बहुयत्नेन सा काशी प्राप्या मोक्षदापरा॥ विना काशीनिवासेन मोक्षस्तु न भविष्य
ति॥ काशामप्यतियत्नेन स्थातव्यं धर्मतत्परैः॥ अधर्मलेशरहितैः सर्वदा शिवपूजकैः॥ काशीतिस्म
रणादेव महापातककोटयः॥ क्षणाच्छिवेविनश्यंति सा काशी कोपमीयते॥ यस्यां मरणमात्रेण पु
नर्जन्म न जायते॥ दुष्टस्यापि महादेवी सा काशी कोपमीयते॥ यस्यां मरणमिच्छंति ब्रह्म
विष्ण्वादयः सुराः॥ शिवाकारास्तु ते राध्या सा०॥ काकादयोपि काशीस्था गणत्वं त्वरनाम रान्
तादृशी दिव्यरूपा सा काशी केनोपमीयते॥ यस्यां काश्यां मृतानां तु मरणं मंगलायते॥ दिव्या
शनायते पर्णं सा०॥ यस्यां काश्यां जलं पीत्वा सोमपान्प्रतिवासरं॥ तिरस्कारोतिकावेपि सा०॥
यस्यां क्षौमायते चीरं विभूतिश्चंदनायते॥ दिव्यामृतायते नीरं सा०॥ यस्यां रुद्राक्षमालापि रत्न

मालायते सदा॥ सुरव्याप मेघासः सा॰॥ यस्यां तृणा सनाबोच्चरत्नसिंहासनायते॥ त्वकेश्वरा
र्पितेदीनः सा॰॥ यस्योघनविहीनोपिदरिद्रो मनुजाधमः॥ तिरस्कारोतिधनदं सा॰॥ यावतो मुक्तिमि
च्छतिदेवर्षिमुनिमानवाः॥ तावतामपिसर्वेषांगतिः काश्येव सर्वथा॥ काशीकल्पतरुर्नित्यं मुक्ति
पुष्पफलान्वितः॥ मुमुक्षवोनिशंतत्र॥ वसंतितमुपाश्रिताः॥ काश्यामेवमुनिश्रेष्ठैः स्थातव्यंय
र्मतत्परैः॥ विनाकाशींनचान्यत्रमोक्षोभवति सर्वथा॥ अनेतकाउममलैरनंतरसनैरपि
काशीप्रभावोनमया शक्यते वक्तुमंबिके॥ वेदैरपि नविज्ञातं काशीतत्वं वरानने॥ किंपुनर्विधि
विष्ण्वाद्यैः सिद्धैर्मुनिवरैरपि॥ काशीस्तुतिपराजिह्वाधन्याधन्यावरानने॥ काशीध्यानपरंधन्यंध
न्यंधन्यंमनासदा॥ इयंपुण्यसमृद्ध्यर्थंकथापापौघनाशिनी॥ श्रोतव्यंनियतंकाश्यामतियत्ने
नमानवैः॥ यस्त्वेतान्नित्यमध्यायान्पठिष्यतिशिवालये॥ समहापातकेभ्योपि मुच्यते नात्र
संशयः॥ यः काश्यां कृतपापोपि मनुष्यो नित्यमादरात्॥ एतान्पठिष्यत्यध्यायान्सपापेभ्यो

विमुच्यते॥ काश्यांतुकृतपापानिप्रत्यहंमुदितानने॥ प्रत्यहाध्यायपाठेन विनश्यंतिनसंशयः॥ सह
स्रवारमध्यायाः पठितामुनिसत्तमैः॥ काश्यांपुराकृतंपापं नाशयंत्यग्निसन्निभैः॥ सहस्रवारमध्या
यान्पठित्वैवतिलादिभिः॥ तन्मंत्रैर्लक्षहोमोपि कार्यस्तत्पापनाशकः॥ काशीमाहात्म्यममलंमि
दंयत्नहमादरात्॥ यः पठेद्यातनातस्य नभविष्यतिभैरवी॥ इदंमाहात्म्यममलंकालभैरवसन्नि
धौ॥ प्रत्यहम्यांप्रयत्नेन पठनीयंविशेषतः॥ एतच्छ्लोकमहामंत्रलक्षाहुत्यातिलादिभिः॥ शिव
निंदाघशांत्यर्थंहोमः कार्यः प्रयत्नतः॥ बिल्वाश्वत्थपलाशार्कसमिदाज्यान्वितास्तिलाः॥ तद्धोम
साधनीभूताः शूद्राः कीटाद्यदूषिताः॥ स्वस्वशाखोक्तमार्गेणप्रतिष्ठाप्यहुताशनं॥ तस्मिन्न
ग्नौ यथाशास्त्रंहोमः कार्यो द्विजोत्तमैः॥ काशीमाहात्म्यमंत्रस्यमहादेवः स्वयंऋषिः॥ कृष्णेव
देवताशक्तिर्भैरवीयातनापहा॥ कीलकंसर्वयत्नेनकाशीप्राप्तिरिहेप्सिता॥ छंदोनानाफलंदि
व्यमोक्षरूपमुदाहृतं॥ सहस्रवदनांदिव्यांसहस्राक्षिकरान्वितां॥ विराट्रूपधरांनित्यांध्या

पितृकार्यधिदेवतं॥ श्लोकमुच्चार्यतदनु कार्येत्स्वाहेति वाहुतिः॥ देयाभवति यत्नेन याशिवेहोमकर्मणि
दक्षिणा षट्द्वादशाष्टसप्तत्रिकान्तायथा क्रमात् भोजनीयाद्विजश्रेष्ठा देयास्याद्दक्षिणा तथा॥ काशी
माहात्म्यममलं लिखित्वा पुस्तकं शुभे॥ देयं शैवाय लिंगं च ससाधनमनुत्तमं॥ पार्वती०॥ एवं केन
कृतो होमः केन किं पातकं कृतं॥ तत्सर्वं वद सर्वज्ञ शिवलिंगार्चनप्रिय॥ शिव०॥ वसिष्ठेन पुराका
श्यामं तगेहे शिवात्मके॥ शिवलिंगार्चको दृष्टः शैवः शिवपरायणः॥ वसिष्ठः शिवतत्वज्ञस्तदा
शैवं शिवार्चकं॥ विलोक्यानिजगादेवं ज्ञातुं तस्य मनस्तदा॥ वसिष्ठ०॥ किमर्थं पूज्यते लिंगमेत
ल्लिंगे प्रयच्छति॥ अदृष्टेन विना लोके वस्तुप्राप्तिर्न सर्वथा॥ किमर्थमति यत्नेन क्रियते भस्मधारणं
चंदनं शीतलं रम्यमंगे सम्यग्विलेपय॥ किमर्थं क्लिश्यते काय्यं निराहारेण सर्वदा॥ भुंक्ष्व नाना
विधान्नानि यथेष्टमति यत्नतः॥ किमाराध्यो हरो नित्यं स्मशाननिलयस्तव॥ अलीकपालमालांगः सर्व
दा वृषवाहनः॥ न दृष्टोस्ति मया विप्र लोके पाषाणपूजकः॥ अभाग्योसि भवान्नूनं कृतं चाघम
हर्निशं॥ इति श्रुत्वा वसिष्ठस्य वाक्यं दुःखकं द्विजः॥ रोदद्दुःखसंक्रांतो हा हा शिव शिवेति सः

तदा तद्रोदनं श्रुत्वा ब्रह्मा शिवपरायणः॥ तमुवाचातियत्नेन किमासीदिति दुःखितः॥ द्विजः०॥ शि
वनिंदा कृतानेन श्रुता सा पुण्यनाशिनी॥ अशैवो दूरदृष्टेन दृष्टोयं पातकाश्रयः॥ इति तद्वचनं श्रुत्वा
दुःखितो विधिरुत्तमः॥ पुरःस्थितं वसिष्ठं तं दृष्ट्वा वचनमब्रवीत्॥ हा वसिष्ठ त्वया दुष्ट शिवनिंदा कथं
कृता॥ दुःखितोयं महाशैवः शंकरस्य विनिंदया॥ भूतले स्वर्गलोके वा पाताले वा कदाचन॥ एतावत्
कालपर्यंतं न दृष्टः शिवनिंदकः॥ अघोरपातकौघस्य परिपाकस्तवाधुना॥ ज्ञातस्त्वया यतो निंदा
शंकरस्य कृता ध्रुवं॥ यस्याः पुत्रो महादेवं दूषयिष्यति दुर्भगः॥ दुर्भगा तस्य जननी जन्म तस्य वृथा ध्रु
वं शैवदुःखप्रदो मर्त्यस्तथा शंकरनिंदकः॥ अनेकजन्मपर्यंतममेध्ये जायते कृमिः॥ विष्ठायां कृ
मिरूपेण बहुदुःखेन सर्वदा॥ भविष्यति स्थितिर्दुष्टा तव शंकरनिंदक॥ इति ब्रह्मवचः श्रुत्वा वशि
ष्ठो भयविह्वलः॥ प्रणिपत्य वचः प्राह चतुर्वक्त्रं शिवार्चकं॥ एतस्य हृदयं ज्ञातुमेवमुक्तं यथा ध्रु
वं॥ शिवस्य देवदेवस्य निंदा कार्या कथं मया॥ ब्रह्मोवाच॥ भ्रमेण परिहासेन शाठ्येनान्येन वा द्वि
ज॥ शिवनिंदा कृता येन तेन प्राप्यं वयातना॥ भ्रमेणापि करस्पृष्टो वह्निर्दुःखप्रदो यथा॥ ब्रह्महत्या

शि०रह
१२९

तथैव दुःखदं नित्यं मन्ये शंकरदूषणं ।। कृतेस्पर्शो दहत्यग्निः शिवदूषणपावकः ।। शिवदूषकपापि
ष्ट कुलं दहति सर्वथा ।। ब्रह्महत्यार्जितं पापं कदाचिन्नाशमेष्यति ।। शिवनिंदार्जितं पापं न नश्यत्येव
सर्वथा ।। शिवनिंदकजिह्वाग्रं यमदूतास्त्रधारया ।। सदा दहति तीव्रेण क्षुभितः क्रोधसंकुलः
धिग्जन्म तव दुर्वृत्त महापातकसंश्रय ।। धिक् शीलं तव दुःशील शिवदूषक दुर्भग ।। त्वत्तो न पात
की लोके न त्वत्तो नारकी ध्रुवं ।। असंभाष्यो निरीक्ष्योसि यतस्त्वं शिवनिंदकः ।। अस्माभिरपि पा
पानि संप्राप्तानि न संशयः ।। महेशनिंदकेनाद्य यतः संभाषणं कृतं ।। इति तद्वचनं श्रुत्वा वसि
ष्ठो दुःखितस्तदा ।। रुरोदोच्चैः सुतो वाचमुवाच कृतांजलिः ।। वसिष्ठः ० ।। प्रायश्चित्तं वद श्री
मन्नेतस्य पातकनाशकं ।। प्रायश्चित्तं यदस्त्यत्र तत्करिष्यामि सर्वथा ।। ब्रह्मोवाच ।। उपवासेन विधि
वद्दानैर्मुंडनपूर्वकं ।। पंचगव्यं प्रयत्नेन प्राश्यं शंकरदूषकैः ।। ततोंतर्गृहयात्राणां कार्यं सार्धश
तत्रयं ।। ततः पंचक्रोशयात्राशतकं कार्यमादरात् ।। ततः शिवरहस्यस्थ काशीमाहात्म्यमुत्त
मं ।। सहस्रवारं यत्नेन पठितव्यं समाहितैः ।। ततस्तत्श्लोकमंत्रैस्तु तिलहोमो यथाक्रमं ।।

श्रीः ।।
१२९

कर्तव्यः शतपर्यंतं तिलाज्यादिभिरुत्तमैः ।। तदष्टाविंशदावृत्त्यान्नैर्वा शिवपरायणाः ।। भोजनी
याः प्रयत्नेन देया च स्वर्णदक्षिणा ।। एतावदतियत्नेन क्रियते यदि सादरं ।। तदा तत्पापशांतिस्ते भवि
ष्यति न संशय ।। इदं पुरा महादेवः पृष्टः सन् जगदंबया ।। प्रायश्चित्तं जगादेव शिवनिंदाघनाशकं ।।
शिवनिंदा श्रुता येन कारिता वा भविष्यति ।। तेनापि यत्नतः कार्यं प्रायश्चित्तमिदं क्रमात् ।। शिवलिंगस्थ
न भंगः कृतो येन भ्रमाद्वशात् ।। तेनायुतगुणं कार्यं प्रायश्चित्तमिदं क्रमात् ।। भ्रमेण चरणाघातः शि
वलिंगे कृतो यदि ।। तदा दशगुणं कार्यं प्रायश्चित्तमिदं क्रमात् ।। एवमुक्तस्तदा देवी वसिष्ठो ब्रह्म
णा ततः ।। तदुक्तं तत्प्रकारेण प्रायश्चित्तं चकार सः ।। सूत ० ।। काशीमाहात्म्यपीयूषवर्षधारा
परिप्लुतं ।। संदृष्ट्वा गौरी विश्वेशः प्रापानंदं जगत्पिता ।। ततो हृष्टो वृषमारुह्य काशीदर्शनलो
लुपः ।। कैलासादगमत्काशीं भवया सह सत्वरः ।। भवद्भिरपि विप्रेंद्राः काशी विश्वेशसंश्रया
सम्यगाश्रयणीयैव मोक्षार्थिभिरहर्निशं ।। इदं माहात्म्यममलं यः शृणोति पठिष्यति ।। स

र्वपापविनिर्मुक्तः शिवलोकं गमिष्यति ॥ इदं माहात्म्यममले लिखित्वा पुस्तके यदि ॥ पूजां करिष्य
ति प्रीत्या यस्तस्याघं प्रणश्यति ॥ इदमेव हि माहात्म्यं यत्र कुत्रापि यः पठेत् ॥ तत्रैव काशी विश्वे
शा वसति नो त्र संशयः ॥ इदं माहात्म्यमनिशमिंद्राद्यैरमरैर्मुदा ॥ श्रूयते सुखदं क्षिप्रं सर्वपापौघ
नाशकं ॥ इदमेव हि माहात्म्यं ब्रह्मा शिवपरायणः ॥ ब्रह्मलोके सदा सम्यक् पठति प्रीतमानसः
विष्णुरप्यनिशं भक्त्या शिवलिंगार्चनप्रियः ॥ पठति प्रीतहृदयो माहात्म्यमिदमेव हि ॥ येनेदं
पठ्यते प्रीत्या माहात्म्यमतिशोभनं ॥ तेन प्राप्ता मुक्तिकांता सत्यं सत्यं न संशयः ॥ देहांत
रेपि वा स्थित्वा माहात्म्यमिदमुत्तमं ॥ यः पठिष्यति पुण्यात्मा स काश्यां संस्थितो भवेत् ॥ अ
शक्तैः पंगुभिर्दृष्टैरिदं माहात्म्यमन्वहं ॥ काश्यां प्रदेशे स्थित्वापि पठनीयं प्रयत्नतः ॥ ६०० ॥ प्र
जन्मदुःखानि विनाशकं सदा शृण्वंति माहात्म्यमिदं मनोहरं ॥ तिरश्चकरस्यांतिहिताः शिवार्च
काः शिवैकदेवाः शिवसंमता सदा ॥ संसारदावानलदह्यमानैः काशीसुधाब्धिः सुनवंद्यसेव्यः

सेव्यो हि सर्वैरपि सर्वदायं पापापनुत्त्यै जनदुःखशांत्यै ॥ ६०१ ॥ ॥ ॥ इति श्रीशिवरहस्ये सप्तमांशे
काशीमाहात्म्ये शिवगौरीसंवादे द्वादशोध्यायः ॥ १२ ॥ ॥ ॥ ऋषय ऊचुः ॥ सूत वेदार्थतत्व
ज्ञ काशीतत्वं यथार्थतः ॥ यथाज्ञातं तथैवोक्तं त्वयास्मभ्यं प्रयत्नतः ॥ वयं पुनीताः सर्वेपि त्वत्प्रसा
दान्मुनीश्वर ॥ तत्तावबोधाय कृतं त्वयास्मासु कृपानिधे ॥ संसारानलसंदग्धा वयं सर्वे त्व
याधुना ॥ तर्पिताः सत्कथालापामृतवृष्ट्या न संशयः ॥ काशीकथामृतं श्रेष्ठं दुष्प्रापममृता
दपि ॥ तत्पायितं त्वयास्मभ्यमस्मद्भाग्यवशाद्ध्रुवं ॥ कृतकृत्या वयं सर्वे संभूतास्त्वदनुग्रहा
त् ॥ अनुग्रहोयमस्माभिर्लब्धः प्रायस्तपस्यया ॥ त्वया हितोपदेशोयमस्मभ्यं यः कृतोधुना ॥
सद्दुर्लभतरो नूनमन्यात्प्राप्यो न संशयः ॥ सूत काशीकथां श्रुत्वा दग्धाः पातककोटयः ॥ संप्राप्ताः
पुण्यनिचया दुर्लभा मोक्षसाधनाः ॥ काशीकथासुधापानसमुत्कंठाभवत्पुरा ॥ सफलासा स
मुत्कंठा जाताद्य त्वत्प्रसादतः ॥ काशीकथासुधापानात्संतोषो यादृशो भवत् ॥ संतोषस्तादृशो

पायः सुधा नैपि न धवं॥ काशी कथासुधापानं न कृतं येन सादरं॥ स जीवन्मृत एवाहो स नीचः
पुल्कसादपि॥ यथा देवाः सुधां प्राप्य सुप्रीताश्च सुधाशनाः॥ काशीकथासुधां प्राप्य सुप्रीतास्मस्त
था वयं॥ विद्याः समस्ताः संप्राप्य यथा प्रीता द्विजोत्तमाः॥ काशीकथासुधां प्राप्य सुप्रीतास्म
स्तथा वयं॥ यथा नवनिधीन् लब्ध्वा संतुष्टोभूद्धनाधिपः॥ काशी०॥ यथा शिवार्चनां लक्ष्मीं ल
ब्ध्वा प्रीतो जनार्दनः॥ काशी०॥ यथेशात्प्राप्य वैकुंठं सुप्रीतोभूज्जनार्दनः॥ काशी०॥ यथा शि
वार्चनाल्लब्ध्वा शर्वं प्रीतः शचीपतिः॥ काशी०॥ यथा शिवार्चनात्प्राप्य स्वर्गं प्रीतः शचीपतिः॥
काशी०॥ यथा नवतृणं प्राप्य प्रीता गावः क्षुधातुराः॥ काशी०॥ यथा प्रीतानि सस्यानि वृ
ष्टिं प्राप्य यथाहितं॥ यथा यथेष्टमन्नानि लब्ध्वा प्रीताः क्षुधातुराः॥ काशी०॥ यथा यथेष्टं व
स्त्राणि लब्ध्वा प्रीता हिमातुराः॥ काशी०॥ यथा यथेष्टं द्रविणं लब्ध्वा प्रीता धनैषिणः॥ काशी०
यथा कामातुरः प्राप्य सुप्रीतां नवयौवनां॥ काशी०॥ यथा पुत्रैषिणः पुत्रान् लब्ध्वा प्रीताश्चि

रायुषः॥ काशी०॥ यथा पिता सुतान् दृष्ट्वा प्रीतो विद्यामदान्वितान्॥ काशी०॥ यथा विद्या द्विजं प्रा
प्य सुप्रीता शिष्टसंमतं काशी०॥ यथा पात्रमनुप्राप्य सुप्रीतो दानतत्परः॥ काशी०॥ यथा दस्मारम
भ्येत्य सुप्रीतो तिथिरातुरः॥ काशी०॥ यथा चकोराः सुप्रीता लब्ध्वा चंद्रकलामृतं॥ काशी०॥ यथा
माकंदमालोक्य सुप्रीता पिकसुंदरी॥ काशी०॥ मकरंदं यथा प्राप्य सुप्रीता मकरंदपाः॥ काशी०
यथा प्रोषितमालोक्य पतिं प्रीता पतिव्रता॥ काशी०॥ यथा शीतं जलं प्राप्य पांथः प्रीतोर्कतापितः
काशी०॥ यथा यानमनुप्राप्ताः सुप्रीताः पादपंगवः॥ काशी०॥ यथेडमूकाः संप्राप्य प्रीता वा
ग्जालमुज्वलं॥ काशी०॥ यथा नेत्रबलं प्राप्य प्रीता जन्मांधवृद्धयः॥ काशी०॥ यथा श्रोत्रबलं प्राप्य
प्रीता बधिरहृत्तयः॥ काशी०॥ यथा जिह्वेंद्रियं प्राप्य प्रीता स्तब्धरसग्रहाः॥ काशी०॥ यथा घ्राण
मनुप्राप्य प्रीता घ्राणविवर्जिताः॥ काशी०॥ यथा त्वगिंद्रियं प्राप्य प्रीतास्तब्धत्वगिंद्रियाः॥ का
शी०॥ ४०॥ यथा मनो वशीकृत्य सुप्रीताश्चित्तचंचलाः॥ काशी०॥ प्रायः कृतानि पुण्यानि पूर्वम

शि०स्य
१३२
स्माभि रादरात्॥ कथं प्राप्या न्यथास्माभिः सैषा काशी कथा सुधा दाने महादानमिदं मुने॥ न तस्माद्धि
के दानं सत्यं सत्यं न संशयः॥ अस्मासु दानपात्रेषु दत्ता काशी यथा सुधा॥ काशी कथा सुधां प्राप्य नरो
त्विमः कदाचन॥ अतः परं मुने स्म भ्यं काशी संप्राप्ति साधनं॥ वद कारुणिकाय स्माद्भवान् सिविवक्ष
णः॥ सूत०॥ यूयं धन्यतमा विप्रा विप्रवीर्य समुद्भवाः॥ यतो युष्माकमुत्पन्ना प्रीतिः काशी कथामृते॥
काश्यां काशी कथायां च यस्य श्रद्धा नपायिनी॥ स एव धन्यः पूतात्मा सत्यं सत्यं न संशयः॥ काशी
शिवः स्वयं साक्षात्सच्चिदानंदलक्षणः॥ तस्मिन्यस्य भवेच्छ्रद्धा स धन्यात्रणि रुच्यते॥ यः काशी द्वे
ष्टि मूढात्मा स शिवद्वेष्टि वस्तुतः॥ ततः स निरयं याति सर्वज्ञो नात्र संशयः॥ कस्मीशिवः स्वयं
साक्षात् शिवं विश्वाधिकं साम्बमनन्यसदृशं प्रभुं॥ यो न्यथा मनुते मोहात्स भवेत्पुल्कसाधमः॥ शिव
द्वेषोपि विविधः समयात्र निरूप्यते॥ श्रोतव्यं सावधानेन शुद्धनिश्चलचेतसा॥ विष्ण्वादिदेवतासा
म्यं यो वदेदीश्वरे शिवे॥ स दुर्भगः शिवद्वेष्टा द्वेषस्तत्साम्यधीः शिवे॥ शिवे न देवदेवेन सदृशो नास्ति

श्री०॥
१३२

सर्वथा॥ यस्माद्विश्वाधिकत्वेन शिवः सर्वश्रुतिश्रुतः॥ यतः श्रुतो शिवान्यस्य विष्णोरन्यस्य वा द्विजः
विश्वाधिकत्वं नैवोक्तं स्तोत्रार्थमपि सर्वथा॥ अतो विश्वाधिको रुद्रः कथं विष्णुसमो भवेत्॥ रुद्रो विश्वा
धिकः श्रेष्ठो देवोत्तम इति श्रुतेः॥ विप्रा विश्वाधिको रुद्रो यदि विष्णुसमः सदा॥ श्रुतिर्विश्वाधिको रुद्र इ
त्येषा बाधिता भवेत्॥ विष्णोर्विश्वाधिकः सोमो जनितेति श्रुतिर्यतः॥ ततो विष्णुर्न सोमेन जनकेन
समो ध्रुवं॥ पवनादिभिरप्येवं न समः सोम उच्यते॥ सोमोयं पवनादीनां जनितेति श्रुतिर्यतः॥ शिवं
विश्वाधिकत्वेन श्रुतिश्रुतमनामयं॥ यो विष्णुसाम्यतां ब्रूयात् स वेदेभ्यो बहिष्कृतः॥ विश्वाधिकः
शिवो नेति यो वदेन्मोहतोपि वा॥ स मद्यपज चंडालरेतो बुद्बुदजो ध्रुवं॥ विश्वाधिके महारुद्रे यो वि
ष्णुसमतां वदेत्॥ स मद्यपज चंडालरेतो बुद्बुदजो ध्रुवं॥ विश्वाधिकं महारुद्रं यो न्यथा वर्णयेद्भ्रमा
त्॥ स मद्यपजश्चंडाल०॥ चक्रांकग्रावसाम्येन शिवलिंगस्य पूजनं॥ शिवद्वेषः स्मृतद्वेषः सर्वशानि
रयप्रदः॥ शिवलिंगं शिवाकारं चक्रांकप्रस्तरैः सह॥ सन्निवेश्य महापापैः संयुतो भवति ध्रुवं

DS BHAU DAJI

अत्युत्तमस्थानसंस्थं शिवलिंगं शिवात्मकं॥ पूजनीयं प्रयत्नेन त्यक्त्वान्यान्यत्नेन यतः॥ पतिव्रतान्य
भर्तारं त्यक्त्वा स्वपतिं गायथा॥ तथा द्विजैरन्यदेवास्त्याज्याः पूज्यो महेश्वरः॥ महेश्वरातिरिक्तं यो भ्र
मेणाप्युपधावति॥ स चंडाल इति ज्ञेयः सत्यं सत्यं न संशयः॥ ७९॥ विभूतिधारणं त्यक्त्वा यः शिवं पूज
यिष्यति॥ स दुर्भगः शिवद्वेष्टा सद्वेषो नरकप्रदः॥ सर्वकर्मबहिर्भूतो भस्मधारणवर्जितः॥ भस्म
ना रहितं कर्म वृथा भवति सर्वथा॥ विभूतिधारणं त्यक्त्वा कुर्वन् हेमतुलामपि॥ तत्फलं न समाप्नोति
पतितोपि भविष्यति॥ संध्याशिवार्चनादीनि कर्माण्येतानि वस्तुतः॥ वैदिकानि ततस्तेषु कर्तव्यं भ
स्मधारणं॥ यथोपवीतरहितैः संध्या न क्रियते द्विजैः॥ तथा संध्या न कर्तव्या विभूतिरहितैरपि॥
गतोपवीतैः संध्यायां कार्यः प्रतिनिधिः क्वचित्॥ विभूतिधारणे त्वन्यो नास्ति प्रतिनिधिर्ध्रुवं
विभूतिधारणाभावे संध्यात्यागोपि वस्तुतः॥ द्विजो न प्रत्यवैत्येव नाधिकारी यतस्तदा॥ विभू
तिधारणं त्यक्त्वा यदि संध्यां करोति सः॥ प्रत्यवैत्येव येनासौ नाधिकारी तदा द्विजः॥ यथाधीतं

श्रीः॥
१२२

त्यजो वेदान् प्रत्यवैति तथा द्विजः॥ प्रत्यवैति न संदेहः संध्याकृद्भस्मवर्जितः॥ संध्यायां नाधिकारोस्ति
मूर्छितानां यथा तथा॥ विभूतिरहितानां च संध्यायां नाधिकारिता॥ संपादनीयं यत्नेन श्रौतं भस्म
सदा द्विजैः॥ स्मार्तं वा तदभावे तु लौकिकं वा समाहितैः॥ यादृशं तादृशं वास्तु पवित्रं भस्म संततं॥ धार
णीयं प्रयत्नेन द्विजैः संध्यादिकर्मसु॥ न संविशंति पापानि भस्मनिष्ठं ततः सदा॥ कर्तव्यमतियत्
नेन ब्राह्मणैर्भस्मधारणं॥ ८०॥ यत्कृतं भस्मनिष्ठेन श्रीमहादेवपूजनं॥ तत्सर्वाभीष्टदं तस्मात्क
र्तव्यं भस्मधारणं॥ शिवस्यार्धनमस्कारः शिवद्वेष इति श्रुतः॥ स पुण्यनाशकस्तस्मान्न कर्ता पाप
कृद्भवेत्॥ साष्टांगं दंडवद्भूमौ प्रणामो भक्तिपूर्वकं॥ कर्तव्याः श्रीमहेशस्य देवाधीशस्य सर्वदा
महेश्वरजनद्वेषः शिवद्वेष इति स्मृतः॥ स द्वेषः पापजनितो महापापफलप्रदः॥ शिवभक्ताः पू
जनीयाः स्वशक्त्या साधु संततं॥ हेमरत्नान्नवस्त्राद्यैः प्रीणनीयाः प्रयत्नतः॥ शुभवान्मधुराला
पैः प्रणामाद्यैश्च संततं॥ यः प्रीणयेत्स गौरीशं प्रीणयत्येव वस्तुतः॥ याकृता शांभवे पूजा साशं

भोनेववस्तुतः॥ साक्षादभ्यर्चितः शंभुः शांभवस्यैवपूजया॥ यतः प्रियतमाः शंभोः शांभवाभस्म
भूषणाः॥ ततः कर्त्तव्यमनिशं शांभवाभ्यर्चनंमुदा॥ सदाशिवकथाभिन्न कथाश्रवणवाचने॥ शिव
द्वेषायमाकल्पमघोरनरकप्रदः॥ श्रोतव्याः सावधानेन सदाशिवकथाः सदा॥ यतस्ता मोक्षदाः
श्रोतॄः सर्वपातकनाशकाः॥ कीर्त्तनीयो महादेवो जिह्वया पुण्यपूतया॥ महेशकीर्त्तनं यस्मान्महा
पातकनाशकं॥ भुक्तिमुक्तिप्रदे पुण्ये शिवश्रवणकीर्त्तने॥ ततस्ते यत्नतः कार्ये ब्राह्मणाद्यैर्मुमुक्षु
भिः॥ शिवेतरसुराध्यानं शिवद्वेष इति श्रुतः॥ स द्वेषः सर्वपुण्यानि विनाशयति सर्वथा॥ एतत्प्र
भृतयो द्वेषा बहवः पापहेतवः॥ तस्मादेतादृशैर्द्वेषैः पच्यंते नरके जनाः॥ तस्मादेतादृशैर्द्वेषैर्नि
र्मुक्ता ये भवादृशाः॥ तेषां काश्यां भवेच्छ्रद्धा नान्येषां सत्यमुच्यते॥ काशीकथासुधा विप्राः दुर्लभा
दुर्लभापि सा॥ सुलभा शिवभक्तानां शिवार्थकृतकर्मणां॥ काशीकथासुधां प्राप्य तपोध्यानस
माधिभिः॥ तत्प्राप्त्यर्थं यततेषामुपयोगः श्रुतिः श्रुतः॥ काशीकथासुधां प्रीत्या ये पिबंति मु

हुर्मुहुः॥ ते शिवानुगृहीतास्ते पूजनीया मनीषिभिः॥ काशीकथा शिवकथा सा कथा मोक्षदायि
नी॥ तस्यां कथायां प्रीतिस्तु न शिवानुग्रहं विना॥ १०॥ निष्कलं निर्गुणं ब्रह्म शिवः काशीति गीय
ते॥ तस्यां प्रीतिरनंतानां तपसां फलमुच्यते॥ स्वाभिन्नायामपीशस्य काश्यां प्रीतिरनामया॥ तत
स्तत्प्रीतिकृत्स्पष्टं तपोदानफलं द्विजाः॥ काशीमूर्त्तिः शिवस्यैव मूर्त्तिभेदेन तिष्ठति॥ काशीमूर्त्तिः शिवस्येति
वदंति श्रुतयो यतः॥ मूर्त्तयः संति विविधाः शिवस्य परमात्मनः॥ तासु मूर्त्तिषु काश्येव शिवप्रियतमा
स्मृता॥ काशीमूर्त्तिं शिवाकारां शिवो दृष्ट्वा मनोरमां॥ शिवो दृष्ट्वा शिवानीव प्रीतो भवति सर्वदा॥
यदा संप्राप्य कैलासात्काशीमूर्त्तिं महेश्वरः॥ तदा प्राह महादेवं भवानी भक्तवत्सला॥ गौरी०॥
शिव सर्वेश सर्वात्मन् किं काशीप्राप्तिसाधनं॥ एतत्सर्वं विशेषेण निरूपय कृपानिधे॥ महेश्व
र०॥ मयि भक्तिरविच्छिन्ना या मदभ्यर्चनोद्भवा॥ सा भक्तिरेव सुभगे काशीसंप्राप्तिसाधनं॥
मदर्चनं नवविधं श्रुतिषु प्रतिपादितं॥ तादृशेनार्चनेनैव मयि भक्तिः प्रजायते॥ मद्भक्त इति

शि॰ रह॰
१३५

विज्ञेयः स एव कमलानने ॥ यो भस्मनिष्ठः सततं ममैवाराधने प्रियः ॥ काश्मीरादिषु लिंगेषु प्रविष्टं देव
तात्मनं ॥ मामेव यो र्चयेन्नित्यं स मद्भक्त इति श्रुतः ॥ हिमवत्पर्वतादीनि यानि स्थानानि शोभने ॥ तेषु स्था
नेषु शैवेंद्रैर्मदर्थं तप्यते तपः ॥ तेषु तेषु तपस्तप्तं येरनेकयुगावधि ॥ तेनैव प्राप्यते काशी मत्स्वरूपा वरान
ने ॥ गिरिजे सुलभो नाहं परं त्वस्यंत दुर्लभः ॥ तथापि सुलभो त्यंते शैवधर्मरतात्मनां ॥ पुरा हिमाद्रि
शिखरे नानारत्नविराजिते ॥ ब्रह्मविष्ण्वादयो देवाः स्थिता मल्लिंगपूजकाः ॥ ऋषयः पितरः साध्या गं
धर्वाः सिद्धाश्च पुंगवाः ॥ मल्लिंगपूजनासक्ताः स्थिताः पूर्वं हिमालये ॥ हिमवत्पर्वते रम्ये सर्वदा मां मुमुक्ष
वः ॥ पूजयंत्यहिकंठेशं निर्वाणपदकांक्षया ॥ तत्रैकदा कश्यपाद्या ऋषयो ब्रह्मवादिनः ॥ ममाराध्य
स्थिता देवी हेमपद्मादिभिर्मुदा ॥ तदा कण्वः समागत्य स्नात्वा छेमानसे जले ॥ मानसेशं समभ्यर्च्य
कश्यपं प्राह सादरं ॥ कण्व उवाच ॥ संसारदावविश्रान्तमर्त्यनामकृतात्मनां ॥ घोरसंसारविच्छे
दः कथं भवति सत्वरं ॥ किमर्चनीयं किं ध्येयं किं वा सर्वार्थदं महः ॥ किमाश्रयं किमाराध्यं तद्वदस्व — श्रीः ॥ १३५

महामुने ॥ कश्यप उवाच ॥ शिवाभिधं महः सेव्यं सर्ववेदांतसंश्रुतं ॥ तत्सेवयैव सर्वेषां मुक्तिर्भवति वस्तुतः ॥
सच्चिदानंदमद्वैतं यन्महः शिवसंज्ञितं ॥ तन्महः सततं सेव्यमन्यत्त्यक्त्वाखिलं मुने ॥ तुरीयमेकं विम
लं शिवं मत्वा यथार्थतः ॥ ये भजंति शिवं नित्यं न ते संसारभागिनः ॥ ये मायातीतमद्वैतं शिवमेव भजंति
ते ॥ कदापि जननीगर्भं न विशंत्येव सर्वथा ॥ संसारदंदशूकेन संदष्टा ये मुहुर्मुहुः ॥ ते तद्विषाद्विमुच्यं
ते शिवसेवौषधाशनाः ॥ संसारसागरोत्तारः शिवसेवातरीर्यतः ॥ ततः सर्वात्मना नित्यं कर्त्तव्यं
शिवसेवनं ॥ संसारसागरे घोरे तमज्जंति मुहुर्मुहुः ॥ ये मुक्तं न भजंतीशं शिवं संसारतारकं ॥ अ
नन्यशरणा नित्यं शिवमव्यभिचारतः ॥ ये भजंत्यन्वहं भक्त्या ते यांति शिवमव्ययं ॥ बहुपुण्यफलैः
कण्व शिवे भक्तिः प्रजायते ॥ साप्यनंततपोधर्मैर्भवत्यव्यभिचारिणी ॥ महापातकपूजानां महापा
परतात्मनां ॥ न भवत्येव गौरीशे भक्तिरव्यभिचारिणी ॥ येषां चेतस्तपःपूतं तेषामेव महात्मनां
जायते गिरिजानाथे भक्तिरव्यभिचारिणी ॥ या भक्तिः श्रीमहादेवे भवत्यव्यभिचारिणी ॥ सैव मो

शि०स्प
१३६

सप्रदेस्याद्दुर्देवाः सर्वेपि सर्वदा ।। ब्रह्मविष्ण्वादिदेवानामधिपं गिरिजाधिपं ।। भजंति धीराः सततं निष्क
लं निर्गुणं शिवं ।। रसनायस्य सततं शिवनामरसायनं ।। स धन्यः स कृतार्थश्च तीर्णसंसारसागरः ।।
संसारपाशसंबद्धस्तावद्भवति मानवः ।। न यावद्भजति प्रीत्या देवदेवं महेश्वरं ।। देवोत्तममनाद्यंतं
निरवद्यं महेश्वरं ।। ये भजंत्यन्वहं प्रीत्या ते धन्या इति मन्महे ।। शिवं प्रयांत्ययत्नेन सर्वेपि शिवपूज
या ।। अतो नानाविधोपायैः कर्तव्यं शिवपूजनं ।। सर्वज्ञः श्रीमहादेवः स सर्वव्यापकोपि सन् ।। स्व
भक्तानुग्रहायात्र लिंगाकारेण तिष्ठति ।। विभूतिराशयो यत्र यत्र बिल्ववनान्यपि ।। यत्र शैवाः शि
वपरास्तत्र सन्निहितः शिवः ।। यत्र रुद्राक्षतनवो यत्र रुद्राक्षभूषणाः ।। यत्र लिंगानि शैवानि तत्र
सन्निहितः शिवः ।। यत्र पंचाक्षरासक्ता यत्र श्रीरुद्रपूजकाः ।। यत्र पाशुपता वा रास्तत्र सन्निहितः श्री:।।
शिवः ।। विभूतिराशयः संति पृथ्व्यां शतशो मुने ।। कोटिशः संति पृथ्व्यां च नवबिल्ववनान्यपि ।। १३६
रुद्राक्षवृक्षान्पृथ्व्यां च पक्वरुद्राक्षसंयुतान् ।। कोटिशः संति रुद्राक्षा महारुद्रप्रिया मुने ।। रुद्रा

क्षदर्शनेनापि नरस्यास्य च कुलं क्षणात् ।। पृथ्व्यां च रुद्राक्षा न राशीभूतान नेकधा ।। अत्र नानामु
खाः संति रुद्राक्षाः शिवसंमताः ।। रुद्राक्षमालिकाः कृत्वा कुरु रुद्राक्षधारणं ।। मुखं मुखेन संयो
ज्य कुरु रुद्राक्षमालिकां ।। कंठकर्णादिदेशेषु वह रुद्राक्षमालिकाः ।। सहस्रमात्रं यस्यांगे रुद्राक्षाः
संति सर्वदा ।। स सर्वदुःखनिर्मुक्तः प्रयाति शिवसन्निधिं ।। एतानेकादशमुखान् रुद्राक्षान्यस्य को
टिशः ।। अनर्घ्यानघहान्पुण्यान्स्वारयत्व यथेच्छया ।। रुद्राक्षधारणं कृत्वा भस्मधारणपूर्वकं ।।
कृतानंतमहापापोप्यनायासेन मुच्यते ।। मुने केवलभस्मांगैः कार्यं रुद्राक्षधारणं ।। तेषामेवा
धिकारोस्ति यतो रुद्राक्षधारणे ।। देवस्याध्ययनं कार्यमुपनीतैर्यथा तथा ।। रुद्राक्षधारणं कार्यं शु
द्धभस्मानुलेपनैः ।। विभूतिधारणं कृत्वा कृत्वा रुद्राक्षधारणं ।। यः शिवं पूजयेद्भक्त्या स मोक्षमधिग
च्छति ।। भूतिरुद्राक्षपूतांगैः शिवैकपरदेवतैः ।। पूजितः श्रीमहादेवस्तेभ्यो मोक्षं प्रयच्छति ।। भुक्ति
मुक्तिप्रदं मत्वा शिवं शैवाः समाहिताः ।। पूजयंत्यतियत्नेन नित्यमव्यभिचारतः ।। न जानीमः

शि॰स्प
१३७

शिवादन्यं न जानीमः रतीश्वरं॥ पूजयंत्यत्र ये भक्त्या संसारच्छेदकारणं॥ संसारतरुमूलानि महेशार्च
नवह्निना॥ सद्यो भवति दग्धानि प्रबलान्यपि सत्वरं॥ प्ररूढमूलसंबद्धं महासंसारपादपं॥ शैवाः प
दनखाग्रेण छिलायंति परं शिवं॥ अतः शिवपरा भूत्वा भस्मरुद्राक्षभूषणाः॥ पूजयस्व महादेवं दे
वदेवोत्तमं शिवं॥ इदं सिद्धिप्रदं क्षेत्रं सिद्धलिंगमिदं मुने॥ अत्र संसारनाशार्थं पूजयस्व महेश्वरं॥ शि
वाराधनवह्निरेव विततागारदाहकः॥ शांतो भवस्तु तत्रापि संसारवनपालकः॥ पुरा संसारनाशार्थं ब
हवोत्र मुनीश्वराः॥ महेशाराधनं कृत्वा मुक्ताः संसारबंधनात्॥ विना शिवार्चनं कस्य संसारो न विनश्य
ति॥ अतः संसारनाशार्थं कुरुष्व शिवपूजनं॥ पुरा चैव महाशैवाः काशीप्राप्त्यर्थमादरात्॥ तपः कृत्वा
स्थिता घोरं संसारवनपावकं॥ इदानीमपि कुर्वंति शैवा लिंगार्चनप्रियाः॥ काशीप्राप्त्यर्थमत्यर्थं तपो
यत्नपुरःसरं॥ काशी प्राप्यैव बहुभिरत्र पूर्वं तपस्यया॥ अत्र तप्तं तपस्यास्तु काशी संप्राप्यते द्विजैः
अस्य सिद्धेशलिंगस्य प्रभावस्तादृशो यतः॥ सार्धार्बुदं द्विजाः पूर्वमत्र कृत्वा तपो मुदा॥ काशीप्रापुर

श्रीः॥
१३७

DR BHAU DAJI MEMORIAL

नायासात् काशी महेशप्रसादतः॥ अतोत्र यत्नतः कार्यं तपः सिद्धिप्रदं द्विजैः॥ अत्र पूर्वं शिवा नित्यं प्राप्याविर्भू
ता हिमालये॥ त्वक्के प्राप्य शिवाप्यत्र शिवं प्रांततपो मुदा॥ निष्कलानि नवद्या सा शिवानी शिवरूपिणी॥
दृष्टात्र विष्णुना पूर्वं आदिविद्या यशस्विनी॥ तां तादृशीमुमां दृष्ट्वा विष्णुः संतुष्टमानसः॥ प्रणम्य दंड
वद्भूमौ पूजयामास सादरं॥ ततस्तुष्टाव तां विष्णुरादिविद्यां महेश्वरीं॥ कृतांजलिपुटो भूत्वा प्रणम्य च मु
हुर्मुहुः॥ विष्णुरुवाच॥ जय मातर्जगद्वंद्ये जय विश्वेश्वरप्रिये॥ जय कल्याणदे भव्ये जय सौभाग्य
संश्रये॥ जय कल्याणनिलये जय वेदांतसंस्तुते॥ जय पुण्यैकनिलये जय कारुण्यसंश्रये॥ जय
वेदांतसंवेद्ये जय नित्ये निरंजने॥ जय विद्यैकनिलये जयापर्णे जयामले॥ जय सर्वकलापूर्णचंद्र
बिंबनिभानने॥ जय विद्रुमबिंबाभभव्याधरविराजिते॥ जय दाडिमबीजाभदंतराजिविरा
जिते॥ जय शार्ङ्गनिभानीलभ्रूवल्लीसमलंकृते॥ जय शृंगारवल्लीतुल्यकेशपाशविराजिते॥ ज
य सिंदूरसंबद्धसीमंतललितालके॥ जय पत्रीरसंबद्धघुसृणारुणभालके॥ जय कंबुनिभाप्र

कंठमंडलशोभिते ।जयहेममृणालाभाबाहुवल्लीविराजिते।।जयकोकनदारक्तहस्तपद्मविराजिते।।जयका
रुण्यपीयूषपूर्णवक्षोजशोभिते।।जयकामजयोत्पन्नरोमराजिविराजिते।।जयत्रिवलिसंबद्धविलस
द्भुवनोदरे।।जयसिंदूरकदलीसन्निभोरुमनोहरे।।जयदेवनतापूतविलसत्पदपंकजे।।जयानवद्यनि
र्द्वंद्वनिर्मले लयवर्जिते।।जयविद्ये महाविद्ये जयानंदे जयोत्तमे।।जयलीलाविलासार्थस्वीकृताम
लविग्रहे।।जयमौनिमनोरम्यसिंहासनवराश्रये।।जयरत्नोज्वलत्परत्नावलिविराजिते।।जयदि
व्यमणिभ्राजद्धेमाभरणशोभिते।।जयमातर्महादेवी जयमातर्महेश्वरी।।जयमातस्त्रिनयने जय
मातः सुरेश्वरी।।जयमातः प्रसीद त्वं जयमातः शिवप्रिये।।जयमातः कृपापूर्णे जयमातः परात्परे
किं ध्यायते त्वया देवी ध्यातव्यं तव किं शिवे।।ध्येया त्वमेव सर्वेषां भुक्तिमुक्तिप्रदायिनी।।ध्येयध्या
तव्यशून्या त्वं ध्यानगम्या कथं शिवे।।दासास्तवैव सर्वेपि वयं ब्रह्मादयः शिवे।।दास्यस्तवास्मदा
दीनां देवानां वनिताः शिवे।।देवतासार्वभौमस्य शिवस्यार्धांगभागिनी।।त्वमस्य तस्त्वया देवी कि

मत्र ध्यायते वद ।पार्वती० ।शरीरार्धमहं शंभोर्येन प्राप्स्यामि केशव।।तदिदानीं ममाचक्ष्व स्तोत्रं शी
घ्रफलप्रदं।।विष्णुरुवाच।।शरीरार्धं महेशस्य प्राप्तमेव त्वया शिवे।।त्वमेव शिवरूपासि तत्प्राप्यं
न दृश्यते।।तथापि पृच्छते देवी लोकानुग्रहकाम्यया।।त्वया ततोहं वक्ष्यामि स्तोत्रमेकं शिवप्रदं।।पुत्रो
हं तव कल्याणी नतोवात्सल्यभावतः।।मया सह त्वया देवि शिवसंभाषणं कृतं।।तव यत्पदपद्मं त
त्सर्ववेदांतसंस्तुतं।।दृष्टं मया कृतार्थोस्मि त्वत्पादांबुजवीक्षणात्।।यं पश्यसि जगद्वंद्ये कृपया त्व
मनेकधा।।पूजयंति सुराः सिद्धा मुनयश्च न संशयः।।लक्ष्म्याद्याः सुभगा जाता त्वत्पादांबु
रुहार्चनात्।।त्वत्पादपद्मं सततं ध्यायते कमलादिभिः।।२००।।त्वमादिशक्तिः परमा सर्ववेदांत
संस्तुता।।त्वमोंकाररूपा त्वं सर्ववेदांतरूपिणी।।त्वमाद्यंतविहीना त्वं सच्चिदानंदरूपिणी।।वि
ज्ञानसारिणी साक्षात् ज्ञानधाराविनोदिनी।।कलाकाष्ठामुहूर्तादिकालोल्लयनकारिणी।।त्वत्त
एव समुत्पन्ना वयं ब्रह्मादयः सुराः।।त्वत्त एव समुत्पन्ना लोकाः सर्वेपि शांभवी।।तवनेत्रमयं

द्रः सूर्योग्निश्च महेश्वरी ।। तवैव मूर्तयः सर्वे पवनाद्याः शिवप्रिये ।। त्वदन्यद्दृश्यते नात्र त्वमेव सकलं शि
वे ।। निष्कलापि त्वमेवासि सकलासि त्वमीश्वरी ।। त्वमेव सकला देवी सृष्टिस्थित्यंतकारिणी ।। त्वमेव
निष्कला देवी सर्वोपाधिविवर्जिता ।। प्राप्या त्वमेव सर्वेषां मुक्तिरूपा स्वभावतः ।। त्वामीदृशीं विदि
त्वैव सच्चिदानंदलक्षणां ।। भजंति मुनयः सर्वे नित्यं वेदैः स्तुवंति च ।। ईदृशी त्वं निराकारा साकारा चैव दृ
श्यते ।। यस्त्वमसि विज्ञानमनोरूपं न ते ध्रुवं ।। त्वं तपोदानयागानां फलदासि शिवप्रिये ।। त्वामुद्दिश्यैव मु
निभिः सततं तप्यते तपः ।। संतुष्टा तपसा देवि ददासि परमं पदं ।। सुप्रीतायास्तवैमेव नादेयं वस्तु दृश्यते
शिवे त्वयैवं सृष्टानि वैकुंठादिपदान्यपि ।। तानि दत्तानि चास्मभ्यं त्वयैवार्चितया ध्रुवं ।। यतः शिवस्त्व
मेवासि ततो दत्तं शिवेन यत् ।। तत्त्वयैव ध्रुवं दत्तं सर्वकल्याणसंश्रये ।। रत्नराशेर्मनोज्ञानि रत्नानीव
मया पुरा ।। वेदराशेर्गृहीतानि शिवनामानि शोभने ।। सत्यं तानि नामानि महादेवस्य शोभने ।।
तानि सर्वाणि नामानि पावनानि न संशयः ।। तानि दिव्यानि नामानि प्रसिद्धानि वरानने ।। बहू

न्यपि तत्रैषा माहात्म्यरतिदुर्लभा ।। अस्ति गुह्यतमं देवी नाम्नामष्टोत्तरं शतं ।। शंभोरहं प्रवक्ष्यामि पठतां
शीघ्रकामदं ।। शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः ।। वामदेवो विरूपाक्षः कपर्दी नीललोहितः
शंकरः शूलपाणिश्च खट्वांगी विष्णुवल्लभः ।। शिपिविष्टोऽम्बिकानाथः श्रीकंठो भक्तवत्सलः ।। भवः
शर्वस्त्रिलोकेशः शितिकंठः शिवाप्रियः ।। उग्रः कपाली कामारिरंधकासुरसूदनः ।। गंगाधरो ललाटा
क्षः कालकालः कृपानिधिः ।। भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ।। कैलासवासी कवची कठो
रस्त्रिपुरांतकः ।। वृषांको वृषभारूढो भस्मोद्धूलितविग्रहः ।। सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्व
रः ।। सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ।। हविर्यज्ञमयः सोमः पंचवक्त्रः सदाशिवः ।। विश्वे
श्वरो वीरभद्रो गणनाथः प्रजापतिः ।। हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।। भुजंगभूषणो
भर्गो गिरिधन्वा गिरिप्रियः ।। कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ।। मृत्युंजयः सूक्ष्मतनु
र्जगद्व्यापी जगद्गुरुः ।। व्योमकेशो महासेनजनकश्चारुविक्रमः ।। रुद्रो भूतपतिः स्थाणुरहिर्बु
ध्न्यो दिगंबरः ।। अष्टमूर्तिरनेकात्मा सात्विकः शुद्धविग्रहः ।। शाश्वतः खंडपरशुरजः पाशविमो

वकः॥ मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः॥ पूषदंतभिदव्यग्रो दक्षाध्वरहरो हरः॥ भगनेत्रभिदव्यक्तः
सहस्राक्षः सहस्रपात्॥ अपवर्गप्रदोऽनंतस्तारकः परमेश्वरः॥ इमानि दिव्यनामानि जप्यंते सर्वदा म
या॥ नामकल्पलतेयं मे सर्वाभीष्टप्रदायिनी॥ नामान्येतानि सुभगे शिवदानि न संशयः वेदसर्व
स्वभूतानि नामान्येतानि वस्तुतः॥ एतानि यानि नामानि तानि सर्वार्थदान्यतः॥ जप्यंते सादरं नित्यं मया
नियमपूर्वकं॥ वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च॥ संत्यनंतानि सुभगे वेदेषु विविधेष्वपि॥ तेभ्यो
नामानि संगृह्य कुमाराय महेश्वरः॥ अष्टोत्तरसहस्रं तु नाम्नामुपदिशत्पुरा॥ तानि नामानि जप्यं
ते मया प्रत्यहमादरात्॥ इत्युक्त्वा प्रणिपत्यांबां संपूज्य च जनार्दनः॥ ततो जगाम वैकुंठं प्रेषितो जगदं
बया॥ शिवमाराधयंती सा गिरिजापि ततः शिवं॥ संप्राप शिवरूपा सा भूयः प्राप्तशिवापि सा॥ गौरी लिं
गमिदं विप्र शिवानी निर्मितं पुरा॥ एतल्लिंगार्चनान्नास्ति मृत्युबाधा न कुप्यते अस्मिंल्लिंगे महादेवः प्रा
दुरासीद्यदा तदा॥ शिवापि पूजयामास लिंगमेतन्मनोहरं॥ त्रिकालमेतल्लिंगस्य यः करिष्यति पूज
नं॥ स सर्वाल्लभते कामान्मोक्षं चांते न संशयः॥ पुरा च पुष्पदंतेन तपस्तप्तं दुरासदं॥ तत्कृतेनैव तपसा

क्षुब्धमासीज्जगत्त्रयं॥ इंद्रादयो लोकपालाः क्षुब्धाः सर्वे तदा मुने॥ विष्णुलोकं ययुः शीघ्रं ब्रह्मणा
पि समन्विताः॥ ततस्तानागतान्दृष्ट्वा ज्ञात्वा तत्क्षोभकारणं॥ ब्रह्मादीनाह तान्विष्णुरूपेवक्ष्ययथा
यथं॥ विष्णुरुवाच॥ पुष्पदंतोऽत्र तपसा भीता यूयं ततो भयं॥ कदापि वस्तुतो देवा भवतां न भविष्य
ति॥ यानि संत्यधुना देवाः पदान्यस्माकमक्षतं॥ तानि तेन न गण्यंते पुष्पदंतेन धीमता॥ स्वगाण
पत्यमधुना लब्धुमिच्छति शंकरात्॥ स्वबलाद्दापि दत्तानि पदान्येतानि नेच्छति॥ वैकुंठादीनि सर्वा
णि पदानि बहुधा पुरा॥ तेन लब्धान्यतस्तस्य नैतेष्विच्छा भविष्यति॥ यश्चेदृशोऽत्र तपसा प्रीण
यिष्यति शंकरं॥ स किमस्मत्पदे वांछां करिष्यति वदंतु तत्॥ यः करिष्यति यत्नेन तपो घोरं दुरासदं
स सर्वदा शिवं प्राप्तुं समुद्युक्तो भविष्यति॥ अतस्तस्माद्भयं त्यक्त्वा यूयं स्वस्वपदे सदा॥ तिष्ठंतु
साधवानेन स्वस्वकर्मसु संयताः॥ भ्रमः स्थितो ममाप्येवं स निवृत्तः शनैः शनैः॥ सुखेन तस्थीय
ते देवास्तदाप्रभृति सर्वदा॥ इत्युक्त्वा विष्णुना देवाः सर्वे स्वस्वपदं ययुः॥ ततस्तस्माद्भयं त्यक्त्वा
सर्वैरपि सुरैर्मुने॥ एतादृशं तपो घोरं पुष्पदंतश्चकार सः॥ तेनैव तपसा तुष्टः प्रत्यक्षोऽभून्मे

शि०स्त
१४१

हेश्वर:।प्रादुर्भूतं महादेवं गौरीलिंगान्मनोहरात्॥ पुष्पदंतो विलोक्याशु पूजयामास सादरं॥ ततः
प्रणम्य तुष्टाव विनयानतकंधरः॥ कृतांजलिपुटो भूत्वा पुष्पैः संपूर्य चांजलिं॥ ॥पुष्पदंत उवाच॥
महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः॥ अथावाच्यः
सर्वः स्वमतिपरिणामावधिगृणन्ममाप्येष स्तोत्रे हर निरपवादः परिकरः॥ ५॥ १॥ अतीतः
पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि॥ स कस्य स्तोतव्यः
कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः॥ २॥ मधुस्फीता
वाचः परमममृतं निर्मितवतस्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदं॥ मम त्वेतां वाणीं गु
णकथनपुण्येन भवतः पुनामीत्यर्थेस्मिन्पुरमथन बुद्धिर्व्यवसिता॥ ३॥ तवैश्वर्यं यत्तज्जग
दुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु॥ अभव्यानामस्मिन्वरद रम
णीयामरमणीं विहंतुं व्याक्रोशीं विदधत इहैके जडधियः॥ ४॥ किमीहः किंकायः स खलु
किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च॥ अतर्क्यैश्वर्ये त्वय्यनव

श्री:॥
१४१

सरदुःस्थो हतधियः कुतर्कोयं कांश्चिन्मुखरयति मोहाय जगतः॥ ५॥ अजन्मानो लोकाः किमवयव
वंतोपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति॥ अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे॥ ६॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्र
स्थाने परमिदमदः पथ्यमिति च॥ रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको ग
म्यस्त्वमसि पयसामर्णव इव॥ ७॥ महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः कपालं चेती
यत्तव वरद तंत्रोपकरणं॥ सुरास्तां तामृद्धिं भवति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं
विषयमृगतृष्णा भ्रमयति॥ ८॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जग
ति गदति व्यस्तविषये॥ समस्तेप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन्जिह्रेमि त्वां न खलु न
नु धृष्टा मुखरता॥ ९॥ तवैश्वर्यं यत्नाद्यदुपरि विरिंचो हरिरधः परिच्छेत्तुं यातावनिलमनलस्कंधवपुषः॥ ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृ

शि०स्त
१४२

त्तिर्न फलति॥ १०॥ अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकंडूपरवशान्
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितपदे॥ ११॥ अमु
ष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः। अलभ्या पाताले
प्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः॥ १२॥ यदृद्धिं सूत्राम्णो
वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः। न तच्चित्रं तस्मिन्वरिवसितरि त्व
च्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥ १३॥ अकांडब्रह्मांडक्षयचकितदेवासुरकृपा
विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः। स कल्माषः कंठे तव न कुरुते न श्रियमहो विकारोपि
श्लाघ्यो भुवनभयभंगव्यसनिनः॥ १४॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तंते नि
त्यं जगति जयिनो यस्य विशिखाः। स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः स्मर्तव्या
त्मा न हि वशिषु पथ्यः परिभवः॥ १५॥ महीपादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्रा

श्रीः॥
१४२

DR BHAU DAJI

म्यद्भुजपरिघरुग्णग्रहगणं। मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि न
नु वामैव विभुता॥ १६॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः
शिरसि ते। जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥ १७
रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे चंद्रार्कौ रथचरणपाणिः शर इति। दिधक्षोस्ते
कोयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः॥ १८॥ हरिस्ते साहस्रं
कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलं। गतो भक्त्युद्रेकः परिणतिमसौ
चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगतां॥ १९॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्र
तुमतां क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते। अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः॥ २०॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः॥ क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो

शि०स्त
१४३

ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥ सतां वर्त्म त्यक्त्वा श्रुतिसमधिगम्यं सह भुवं घृ
णामप्युन्मील्य स्वजनविषयस्नेहगुणितां ॥ द्विजः कृतन्यादेपितरमपराद्धे त्वयि विभो मनुष्यत्वं
सद्यस्त्रिदशपरिणामेन विजहौ ॥ २२ ॥ प्रजानाथं नाथ प्रसभमधिकं स्वां दुहितरं गतं रोहिद्भूतां
रिरमयिषुमृष्यस्य वपुषा ॥ धनुःपाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेद्यापि त्यजति
न मृगव्याधरभसः ॥ २३ ॥ स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथ
न पुष्पायुधमपि ॥ यदि स्त्रैणं देवी यमनिरतदेहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवत
यः ॥ २४ ॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरो
टीपरिकरान् ॥ अमंगल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मंगलम श्री॥
सि ॥ २५ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः ॥ १४३
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २६ ॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ॥ परिच्छिन्ना
मेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥ २७ ॥ त्रयीं तिस्रो वृत्ती
स्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ॥ तुरीयं ते धाम ध्वनिभि
रवरुंधानमणुभिः समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदं ॥ २८ ॥ भवः शर्वो रुद्रः पशुप
तिरथोग्रः सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदं ॥ अमुष्मिन्प्रत्येकं प्रविच
रति देवः श्रुतिरपि प्रियायास्मैधाम्ने प्रहितनमस्योस्मि भवते ॥ २९ ॥ नमो नेदिष्ठाय प्रियदव
दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥ नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च
नमो नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ ३० ॥ प्रबलरजसे विश्वोत्पत्तौ भवाय नमो नमो
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः ॥ प्रबलतमसे तत्संहारे हराय नमो नमः प्रमहसि प
दे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३१ ॥ कृशपरिणतचेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमो

शि०स्प
१४४

लंघिनीशाश्वदृद्धिः ।। इति चकितममंदीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारं ।।
३२ ।। वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे न क्वापि क्षणमपि भवंतं प्रणतवान् ।। नमन्मु
क्तः संप्रत्यहमतनुरग्रेप्यनतिमानितीश क्षंतव्यं तदिदमपराधद्वयमपि ।। ३३ ।। असितगिरिस
मस्यात्कज्जलं सिंधुपात्रे सुरतरुवरशाखा लेखनी पत्रमूर्वी ।। यदि लिखति गृहीत्वा शारदा सार्वका
लं तदपि तव गुणानामीश पारं न याति ।। ३४ ।। ।। कश्यप उवाच ।। ।। एवं स्तुतो महादेवः करुणासा
गरः प्रभुः । गाणपत्यं ददौ तस्मै तदेवाश्रितवत्सकः ।। असुरसुरमुनींद्रैरर्चितस्येंदुमौलेर्ग्रथितगु
णमहिम्नो निर्गुणस्येश्वरस्य ।। सकलगुणवरिष्ठः पुष्पदंताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेत
च्चकार ।। अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः ।। स भवति शिव
लोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ।। ३७ ।। महेशान्नापरो देवो महिम्नो
नापरा स्तुतिः ।। अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परं ।। ३८ ।। दीक्षा दानं तपस्तीर्थं स्नानं यागादि

श्रीःम
१४४

काः क्रियाः ।। महिम्नस्तवपाठस्य कलां नार्हंति षोडशीं ।। ३९ ।। एतादृशोस्तपस्तस्य मंत्रैर्बहुभिः पुरा
तिमहेशप्रसादेन मुक्ताश्च मुनिसत्तम ।। पुरा विष्णुप्रभृतयः सुरा मोहसमन्विताः ।। सायं सोमत्रयो
दश्यां नार्चयामासुरीश्वरं ।। तदा समुद्रपतिता लक्ष्मीर्विष्णुमनोहरा ।। ऐरावतो निपतितो देवाश्चे नसहा
बुधै ।। अमृतं चापतत्तत्र रत्नैश्च विविधैः सह ।। ततो बभूवुस्ते देवा निस्तेजस्का भयाकुलाः ।। ततः
स्वस्वपदाः सर्वत्र च्युताः पृथिवीं गताः ।। भूमावगस्त्यं शैवेंद्रं ददृशुस्ते सुरा मुने ।। प्रणम्य ते नतेगस्त्यं
निस्तेजस्काः सुरास्थिताः ।। विचार्य स ततस्तेषां विष्ण्वादीनां कृताकृतं ।। ४० ।। तानुवाच ततो धी
मान्कुंभयोनिः शिवार्चकः ।। भवद्भिर्यन्मोहेन न शिवाराधनं कृतं ।। तेन पापेन भवताम
भवत्स्वपदच्युतिः ।। प्राप्ताधिकारान्विश्वेशान्मत्ता यूयं बभूविथ ।। भवद्भिस्तन्मदाविष्टैस्त्यक्तं
शंकरपूजनं ।। अतएवाधिकारास्ते भवतां प्रच्युताः सुराः ।। समुद्रपतिता लक्ष्मी रत्नैरैराव
तान्विता ।। रत्नैरश्वेन देवेन संयुता नर्चनात्प्रभोः ।। येनार्चयंति गौरीशं सावधानेन सर्वदा

शि॰ स्य १४५

तेषामेतादृशाः क्लेशा भविष्यंति पदे पदे॥ ये पूजयंति गौरीशं पत्रेणपयसापि वा॥ ते सर्वेभयनिर्मु
क्तास्तिष्ठंति सुखिनः सदा॥ यैरीशपूजनं त्यक्तं मालस्येन भ्रमेण वा॥ तेषां क्व सुखलेशस्याप्य
न्वयः संभविष्यति॥ ये संततं शिवरताः शिवपूजारतः सदा॥ तेषामेव शुभं नूनं मन्येषामशुभं
ध्रुवं॥ मूर्खाः संप्राप्य दुःखानि प्रलपंति पुनः पुनः॥ परं तु दुःखनाशार्थं नार्चयंति सदाशि
वं॥ श्रुतः स्मृतो वा दृष्टो वा महादेवः कृपानिधिः॥ ददाति महदैश्वर्यं पूजितश्चेत्संपदां॥ एतादृशं
महादेवं सर्वदेवशिखामणिं॥ नार्चयंति नरा मूढा भवंत इव मोहिताः॥ शिवार्चने नार्थयत्नेन संपा
द्यं कुसुमादिकं॥ यः पूजयेन्महादेवं समुक्तो भवति ध्रुवं॥ यः पूजयेन्महादेवं कुसुमैरसमैरपि
स पुल्कसो वा भूपो वा न समोप्यसमो भवेत्॥ कल्याणी पतिरीशानः स्मृतोपि सहसा ददात्॥ पदे
पदेपि कल्याणं तनुते नात्र संशयः॥ यः कालातक्रमश्चांते नितांतं नार्चयिष्यति॥ सकालकव
लः सद्यो विना कालं भविष्यति॥ लक्ष्म्यादयः शंकरेण क्षीराब्धौ रक्षिताः शिवं॥ पूजयित्वाद्य

श्रीः॥ १४५

कुर्वंतु क्षीराब्धिमथनं सुराः॥ ये भजंत्यनिशं भक्त्या देवदेवं महेश्वरं॥ ते लभ्यंते विनायत्नं स्वाभीप्सितम
संशये॥ भवद्भिर्मोहसंक्रांतैः कदाचिन्नार्चितः शिवः॥ अतो नयूयमनिशं शिवपूजापरायणाः॥ अ
तः कृतमहादेवपूजनैरपि यत्नतः॥ भवद्भिरब्धिमथनात्प्राप्तव्यं स्वेष्टमाशु वै॥ विघ्नाय दिभवि
ष्यंति क्षीराब्धिमथनेत दा॥ बिल्वपत्रादिभिः सम्यक् कुर्वंतु शिवपूजनं॥ नश्यंति विघ्नाः सर्वेपि
श्रीमहादेवपूजया॥ यतो विघ्नहरस्यापि जनको विघ्नहा शिवः॥ विघ्नेशः पुत्रो विघ्नेशो यतस्त
स्माद्गणाधिपः॥ विघ्नघ्न इति विख्यातो देवेष्वन्येष्वपि ध्रुवं॥ असकृद्वा सकृद्वापि यः स्मरेत्सां
बमव्ययं॥ कृत्वापि स महारंभं सतत्फलमवाप्नुयात्॥ यः कार्यारंभसमये नाराधयति शंकरं॥
स विघ्नौघसमाक्रांतो भविष्यति पदे पदे॥ विधिवत्पार्वतीनाथः कार्यारंभेषु पूजितः॥ संहत्य
विघ्ननिवहान् ददाति वपकलं ध्रुवं॥ विघ्नदो विघ्नहर्ता च फलदोफलदोपि च॥ शिव एवेति नि
र्णीतो वदवेदांगपारगैः॥ नार्चयिष्यति यो भक्त्या पार्वतीप्राणवल्लभं॥ स विघ्नवज्रनिहतो नि

शि०स्य
१४६

ष्फलो निहतो भवेत्॥ अतो भवंतो यत्नेन पूजयित्वा सदाशिवं॥ समुद्रमथनोद्योगं कुर्वंत्विष्टफला
सये॥ मंदरं मंथानं कृत्वा शेषरूपेण रज्जुना॥ कुर्वंतु संततं यत्नेन समुद्रमथनं बुधाः॥ इति तद्वचनं श्रुत्वा
विष्णुब्रह्मादयः सुराः॥ चक्रुः क्षीराब्धिमथनं शिवाराधनपूर्वकं॥ क्षीराब्धिमथनोद्युक्तान्सुरानी
शः स सुरार्चितः॥ आप्याययदृष्टोपि सर्वांतरगतः सदा॥ शिवेनाप्यायिता देवा विष्ण्वाद्यास्ते
मुहुर्मुहुः॥ शिवं संपूज्य यत्नेन चक्रुश्च मथनं मुदा॥ सत्वरं मथ्यमानस्तैः क्षीराब्धिर्व्याकुलस्तदा॥
तरंगहस्तैरमरान्वारयन्निव संस्थितः॥ ततस्ते मथनोद्युक्ताः शिवं विस्मृत्य सत्वरं॥ अहं बली
बलीत्युक्त्वा चक्रुर्मथनमुद्धतः॥ ततः परं मथ्यमानाद्दालोलात्क्षीरसागरात्॥ कालकूटः समुत्पन्नो
ज्वालामालासमाकुलः॥ ततस्तमग्निसंभूतं हलाहलमनद्भुतं॥ दृष्ट्वा विहाय मथनं जग्मुः प्रतिदि
शं सुराः॥ हाहा किमासीदिदमित्यतित्रस्ता दिवौकसः॥ पुनः प्राप्तं कुंभयोनिं कालकूटहतप्रभाः॥
तानागतान्सुरान्दृष्ट्वा कुंभयोनिः शिवार्चकः॥ कालकूटभयग्रस्तानुवाच प्रीतिपूर्वकं॥

श्रीः॥
१४६

अगस्त्य उवाच॥ अहं बली बलीत्येवं भवद्भिर्मोहसंवृतैः॥ विस्मृतः शंकरस्तस्माद्भयं प्राप्तं न संशयः॥
क्व शक्तिर्भवतामस्ति समुद्रमथने सुराः॥ श्रीमहेशबलेनैव कृतं तन्मथनं तदा॥ महेशः सर्वजंतू
नां बलदः पुष्टिदः प्रभुः॥ कर्ता कारयिता चैव शिव एव न संशयः॥ कर्ताहमिति मन्वाना नित्यभ्रां
ता भवादृशाः॥ बहवः संति भूर्लोके शिवमायाविमोहिताः॥ जगत्स्रष्टा महादेवः पाति हंति च
लीलया॥ पुनः सृजति पातीशः संहरत्यपि लीलया॥ करोति सर्वकर्माणि भगवान्पार्वतीपतिः॥
न तस्मादपरः कोपि कार्यकर्ता श्रुतिश्रुतः॥ समुद्रमथनादीनि महाकार्याणि वस्तुतः॥ कर्तुं वि
श्वेश्वरादन्यो न समर्थो न संशयः॥ आप्यायितैर्महेशेन भवद्भिर्मथनं कृतं॥ अन्यथा मथनेश
क्तिर्भवतां क्व भविष्यति॥ महेशानुगृहीतोल्पोप्यनल्पो भवति भूरिशः॥ सदा करोति कार्याणि
नान्यः कोपि भवादृशः॥ महेशप्रेरितैरेव नरैरप्यमरैरपि॥ क्रियंते खलु कार्याणि नानारूपाणि
सादरं॥ भवादृशा महेशेन यदि नप्रेरितास्तदा॥ शक्तास्तृणाग्रमप्यल्पं नैव चालयितुं सुराः॥ प

शि०स्य १४७

रतं नैर्भवद्भिस्तु महेशप्रेरणं विना॥ क्रियंते यदि कार्याणि तदानीं शं जगद्भवेत्। जगद्यदि भवेद्देवाः सर्वमेत
दनीश्वरं। तदाक्षित्यादिकं कार्यं को वा कर्ता भविष्यति॥ कार्यं यद्यद्भवेन्नन्तु वस्तुतः कर्त्रपेक्षितं। कर्ता
रमनपेक्ष्यैव कार्यं क्वापि न जायते॥ मरीचिदृशानाम शानां जगत्कर्तृत्वकल्पने॥ बाधोऽति स्फुट एवातो
जगत्कर्ता महेश्वरः॥ क्षित्यादिषूपादानशानवानत एव सः॥ जगदीश इति ख्यातः स विश्वेश इति
श्रुतः॥ वस्तुतो जगदीशत्वं विश्वेशस्यैव संमतं। विश्वेशो जगदीशत्वे न्यायप्राप्तमखंडितं। विश्वेश्वर
स्तु विस्तुर्वा ब्रह्मा वा न भविष्यति। यतो नयोर्द्वयोरेकः प्रभुर्विश्वेश्वरः पिता॥ नमस्ते अस्तु भगवन्नित्या
दिश्रुतिभिः सदा॥ विश्वेश्वरो महेशान्यो नेति निश्चीयते मया॥ सोमः पवत इत्यादिश्रुत्या सोमः स
दाशिवः॥ जनिता पवनादीनां विश्वं तानामिति श्रुतः। ब्रह्माप्यर्यस्मुत्तनो विश्वेशाज्जनुराननम्।
सर्वेप्येते सुरा जाताः श्रीमहेशान्महौजसः॥ अतः सर्वसुराधीशः सर्वलोकेश्वरः शिवः॥ वेदैरेवाय
मर्थस्तु निर्णीतो सिमुकुर्मुहुः॥ ईशानः सर्वविद्यानामित्यादिश्रुतिभिर्मुहुः॥ महेशस्यैव कर्तृत्वं निश्चि

श्री:॥ १४७

तं नात्र संशयः॥ तस्मात्तमीश्वरं शक्तमविशायबलं स्वकं॥ स्तुतं भवद्भिस्तेनैव कालकूटो विनिर्मितः॥
यतः स्तुतं बलं स्वीयमतः क्रुद्धो महेश्वरः॥ कालकूटाभिधं क्रोधं स सर्जात्र न संशयः॥ शरण्यः शरणं
प्राप्यो भवद्भिरधुना शिवः॥ अन्यथा कालकूटायं भवतां नाशको भवेत्॥ गत्वा हिमगिरिं तत्र गौरीलिं
गमनामयं॥ पूजयध्वं यथाशास्त्रं सर्वशोकनिवृत्तये॥ पुरा भवं तं गंधर्वाः सोमकासुरनाशकं॥ सदेवा
स्तुष्टुवुर्दृष्टाः केशवं जगतां हितं॥ तदा तवाभवद्गर्वः सोमकासुरनाशकः॥ तेन गर्वेण सर्वेषां सुराणां
मोहनं कृतं॥ मोहितास्ते सुरा भूयो भवं तं तुष्टुवुर्हरे। तदा समभवद्धोरा लक्ष्मीनाथाशरीरवा
क्॥ श्रुत्वा तां वाचमनघां सर्वेषां च भयप्रदां सर्वेपि कंपमापन्नास्त्वया च सह केशव॥ त्वया नम्र
र्यते किं सा तदोत्पन्नाशरीरवाक्॥ सामया नक्ष्यते विप्रो शृणु तां यत्नतोऽधुना। त्वदुपमानं तदा विस्तु
भवं तं साशरीरवाक्॥ स्तोतव्यो नायमित्याह स्तुतो स्त्वन्य इति ध्रुवं॥ पश्यते हाति दूरस्थं महानल
समप्रभं, तं जित्वा केशवं देवाः स्तुवेथा त्वान्यथा तु ना॥ इति श्रुत्वा वचो देवाः सर्वे विस्मयमागताः

तदातत्पुरुषाप्याशुप्रेषयुः पावकं स्त्रमात।। तदातमाहकोसीतिपुरुषंवह्निसन्निभं।। सलेकइति संप्राह
कम्प्राल्लिरितिकेशवा प्राहतंवह्निरुदृत्तोदाहकोहमिति ध्रुवं।। तदातमाहपुरुषस्तृणंतृणदहेतिसः।। तदा
दग्धुंसमर्थोपिवह्निरसेनमुज्वलः।। तृणदाहेप्यशक्तःसन्लज्जितोभूत्तदाहरो।। तेतंन्निवृत्तौदेवानांप्र
तिष्ठोमध्यमाशुसः।। खेवृत्तांतमशेषेणजगादनतकंधरः।। ततोवायुर्गतस्तत्र लपाललज्जासमाश्रि
ता।। ततः सर्वेगतादेवास्तेपि लज्जांसमाश्रिताः।। ततः परंपरावृत्तंभवद्भिः शंभुधिक्कृतैः।। सर्व
तांतः कथंविज्ञो विस्मृतोद्य लयावद।। अतः सदाशिवः शक्तः सर्वशक्तिप्रपूरकः।। तच्छक्तिकोटिको
ट्यंशाच्छक्तिर्युष्मास्ववस्थिता।। कश्यप ०।। इतितद्वचनंश्रुत्वा विष्णुब्रह्मादयःसुराः।। अत्रागत्यम
हादेवंप्रजयामासुरादृताः।। ततस्तत्पूजयाप्रीतः करुणानिधिरीश्वरः।। प्रत्यक्षोभूदुमाकांतो नाना
विधगणान्वितः।। तंदृष्ट्वाश्रीमहादेवमनंतंद्युरविप्रभं।। स्तोतुमारेभिरेशंभुंविष्णुब्रह्मादयःसुराः।।
ऽचोदेवाऊचुः।। नमोनमस्तेभगवन्महेश नमोनमस्तेभगवन्दयाब्धे।। नमोनमस्तेभगवन्वृषेन्द्रे भे

कृते।। नमोनमस्तेनिगमैरुहीतः।। नमोनमस्तेभगवन्निरीह नमोनमस्तेभगवन्शरण्य।। नमोनमस्तेभग
वन्वरेण्य नमोनमस्तेभगवन्सुरेश।। नमोनमस्तेसकलोत्तरंग नमोनमस्तेधृतसुंदरांग।। नमोनमस्ते
हतमन्मथांग नमोनमस्तेनिगमानुषंग।। नमोनमस्तेगिरिजासमेत नमोनमस्तेगणनाथवीत।।
नमोनमस्तेजितकालसूत नमोनमस्तेहतसृष्टिभूत।। नमोनमस्तेसगुणाभिराम नमोनमस्तेधृ
तदिव्यधाम।। नमोनमस्तेधृतवारताम नमोनमस्तेपरिपूर्णकाम।। नमोनमस्तेसुखरूपमूर्त्तये न
मोनमस्तेक्षितपुण्यकीर्त्तये।। नमोनमस्तेसमवासमूर्त्तये नमोनमस्तेनिहताखिलार्त्तये।। नमो
नमस्तेनिहतात्रिवृत्तये नमोनमस्तेधृतदंतिकृत्तये।। नमोनमस्तेमुनिहृद्यवृत्तये नमोनमस्तेसु
रवंद्यमूर्त्तये।। नमोनमस्तेसुरूतप्रियाय नमोनमस्तेगिरिजाधवाय।। नमोनमस्तेवृषभध्वजाय
नमोनमस्तेवृषपर्वनाय।। नमोनमस्तेकलुषापहाय नमोनमस्तेऽमितकामदाय।। नमोनमस्ते
पुरसूदनाय नमोनमस्तेविबुधोत्तमाय।। नमोनमस्तेऽमितभूषणाय नमोनमस्तेऽखिल

शि०स्य
१४९

कारणाय। नमो नमस्ते समवीक्षणाय नमो नमस्ते विषमेक्षणाय॥ ९४॥ नमो नमस्ते करुणाकराय
नमो नमस्ते कलिनाशकाय। नमो नमस्ते सकलेश्वराय नमो नमस्ते सकलामृताय॥ नमो नमस्तेऽ
खिलमुक्तिदाय नमो नमस्तेऽखिलसंस्तुताय॥ नमो नमस्तेऽखिलपूजिताय नमो नमस्तेऽखिलर
क्षकाय॥ एवं स्तुतो महादेवो विष्णुब्रह्मादिभिः सुरैः॥ कालकूटभयत्रस्तान्सुरानाह सुरार्चितः॥ ॥
महेश्वर उवाच॥ भवतां भयमेतस्मात्कालकूटात्समुद्भुतं। अतः परं भयं नास्माद्भवतां तु भविष्यति॥ ता
वद्भयं प्राप्नुवंति सर्वेपि भवदादयः॥ यावन्नमामेवं यंति मोहगर्ते निपातिताः॥ सर्वमदपमानेन भवाब्धौ
निपतंत्यतः॥ मत्संमानेन सर्वेपि निवर्तंते भवांबुधेः॥ यो मामव्यभिचारेण सदा संपूजयिष्यति॥ स दु
स्तराणि दुःखानि तीर्त्वा सुखमवाप्नुयात्॥ मद्भक्ता न विनश्यंति प्रलयेपि ततः सदा॥ मोदमानाः सं
वसंति मद्भक्ता मत्परायणाः॥ नश्यंति पर्वताः सर्वे समुद्राश्च सपन्नगाः॥ नश्यंति महदाद्याश्च मद्भक्ता
न विनश्यति॥ सदा वसंति मद्भक्ता नित्यानंदनिरामयाः॥ अतस्ते न विनश्यंति प्रलयेपि मम प्रियाः

श्रीः॥
१४९

एवमुक्त्वा स्थिते शंभौ कालकूटोतिभीषणः॥ दिगंतराणि संदग्ध्वा सुराण्यां समुपाययौ॥ विष्णुब्र
ह्मादयो दृष्ट्वा कालकूटमुपागतं॥ तत्प्रभातप्तसर्वांगाः क्रोशंतः पतिता भुवि॥ कालकूटप्रभात
प्तान्विष्णुब्रह्मादिकान्सुरान्॥ ददर्श गिरिजाकांतः सगणो गिरिजापितान्॥ ततः परमुमा प्राह
महादेवं कृपानिधिं॥ विनयावनता भूत्वा कृतांजलिपुटा मुने॥ पार्वत्युवाच॥ देवदेव महादेव कृपासागर
शंकर॥ संहरैनं कालकूटं प्रलयानलसन्निभं॥ अतिदूरास्थिते चैनं कालकूटं महौजसं॥ दृष्ट्वैव पतिता
भूमौ विष्णुब्रह्मादयः सुराः॥ अयं यदि समायाति विष्ण्वादिसुरसन्निधिं॥ तदा दग्ध्वा भविष्यंति वि
ष्णुब्रह्मादयः सुराः॥ नायं प्रलयकालेपि विष्णुब्रह्मादिनाशकः॥ अतः पालय देवेश विष्ण्वादीन्मु
विमूर्छितान्॥ महेश कालकूटोयं भूभृधरविनाशकः॥ ~~अतः प्राक्कमपेक्षा~~ यवसानीव विष्ण्वादी
न्संदहिष्यति सत्वरं॥ अभक्ष्यमस्य नास्त्येव कालकूटस्य शंकर॥ दर्पितं कालकूटायं जगद्दुःखकरं त्व
पि॥ विनिवारणमप्यस्य त्वदन्ये न महेश्वर॥ कर्तुं न शक्यं तेनूनमतः एवं निवारय॥ शूलेनैव जयाश्च

वकालकूटमेहेश्वर।।अन्यथाशीघ्रमेतस्य शंकनैवनिवारणं।। कृत्यपय० । इत्युक्तः पार्वतीनाथः
पार्वत्याकरुणानिधिः।।शिरामुवाचसर्वज्ञः स्मितपूर्वंतदावचः।शिवशूलेनसहसाकालकूटनिवा
रणं।कर्तव्यमथवातस्यविनाशंकरवाण्यहं।।उतकस्तूरिकावत्तं कंठेवाधारयाम्यहं।।अथवेत्ल्को
वदधुनाकरवाणिवदप्रिये।।पार्वतीउवाच।।ब्रह्मांडमंडलंव्याप्यकालकूटोयमागतः।।एतन्नि
वारणंशंभोकथंवाद्यभविष्यति।।एतानदग्ध्वासुरान्सर्वान्ब्रह्मांडमपिसत्वरं।।दहिष्यत्यधुने
वेशकालकूटोयमद्भुतः।।येनकेनापिरूपेणकर्तव्येदोपवारणं।।तदालोकाभविष्यंतिसर्वेपिसु
खिनःशिवा।।इत्युक्तः श्रीमहादेवःकालकूटंदुरासदं।।दधारलीलयाकंठेकस्तूरीकणवन्मुने।।
ततःसमुत्थिताःसर्वेविष्णुब्रह्मादयःसुराः।।पुष्पवृष्टिरभूद्दिव्यादुंदुभिध्वनिपूर्वकं।।निच्च
तमूर्ध्विवृत्त्वाद्यासुरास्तेशिवपादुके।।प्रणम्यतुष्टुवुर्भूयःकृतांजलिपुटामुने।। देवाऊचुः।
नमःशिवस्वरूपायशिवायामिततेजसे।।सच्चिदानंदरूपायनमस्तेगिरिजापते।।नमस्तेदे

वदेवायसोमसूर्याग्निचक्षुषे।।सर्वाधिकायशर्वायनमस्तेसुखमूर्तये।।नमस्तेसर्ववंद्यायवेदवेद्यायशं
भवे।।नमस्तेशूलहस्तायमहादेवायतेनमः।। निष्कलायनिरीहायसर्वप्रत्ययसाक्षिणे।। नमस्तेनिरव
द्यायनमस्तेप्रत्यगात्मने।। नमस्तेगुणकूटायनमस्तेगुणरूपिणे।।नमस्तुणसंगायसंगहीनायते
नमः।।नमस्तेनिर्मलायस्तु महेशायशशिशेखर।। नमस्तेजगतामीशनिरीश परमेश्वर।। सर्वांतरा
त्मन्सर्वात्मन्सर्वरूपमहेश्वर।।सर्वाधारनिराधारनमस्तेविश्वरूपिणे।। भवांछरणमस्माकंसर्वे
षामपिशंकर।।नभवंतंविनास्माकमन्यच्छरणमीश्वर।।तवैतत्पादकमलेमस्मच्चित्तमधुव्रतैः
सर्वदासंश्रितंभूयान्महादेवकृपानिधे।।महेशतववक्तुंत्वर्थंनास्माभिर्शक्यतेप्रभो।।वेदैरपिनवि
ज्ञातेसत्यंसत्यंनसंशयः।।प्रलयानलसंकाशःकालकूटोयमद्भुतः।। त्वयास्मत्प्राणरक्षार्थंसंहृ
तःपरमेश्वर।। कालकूटाद्भयंघोरंयत्त्वयाद्यनिवारितं।। एतद्भयंत्वदन्यस्तुकोवावारयितुंक्षमः
अस्मत्तुल्योनापराधीसहिष्णुर्नत्वयासमः।। नास्मत्कृतापराधानांगणनापार्वतीपते।।अग

णप्याधुनास्माकमपराधान्बहून्यपि॥ महेश कृतमस्माकं रक्षणं कालकूटतः॥ भवान्य कृतमस्मा
कमतएव भवत्वया। रक्षणं कृतमस्माकं कालकूटभयाद्ध्रुवं॥ कश्यप०॥ इति स्तुत्वा सुराः सर्वे
शिवपादांबुजे ततः। प्रणतादंडवद्भक्त्या पुष्पैः संपूज्य शंकरं, महेशः प्रणतो देवैः स्तुतः संपूजि
तश्च तैः॥ क्षीराब्धिमथनं कर्तुं प्रेषयामास तान्पुनः। ततः पुनर्महादेवं तत्र संपूज्य ते सुराः॥ ममं
थुरब्धिं मुदिताः स्मरंतः पार्वतीपतिं। ततस्तस्मात्समुत्पन्ना कमला कमलानना॥ अमृतं च
समुत्पन्नमैरावतसमन्वितं॥ देवाश्चापि समुत्पन्नो नानारत्नसमन्वितः। पारिजातश्च सं
भूतामथ्यमानो महोदधेः। ततः शिवप्रसादेन लक्ष्मीं प्राप हरिर्मुने॥ ऐरावतादीन्प्रापेंद्रः शि
वस्यैव प्रसादतः। अमृतं प्रापुरमराः सर्वे भागानुरूपतः॥ महादेवप्रसादेन विवादेन विना मुने
एवं शिवप्रसादेन देवा लब्धमनोरथाः। स्वस्वस्थानानि संप्रापुः कीर्तयंतो महेश्वरं अतएव म
हादेवो भगवान्भक्तवत्सलः॥ सावधानं पूजनीयो भुक्तिमुक्तिफलार्थिभिः॥ महेशाराधनादन्य

न्नास्ति सर्वार्थदायकं॥ अतः सदासावधानं पूजनीयो महेश्वरः॥ पुरात्र नारदं वीक्ष्य हिमवान्मुनिपुं
गवं॥ आसनाद्यैः समभ्यर्च्य तं शिवं तमब्रवीत्॥ हिमवानुवाच। तत्वज्ञस्त्वं मुनिश्रेष्ठ शिवतत्वव
दस्तमे॥ शिवस्य किं परं रूपं यद्रूपध्यानमिष्टदं॥ किं च सर्वेषु लोकेषु संचार क्रियते त्वया॥ किं दृष्टं क्षे
त्रमुत्कृष्टं यतः श्रेष्ठं न किंचन॥ यत्र देवास्तु विष्टेपि न यास्यन्यत्र वास्ति कः॥ यतो विनिर्गतो मोहा
न्नारकेपि पतिष्यति॥ कश्यप०॥ इतितद्वचनं श्रुत्वा क्षणं ध्यात्वा महेश्वरं॥ प्रहृष्टवदनो भूत्वा ततो
वक्तुं समारभे॥ नारद०॥ हिमवन्पृष्टमिष्टं मे विद्धादिष्टमभीष्टदं॥ दृष्टं तदपि विष्टस्याप्यष्टमूर्तेर्वि
नोषतः॥ ॐकाररूपमद्वैतं शिवं ज्ञानात्मकं प्रभुं॥ मोक्षदं अक्षरमखिलं वेदवेदांगपारगाः॥ यत्प्र
सादसमो नास्ति प्रसादोन्यस्य वस्तुतः॥ स श्रोतव्य इति श्रुत्या कीर्त्यते भगवाञ्छिवः॥ यत्तत्वं नविदुर्दे
वा वदाश्च सशिवः परः॥ केनवा ज्ञायते सम्यग्वा ज्ञानसगोचरः। शिवेनानुगृहीता ये सच्चिदानंदमू
र्तिना॥ तैः शिवो ज्ञायते सम्यग्न्यैर्न ज्ञायते ध्रुवं॥ क्षेत्राणि च मया दृष्टान्यनेकानि सहस्रधा॥ का

शीक्षेत्रसमं क्षेत्रं न दृष्टं क्वापि सर्वथा॥ चतुर्दशानि भुवनान्येकस्मिन् दिवसे मया॥ दृश्यंते तेषु भुवनेषु
का काश्येव मुक्तिदा॥ काशीपरं तं क्षेत्रं क्षेत्राणामधिदैवतं॥ भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनं
तपोदानादिधर्माणामनंतानां परं तपः॥ यस्यामिमाहुः सा काशी काशते सर्वदा यतः॥ परात्परतरं यत्तु
तत्परात्परतरः शिवः॥ स एव काशी काशीनस्ततः किमधिकं वद॥ काशी स्मृतापि संसारमूलनिर्मूल
नक्षमा॥ सा साक्षात्सेविता शैवे मोक्षदेत्यत्र नाद्भुतं॥ हंत्यघं स्मृतिमात्रेण दृष्टा पुण्यं तनोति या॥
सा निर्वाणैकनिलया काशी विश्वेश्वरालया॥ यस्यां शिवो निर्गुणोपि श्रीमद्विश्वेश्वराभिधे॥ लिंगे
तिष्ठति सा काशी कलिकल्मषनाशिनी॥ चतुर्दशानि भुवनान्येकदा तुलितान्यपि॥ काशीकाष्ठांश
कोट्यंशतुल्यानि न रूते रूते॥ काऽनुवर्णयितुं शक्तः काशीं मुक्तिप्रदां शिवां॥ यतः काशीं वेदसंघैर
पि स्तोतुं न शक्यते॥ तिरश्चियंते ब्रह्माद्याः काश्यां कैर्मनुजैरपि॥ अतस्तां तादृशीं काशीं कोऽनुवर्ण
यितुं क्षमः॥ एवं ते ब्रह्मसदनाद्वैकुंठादपि वस्तुतः॥ महाप्रलयकालेपि न काशीवासिनां स्मृतिः

एकार्णवेपि संजाते त्रिशूलाग्रेण काशिकां॥ ऊर्ध्वं नयति विश्वेशः सा काशी क्वोपमीयते॥ तृणीकरो
ति देवेंद्रं काशीस्थः पुल्कसोप्यतः॥ काशीपुरीसमेवस्तु कुत्रकेनापलभ्यते॥ यस्यां भवानी सततं भव
भीमभयापहा॥ ददाति परमामृद्धिं सा काशी भुक्तिमुक्तिदा॥ यस्यां तनुव्यये जंतोर्मुक्तिः करतले स्थि
ता॥ सद्यो भवति शुद्धस्य सा काशी सेव्यते बुधैः॥ काशीनामप्रदानेन पितरः पूर्वमादरात्॥ नारद
स्त्वं नारदोसि त्युक्त्वा मुक्तास्ततः परं॥ किंवक्तव्यं मया तत्वं काश्याः सुरसमाश्रये॥ वेदैरपि न विज्ञा
तं तत्तत्वं वस्तुतो ध्रुवं॥ एतावदपि यत्काश्यास्तत्वं ज्ञातं मयाधुना॥ इदं शिवप्रसादस्य लेशेनेत्य
वगम्यतां॥ पुरा दृष्टानि सर्वाणि भुवनानि मयेच्छया॥ ततो गते ब्रह्मलोके तदा मामाह विश्वसृट्॥
ब्रह्मोवाच॥ कस्मिन्प्रदेशे किं दृष्टं कारयामपि विशेषतः॥ तदद्य स्वेति पृष्टोहं मा काशीध्यानपरोऽभवत
तदा काश्यं न देवानां वार्त्ता सर्वा मयोदिता॥ काशीवार्त्तां वदस्वेति पुनर्मामाह विश्वसृट्॥ काशी
न दृष्टेव किं कदाचिदपि वस्तुतः॥ तदाकर्ण्य ततः कथं श्रेयाय द्वार्त्तापघहारिणी॥ इति मद्वचनं श्रुत्वा वि

शि०स्य
१५३

केधिः स्तव्याब्रवीत्॥ त्वया काशी नावलोकि। तत्कृत्स्नमदृष्टमिमं॥ तदुक्तं वचनं श्रुत्वा दुःखितो हं त
मब्रुवं॥ काशीप्राप्तिकरं पुण्यं मह्यं ब्रूहीति सादरं॥ इति वद्वचनं श्रुत्वा काशीप्राप्तपुण्यवित्॥ मोम
हश्रुतिं तत्र शैवि श्वसद्भावयन शिवं॥ अस्लोवाच॥ काशीप्राप्तिर्महादेवप्रसादेन भविष्यति॥
महादेवप्रसादार्थं पूजयस्व महेश्वरं॥ पुण्येस्मिन्कार्त्तिके मासि सोमवारे शुभंकरं॥ उपोष्याभ्य
र्चय प्रीत्या निशि यामचतुष्टये॥ अस्य कार्त्तिकमासस्य चत्वारः सोमवासराः॥ पुण्येष्वेतेषु सर्वे
षु। निशि पूजय शंकरं॥ सोमस्योमासमेतस्य वासरः सोमवासरः॥ तस्मिन्निरूपर्चिते शंभौ
प्रसादेति महेश्वरः॥ अथैवत्याहिकेदारं तत्रोर्जमासि सादरं॥ पूजयित्वा महादेवं काशीप्राप्स्य श्रीः॥
सि सर्वथा॥ केदारान्यशिवस्थानेष्वर्चितो सित्वयाशिवः॥ केदारेस्मिन्पुण्यमासि पूजयस्व
सदाशिवं॥ बिल्वपल्लवधत्तूरद्रोणनीलोत्पलादिभिः॥ पूजयित्वा शिवं धूपैर्दीपाद्यैश्च प्रसाद १५३
य॥ मयोपेंद्रेण चंद्रेण तथेंद्रेण यमैरपि॥ विशेषेणार्चितः सांबः कार्त्तिके मासि सादरं॥ अं

वाप्युपोष्य विश्वेशः कार्त्तिके मासि भक्तितः॥ अर्चयिष्यति हेरंब स्कंदाद्याश्चार्चयंति ते॥ ऊर्जे शुक्लच
तुर्दश्यां काश्यां विश्वेश्वरं प्रभुं॥ समर्चयितुमिंद्राद्यैर्गम्यते स्माभिरादरात्॥ त्वयापि तद्दिने काशीं
संप्राप्या पुण्ययोगतः॥ अतस्तदर्थं शीघ्रेण प्रसन्नं कुरु शंकरं॥ इत्येतद्वचनं श्रुत्वा ते नत्वाह
मिहागतः॥ अत्रोर्जमासि गौरीशः पूजितश्च मया तदा॥ ततः शिवप्रसादेन काशी पापप्रणो
दिनी॥ भुक्तिमुक्तिप्रदा पुण्या मया प्राप्ता शिवात्मिका॥ ततो विश्वेश्वरो दृष्टः संसारभयनाश
कः॥ पूजितश्च मया भक्त्या विश्वेशो भक्तवत्सलः॥ ५००॥ बहुकालं स्थितं काश्यां ततो त्र तु
कदाचन॥ समागतं तथान्यत्र कदाचिद्गम्यते मया॥ कश्यप उ०॥ इति तद्वचनं श्रुत्वा हिमवान्हृ
ष्टमानसः॥ तं प्रीणयित्वा संप्राप काशीं विश्वेश्वरालयं॥ पुरा शातवनो नैव चकारोग्रं तपो मुने
शैवदीक्षापरो नित्यं मोक्षार्थी विगतस्पृहः॥ प्रादुर्भूतो महादेवः प्रीतस्तत्तपसा मुने॥ एतस्माद्
वविमलाच्छिवलिंगाच्छिवप्रियात्॥ प्रादुर्भूतं महादेवं दृष्ट्वा सांबं शातवनः॥ संपूज्य परया भ

त्यानुस्याव मुनिसत्तम॥ भ्रातर्वेन०॥ श्रीमन्महेशाविर्भवेवृषभध्वजायध्वस्तौघकायमकर
ध्वजनाशकाय॥ दंभापहायगरुडध्वजपूजिताय भालेक्षणाय भगवन्सततं नमस्ते॥ पाशाप
हायपशुपाशविमोचकाय पंचाननायपरमाद्भुतविभ्रमाय॥ पारायपालितसुरासुरमानवाय
भालेक्षणायभगवन्सततं नमस्ते॥ मायापहायमकरंदसखकराय मानप्रदायमधुराय महेश्वराय॥
मानपतिगायमदमोहविवर्जितायभालेक्षणाय सततं भगवन्नमस्ते॥ मुक्तिप्रदाय मुनिमानस
मंदिरायमुक्ताकलापकलितामलकंधराय॥ मुग्धाननायमुदितायमुकुंदहाय भालेक्षणाय०॥
सर्वोत्तमायसकलाय समाश्रयाय सर्गस्थितिप्रलयकारणकारणाय॥ सत्यप्रियायसरसाय
सुमंगलायभालेक्ष०॥ भद्रायभव्यविभवायभवौषधायभस्मप्रभासमभिभावितभूषणा
य॥ भर्गायभानुशशिवह्निगणप्रभायभालेक्ष०॥ भव्यायभव्यभगनेत्रविदारकायभाग्यास्प
दायभवतापविनाशकाय॥ भक्ताभिवांछितविचित्रफलप्रदायभालेक्ष०॥ भोगीन्द्रभोगमणि

राजितकंधराय भोगस्फुरन्मकरतोज्वलकुंडलाय॥ भोगानुयोगनिगलन्मुकुटप्रभायभाले
क्ष०॥ भूताधिपायभुजगामलकंकणाय भूतिप्रधानपदेभुवनोद्भवकारणाय॥ भूभूधरप्रभृति
भूतगणोदरायभाले०॥ दिव्यायदिव्यचरिताय दिगंबराय दिव्यांबराय दितिजानलशामकाय॥
दीनार्तिहाय दिननाथनिषेविताय भालेक्ष०॥ सोमाय सोमरुचिरंजितशेखराय सोमाग्निभा
नुविततविमललोचनाय॥ सोपेंद्रचंद्रविधिवंदितपादुकाय भाले०॥ कालांतकाय कमनीयज
टाधराय कालाय कालविजयाय कलाधराय॥ कल्याणदाय कनकाचलकार्मुकाय भाले०॥
पुण्यायपुण्यहृदयायपुरातनायपूतायपूतजनसंचितसत्क्रियाय॥ पुण्यप्रियायपुरकानन
पावकाय भाले०॥ विश्वाधिकाय विधिविष्णुविदारकाय वित्ताधिपाय विबुधायुधसर्जकाय॥
विस्तारदायविजयायविशोधकाय भाले०॥ नित्याय नित्यविविधामितविग्रहाय नीतिप्रदायनि
यतायनिवृत्तिदाय॥ नीहारशैलनिलयायनियामकाय भाले०॥ निर्धर्मकायनिगमागमनिश्चिताय

शि॰स्य निर्णीतस्तुतिवचायनिगमयाय॥ निर्धूतपातकहितायनिरंजनाय भालेक्ष०॥ मृत्युंजयायमृति
१५५ कालविवर्जितायमृद्भमरत्नरजताकरवृद्धिदाय॥ मल्लिंगपूजकमनोरथपूरकाय भाले०॥ गानप्रिय
यगीतिरत्नविशारदाय गाथामयायगजकृत्तिधरच्छदाय॥ गम्यागमायगमनादिविवर्जिताय भाले
क्ष०॥ दांतायदाननिपुणायदयामयाय दारिद्र्यदुःखदुरिताद्रिदवानलाय॥ दानायदायरहिताय
दि दमप्रभाय भाले०॥ यज्ञाययज्ञपुरुषाययज्ञमयाययज्ञ[illegible]फलदाययतिप्रियाय॥ यज्ञप्रिय
यजनादिरताश्रियाय भाले०॥ श्रीविष्णुनेत्रकमलार्चितपादुकाय श्रीसेविताद्रितनयातनुसंयु
ताय॥ श्रीपद्मजासननवच्छदपूजिताय भालेक्षणाय भगवन्सततं नमस्ते॥ ॥कश्यप०॥ इतिस्तुत्वाम
हादेवंप्रणम्यसशांतचेनः॥ भयोरुद्रेणतुष्टावसूक्तैरन्यैश्चवशीभवेः॥ ततःशिवप्रसादेनजीवन्मुक्तःज्ञा श्री॥
तचेतनः॥ पुनःकर्तुंसमारेभेतपोघोरतरंमुने॥ एतादृशोस्तपस्तप्त मत्रानेकैर्मुनीश्वरैः॥ मुक्तिश्चब १५५
हुभिःप्राप्ताशंकरानुग्रहान्मुने॥ यावंतोनिवसंत्यत्र सततंशिवपूजकाः॥ तावंतोमुक्तिमिच्छंति

शिवव्रतपरायणाः॥ शिवव्रतपराधन्याः शिवक्षेत्रनिवासिनः॥ मुक्त्यर्थिनस्तदन्यत्तु नतेषामभिलाषि
तं॥ पुरोंकारंमूर्तिमंतंशिवध्यानपरायणं॥ ब्रह्मविष्ण्वादयोदेवा दृष्ट्वाऽऽचुर्मुमुक्षवः॥ देवाऊचुः॥ त्वमों
कारोस्यतस्तत्वंत्वयैवज्ञाप्यतेततः॥ किंध्येयंसततंमुक्त्यैतद्विचार्यवदस्वनः॥ ॐकारउवाच॥ मोक्षार्थं
शिवएवैकोध्येयःसर्वैरहर्निशं॥ सर्वमन्यत्परित्यज्य सादरंभक्तिपूर्वकं॥ यःपिताभवतांदेवाः सए
वशिवउच्यते॥ सएवपार्वतीनाथः सएवसुरसत्तमः॥ सएवश्रीमहादेवः सएववृषभध्वजः॥ सए
वसर्वदेवेशः सएवपरमेश्वरः॥ सएवचंद्रनयनः सएवार्कविलोचनः॥ सएववह्निनयनः सएवत्रिपुरां
तकः॥ सएववेदजनकः सएवांधकसूदनः॥ सएवविष्णुसंहर्ता सएवमदनांतकः॥ सएवब्रह्मसं
हर्ता सएवेंद्रविनाशकः॥ सएवयमसंहर्ता सएवाखिलशासकः॥ एतादृशंशिवंमत्वा सच्चिदानंद
लक्षणं॥ पूजयध्वंप्रयत्नेन मुक्त्यर्थंसर्वसाधनैः॥ शिवार्चनंशिवध्यानंशिवनामानुकीर्तनं॥ शिव
क्षेत्रनिवासश्चमुक्तिसाधनमुच्यते॥ शिवार्चनेचविविधंनानावेदांतसंश्रुतं॥ तन्मोक्षदमितिप्रो

शि॰स्य
१५६

क्तं महेशेनापितत्वतः॥ पुरा पृष्टो महादेवः शिवया ज्ञानरूपया॥ किं मोक्षदमिति प्रीत्या तदाह भगवान्
शिवः॥ सदाशिव०॥ शिवे मदर्चनं ध्यानं मन्नाम्ना मनुकीर्त्तनं॥ मद्दिष्टक्षेत्रवासश्च मुक्तिसाधनम
सतं॥ मदर्चनं च विविधं सद्यः सर्वाघनाशकं॥ मदर्चनाधिकारोपि मद्भक्तस्यैव वस्तुतः॥ मद्भक्ताश्च त
एवेति विद्रूप्यः सततं बुधैः॥ ये वेदमार्गनिरताः स्वप्रम्पन्यपराङ्मुखाः॥ वेदैः सर्वैरहं वेद्यो वेदांतेष्वपि शैल
जे॥ मदन्यो वेदवक्ता न वेद्यो नास्ति वस्तुवै था॥ मम तत्त्वमविज्ञाय वेदबाह्या भवंत्यतः॥ भजंति वेदबाह्यास्त
मदन्यममरं भ्रमात्॥ मदन्यपूजासंसक्ता लब्ध्वा जन्मानि कोटिशः॥ प्राप्नुवंत्यतिघोराणि नरकाणि
पुनः पुनः॥ वैदिकास्तु सदाचारा वेदोक्ताचारतत्पराः॥ भजंति मां प्रयत्नेन वेदान् विश्वस्य संततं॥ यो मां
विश्वाधिकं रुद्रं भजंत्यनन्यपराङ्मुखाः॥ ते वैदिका इति प्रोक्ता मद्भक्ताश्च तत्त्वहि॥ ये भस्मोद्धूलितांगा
स्त्रिपुंड्रांकितमस्तकाः॥ ते वैदिका इति प्रोक्ता मद्भक्ताश्च तत्त्वहि॥ ये रुद्राक्षलसत्कंठा रुद्राक्षकर्णक
र्णाः॥ ये मल्लिंगार्चनासक्ता बिल्वपत्रादिभिः सदा॥ ते वैदिका०॥ ये मच्छ्यानरता नित्यमन्यध्यानविव
ते वैदिका०॥

श्रीः॥
१५६

र्जिताः॥ ते वैदिका०॥ ये मन्नामरता नित्यमन्यनामपराङ्मुखाः॥ ते०॥ ये मत्कथासु संसक्ताः संत्यक्ता
न्यकथाः सदा॥ ते वै०॥ ये मन्निरीक्षणासक्ताः संत्यक्तान्यनिरीक्षणाः॥ ते वै०॥ ये मत्तीर्थोदपा नित्यम
न्यतीर्थपराङ्मुखाः॥ ते०॥ ये मन्नैवेद्यपुष्पांगा मद्दाताघ्राणनप्रियाः॥ ते०॥ ये मद्भक्तार्चनासक्ता म
द्भक्तान्यपराङ्मुखाः॥ ते वै०॥ ये मत्क्षेत्रकृतावासास्त्यक्तान्यक्षेत्रसंश्रयाः॥ ते०॥ ये मत्कृते जिनोनि
त्यं सर्वदा सोमवासरा॥ ते०॥ ये नित्यं कृत्सभूतायामुपोषणरताः सदा॥ ते०॥ ये महेशमहादेवनी
लकंठेति वादिनः॥ ते वै०॥ ये शिवेशान सर्वेश विश्वनाथेति वादिनः॥ ते०॥ ये चंद्रचूडगौरीश
विरूपाक्षेति वादिनः॥ ते०॥ ये कृतांतांतकामेश गर्भेश्वमेति वादिनः॥ ते वै०॥ ये देवात्तमदेवेशादेव
वंद्येति वादिनः॥ ते०॥ ये शूलपाणे खट्वांगिन्कृत्तिवासेति वादिनः॥ ते०॥ ये विष्णुपूज्य विश्वात्मन्
विधिपूज्येति वादिनः॥ ते०॥ ये मृत्युंजय कामारे त्रिपुरघ्नेति वादिनः॥ ते०॥ ये विष्णुविधि वंद्यद्वि
घातेति वादिनः॥ ते०॥ ये सर्वज्ञाखिलाधार हरधीरेति वादिनः॥ ते वैदिका इति प्रोक्ता मद्भक्ता

शि०स्प श्चतएवहि॥ एतादृशामहाशैवा मदेकपरदेवताः॥ मद्भक्ताइतिविज्ञेयावेदमार्गरताःसदा॥ शिवेसुरा
१५७ णांमर्त्यानांमद्भक्तिर्मदनुग्रहात॥ भवत्यतस्तथाभक्तामय्येवप्रविशंतिते॥ योमांजानातितत्वेनज्ञा
त्वामामर्चयिष्यति॥ तमहंसर्वदुःखेभ्योमोचयामिशिवेध्रुवं॥ मद्भक्तिंतनिनैवेका संसारार्णवतारिणी
नास्तिमद्भक्तिसदृशी संसारार्णवतारका॥ मद्भक्तियुक्तोमामीशंसर्वदेवगणाधिपं॥ यःपूजयतिय
त्नेनसमोक्षमधिगच्छति॥ तिष्ठन्गच्छन्वदन्भुंजन्यःसदामांस्मरिष्यति॥ सनिर्दग्धमहापापोमा
मुपैष्यत्यसंशयं॥ पुण्यकालेषुसर्वेषुपुण्यक्षेत्रेष्वपिसादरं॥ क्षीराद्यैःस्नपयेद्योमांसमोक्षमधिगच्छ
ति॥ भस्मनास्नपयेद्योमांशोधितेनसितेनवा॥ समांप्रविश्यसुभगेमत्स्वरूपोभविष्यति॥ स्वार्जि
तैर्बिल्वपत्रैर्मांयःपूजयतियत्नतः॥ समां०॥ रुद्रावासरतोभूत्वा योमामन्नैःप्रतर्पयेत॥ समांप्र०॥ श्रीः॥
योमांगोघृतसंयुक्तैर्धूपैःसंधूपयेन्मुदा॥ समां०॥ योमांगोघृतसंयुक्तैर्दीपैःसंदीपयेन्मुदा॥ समां १५७
योमांप्रदक्षिणैर्नित्यंप्रणामैश्चानुमोदयेत॥ समां०॥ योभस्मोद्धूलितोनित्यंरुद्राध्यायीजपेन्मु

दा॥ समां०॥ योभस्मोद्धूलितोनित्यंशैवंपंचाक्षरंजपेत॥ समां०॥ यःप्रीणयेत्तत्ताद्रूपाठेर्नृत्यैश्चकरताड
नैः॥ समां०॥ योवर्ण्येन्मत्प्रशंसांसानुमोदमदालये॥ समां०॥ योमद्भक्तानतिप्रीत्याभोजयेत्साय
सादिभिः॥ समां०॥ योमद्भक्तायवस्त्राणि दत्वासंप्रीणयेन्मुदा॥ समां०॥ एवं योमद्भक्तायरत्नानिद
द्यात्स्वर्णंवसादरं॥ समां०॥ योमद्भक्तायरुद्राक्षान्दद्यात्प्रीतिपुरःसरं॥ समां०॥ योदद्याद्रत्नलिंगानि
मद्भक्तायविधानतः॥ समां०॥ एवंमत्कर्मनिरतामम वानुग्रहाच्छिवे॥ मांप्राप्नुवंतिज्वलनेहवींषीवन
संशयः॥ यस्याग्रेनभविष्यंतिदुःखानिविविधान्यपि॥ समद्भक्तिंपरांप्राप्यततःप्राप्नोतिमांशिवे
मयियस्यसमुद्भूताभक्तिरव्यभिचारिणी॥ सदुःखसागरंतीर्त्वामयिसंविशतिप्रिये॥ ६००॥ य
स्यभक्तिरविच्छिन्नामय्यपिजातानपायिनी॥ तस्याहंसुलभोदेवि दुर्लभोपिनसंशयः॥ येमांय
त्नैर्महादेवंभजंतिश्रद्धयान्विताः॥ भावयंतानहंदेवि हृदयमणिवत्सदा॥ स्वंतत्रापिमहादेवःसो
हंभक्तैर्वशीकृतः॥ अवद्यापिअहमीशानोमद्भक्तवशतांगतः॥ मांनजानंतिसहसाशैवमार्गव

शि॰रह
१५८

हिस्कृताः॥ शैवमार्गरता एव ज्ञानेति भुवि मां शिवे॥ वेदैरपि न विज्ञातं यत्तत्त्वं मम शाश्वतं॥ तद्विज्ञात
मुमे शैवैर्मदनुग्रहभाजनैः॥ मामनन्यसमं नित्यं देवदेवं पिनाकिनं॥ विज्ञाय शैवाः सततं पूजयंति
मुमुक्षवः॥ त्यक्ताहाराः पूजयंति केचिच्छैवाः सदापि मां॥ केचिन्नक्ताशिनः शैवाः पूजयंत्यनिशं च मां
उपोष्यान्ये यमासाद्य ततः संपूज्य मां प्रभुं॥ भोजयित्वा च मद्भक्तान्योश्नाति स मम प्रियः॥ नित्यनक्त
व्रतं देवि यः करिष्यति यत्नतः॥ स भूयो भर्गदुःखानि न प्राप्नोत्येव सर्वथा॥ नित्यनक्तव्रतं देवि सुल
भं भुक्तिमुक्तिदं॥ तद्विधानं च वक्ष्यामि शृणु यत्नपुरःसरं॥ प्रातरादिषु कालेषु स्नानं कुर्यात्तथा वि
धि॥ त्रिपुंड्रधारणं कार्यं तथा रुद्राक्षधारणं॥ ततो मृन्मयलिंगानामष्टोत्तरशतं क्रमात्॥ प्रातरादि श्रीः॥
षु कालेषु पूजनीयं प्रयत्नतः॥ पूजा तिलाक्षतैः कार्या बिल्वपत्रैश्च कोमलैः॥ करवीरादिपुष्पैश्च तत्त १५८
त्कालसमुद्भवैः॥ दीपमाला च कल्पनीया कृष्णगोघृतनिर्मिता॥ प्रतिकालेपि सा माला शतदीपसम
न्विता॥ प्रतिकाले पलनूतं कृष्णगोघृतसंयुतः॥ धूपश्चागरुसारेण कल्पनीयो विशेषतः॥ गोक्षीर

पाचिते रन्नैरपूपैर्लड्डुकैरपि॥ मधुक्षीराज्यसंयुक्तै नैवेद्यमपि कल्पयेत्॥ तांबूलं कल्पयित्वाथ पुनर्धूपं प्र
कल्पयेत्॥ ततो नीराजनं देयं शतदीपविराजितं॥ षट्सहस्रं प्रजप्तव्यः शैवैः पंचाक्षरस्ततः॥ रुद्राध्याय
जपः कार्यो मौनेन विधिपूर्वकं॥ ततः प्रदक्षिणाः कार्या यत्नादष्टोत्तरं शतं॥ ततः प्रणामाः कर्त्तव्या
यत्नादष्टोत्तरं शतं॥ आसायमेकं संपूज्य मामनाद्यंतमव्ययं॥ सायंकाले ततः कार्यं तथैव मम पूजनं
ततः परं प्रयत्नेन तिलैर्गोघृतसंयुतैः॥ होमः कार्यो बिल्वयुक्तैः सहस्रत्रयमादरात्॥ भोजनीया
स्ततो यत्नान्मद्भक्ताः पायसादिभिः॥ सुवर्णं दक्षिणा देया मद्भक्तेभ्यस्ततः परं॥ एवं कृत्वा विधानेन स्व
कृतं कर्म सपदं॥ निवेदनीयं यत्नेन मह्यं पूजापुरःसरं॥ पीत्वामृतं तीर्थं मम च मन्नैवेद्यं ततः परं॥ भोक्त
व्यं मौनमासाद्य मन्नाम स्मृतिपूर्वकं॥ एवं नक्तव्रतं कृत्वा यस्तिष्ठति सदाशिवे॥ स महापापराशिभ्यो
मुक्तो भवति सर्वथा॥ एवं नक्तव्रतं देवि यः करिष्यति यत्नतः॥ सर्वशः कोटिसंयुक्तो मत्स्वरूपतया
प्स्यति॥ नक्तव्रतं प्रयत्नेन क्रियते येन सर्वदा॥ तेन व्रतानि सर्वाणि चीर्णान्येव वरानने॥ स निराशी

शि॰रह्य
१५९

ति विज्ञेयो यो न नक्ताशी सदा भवेत्॥ सर्वेषां तपसां श्रेष्ठं यतो नक्ताशनं शिवे॥ नक्ताशनव्रताधीरा भस्म
निष्ठा जितेंद्रियः॥ गर्भवासादिदुःखेभ्यो निवर्तंते न संशयः॥ गर्भवासादि दुर्लंघ्य महानरकभीरवः॥
कुर्वंति सावधानेन नक्तव्रतमिदं शिवे॥ पूजामममपि यतरा नक्तव्रतरतैः कृता॥ नक्तव्रतरता यस्मान्म
मप्रियतमाः प्रिये॥ यस्य नक्तव्रते श्रद्धा तथा भस्मानुलेपने॥ तथा लिंगार्चने श्रद्धा सजीवन्मुक्त उच्यते
यस्य प्रीतिर्मयी श्रद्धा विश्वासोपि मदर्चने॥ सममातिप्रियतमो ममात्मा सुवरानने॥ मयि प्रीतिर्नेस
हसा जायते वस्तुतो नृणां॥ यदि प्रीतिर्मयि भवेत्तदा मुक्तिरदूरतः॥ मुक्तिदोहं महादेवो न मत्तोन्योस्ति
मुक्तिदः॥ यतोहं सर्वदेवानामधिपो मुक्तिनायकः॥ मद्भक्ता एव मुच्यंते घोरसंसारसागरात्॥ नान्यभक्ता श्री:॥
विमुच्यंते संसारात्तस्य मुच्यते॥ शिवमद्भक्तभक्तानां यो भक्तः सोपि मुच्यते॥ तथा वसति मद्भक्तो मुच्य १५९
ते त्यत्र नाद्भुतं॥ इत्युक्तं श्रीमहेशेन गौरी प्रति सुरास्ततः॥ भजध्वं पार्वतीनाथं मनोवाक्कायकर्मभिः॥
मनसा कर्मणा वाचा शिवं यो भजते सदा॥ तं तारयति गौरीशो घोरसंसारसागरात्॥ महेशार्चन

मेवैकं लोके सारतरं सुराः॥ तदेवा घोरसंसारमहासागरतारकं॥ श्रीमहेश महेशेति महेशेति त्रि
रुच्चरन्॥ सद्यो महाघसंघाद्यो मुच्यते नात्र संशयः॥ महेशेति परं नाम भुक्ति मुक्तिप्रदं स्मृतं॥ त
तस्तदेव सततं स्मर्तव्यं मुक्तिकांक्षिभिः॥ मुक्तिकांता कर्षकार्यं शिवमंत्र श्रुतिश्रुतः॥ गोपनीयोपि मो
क्षार्थं वेदांतैः प्रकटैः कृतः॥ अतो महेश्वरं सांबं सावधानेन संततं॥ भजध्वं भवसंताप विच्छित्यर्थं
मुदा सुराः॥ शिवान्यो न गतिर्यस्माद्भवतां मुक्तिकांक्षिणां॥ ततो भजध्वं मुक्त्यर्थं शिवमेव सदा
मुदा॥ मोक्षार्थी स शिवादन्यं यः पूजयितुमिच्छति॥ स उन्मत्त इति ज्ञेयो वेदमार्गबहिष्कृतः॥ तृष्य
थी कंटकग्रासी यत्तृप्तिं न विंदति॥ शिवेतरस्तद्वन्न मुक्तिमभिविंदति॥ शिवेतरार्चने श्रद्धा यस्य
संजायते भ्रमात्॥ तज्जन्मगतमेवाशु वृथा कंटकजन्मवत्॥ ४८॥ नवरं तादृशं जन्म यादृशं प्राप्य
मानवः॥ शिवेतरार्चने श्रद्धां कुरुते मोह संयुतः॥ जन्मता दृग्वरं देवा यादृशं प्राप्य मानवः॥ मह
शाराधने श्रद्धां कुरुते भुक्ति मुक्तिदां॥ गर्भधारणजः क्लेशस्तन्मातुः सफलः स्मृतः॥ यद्गर्भान्निर्ग

तः पुत्रः शिवभक्तिरतोभवत्॥ तदेवकुलमुत्कृष्टं धन्यमित्यपि मन्महे॥ यस्मिन्कुले समुत्पन्नः शिवपूजाप
रोभवेत्॥ किमत्र बहुनोक्तेन शिवभक्तिर्मुमुक्षुभिः॥ नियमव्यभिचारेण कर्तव्या सत्यमुच्यते॥ कश्यप॰
इत्येवं सर्ववचः श्रुत्वा विष्णुब्रह्मादयः सुराः॥ शिवार्चनरताः संतस्तपस्तपुंड्रासदं॥ पश्यैतान् त्वं क
रान धर्मान् महेशाराधनोत्सुकान्॥ एतेषां कदाचिदन्यः पूज्यो नास्त्येव सर्वथा॥ शिवान्यं नार्चयंत्येते स्व
प्नेपि शिवतत्पराः॥ न नमंति विमोहेनाप्यशिवं शंसितव्रताः॥ नमंति चंद्रशेखरं त्रिशूलांकं महेश्वरं॥ बिल्व
पत्रादिभिः सम्यक् पूजयंति स्तुवंति च॥ ~~पश्यंति स्वप्यले~~ न शिवलिंगं पूजयंति प्रणमंति स्तुवंति च॥ पश्यं
ति च प्रयत्नेन शिवलिंगं समर्चितं॥ अतः सर्वेप्यनेनैव जन्मना शिवपूजकाः॥ शीघ्रमुक्ता भविष्यंति
महेशानुग्रहान्मुने॥ पूजयस्व महादेवं भवानप्यत्र यत्नतः॥ महादेवप्रसादेन शीघ्रं मुक्तो भविष्यति
शिव॰॥ इति तद्वचनं श्रुत्वा तपस्तेपे ततो मुनिः॥ अन्यैश्च ऋषिभिः साकं बहुभिर्मुक्तिकांक्षिभिः॥
त्यक्त्वान्यपूजां मदनुग्रहेण मामेव ये संततमर्चयंति॥ तेभ्यः शिवे भाषितमर्थमीशो दास्याम्य

हं भक्तजनाभिसेव्यः॥६२॥ ॥ ॥ इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे त्रयोदशोध्या
यः॥ १३॥ ॥ ॥ ॥० शिव उवाच॥ पुरा नैमिषमाश्रित्य शौनकाद्या मुनीश्वराः॥ प्रणम्य सूतं पप्रच्छु
र्मोक्षसाधनमुत्तमं॥ भगवन् शंकरे तत्वज्ञ शिवपूजापरायण॥ कथं संसारदावाग्नितापशांतिर्भविष्यति
असारतरसंसारे रतिवृद्धिः प्रजायते॥ संसारोसारबुद्धिश्च जायते कर्मबंधनात्॥ असारबुद्धिः संसारे क
थं भवति सर्वदा॥ तत्र ज्ञानस्य किं हेतुः किं वा तत्वं वदस्व नः॥ सूत उवाच॥ पुरा श्रीशैलशिखरे स्कंदयोग
रतं शिवः॥ त्रिलोक्याप्याहितं तत्ते शास्त्रा वेत्याह नंदिनं॥ शिवाज्ञां शिरसा धृत्वा नंदिकेशो गच्छति हृष्टधीः
कैलासाच्चलितः काशीमध्ये मार्गं ददर्श सः॥ दृष्ट्वा काशीं नंदिकेशो महेशप्रियमुत्तमं॥ अवाप परमा
नंदं कृतार्थोस्मीति सत्तमाः॥ प्रविश्य काशीं नंदीशः शिवगंगाजलेमले॥ स्नात्वा श्रीशं पूजयित्वा
मणिकर्णीं ययौ ततः॥ मणिकर्ण्यां ततः स्नात्वा कृतोद्धूलनमादरात्॥ भाति त्रिपुंड्रं रुद्राक्षान् धृत्वा
स्मृत्वा महेश्वरं॥ प्रहृष्टवदनो भूत्वा स्वं कृतार्थममन्यत॥ प्राप्ता काशीपुण्यपुंजान्महेशानुकंपयेति सन्

शि०स्य १६१

मणिकर्णीजलेस्थित्वा त्रिः पीत्वा तज्जलं मुदा॥ धिङ्कृतामृतमेतद्धि जलमित्यप्यमन्यत॥ मणिकर्णी
समं तीर्थं पापशोकविनाशकं॥ चतुर्दशेषु भुवनेष्वपि नास्तीति मन्यत॥ हेमकुंभेन संगृह्य मणिक
र्णीजलं मुदा॥ श्रीमद्विश्वेश्वरं द्रष्टुं नंदिकेशो ययौ ततः॥ ज्ञानवाप्यां ततः स्नात्वा कृत्वा चोद्धूलना
दिकं॥ ज्ञानेशादीन्विलोक्याथ प्रविश्य मुक्तिमंडपं॥ ततो विश्वेश्वरं दृष्ट्वा परमानंदसंयुतः॥ श्रीम
द्विश्वेश्वरं लिंगं ज्योतिरूपम संस्पृशत्॥ दुग्धाद्यैरभिषिच्यादावभिषिच्य जलैस्ततः पूजयामास
रत्नाद्यैर्बिल्वपत्रादिभिस्तथा॥ नैवेद्यधूपदीपादिन्समर्प्य तदनंतरं॥ कृत्वा प्रदक्षिणादींश्च जपं च
षडक्षरं॥ कृत्वा ततो विलोक्याथ दृष्ट्वा विश्वेश्वरं पुनः॥ संपूज्य नत्वा स्तुत्वा च हृष्टचित्तो बभूव सः॥
ततो महेश्वरस्याज्ञां संस्मार नंदिकेश्वरः॥ यत्र श्रीनीलशिखरं यत्र तिष्ठति षण्मुखः॥ तत्र स्कंदं
समालोक्य नत्वा नंदी तु तस्थिवान्॥ पूजयामास बिल्वाद्यैः शिवबुध्या शिवात्मजं॥ भक्तिभारसमा
क्रांतः स्कंदं नत्वाभिपुश्चनेतः॥ नंदिकेशोमुद्रुः सम्यक्पूजयामास सादरं॥ नंदिकेशं षण्मुखोपि

श्रीः॥ १६१

स्वागतं पर्यपृच्छत॥ कुतः समागतं नंदिन्कुशलं खलु सर्वतः॥ शिवैकशरणस्याद्य तवाभूद्दर्शनं मम॥
शिवभक्तिस्वरूपेण शिवः स्वं चातिस्वयं॥ शिवस्यादर्शनं साक्षान्मंगलावहमुत्तमं॥ सर्वसंपत्करं यस्मा
द्भुक्तिमुक्तिफलस्य फलप्रदं॥ भूयसा तपसा नंदिन्संतुष्टः पार्वतीपतिः॥ प्रयच्छति दृढां भक्तिं स्वस्मिंश्च
भोपरावरः॥ शरीरस्य चरमे यस्यागानंतरं शिवः॥ मोक्षं ददाति तस्यैव शिवे भक्तिः प्रजायते॥ दुर्लभा
दुर्लभा नंदिन शिवभक्तिर्न संशयः॥ सा मुक्तिदायिनी भक्तिः शैवी यानन्यसंश्रया॥ श्रद्धयानन्यगामि
न्या मुक्तिर्भवति सर्वथा॥ श्रद्धा शिवेहि कर्तव्या सैव भक्तिः प्रदायिनी॥ शैवी श्रद्धा कल्पवृक्षः श्रद्धा सा
कामधुग्ध्रुवं॥ सा मोक्षफलदा तस्मात्शैवी श्रद्धाति दुर्लभा॥ महेश्वरा श्रद्धयैव मुक्तिः प्राप्या जनैर्यतः॥
तस्मान्महेश्वरे चैव श्रद्धा कार्या प्रयत्नतः॥ महादानानि यज्ञाश्च ये च सर्वे सदक्षिणाः॥ तपांसि यानि
घोराणि तेषां तु फलदः शिवः॥ येनानंताः कृताः सम्यगश्वमेधाः शिवप्रिये॥ तेनैव शैवी संप्राप्या
श्रद्धा नान्येन सर्वथा॥ तपांसि येन चोग्राणि कृतानि बहुधा मुदा॥ तेनैव०॥ गोकोट्यो येन दत्ताः शैवे

शि०स्य
१६२

स्य: सर्वभूषिता:॥ तेनैव०॥ सप्तसुवर्णा येन दत्ता मत्तमातंगकोटय:॥ तेनैव०॥ सप्तसुवर्णा येन दत्तास्तुरंगोत्त
म कोटय:॥ तेनैव०॥ सप्तस्या पृथिवी दत्ता बहूये न द्विजोत्तमे॥ तेनैव०॥ येन दत्ता निबद्धा शिवलिं
गानि सादरा॥ तेनैव०॥ कन्यादानानि बहुधा येन सम्यक्कृतानि हि॥ तेनैव०॥ मुक्तातुला: कृता येन ब
हुधा सांगदक्षिणा:॥ तेनैव०॥ पुष्परागादिरत्नानां तुला येन कृता मुहु:॥ ते०॥ शैवक्षेत्रेषु धर्मेण
येन वास: कृतो मुहु:॥ तेनैव०॥ किमुक्तेनात्र बहुना महद्भाग्येन तां भवी॥ भक्तिर्भवति नाल्पेन
भाग्येनैव ध्रुवं ध्रुवं॥ नंदिकेश्वर उवाच॥ स्कंद सत्यं सत्यमेतत् सत्यं सत्यं न संशय:॥ यत्त्वयोक्तं वेद तत्त्वं
नंदि त्येवमतिर्मम॥ शिवतत्वं शिवो वेद ज्ञातं तत्वं त्वयापि तत्॥ न शिवान्यस्त्वदन्यो वा वेद तत्वं शिवस्य हि॥
त्वत्कृपामयि संजाता धन्योस्म्यहमत: परं॥ कृपेयं तव कल्याणी शंकरस्य कृपा ध्रुवं॥ यथा गणेश्वर प्रीति
र्भक्तिविष्ण्वादि वंदिते॥ तथा प्रीतिर्मयि श्रीमत्क्रियते षण्मुख त्वया॥ सर्वज्ञस्त्वं सर्वगश्च षण्मुख त्वं न सं
शय:॥ वद क्षेत्रस्य माहात्म्यं शैवस्यास्याखिलस्य च॥ शिवक्षेत्राणि यान्यन्यान्यपि तेषां च षण्मु

ख। माहात्म्यं वद सर्वं त्वं पृच्छतो मम सादरं। स्कंद उवाच॥ नंदिकेश्वर त्वया पृष्टं तोषो जातस्तदेव नान्मम॥ श्रीशै
लस्यास्य माहात्म्यं वक्ष्ये मोक्षप्रदं शृणु॥ अशीतियोजनायाम: पर्वतोयं शिवात्मक:॥ प्रभावोस्य मया व
क्तुं शक्यो नैव न सर्वथा॥ यावंत: संति पाषाणा: शैलस्मिन् नंदिकेश्वर॥ तावंत: शिवलिंगानि पाषाणात्र सं
शय:॥ तृणानि वृक्षा गुल्माश्च लता: पर्णानि जंतव:॥ यावंत: संति तावंतो लिंगान्येव न संशय:॥ अ
मितान्यत्र तीर्थानि सर्वतीर्थोत्तमानि हि॥ सर्वार्थदानि सर्वेषां स्मरणादपि सर्वदा॥ पदे पदे त्र तीर्था
नि लिंगान्यत्र पदे पदे॥ पदे पदे तप: सिद्धिस्तपतामत्र जायते॥ सर्वसिद्धिकरं तीर्थमीदृशं नैव
दृश्यते॥ परं पक्षेत्राणि तीर्थानि मुक्तिदान्यत्र पर्वते॥ अत्र पर्वत पश्चत काशी प्राप्त्यर्थमास्तिकै:॥
काशी प्राप्तावत: शुद्धा शुद्धै: सिद्धतपोधनै:॥ काशीं प्राप्य तत: सिद्धैरवि मुक्ते मुनीश्वरै:॥ मुक्तीश्वरप्र
सादेन मुक्तिर्लब्धा च तैस्तदा॥ इदानीमपि कुर्वंति काशीप्राप्त्यर्थमास्तिका:॥ तपो यापि करिष्यंति
सिद्धिक्षेत्रमिदं यत:॥ पंचाग्निमध्यगो चैव कपिल: सिद्धसत्तम:॥ अनिव्रतस्तपो नित्यं करो

श्री:॥
१६२

Dr BHAU DAJI MEMORIAL

तिप्रीतमानसः॥ तपः पूर्वमनेनैव युगानामयुतं कृतं॥ प्रज्वाल्याग्नीन यं भूयस्तपः कर्तुं समारभे
विशिष्टः श्रमसंक्रांतस्तपसा भूयसा मुद्रः॥ करोत्यत्र तपो घोरं सततं नियमाश्रयः॥ तपसोस्य प्रभा
वेन पावकाः स्वत एव ते॥ प्रज्वलंत्यनिशं पश्य कथं शांत्यग्नयो मुदा॥ कण्वोपि घोरं तपसा शरीरं पा
वनं स्वकं॥ चकार पुनरप्यत्र करोत्येव तपो मुदा॥ गर्गोत्र तपसा नित्यं प्रीणयंत्यंबिकापतिं॥ ऊर्ध्वबाहुः
कथंश्रीत्यापश्यस्वंर्द्र विलोकय॥ अत्रिणात्र तपस्तप्तम पुत्रेण पुरा मुदा॥ ततः शिवप्रसन्नोभूद्दवि
कारमणस्तदा॥ तपो दृष्ट्वा महादेवमत्रिर्देवोत्तमं शिवं॥ प्रणम्य पूजयित्वाथ तुष्टाव गिरिजापतिं॥
अत्रिरुवाच॥ नमो नमो निर्गुण निर्विकार नमो नमो निष्कल निष्प्रपंच॥ नमो नमः शांत नमो नम
स्ते नमो नमस्ते शिव सर्वरूप॥ नमो नमः सांब नमो नमस्ते नमो नमः शंकर सर्वहेतो॥ नमो नमो
मयगुण स्वरूप तुरीय शंभो सततं नमस्ते॥ नमो नमोऽनंतगुणैकसिंधो प्रसन्न बंधो भगवन्नम
स्ते॥ नमो नमः शर्व नमो नमस्ते नमो नमः पूर्ण नमो नमस्ते॥ नमो नमस्तेस्तु नमोस्तु रुद्र नमो

नमस्तेस्तु नमोस्तु शंभो॥ नमो नमस्ते गिरिजासमेत नमो नमस्तेस्तु नमो महेश॥ नमो नमस्तेस्तु हि
रण्यबाहो नमो नमस्तेस्तु हिरण्यरूप॥ नमो नमस्तेस्तु हिरण्यवर्ण नमो नमस्तेस्तु हिरण्यरेतो॥
नमो नमस्तेस्तु शशांकमौले नमो नमस्तेस्तु पिनाकपाणे॥ नमो नमस्तेस्तु वृषांककेतो
नमो नमस्तेस्तु नमो गिरीश॥ नमो नमस्ते पृथिवीस्वरूप नमो नमस्तेस्तु जलस्वरूप॥ तेजःस्वरू
पाय नमो नमस्ते वायुस्वरूपाय नमो नमस्ते॥ आकाशरूपाय नमो नमस्ते कालस्वरूपाय नमो नम
स्ते॥ नमो नमस्तेस्तु दिगात्मने सदा नमो नमस्ते सकलात्ममूर्तये॥ नमो नमस्तेस्तु कपर्दिने सदा
नमो नमस्तेस्तु कपालमालिने॥ नमो नमस्तेस्तु नमस्त्विषीमते नमो नमस्तेस्तु निषंगिणे नमः॥
नमो नमस्तेस्तु नमोस्तु शर्व नमो नमस्तेस्तु नमोस्तु बभ्रुश॥ नमो नमस्ते शिपिविष्ट शंभो नमो नम
स्तेस्तु हरामरेश॥ नमो नमस्ते हरिपूजितांघ्रे नमो नमस्ते हरिनेत्रपाद॥ नमो नमस्ते हरिजन्महे
तो नमो नमस्ते हरिनाशहेतो॥ नमो नमस्ते विधिजन्महेतो नमो नमस्ते विधिनाशहेतो॥ नमो

शि०स्य
१६४

नमस्तेऽखिललोकहेतो नमो नमस्तेऽखिलनाशहेतो॥ नमो नमो निर्मलनित्यरूप नमो नमो नित्य
विशालबुद्धे॥ नमो नमो निर्भयभीमरूप नमो नमः सर्गविनाशहेतो॥ नमो नमस्ते हरमृत्युमृत्यो
नमो नमस्ते शिवविष्णुमूर्ते॥ नमो नमस्ते जगदेकमूर्ते नमो नमः शंकर शंकरेश॥ स्कंद उवाच॥
एवमत्रिस्त्रिनेत्रं तं स्तोत्रैः स्तुत्वा महेश्वरं॥ मुहुर्मुहुः प्रणम्याग्रे कृतांजलिपुटः स्थितः॥ तमुवाच कृपासिं-
धुः स्तुतस्तेन महेश्वरः॥ अदेयमप्यभीष्टं ते दास्यामीति कृपानिधिः॥ अत्रिरुवाच॥ पुनीतोऽस्मि म-
हादेव प्रसन्नोऽसि यतो मम॥ इतोऽप्यभीष्टमन्यन्मे किमस्ति करुणानिधे॥ यद्विष्णुनेत्रांभ्रमरनिल-
यं पदपंकजं॥ तच्च दृष्टं महादेव किमभीष्टमतः परं॥ यत्सिद्धहृत्पंकजगं पादपंकजमुत्तमं॥ तत्ते दृष्टं
महादेव किमभीष्टमतः परं॥ यद्ध्यातं योगिवर्यैश्च पादपद्ममभीष्टदं॥ तत्ते दृष्टं॥ विष्णुनेत्रार्चितं
यत्तु पदद्वंद्वमनुत्तमं॥ तत्ते०॥ यत्तु श्रुतीशिरोरत्नं चरणद्वंद्वमुत्तमं॥ तत्ते०॥ यन्मौनिमानससरो-
हंसायितपदांबुज॥ मोक्षहेतुरनायासा यत्पदद्वंद्वदर्शनं॥ तत्ते०॥ पूर्णमनोरथाः सर्वे त्वत्पदद्वं- श्री:॥ १६४

द्वदर्शनात्॥ कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि महेश्वर॥ धन्यमेतदभूज्जन्म त्वत्पदद्वंद्वदर्शनात्
कृतार्थोऽस्मि०॥ धन्यं मम कुलं जातं त्वत्पद०॥ कृतार्थोऽस्मि०॥ धन्यमक्षियुगं जातं त्वत्पाद०॥ कृतार्थोऽस्मि०॥
मच्चित्तभ्रमरो नित्यमस्मिंस्त्वत्पदपंकजे॥ यथा तिष्ठति देवेश तथा कुरु महेश्वर॥ अस्य देवस्यावसाने मो-
क्षपात्रं कुरुष्व मां॥ न त्वदन्यो मोक्षहेतुरिति वेदो वदत्यतः॥ स्कंद उवाच॥ इत्यत्रिवचनं श्रुत्वा शंकरः
करुणानिधिः॥ पुत्रं सर्वसुराराध्यं लभस्वेति वरं ददौ॥ धर्ममर्थं च कामं च लभस्व मुनिसत्तम॥ मोक्षो-
ऽप्यंते मयैवायं देयस्तुभ्यं न संशयः॥ यन्मदाश्रितचित्तानां मदर्पितसुकर्मणां॥ मोक्षदोऽहं मदन्य-
स्तु मोक्षदो नास्ति सर्वथा॥ स्कंद०॥ इत्युक्त्वांतर्दधे शंभुर्देवदेवोत्तमः स्तुतः॥ ब्रह्मविष्ण्वादिवंद्यां-
घ्रिरंबिकासहितः प्रभुः॥ १००॥ ततः पुत्रोऽभवत्तत्र अत्रिनेत्रसमुद्भवः॥ सर्वानंदकरो नित्यं शीतांशुः
शुभलक्षणः॥ कलाः षोडश तस्यासन्नत्रिपुत्रस्य धीमतः॥ अष्टाशीतिसहस्राणि विस्तीर्णो योजना-
नि तु॥ तदा महानुत्सवोऽभूत्तावेषां नंदिकेश्वर॥ तद्दृष्ट्वा मुनयः सर्वे तुष्टुवुर्मुदितानना:॥ ततोऽत्रि तु

शि०स्त०॥ तुष्टुवुः प्रीत्या मुनयः शंकरार्चकं ॥ शंभुराराधितः सम्यक् त्वया चात्रिमुनीश्वर ॥ शिवप्रसादलब्धोयं पु
॥१६५॥ त्रस्तव सुरेश्वरः ॥ विना शिवप्रसादेन पुत्रः कुत्र दृशः प्रभुः ॥ ऐहिकामुष्मिकानर्थान् शंकरो भक्तवत्सलः ॥
ददात्येव स्वभक्तेभ्यः स्वतंत्रः सुरसत्तमः ॥ शिवान्यदेवास्त्वल्पमैहिकार्थमकामदः ॥ अतिप्रीताः प्रय
च्छंति स्वस्वशक्त्यनुराधतः ॥ तेपि देवाः प्रयच्छंति प्रसादाच्छंकरान्मुने ॥ अस्वतंत्रायतस्तेपि स्वातंत्र्या
त्फलदास्तु न ॥ देवतासार्वभौमस्तु शंकरः सर्वकामदः ॥ धर्मार्थकाममोक्षाणां दाता सांबः शिवः स्वयं
सर्वदेवेश्वरः पुत्रो धीमानमितविक्रमः ॥ शिवान्यदेवताभक्त्या प्राप्यः किं दुर्लभोप्ययं ॥ शंकरो विष्णुत
पसा संतुष्टो विष्णवे मुदा ॥ ददौ वैकुंठममलमतो देवोत्तमः शिवः ॥ ब्रह्मणो ब्रह्मतपसा संतुष्टः शंकरो श्रीः॥
मुदा ॥ ब्रह्मलोकं ददौ पूर्वमतो देवोत्तमः शिवः ॥ इंद्रायेंद्रस्य तपसा संतुष्टः शंकरो मुदा ॥ स्वर्गलो ॥१६५॥
कं ददौ पूर्वमतो देवोत्तमः शिवः ॥ पुराग्नितपसा प्रीतः शंकरस्त्वग्नये मुदा ॥ अग्निलोकं ददौ पूर्वमतो
देवोत्तमः शिवः ॥ अन्येभ्योपि च देवेभ्यः प्रीतस्तत्तपसा शिवः ॥ लोकानिष्टान्ददौ पूर्वमतो देवो० ॥

वेदाः सर्वे महादेवं स्तुवंति विविधा मुदा ॥ तदन्यं न स्तुवंत्येवमतो० ॥ मोक्षप्रदाता सर्वेभ्यः स्वभक्तेभ्यो म
हेश्वरः ॥ मोक्षप्राप्ता महाशैवे रतो दे० ॥ यथा श्रेष्ठो मनुष्येषु ब्राह्मणो ब्रह्मवित्तमः ॥ तथा देवेषु सर्वेषु श्रे
ष्ठः सांबः शिवः प्रभुः ॥ विद्यामध्ये यथा श्रेष्ठा वेदविद्या प्रकीर्तिता ॥ तथा देवेषु० ॥ गोरत्नमाकाम
दोग्ध्री यथा सर्वसुखप्रदा ॥ तथा० ॥ लोहमध्ये यथा श्रेष्ठं कांचनं सर्वतृप्तिदं ॥ तथा० ॥ ऐरावतो यथा
श्रेष्ठो गजेष्वमितविक्रमः ॥ तथा० ॥ हयेषूच्चैःश्रवाः श्रेष्ठो यथामितपराक्रमः ॥ तथा० ॥ यथा सर्वमृ
गश्रेष्ठः सिंहो लंघ्यपराक्रमः ॥ तथा० ॥ कैलासः सर्वलोकेषु यथा श्रेष्ठः सुखप्रदः ॥ तथा० ॥ पुष्परा
गो यथा श्रेष्ठो रत्नेषु विविधेष्वपि ॥ तथा० ॥ समुद्रेषु यथा श्रेष्ठः क्षीराब्धिरमितप्रभः ॥ तथा० ॥ सिद्धानां
कपिलः श्रेष्ठो यथा सिद्धाश्रयः सदा ॥ तथा० ॥ यथा चित्ररथः श्रेष्ठो गंधर्वेषु बलोन्नतः ॥ तथा० ॥ य
थागस्त्यो मुनिश्रेष्ठः सर्वदा शिवचिंतकः ॥ तथा० ॥ यथा सुगंधो गंधेषु श्रेष्ठः सर्वजनप्रियः ॥
तथा० ॥ शिवान्नास्त्यधिको देवः सत्यं सत्यं न संशयः ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥

॥शि०रस्य ॥१६६॥

नशिवेन समो देवः सत्यं सत्यं न संशयः॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते॥ शंकरस्य प्रसादेन ज्ञा-
नं भवति धीमतां॥ शंकरस्य प्रसादेन मोक्षो भवति धीमतां॥ शंकरः सर्वभावेन शरण्यः शरणार्थिनां॥ स
च्यः पूज्यः सदा सर्वैरप्रमादेन सर्वदा॥ स्कंद उवाच॥ इत्यत्रिवचनं श्रुत्वा मुनीनां भावितात्मनां॥ तुतोष
पूजयामास तान्सर्वान्मुनिपुंगवान्॥ चकार नामकरणं मुनीनां माठरो मुनिः॥ सोमप्रसादलब्ध-
स्य सोम इत्येव धीमतः॥ उमया सहितो देवः सोम इत्यभिधीयते॥ उमाज्ञानमयी शक्तिः शैव वि-
द्येति गीयते॥ विद्याः सर्वा उमारूपाः विद्यानामीश्वरः शिवः॥ विद्यापतिर्न देवोऽन्यो विद्या तान्य-
त्र न क्वचित्॥ ईशानः सर्वविद्यानां भूतानामीश्वरो ह्ययं शिवः॥ विष्णुब्रह्मादिदेवानां प्रभुः सांब
सदाशिवः॥ रुद्रपिंडसमुत्पन्ना ब्राह्मणा रुद्रदेवताः॥ ततः कार्यं द्विजैर्नित्यं श्रीरुद्रस्यैव पूजनं॥ दे-
वाश्च ब्राह्मणोत्पन्नाः शिवान्या ब्राह्मणाः सुराः॥ ततो देवैश्च कर्तव्यं रुद्रस्यैव हि पूजनं॥ विश्वाधि-
को रुषिर्रुद्रो महान्यद्यपि सः स्वयं॥ तथापि नित्यो जन्यः सन्भावज्ञानात्मकः स्वयं॥ स्वाधिकः

श्रीः॥ ॥१६६॥

पूज्यते लोके पूजा च स्वाधिके मता॥ स्वतोधमः स्वतुल्यो वा पूजा नैव विधीयते॥ ४४॥ न शिवानधिको
यस्माद्विश्वाधिक इति श्रुतिः॥ बाधितः स्याद्दतो रुद्रो विश्वादधिक उच्यते॥ ततो रुद्रः स्वपूजां तु स्वयं नैव
करिष्यति॥ रौद्रैस्तु ब्राह्मणैः सर्वैः क्रियते रुद्रपूजनं॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स
भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानो यदन्नेना-
तिरोहति॥ एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दि-
वि॥ त्रिपादूर्ध्व उदैत्पुरुषः पुरुषः परमो रुद्रो देवदेवता नमो नमः॥ पुरुषो वै रुद्र एव श्रुतिरेषा यतो मता।
यो रुद्रो अग्नौ यो अप्सु रुद्रो यो रुद्र ओषधीष्वपि॥ यो विश्वा भुवनान्यैको विवेश सपत्परः॥ विश्वं भूतं भु-
वनं चित्रं च बहुधा च यत्॥ तज्जातं जायमानं च रुद्राद्रुद्रात्मकं विदुः॥ ऋचो यजूंषि सामानि रुद्रादे-
व हि जज्ञिरे॥ छंदांसि जज्ञिरे रुद्राज्जज्ञिरे विविधाः प्रजाः॥ सोमो मतीनां जनिता सोमो हि जनि-
ता दिवः॥ सद्योऽलयाः पृथिव्याश्च जनिता सोम एव हि॥ अग्नेश्च जनिता सोमो नान्योऽस्य जनिता

॥शि॰रह धुवं॥सूर्याणांजनितासोमो द्वादशानामपिप्रभुः। चंद्रस्यजनितासोमोब्रह्मणः पवनस्यच॥ नदी
॥१६७॥ नांजनितासोमः समुद्राणामपिप्रभुः॥ मनसोजनितासोमः स्कंदस्यगणपस्यच॥ आकाशस्यापि
जनिताओषधीनामपामपि॥ ब्रह्मणोरुद्रमभ्यर्च्यमनभ्यर्च्यतुयोभ्रमात॥ मुक्तेसपापमुग्भूयः पा
पभुग्जायतेध्रुवं॥ विश्वाधिकमुमाकांतमसमंदेवतोत्तमं॥ जानातियोन्यसदृशं सचंडालसमद्यपः॥
पुराकश्चिदभूद्विप्रोदेवदारुवनाश्रितः॥ ससर्वत्रसमत्वेनबुद्धिंकृत्वैवसंस्थितः। तंतथाविधम
लोक्यकश्चिच्छैवः शिवार्चकः॥ तमब्रवीद्भ्रांतचित्तंज्ञात्वातस्यमनस्तदा॥ शैव॰ किंविप्रध्यायते
नित्यंप्रत्यहंक्रियतेचकिं॥ कोवादेवेषुविज्ञातोदेवोत्तमइतित्वया॥ विप्र॰ देवोत्तमोनकोप्यस्ति श्री:॥
देवाः सर्वसमाः स्मृताः ध्येयोन्योममनास्त्येवशरीरंध्यायतेमया॥ यथारुद्रस्तथाविष्णुर्यथावि १६७
ष्णुस्तथाविधिः। यथाविधिस्तथैवेंद्रोयथैवेंद्रस्तथानलः॥ यथानलस्तथावायुर्यथावायुस्तथाय
मः॥ यथायमास्तथान्येपिततः कोप्यधिकोनहि इतितद्वचनंश्रुत्वातत्रशिवार्चितकः॥ तंभ्रांत

BHAU DAJI

चित्तमार्गोनकत्तुमेवंवचोब्रवीत॥ शैव॰॥ रेविप्रभ्रांतचित्तोसिवेदः किंविस्मृतस्त्वया॥ वेदत्वेनवि
ज्ञातंनित्यारस्तेकथंवद॥ ईशानः सर्वविद्यानामित्यादिर्नश्रुताश्रुतिः॥ नमस्तेअस्तुभगवन्नि
त्यादिर्नश्रुताश्रुतिः॥ निष्कलंनिर्गुणंशांतमित्यादिर्नश्रुताश्रुतिः सोमः पवतइत्यादि रुद्रसूक्तंचवि
स्मृतं॥ तत्रास्तिजनिताविष्णोः सोमइत्ययमुत्तमः॥ योरुद्रइतिवेदोपित्वयानस्मर्यतेध्रुवं॥ नेविश्व
भूतमित्यादिवेदोपिस्मर्यतेत्वया॥ हरिंहरंतमित्यादिवेदोनस्मर्यतेत्वया॥ नमस्तेरुद्रइत्यादिवेद
सारोपिविस्मृतः॥ सद्योजातंप्रपद्यामीत्यादिवेदोपिविस्मृतः॥ नतमीशानमित्यादिमंत्रोनस्मर्यते
त्वया॥ इमारुद्रायइत्यादिमंत्रोनस्मर्यतेत्वया॥ तमुष्टुहीतिमंत्रेणस्मर्यतेनत्वयाध्रुवं॥ कद्रुद्रायेति
मंत्रोपिस्मर्यतेनत्वयाध्रुवं॥ किंचसर्वेश्वरः शंभुः सर्वोपनिषदांप्रभुः॥ सर्वोपनिषदामीशपरमा
त्मासदाशिवः॥ यएकोजालवानीशः ईशानीभिः समीशते॥ सर्वांल्लोकानीशतेयं ईशानीभिः
सदाशिवः॥ उद्भवसंभवेचैवएकएवप्रभुः शिवः॥ यएवंविदुरीशानंममृतास्तेभवंतिहि॥ एकए
वहिरुद्रोयंनद्वितीयोयईश्वरः॥ इमांल्लोकानीशानीभिरीशतेतस्मुस्छुरत्ते॥ प्रत्यगात्मनिवि

शि० स्य
१६८

ध्येयो शिवेति ध्यायंतिये जनाः॥ तेनैव संस्तुतो वायमंतकाले त्रिशूलधृक्॥ स सृज्य विश्वा भुवनान्येव मे
व पुनः पुनः॥ पाति हंति पुनः सृष्ट्वा पाति हंति पुनः पुनः॥ विश्वतश्चक्षुरीशानो विश्वतो मुखः शि
वः॥ विश्वतो बाहुरनयो विश्वतस्पात् महेश्वरः॥ द्यावाभूमी च जनयन्नेक एव सदाशिवः॥ सं बा
हुभ्यां संपतत्रैर्धमत्येव पुनः पुनः॥ प्रभवश्चोद्भवश्चासीद्रुद्रो विश्वाधिको ऋषिः॥ ब्रह्म विष्णा
दि देवानां यः स एव सदाशिवः॥ हिरण्यगर्भमेवादौ जनयामास शंकरः॥ विष्णुं जनयामास त
स्माद्विष्णोः सदाशिवः॥ ततश्चेंद्रमुखान्देवान्जनयामास शंकरः॥ ततो भूमिं ततो वायुं ततो गग
नमीश्वरः॥ ततो नानाविधान्देवान्ससर्जोमामहेश्वरः॥ ततः समुद्रान्सरितो गिरीन्नद्योषधी
न्परः॥ य एव निष्कलः शांतो निरवद्यो निरंजनः॥ स एवोमासमेतः सन्सृजत्यवति हंति च॥ ततः
परं ब्रह्मपरं बृहंतं सांबमेव हि॥ यथानिकायं भूतेषु गूढं सर्वेषु सर्वदा॥ एक एव हि रुद्रोयं विश्वस्य प
रिवेष्टिता॥ ज्ञात्वा तमीशममृता भवंत्येव सदाशिवं॥ महांतमेतं पुरुषं परस्तात्तमसः परं॥ आ
दित्यवर्णं वेदाश्च न जानंत्येव शंकरं॥ शिवमेव विदित्वाति मृत्युमेति तमात्मवान्॥ नाविद्यतेय

नायास्य वान्यः पंथाः शिवं विना॥ यस्मात्परं नास्ति परं शिवात्सर्वोत्तमोत्तमः॥ नास्ति कश्चिच्छिवा
ज्ज्यायान्नाणीयो तस्त्वमर्चयेत्॥ तेन पूर्णमिदं सर्वं पुरुषेण शिवेन हि॥ ततो यदुत्तरतरं तदरूपमना
मयं॥ य एवं विदुरीशानं अमृतास्ते भवंति हि॥ दुःखमेवापि यंत्यन्ये शिवध्यानपराङ्मुखाः॥ सर्वाननशि
रोग्रीवः सर्वभूतगुहाशयः॥ सर्वव्यापी च भगवंस्तस्मात्सर्वगतः शिवः॥ महान्प्रभुर्वै पुरुषः सत्व
स्यैष प्रवर्तकः॥ सुनिर्मलमिदं शांतमीशानो ज्योतिरव्ययः॥ अंतरात्मांगुष्ठमात्रः पुरुषोयं सदाशि
वः॥ सदा जनानां हृदये सन्निविष्टो निरंतरं॥ हृदा मनीषा मनसाप्यभिक्लृप्तः सदाशिवः॥ य एवं
विदुरीशानं ममता स्ते भविष्यति हि॥ सर्वतः पाणिपादांतं सर्वतोक्षिशिरोमुखं॥ सर्वतः श्रुतिमान्
लोके सर्वमावृत्य तिष्ठति॥ २००॥ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं॥ सर्वस्य प्रभुमीशानं सर्व
स्य शरणं सुहृत्॥ नवद्वारपुरे देहे हंसो लोलायते बहिः॥ वशी सर्वस्य लोकस्य स्थावरस्य चरस्य
च॥ अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः॥ स वेत्ति सर्वं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महांतं॥ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः॥ तमक्रतुं

शि०॥
१६८

शि०स्प ।। १६९ ।।

पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं॥ वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभु
त्वात्॥ जन्मनिरोधं प्रवदंति यस्य ब्रह्मवादिनो हि प्रवदंति नित्यं॥ य एकवर्णः शक्तियोगान्महे
को बहुधा शिवः॥ वर्णाननेकानुमयात् निहितार्थो ददाति हि॥ वि चैति चांते विश्वात्मा विश्वमादौ स
शंकरः॥ स पुनक्तु सह नो बुध्या शुभया देवतो नमः॥ स एव रुद्रः स चादित्यः स वायुः स तु चंद्रमाः॥
शुद्धं ब्रह्म स एवेशः स एवाप्यः प्रजापतिः॥ स्त्रीरूपः पुरुषाकारः सर्वाकारः सदाशिवः॥ कुमा
रात्मा कुमार्यात्मा सर्वात्मा विश्वतोमुखः॥ नीलो गौरश्च हारीतो लोहिताक्षः सदाशिवः॥ नि
र्मलो नियतो यं तानि च वद्यश्चिदाकृतिः॥ छंदांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदं
ति॥ तस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः॥ मायां तु प्रकृतिं विद्यान्मा
यिनं तु महेश्वरं॥ तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥ यो योनिं योनिमधितिष्ठत्येको यस्मि
न्निदं सं च वि चैति सर्वं॥ तमीशानं वरदं देवमीड्यं निचाय्येमां शांतिमत्यंतमेति॥ यो देवानां प्रभव
श्चोद्भवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः॥ हिरण्यगर्भं जनयामास जायमानं च पश्यत॥ श्रीः। १६९ ।।

विष्णुं च जनयामास जायमानं च पश्यत॥ इंद्रं च जनयामास जायमानं च पश्यत॥ वह्निं च जनयामास जा
यमा०॥ यमं च जनयामास जाय०॥ वसुं च जनयामास जाय०॥ वरुणं जनयामास जा०॥ लोकांश्च
जनयामास जायमानं०॥ य ईशः सर्वगोप्ता स नो बुध्या शंकरः संयुनक्तु नो॥ यो देवानामधिपो यस्मि
न्देवा अधिश्रिताः॥ स एव सर्वदेवेशः शंकरः परमा गतिः॥ यस्मिन्सदाशिवे देवाः द्विपदश्च
चतुष्पदः॥ तस्मै देवाय हविषा शंकरायामितात्मने॥ सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टा
रमनेकरूपं॥ विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शांतिमत्यंतमेति॥ स एव काले भुवनस्य गोप्ता
विश्वाधिकः सर्वभूतेषु गूढः॥ यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति॥
घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढं॥ विश्वस्यैकं परिवेष्टितारमीशं ज्ञात्वा देवं
मुच्यते सर्वपाशैः॥ एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः॥ हृदा मनी
षा मनसाभिक्लृप्तो य एवं विदुरमृतास्ते भवंति॥ यदा स मस्तं न दिवा न रात्रिर्न संश्चासं शिव

एवकेवलः॥ तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥ नैनमूर्ध्वं न तिर्यं तं न मध्ये परि
जग्रभत्॥ न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्य
ति कश्चनैनं॥ हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवंति॥ निष्कलं निर्गुणं शांतं निर
वद्यं निरंजनं॥ शिवं सांबं विदित्वैनं ब्रह्मनिर्वाणमृच्छति॥ न तत्र सूर्यो भाति न चंद्रतारकं नमामि
भांति विद्युतः कुतोयमग्निः॥ तमेव भांतमनुभाति सर्वं यस्य भासा सर्वमिदं विभाति॥ एको
हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले सन्निविष्टः॥ तमेव विदित्वातिमृत्युमेति नान्यो हेतु
र्विद्यतेऽयनाय॥ स विश्वकृद्विश्वविदात्मयोनिः ज्ञः कालकालो गुणी सर्वविद्यः॥ प्रधानक्षेत्रज्ञप
तिर्गुणेशः संसारमोक्षस्थितिबंधहेतुः॥ नातः परं वेद्यमचिंत्यरूपं शिवाच्च सांबादद्वयादित्यरे
मि॥ शिवात्मकं यच्च समस्तमेतच्छिवान्यत्किंचिद्व्यतिरिक्तमस्ति॥ अज्ञाय महादेवमचिंत्यविभवं
शिवं॥ अमरा अपि मुह्यंति किमन्ये मनुजाधमाः॥ द्वे अक्षरे ब्रह्मपरे त्वनंते विद्याविद्ये निहिते यत्र गूढे

क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोन्यः॥ महेश्वरोयं यमधोनिनीषते स चोदयत्ये
नमसाधुकर्मणि॥ यश्चैनमूर्ध्वं स तथोन्निनीषते तं साधुकर्मण्यनु संनियोजति॥ तस्मात्कर्ता प्रभुः
सर्वगश्च सर्वस्यात्मा प्रेरकः सर्वरूपः॥ शिवः सांबः सच्चिदानंदरूपो ध्येयो नित्यं मोक्षहेतुर्निरीशः॥
अवमान्य तमेवेशं निरयं यांति दुर्जनाः॥ संमानयित्वा तं देवं प्रयांति परमं पदं॥ तस्यैव मायया प्राप्तास्त
मविज्ञाय वस्तुतः॥ नानाविधानि दुःखानि प्राप्नुवंति न संशयः॥ पुराकृतानेकधर्मो दक्षो दक्षप्र
जापतिः॥ शिवात्सुसुरसंयुक्तो यागं कर्त्तुं समारभे॥ तस्मिन्यागे समारब्धे सुरा विष्णुपुरोगमाः
सर्वेप्यागतदक्षाय चक्षुः साहाय्यमादरात्॥ सुरर्षयो नारदाद्याः सर्वे तत्र समागताः॥ दक्षाय जन
यामासुः संतोषं यागमंडपे॥ भौमाश्च ऋषयो येच नानादेशसमाश्रिताः॥ ते च सर्वे समागत्य द
क्षं चक्षुः प्रहर्षितं॥ सोमाय राज्ञे प्रादत्त यावंतो दक्षकन्यकाः॥ ताश्च सर्वाः समागत्य दक्षं चक्षुः प्र
हर्षितं॥ देवपत्न्यश्चित्रवेषायाश्च लक्ष्मीपुरोगमाः॥ ताश्च०॥ अमेयारुंधतीमुख्या ऋषिपत्न्यश्च

याः स्थिताः॥ ताश्च०॥ यक्षगंधर्वपत्न्यश्च याश्च नागेंद्रकन्यकाः॥ ताश्च०॥ दक्षश्च सर्वसंभारान्सं
प्राप्य तदनंतरं॥ ददावृषीणामार्त्विज्यं श्रोताधिष्ठितचेतसां॥ देवा बभूवुर्विस्त्राद्याः सदस्या दक्षपू
जिताः॥ क्रतुसंरक्षका जाता गंधर्वाद्या बलान्विताः॥ एतस्मिन्नंतरे काले कैलासनिलयं शिवं॥ गौरी
विनयनम्रांगा स्मितपूर्वमभाषत॥ गौरी उवाच॥ शंभो दक्षाध्वरं कर्तुमिदानीमुद्यतो स्यतः॥ त
त्राहं गंतुमिच्छामि यदा ज्ञाते तदा प्रभो॥ इति तद्वचनं श्रुत्वा महादेवः कृपानिधिः॥ उवाच मंगलां
शुद्धां सर्वज्ञः स्मितपूर्वकं॥ महादेव०॥ गंतुमिच्छसि कल्याणि दक्षयागं प्रति प्रिये॥ गत्वा सत्वरमा
याहि चिरं मा तत्र संवस॥ इत्युक्त्वा प्रेषयामास मंगलां मंगलापतिः॥ गणांश्च प्रेषयामास कोटिशो
विक्रयासहा॥ रत्नछत्रार्बुदाकीर्णा चामरार्बुदशोभिता॥ विमानरत्नमारुह्य ययौ दक्षगृहं शिवा॥
पुष्पवृष्टिरभूद्दिव्या तदा रम्या प्रतिक्षणं॥ स पुष्पगंधामोदाश्च तथा गंधवहा वपुः॥ तदा तूर्यध्वनि
रभून्नानावीणास्वनान्वितः॥ देवदुंदुभयो नेदुर्जगुर्गंधर्वनायकाः॥ ननृतुश्चोर्वशीमुख्या

मंगलादर्शनोत्सुकाः॥ गानशास्त्रानुसारेण वीणासं जगुर्नागकन्यकाः॥ लक्ष्मीमुख्या देवपत्न्यो दूराद्दृष्ट्वा
शिवप्रियां॥ हृष्टाः सत्वरमुत्थाय प्रेणमुर्विनयान्विताः॥ शिवां सरस्वती नत्वा गृहीत्वा वत्रमुत्तमं॥ कृतां
जलिपुटा भूत्वा तुष्टाव विविधैः स्तवैः॥ दृष्ट्वा दूरात्सुराश्चांबां ब्रह्मविष्णुपुरोगमाः॥ प्रणेमुर्दंडव
द्भूमौ मुनिवृंदसमन्विताः॥ यक्षपन्नगगंधर्वसिद्धविद्याधरादयः॥ प्रणेमुरंबिकां दृष्ट्वा दूरादेव पुनः
पुनः॥ अंबिकावीक्षणोद्युक्ता देवाद्यागमना तदा॥ भूयान्बभूव संमर्दो दुर्द्धर्षो गणैरपि॥ समर्द
विकलीकर्तुं वेत्रहस्तास्तदा गणाः॥ सकिरीटान्सुरान्वै सर्वांस्ताडयामासु रुद्धताः॥ गतरत्नकि
रीटाश्च विष्णुमुख्याः सुरास्तदा॥ प्रहृष्टवदना देवीं तुष्टुवुर्विविधैः स्तवैः॥ देवा ऊचुः॥ नमो देव्यै न
मो देव्यै नमो देव्यै नमो नमः॥ नमो नमो जगद्धात्र्यै जगद्धात्र्यै नमो नमः॥ नमो नमस्ते कल्याण्यै मं
गलायै नमो नमः॥ नमो नमस्ते शर्वाण्यै सुखदायै नमो नमः॥ नमो नमस्ते भद्रायै शोभनायै न
मो नमः॥ नमो नमस्ते शुद्धायै शांभव्यै ते नमो नमः॥ नमो नमो नमो मातर्नमो मातर्नमो नमः॥

नमस्तेपरमेश्वर्यैपरमायैनमोनमः॥ नमस्तेमुक्तिदायिन्यैमुक्तिदायैनमोनमः॥ नमस्तेविश्वरूपि
ण्यैविश्वमात्रेनमोनमः॥ नमस्तेलिंगधारिण्यैभूतिदायैनमोनमः॥ नमःसंतुष्टचित्तायैपुष्टि
दायैनमोनमः॥ नमोनमोन्नपूर्णायैसुवर्णायैनमोनमः॥ नमश्चंद्रावतंसायैसर्वैश्वर्यैनमोनमः॥
नमस्तेचंद्रसूर्याग्निप्रतिमायैशिवप्रिये॥ नमस्तेभाग्यदायिन्यैभोगदायैनमोनमः॥ नमस्ते
शांतिदायिन्यैदमदायैनमोनमः॥ नमस्तेपुण्यरूपिण्यैपुण्यदायैनमोनमः॥ नमस्तेकीर्तिरू
पिण्यैकीर्तिदायैनमोनमः॥ नमस्तेधर्मरूपिण्यैधर्मदायैनमोनमः॥ नमस्तेबुद्धिरूपिण्यैबुद्धि
दायैनमोनमः॥ यात्वंविद्यास्वरूपेणविद्यावद्हृदयेस्थिता॥ तस्यैशिवांगभागिन्यैनमस्तुभ्यं
नमोनमः॥ यात्वंकीर्तिस्वरूपेणकीर्तिमद्हृदयेस्थिता॥ तस्यै०॥ यात्वंपुण्यस्वरूपेणपुण्यवद्हृ
दयेस्थिता॥ तस्यै०॥ यात्वंमंदस्वरूपेणमदवद्हृदयेस्थिता॥ तस्यै०॥ यात्वंदयास्वरूपेणदयाव
द्हृदयेस्थिता॥ तस्यै०॥ यात्वंज्ञानस्वरूपेणज्ञानवद्हृदयेस्थिता॥ तस्यै०॥ यात्वंपुष्टिस्वरूपेणपु

श्रीः॥
१७२

ष्टिवद्हृदयेस्थिता॥ तस्यै०॥ यात्वंतुष्टिस्वरूपेणतुष्टिमद्हृदयेस्थिता॥ तस्यै०॥ यात्वंशुभस्वरू
पेणशुभवद्हृदयेस्थिता॥ तस्यै०॥ यात्वंयोगस्वरूपेणयोगवद्हृदयेस्थिता॥ तस्यै०॥ यात्वंसिद्धिस्व
रूपेणसिद्धिमद्हृदयेस्थिता॥ तस्यै०॥ यात्वंकल्याणरूपेणभक्तकल्याणदायिनी॥ तस्यै०॥ यात्वं
धनस्वरूपेणभक्तानांधनदायिनी॥ तस्यै०॥ यात्वंसंतोषरूपेणभक्तसंतोषदायिनी॥ तस्यै०॥
यात्वमैश्वर्यरूपेणभक्तैश्वर्यप्रदायिनी॥ तस्यै०॥ यात्वंरक्षणरूपेणभक्तरक्षणदायिनी॥ तस्यै०॥
यात्वमारोग्यरूपेण॥ यात्वमारोग्यरूपेणभक्तारोग्यप्रदायिनी॥ तस्यै०॥ यात्वंसुखस्वरूपेण ता
भक्तानांसुखदायिनी॥ तस्यैशिवांगभागिन्यैनमस्तुभ्यंनमोनमः॥ इतिदेवैःस्तुतादेवी
प्रसन्नविष्णुपुरोगमैः॥ विद्युल्लतेवविमलाविवेशाध्वरमंडपं॥ तामागतांसुराराध्यांदक्षो
दृष्ट्वापिरोषाकुलः॥ अर्घ्यपाद्यादिकंचक्रेनोपतस्थेभ्रमान्वितः॥ तदातंतादृशंदक्षमुपविष्टं
कुशासने॥ विलोक्याहमुनिश्रेष्ठोदधीचिःक्रोधसंयुतः॥ दधीचिरुवाच॥ रेरेदक्षदुराचार

शि॰स्व देशाचारपरायणः ॥ नकरोषि कथं पूजां मंगलायै यथाविधि ॥ ३० ॥ इयमेव सुराराध्या सर्वयागफलप्रदा
१७३ इयमेवाद्यकल्याणी शंकरार्द्धांगभागिनी ॥ इयमेवार्चितं नित्यं सर्वसौभाग्यदायिनी ॥ इयमेवार्चिता
नित्यं सर्वमंगलदायिनी ॥ इयमेवार्चिता नित्यं संसारभयनाशिनी ॥ इयमेवार्चिता नित्यं सर्वोपद्रव
हारिणी ॥ इयमेवार्चिता नित्यं कीर्तिसंपत्प्रदायिनी ॥ इयमेवार्चिता नित्यं भुक्तिमुक्तिप्रदायिनी ॥
इयमेव जगद्धात्री जगद्रक्षककारिणी ॥ इयमेव हि कल्पांते जगत्संहारकारिणी ॥ इयमेव हि कल्या
णी विष्णुमाताविलासिनी ॥ इयमेव तपोधर्मदानादिफलदायिनी ॥ इयमेव हि वेदोक्तसर्वकर्मफ
लप्रदा ॥ इयमेव स्तुता वेदैर्वेदांतैरखिलैरपि ॥ इयमेव स्तुता सर्वैरितिहासादिभिः सदा ॥ तप्यते हि श्री॥
तपः सिद्धैः तद्दर्शनकांक्षिभिः ॥ युज्यते योगिभिर्योगैः तद्दर्शनकांक्षिभिः ॥ धर्माः क्रियंते मुनिभि १७३
रतद्दर्शनकांक्षिभिः ॥ इज्यते यज्विभिर्यागैः तद्दर्शनकांक्षिभिः ॥ अनंतदानधर्माणां शांकरीदर्श
नं फलं ॥ यागादीनां च धर्माणां शांकरीदर्शनं फलं ॥ इयमेव जगन्माता सर्वविद्यास्वरूपिणी ॥ इ

यमेवादिविद्येयं सर्वमंगलरूपिणी ॥ भवान्याः पूजने शीघ्रं यतोद्य न कृतं त्वया ॥ अत एवाध्वरस्यास्य वि
नाशोयं भविष्यति ॥ अमंगलं भवत्येव पूजार्हाणामपूजया ॥ पूज्यमात्रापि नैवेयं यतः पूज्यतमा शिवा
सहस्रेणापि शिरसां हरिर्यस्याः सरोजजः ॥ वहत्यन्वहमुग्नांग सेयं भगवती शिवा ॥ विधिः प्राप्यानियते
न यस्याः प्रसादजः कृपं ॥ रचयत्यखिलाँ लोकान् सेयं भगवती शिवा ॥ रुद्रोपि यत्प्रसादेन वृत्रं हत्वा महासु
रं ॥ स्वर्गाधिपत्यं संप्राप सेयं० ॥ यत्पादपद्ममनिशं ध्यात्वा संपूज्य सादरं ॥ विष्णुर्विष्णुत्वमापन्नः से०
यत्पादपद्ममनिशं ध्यात्वा संपूज्य सादरं ॥ ब्रह्मा ब्रह्मत्वमापन्नः सेयं० ॥ यत्पादपद्ममनिशं ध्यात्वा० ॥
इंद्रोपींद्रत्वमापन्नः सेयं० ॥ यत्पादपद्ममनिशं० ॥ सूर्यः सूर्यत्वमापन्नः सेयं० ॥ यत्पादपद्ममनिशं० ॥
चंद्रश्चंद्रत्वमापन्नः सेयं० ॥ यत्पादपद्म० ॥ वह्निर्वह्नित्वमापन्नः सेयं० ॥ यत्पाद० ॥ वायुर्वायुत्वमाप
न्नः सेयं० ॥ यत्पाद० ॥ पाशी पाशित्वमापन्नः सेयं० ॥ यत्पादपद्म० ॥ यमो यमत्वमापन्नः सेयं० ॥
महादेवोपि यां त्यक्त्वा क्षणमात्रमपि प्रभुः ॥ न तिष्ठत्येव सहसा सेयं भगवती शिवा ॥ एतस्याः शोभ

शि॰स्प
१७४

नादृष्टिर्यस्मिन्नसरतिक्षणं॥ सधन्यः सगुणी वंद्यः सर्वसौभाग्यसंपच्छ्रयः॥ भवान्याः कुटिलादृष्टि
र्यस्मिन्नसरतिक्षणं॥ सदुर्भगोनिर्गुणश्च सर्वापत्संश्रयोपि सः॥ सेयं भगवती धन्या भवानी भाग्य
दायिनी॥ यदिनाराध्यते भक्त्या कथं भाग्यं भविष्यति॥ दौर्भाग्यं त्वपि संक्रांते संक्रांताश्च पदस्त्वयि॥
यतोनाराधिता भक्त्या भवानी सर्वमंगला॥ कल्याणं ननु ते पेयं स्मृतापि शुभदा शिवा॥ सेयं कथं
त्वया भक्त्या दक्ष नाराध्यते वद॥ अनभ्यर्च्यापि शर्वाणीं कल्याणं शंभु यामिति॥ किमस्ति गर्व दुर्वा
रः। स गर्वो द्याविनश्यति। दक्षते गर्वनिर्वाहः कमाश्रित्य भविष्यति॥ नास्ति कोप्यत्र देवेशो गर्वनिर्वाह
कस्तव॥ शर्वाणीं विमुखो भूत्वा देवेषु तेषु कस्तव॥ करिष्यत्यद्य साहाय्यं तं न पश्यामि सर्वथा॥ यदि देवाः
करिष्यंति साहाय्यमधुना तव॥ तदा नश्यंति यास्यंति शूलभास्वदक्षिगाः॥ तवाद्य शूलसंभूतप
तके नामितौजसा॥ दहनं प्राप्य शोभा विसंशयो नात्र सर्वथा॥ संप्राप्ते न कल्याणं भवानी विमु
खस्य ते॥ सत्यमेतत् पुनः सत्यमुद्धृत्य भुजमुच्यते॥ ज्वलत्वद्यमुखं तेद्य यागध्वंसो भविष्यति॥ सा

श्री:॥
१७४

हाय्यस्तवयावंतो स्तेज्वलंत्वद्य सत्वरं॥ अमराणां सदस्यानां शपथो मे गलापतेः॥ करिष्यंत्यद्य साहा
य्यं यद्येतस्य दुरात्मनः॥ गंधर्वाणां सदस्यानां शप०॥ करिष्यं०॥ पन्नगानां सदस्यानां शप०॥ करि
ष्यं०॥ किन्नराणां सदस्यानां शप०॥ करिष्यं०॥ यक्षाणां च सदस्यानां शप०॥ करिष्यं०॥ सिद्धानां च सद
स्यानां शप०॥ करिष्यं०॥ ऋषीणां च सदस्यानां शप०॥ करिष्यं०॥ ऋत्विजां तपसानां च शपथो मे
गलापतेः॥ करिष्यंत्यद्य साहाय्यं यद्येतस्य दुरात्मनः॥ निर्गच्छंत्वमराः शीघ्रमेतदध्वरमंडपात्
अन्यथा भवतां नाशो भविष्यत्यद्य सर्वथा॥ निर्गच्छंतु सगंधर्वाः पन्नगा यागमंडपात्॥ अन्य
था०॥ यक्षाः सकिन्नराः शीघ्रं निर्यांत्वध्वरमंडपात्॥ अन्यथा०॥ सिद्धाः सऋषयः शीघ्रं निर्यांत्व
ध्वरमंडपात्॥ अन्यथा०॥ ऋत्विजो ऋषयः सर्वे निर्यांत्वध्वरमंडपात्॥ अन्यथा०॥ एवं शपथमु
ल्लंघ्य दक्षस्यास्याध्वरे बलात्॥ यस्तिष्ठति स पापिष्ठो विनश्यत्वद्य सत्वरं॥ इत्युक्त्वा क्रोधलोलाक्षो
दधीचिर्मुनिपुंगवः॥ क्रोधानलं त्यजन्नेव ययावध्वरमंडपात्॥ मुनयः कोटिशः शीघ्रं दधीचिस

हितास्तदा॥ निर्ययुः सिद्धसंयुक्ताः संक्रुद्धा यागमंडपात्॥ विमानवरमारुह्य मंगलापितनः परं॥
चक्रारं गंतुमुद्योगं श्रीमत्कैलासमंदिरं॥ सदा प्रादुर्भगवती प्रमथाः शूलपाणयः॥ कृतांजलिपु
टा नत्वा विनयानतकंधराः॥ गणाऊचुः॥ आज्ञां देहि सुराराध्ये दक्षनाशाय सत्वरं॥ सोढुं न शक्ता
स्तस्माभिनवज्ञात्वयि तत्कृताः॥ को वा वराको दक्षोयं गर्वोस्य कथमीदृशः॥ एतत्सहायभूतश्च के
वराका वदस्व नः॥ सत्वरं भस्मसात्कृत्वा दक्षमेनं ततः परं॥ भवामः सुखिनो देवी नान्यथा सुखि
नो वयं॥ पीताये पूर्वमस्माभिः समुद्राः सप्त सत्वरं॥ अस्माकं तादृशानां तु किमशक्यं जगत्त्रये
जगत्त्रयं रविमुखं लप्स्यच यदि सत्वरं॥ तदा जगत्त्रयं चैतन्नाशामः क्षणात्तरं॥ देहि देहि क्षणं शिवे
शीघ्रमाज्ञां दक्षविनाशिकां॥ नास्माभिरस्य वदनं शक्यते द्रष्टुमंबिके॥ इत्युक्तस्तद्वचः श्रुत्वा ताना
स्यंश्चो ततः शिवा॥ विमानरत्नमारुह्य ययौ शंकरसन्निधिं॥ ततः समुत्थितः शीघ्रं दधीचिक्रो
धपावकः॥ ज्वालामालासमाकीर्णो ददाहाध्वरमंडपं॥ तेनैव यागसंभारा दग्धाः क्रोधाग्निना

तदा॥ प्रपलाय्य गता देवा दक्षयक्षादिसंयुताः॥ भस्मीभूतां यागशालां दृष्ट्वा दक्षः पुनः सुरान्॥ स
हायीकृत्य सहसा यागशालामकारयत्॥ संपाद्य यागसंभारान्सकैश्चिन्मुनिभिः सह॥ यागं कर्तुं स
मारेभे बलवीर्यसमन्वितः॥ तदा दक्षं समालोक्य विष्णुरिंद्रादिसंयुतः॥ नीतिशास्त्राविरोधेन प्राहवाचमु
दारधीः॥ विष्णुरुवाच॥ यागं कर्तुं न तायासं दक्ष दक्षोसि यद्यपि॥ तथापि ऋषिशापो यः सोन्यथा
न भविष्यति॥ दधीचिर्मुनिशार्दूलः श्रीमहारुद्रपूजकः॥ तस्य शक्तिर्न केनापि ज्ञायते दक्ष वस्तुतः॥
त्रैलोक्यदहने शक्तो दधीचिः क्रोधसंकुलः॥ शक्तिस्तथाविधा प्राप्ता तेन श्रीरुद्रपूजया॥ रुद्रमभ्यभि
चारेण ये चर्चयंत्यनवहं सुदा॥ ते सर्वेप्यतिदुर्धर्षाः सत्यं सत्यं न संशयः॥ अगस्त्येन ततस्त्यक्ते निःसृ
तं वमयाततः॥ एतादृशं हि सामर्थ्यं तेन प्राप्तं शिवार्चया॥ अगस्त्येन यदा पीताः समुद्राः सप्त ली
लया॥ तदा लक्ष्मीसमेतेन मया तदुदरे स्थितं॥ अगस्त्येन ततस्त्यक्ते निःसृतं च मया ततः॥
एतादृशं हि सामर्थ्यं तेन प्राप्तं शिवार्चया॥ ताडितो हं पुरा शूलैर्वै रुधाशिवकिंकरैः॥ अनिवा

र्यबला यस्मान्क्रूराः शंकराः॥ शुवना नो कृतः पूर्वं मत्याः सः शिवकिंकरैः॥ तेषामशक्यं लोकेषु
न किमप्यस्ति वस्तुतः॥ शंकराणां प्रतिद्वंद्वी नास्ति लोकेषु सर्वथा॥ तूष्णीं कुर्वंत्यस्मदादीनमरान् शं
करायतः॥ कुपिता न भवंत्येव सहसा शंकरध्रुवं॥ कुपिताश्चेत्तदा लोकान्दहिष्यंत्येव शंकराः॥ शं
कोदधीचिरत्यैव दग्धुमस्मान्समयद्यपि॥ तथाप्यस्मान्नदग्ध्वैव सगतः करुणानिधिः॥ धन्या हि शं
करायस्मात्सदयाः कुपिता अपि॥ अतो न शंकरादन्यो धन्यो नास्ति जगत्त्रये॥ किंत्वदत्तोसि शाप
थस्तेन विश्वपते ततः॥ क्षणमप्यत्र नमयासंस्थातुमुचितं ध्रुवं॥ सर्वेश्वरस्य शपथः केनोल्लंघ्यो
भविष्यति॥ तमुल्लंघ्य पुनः को वा क्षणं जीवितुमिच्छति॥ आदावेव जगन्मातुस्त्वया नाभ्यर्चनं न
कृतं॥ एतदेव त्वया दुःखं प्राप्यमद्य न संशयः॥ यदवज्ञाविधिः कृत्वाच्छिन्नमूर्धाभवत्सुरः॥ त
स्मिया वज्ञया दक्ष तव नाशो भविष्यति॥ याशर्वाणी भगवती भक्तमंगलदायिनी॥ तदवज्ञाग्नि
नादक्ष तव नाशो भविष्यति॥ यामाहुः परमां विद्यां परब्रह्मस्वरूपिणीं॥ तदवज्ञा०॥ यामाहुर्दे

श्रीः॥
१७६

वजननीं निष्कलामपि शाश्वतीं॥ तदवज्ञा०॥ यामाहुर्देवजननीं वेदवादरता बुधाः॥ तदव०॥ यामाहुर्निर्गु
णां नित्यामानंदामृततां शिवां॥ तदव०॥ यामाहुः परमां शक्तिं स्वशक्त्या धृतदिक्सुखां॥ तद०॥ यामाहुर
क्षरां शुद्धां वेदवेदांतवादिनः॥ तदव०॥ यामाहुरीश्वरार्धांगीं मंगसंगविवर्जितां॥ तदव०॥ यामाहुः स
च्चिदानंदस्वरूपामपराजितां॥ तदवज्ञा०॥ यामाहुः कृतकल्याणां कल्याणगुणसागरां॥ तदव०॥ या
माहुर्योगफलदां तथा योगफलप्रदां॥ तदव०॥ यया ततमिदं विश्वं यस्यामंते प्रलीयते॥ तदव०॥ यतंते य
त्प्रसादार्थं योगमार्गविचक्षणाः॥ तद०॥ या शंकरप्रिया साक्षात्सर्वमंगलरूपिणी॥ तद०॥ तिरस्कु
र्वंत्यल्पभाग्या मोहाद्भगवतीं शिवां॥ भवंति तत्तिरस्कारान्निर्भाग्या भुवि संततं॥ धं०॥ तएव दुर्भग
दुष्टास्त एवाभाग्यसंश्रयाः॥ तिरस्कुर्वंति ये मोहादंबां भगवतीं शिवां॥ यद्दर्शनं विरक्तानां सिद्धान
मपि दुर्लभं॥ तां दृष्ट्वापि त्वया मोहात्कथं नाराधनं कृतं॥ किं कर्तव्यं त्वया दक्ष दुरदृष्टं तवेदृशं॥ न वा
पि नापराधोस्ति दुरदृष्टाश्रयो यतः॥ इत्युक्त्वाध्वरशालायां स्थितो विष्णुस्तदंतरे॥ भवानी पूर्वदृ

शि०स्य
१७७

नोतं शापयामास स शंभवे॥ शंभुस्तद्वचनं श्रुत्वा शीतोपि क्रोधसंयुतः॥ क्रोधेन जनयामास वीरभद्रं दुरास
दं॥ वीरभद्रः॥ समुत्पन्नः सहस्राक्षः सहस्रपात्॥ सप्तभूमिं विश्वतो वृत्वा त्यतिष्ठद्दशांगुलं॥ समुत्पन्नो वी
रभद्रः प्रणम्य परमेश्वरं॥ कृतांजलिपुटः प्राह वाक्यं वाक्यविशारदः॥ वीरभद्र०॥ महारुद्र महारौद्र
सोमसूर्याग्निलोचन॥ किं कर्तव्यं मया कार्यं शीघ्रमाज्ञापय प्रभो॥ त्वत्क्रोधानलसंभूतः सोहं काला
ग्निरुज्वलः॥ कस्य दहनं कार्यं तद्वदस्व महेश्वर॥ शोषणीयाः किमीशान क्षणार्धे नैव सिंधवः॥
पेषणीयाः किमीशान क्षणार्धे नैव पर्वताः॥ क्षणेन भस्मसात्कार्यं ब्रह्मांडमुत किं हर॥ क्षणेन भस्मसा
त्कार्याः सुरा वा किमुतेश्वर॥ व्यत्यासः सर्वलोकानां किमु कार्योस्ति शंकर॥ कर्तव्यं किमुतेशान सर्व
प्राणिविनाशनं॥ ममाशक्यं न कुत्रापि त्वत्प्रसादान्महेश्वर॥ पराक्रमेण मत्तुल्यो न भूतो न भविष्य
ति॥ यत्र यत्कार्यमुद्दिश्य प्रेषयिष्यसि मां प्रभो॥ तत्कार्यं साधयाम्येव सत्वरं त्वत्प्रसादतः॥ नरास्तर
ति संसारसागरं शंकरस्मृतेः॥ हरातोहं न किं तर्तुं महापत्सागरक्षमः॥ यत्प्रेषितात्तृणेनापि महत्का

श्री॥
१७७

र्यमयत्नतः॥ क्षणेन शक्यते कर्तुं शंकरात्र न संशयः॥ लीलामात्रेण ते शंभो कार्यं यद्यपि सिद्ध्यति॥ तथाप्य
हं प्रेषणीयो ममैवानुग्रहो ह्ययं॥ शक्तिरेतादृशी शंभो ममापि त्वदनुग्रहात्॥ विना शक्तिर्न कस्यापि शंक
र त्वदनुग्रहं॥ त्वदाज्ञया विना कोपि तृणादीन्यपि वस्तुतः॥ नैव चालयितुं शक्ताः सत्यमेतन्न संशयः॥
त्वदाज्ञयाग्निर्दहति तृणादीनि सवस्तुतः॥ विना त्वदाज्ञामग्निश्च दग्धुं नैव क्षमो ध्रुवं॥ क्व शक्तिर्दहने
वह्नेस्तृणानामपि चालने॥ न तस्य शक्तिः सहसा विना शांतवशंकर॥ भीतस्त्वत्तोयमग्निश्च पवना
श्च तथा रविः॥ इंदुर्यमो वसुश्चापि तिष्ठतींद्रो न संशयः॥ ततो नियम्याः सर्वेपि देवास्त्वया महेश्वर
तथैवाहं नियम्यस्ते नानियम्योस्ति सर्वथा॥ प्रणतोस्मि महादेव भूयोपि प्रणतोस्म्यहं॥ प्रेषय स्वेष्ट
सिद्ध्यर्थं मामद्य हर सत्वरं॥ स्पंदोपि जायते शंभो दक्षिणस्य भुजस्य मे॥ भविष्यत्यद्य विजयो माम
त प्रेषय प्रभो॥ स्पंदो दक्षिणनेत्रस्याप्यधुना जायते मम॥ भविष्य०॥ हरात्माह विशेषोपि जायते म
मकश्चन॥ भविष्य०॥ शिवत्वत्पादकमलं संसक्तामलचेतसः॥ मम प्रतिपदं भावि शुभसंतानसंत

तिः॥ तस्यैव विजयो भावित स्येव शुभमन्वहं॥ यस्याभक्तिर्दृढा शंभो त्वयि शोभनसंश्रिये॥ इत्युक्तं तद्वचः श्रु
त्वा संतुष्टो मंगलापतिः॥ वीरभद्र जयस्वेति प्राहाशीर्दानपूर्वकं॥ महेश्वर०॥ यागकर्तुसमुद्युक्तो दक्षो म
ह्निमुखोधुना॥ तमद्य भस्मसात्कृत्वा पुनरायाहि सत्वरं॥ किं वर्ति छंति मेहेन ये दक्षाध्वरमंडपे॥ तानप्य
द्यैव सहसा भस्मसात्कुरु सत्वरं॥ सुराभवंतु गंधर्वा यक्षा वा ये च केचन॥ तानप्यद्यैव सहसा भस्मसा
त्कुरु सत्वरं॥ दधीचिकृतमुल्लंघ्य शपथं मयि तत्र ये॥ तिष्ठंति ते प्रयत्नेन ज्वालनीयास्त्वया ध्रुवं॥ तत्रा त्व
द्विमुर्द्धस्तावाद्ब्राचीनाथो यमो थवा॥ अविचार्यैव तान्सर्वान्यातस्त्वं प्रयूनतः॥ प्रपलाय्य गमिष्यंति
यदि विष्ण्वादयो भ्रमात्॥ तानाकर्षणशस्त्रेण ज्वालयानीय सत्वरं यतत्रो ल्लंघ्य शपथं मदीयं गर्व
तः स्थिताः॥ ते हि मद्द्रोहिणो तस्मान् ज्वालयानलमालया॥ सपत्नीकान्ससंभारान्दक्षयागस्थल
स्थितान्॥ प्रज्वाल्य भस्मसात्कृत्वा पुनरायाहि सत्वरं॥ तत्र त्वयि गते देवा विष्ण्वाद्याय दि सादरं॥
स्तोष्यंति त्वां तदाप्याशु ज्वालया ज्वालयैव तान्॥ देवान्मयि कृतद्रोहान् ज्वालामालासमाकुलैः

ज्वालय ज्वलनैः शीघ्रमाध्मायाध्माय पावकान्॥ विष्ण्वादीन्दक्षपक्षादीन्सपत्नीकान्सबांधवान्॥ प्रज्वा
ल्य वीरतदनुसलिलं सलिलं पिब॥ इत्युक्तं श्रीमहेशस्य श्रुत्वा वचनमादरात्॥ वीरभद्रो तिसंतुष्टः प्रण
नाम महेश्वरं॥ प्रणतं शंकरः प्राह वीरं जय जयेति तं॥ ततः प्रचलितः शीघ्रं वीरभद्रो द्विराड्विव॥ शंकरः
प्रेषयामास शोभार्थं कोटिशो गणान्॥ वीरभद्रस्य पुरतः पश्चादपि युगे गणाः॥ कल्पवृक्षसमु
त्सृष्टा पुष्पवृष्टिरभूत्तदा॥ तुष्टुवुश्चाग्रगणा वीरं विविधि चेष्ट चेष्टितं॥ वीरभद्रे प्रचलिते दक्षना
शाप सत्वरं॥ दक्षेण दुष्टचिह्नानि दृष्टानि विबुधैरपि॥ दक्ष वामभुजस्पंदो बहुधा समजायत॥ सुर
वामभुज स्पंदस्तथैव समजायत॥ भूकंपः समभूत्तत्र दक्षयागस्थले तदा॥ दक्षो ददर्श मध्याह्ने न
क्षत्राण्यद्भुतानि सः॥ दिशो बभूवुर्मलिनाः कर्बुरो भूद्दिवाकरः॥ परिवेष सहस्रेण संक्रांतश्चाद्भु
तविधिः॥ नक्षत्राणि तदा पेतु र्विद्युदग्निसमन्विताः॥ नक्षत्राणामभूद्वक्रा गतिश्चाधोमुखी तदा
गृध्रा दक्षशिरः स्पृष्ट्वा समुद्भूता सहस्रशः॥ गृध्रपक्षच्छायया सीत्सच्छायो यागमंडपात्॥ व

शि० रह
१७९

बहिरेयागभूमौ क्रोष्टारः कोटिशस्तदा॥ उल्कावृष्टिरभूत्तत्र श्वेतहस्तिकसंयुताः॥ तदा सोष्मा ववुर्वा
ताः पांसुवृष्टिसमन्विताः॥ शलभाश्च समुद्भूताः विवर्त्तानिलकंपिताः॥ नातश्च यपवने सर्वे सद
क्षाध्वरमंडपाः॥ देवान्वितेन दक्षेण यः कृतो नूतनः पुनः॥ वमुर्दक्षादयः सर्वे तदा शोणितम
द्भुतं॥ वमुश्च मांसखंडानि शाल्यानि मुहुर्मुहुः॥ सकंपाश्च बभूवुस्ते दीपा वाताहता इव॥ त
दा तनानि जातानि निखिलानि विषदान्यपि॥ निम्नायां कमलानीव कुमुदानीव संगरे॥ दक्षाद्यक्षीणि जा
तानि अश्रूवर्षीणि तत्क्षणे॥ जातस्तुषारवर्षोपि पद्मानीव वनांतरे॥ भुवि ते मूर्च्छिताः पेतुर्हाहता
स्म इति द्रुतं॥ तनवल्ली रसं जाता नदीवेगाहृता इव॥ पतित्वा तत्र स्थिता भूमौ क्रूराः सर्पा इवाह
ताः॥ कंदुका इव ते भूयः पतिताः पुनरुत्थिताः॥ ततस्ते तापसंतप्ताः रुरुदुः कुररा इव॥ रोदनाध्व
नि संक्रांताः संक्रांता क्रांतिका इव॥ सर्वे कुंठास्ततः सर्वे तदा कुंठितशक्तयः॥ खल्वाप कंठमाकंठ
विलंबुः कमठा इव॥ दुर्भगा भाग्यसंक्रांतं शिवं प्रजापराङ्मुखं॥ धिग्जन्मतत्वदक्षेति संजाता

श्री:॥
१७९

वाशरीरवाक्॥ तदानीमागतो भीमो वीरभद्रोरिमर्दनः॥ नारसिंहविनाशार्थं पुरारिरिव सत्वरं॥ उपें
द्रं द्रष्टुं तयोर्दक्षाद्याश्च ततः परं॥ ददृशुर्वीरभद्रं तं जलंतमिव पर्वतं॥ विलोक्येनं वीरभद्रं दक्षमाह
हरिस्तदा॥ प्रभंजनहतो क्रांतो नालवृंतद्विवस्थितं॥ विष्णु०॥ अयं रुद्रगणश्रेष्ठो वीरभद्रोरिमर्दनः
रुद्रक्रोधाग्निसंभूतः समायातोध्वरांगणे॥ अयमस्मद्विनाशार्थमागतोस्ति न संशयः॥ अनाका
मस्य नास्त्येव किमप्यत्र तवस्तुतः॥ श्रुत्वा त्वा रव्या नयेत्सर्वानधुनाद्यैव सत्वरं॥ ततः प्रशांतहृदयो
भविष्यति न संशयः॥ श्रीमहादेवशपथं समुल्लंघ्य भ्रमान्मया॥ यतः स्थितं ततः प्राप्यं मया दुःख
त्वया सह॥ शक्तिर्मम तु नास्त्येव दक्षाद्येतन्निवारणे॥ शपथोल्लंघनाद्य शिवद्रोहीयतोस्म्यहं॥ काल
त्रयेपि न यतो महद्राद्धो हि णं सुखं॥ ततो वरूपं मया प्राप्यं दुःखमद्य त्वया सह॥ सुदर्शनाभिधं वक्रं
मत्करिन्न लगिष्यति॥ शैवं चक्रमिदं यस्माद्दधीच्यक्षयकारणं॥ विनापि वीरभद्रेण मामेतच्चक्रमे
ष्यति॥ हत्वा गमिष्यत्यधुना सत्वरं हरसन्निधिं॥ शैवं शपथमुल्लंघ्य स्थितं मां चक्रमीदृशं॥ असंह

त्वैव सहसा स्वरूपं यैव स्थितं परं॥ अतः परमिदं चक्रं मयि न स्जस्यति ध्रुवं॥ गमिष्यत्यधुना शीघ्रं ज्वाला
मालासमाकुलं॥ वीरभद्रः पूजितोपि शीघ्रमस्माभिरादरात्॥ महाक्रोधसमाक्रांतो नास्मान्संरक्ष
यिष्यति॥ अकांडप्रलयेस्माकमागतो ह्यद्य हि हाहहा॥ हाहा बत त्वेतदानीं नाशोस्माकमुपस्थितः॥
शरण्योस्माकमधुना नास्त्येव हि जगत्त्रये॥ शंकरद्रोहिणं लोके कः शरण्यो भविष्यति॥ तनुना
शपि संप्राप्यैवास्माभिर्यमयातना॥ सा नैव शक्यते सोढुं बहुदुःखप्रदायिनी॥ शिवद्रोहिण
मालोक्य दद्याद्दंडं तो यमः स्वयं॥ तप्ततैलकटाहेषु पातयिष्यत्यसंशयं॥ मामिंद्रं वा विधिं वान्यं शि
वद्रोहपरं यमः॥ त्रिलोक्यां सहसा क्रूरः सकृपां न करिष्यति॥ यमस्य नयतोस्माकमपेक्षास्तं
स्ततो यमः॥ पातयिष्यति घोरेषु वह्निकुंडेषु सत्वरं॥ आरुह्य श्रीमहेशेन विष्णुर्ब्रह्मास्तु वा
यमः॥ मद्रोहपरं वित्तश्चेत्तमाग्नौ पातयति सः॥ अतोवश्यं यमः क्रूरः शिवद्रोहीजनानलः॥
अस्माननलकुंडेषु पातयिष्यत्यसंशयं॥ यद्यद्य वीरभद्रोयमस्मान्शूलेन सत्वरं॥ शोधयि

त्वा विपोथ्येत तदा न यमयातना॥ अस्माकमीदृशं भाग्यं कथं वा संभविष्यति॥ यत्त्रिशूलप्रो
ताः स्त्यक्ष्यामोसूनिहाधुना॥ त्रिशूलप्रोथिताः पूर्वं मुक्ता जाताः पुरादयः॥ मुक्ता जातास्तदन्येपि
त्रिशूलेन निपातिताः॥ शूलदर्शनमात्रेण मुक्तिर्भवति वस्तुतः॥ तत्संयोगात्तदा मुक्तिर्भवतीति
त्यत्र नाद्भुतं गंतुमेवाहमुद्युक्तः सर्वथा शापथोत्तरं॥ तथापि नगतं शीघ्रं दुष्टसंसर्गपापतः॥ अ
त एव हि सत्संगः कर्तव्यो सर्वदा बुधैः॥ असत्संगस्त्यतनेन परित्याज्यो हितैषिभिः॥ यद्यद्यद्यक्रि
यतेस्माभिः पलायनमितस्तदा॥ अस्मानाकर्षकैः शस्त्रैः स समाकर्षयिष्यति॥ स्वर्गं वा
भुवि पाताले यत्र कुत्रापि वा यतः॥ श्रीवीरभद्रशस्त्राणां गमनं न हि दुर्लभं॥ गणाश्च संति यावं
तः श्रीरुद्रस्य त्रिशूलिनः॥ तावतामपि सर्वेषां शक्तिरेतादृशी ध्रुवं॥ श्रीकालभैरवः काश्यां
नखाग्रेणेव लीलया॥ पुरा शिरांसि चिच्छेद चत्वारि ब्रह्मणोद्भुतं॥ एतादृशा गणाः संति को
टिशो मंगलापतेः॥ तेषामजेयं नास्त्येव त्रिषु लोकेषु वस्तुतः॥ एवमुक्त्वा स्थितो विष्णुः अ

शि०स्य १८१

तिम्लानमुखांबुजः॥ वीरभद्रोपि संप्राप तदैवाध्वरमंडपं॥ वीरभद्रः शूलपाणिर्नानागणसमन्वि
तः॥ ददर्श विष्णुप्रमुखान्यागमंडपसंस्थितान्॥ तान्दृष्ट्वा वीरभद्रो भ्रूकुटीकृतलोचनः॥
कृतांत इव पापिष्ठान्मृगेंद्र इव वारणान्॥ ततो विष्ण्वादयः सर्वे दत्तमुत्थाय सादरं॥ प्रणामान्क
र्तुमुद्युक्तास्तदा प्राह हरात्मजः॥५००॥ वीरभद्र०॥ रेरे हे महादेवशपथोल्लंघनं त्वया॥ क
थमद्य कृतं दुष्टगर्वः किमभवत्तव॥ तव श्रीरुद्रशपथोल्लंघने शक्तिरस्ति किं॥ को वा त्वमसि को
वा तव रक्षकोस्ति जगत्त्रये॥ वक्षो विदारयिष्यामि त्रिशूलेन हरे तव॥ सत्त्ववान्स्ति समायातु रक्षको
द्यममांतिकं॥ पातयिष्यामि भूपृष्ठे ज्वालयिष्यामि वह्निना॥ दग्धं भवंतमधुना पेषयिष्यामि
सत्वरं॥ रे रे हरे दुराचार त्वमेवं कर्तुमिच्छसि॥ श्रीमहारुद्रमाहात्म्यं किं न जानासि शाश्वतं॥ इ
त्युक्त्वा शूलमादाय वीरभद्रो रुणेक्षणः॥ हरिं विदार्य भूपृष्ठे पातयामास सत्वरं॥ ततो दक्षं
समालोक्य कश्यपाभिकोरिशास्तदा॥ संताड्य पातयामास विदार्य त्रिणतत्तनुं॥ ततो विधी

श्री:॥ १८१

द्रपक्षादीन्विदार्य पृथिवीतले॥ पातयामास शीघ्रेण क्रोधाक्रांतारुणेक्षणः॥ वीरभद्रो विदार्या
पि विष्णुब्रह्मपुरोगमान्॥ नाभूच्छांतोद्धुतः क्रोधः फणिराडिवमंत्रितः॥ दिशो विलोकयामास
कः कुत्रास्तीत्यनुक्षणं॥ वीरभद्रो हताराति केसरीव वनं द्विपान्॥ वभौ हत्वा हरीद्रादीन्सपत्नीका
न्गणान्वितान्॥ त्रिपुरारिरिवाराध्यो हत्वा त्रिपुरकाननं॥ रेजे तदा वीरभद्रस्त्रिशूलं भ्रामयन्करे
क्रुद्धारुणाक्षसंवर्तः प्रज्वलत्पर्वतोपमः॥ वीरभद्रहतास्तस्थुर्भुवि विष्णुपुरोगमाः॥ तूर्णं वज्राह
ताः पूर्वपर्वता इव गर्विताः॥ अन्यायासेन हत्वैतान्वीरभद्रस्ततोग्निना॥ ज्वालयामास विष्ण्वा
दीन्दीपाग्निः शलभानिव॥ वीरभद्रः क्षणार्धेन दग्ध्वा विष्णुपुरोगमान्॥ अट्टहासं ततश्चक्रे
पूरयञ्जगतांत्रयं॥ स्वैरीकसमाक्रांता ततो नंदनसंभवा॥ पुष्पवृष्टिरभूद्रम्या वीरभद्रेग
णान्विते॥ ववुर्गांधवहाः शीताः सगंधास्तदनंतरं॥ देवदुंदुभयो नेदुः स्वयमेव ततः परं॥ दिशो
वभूवुर्विमलाः भानुमानपि संबभौ॥ भूताः प्रशांताः सर्वे पि ततो भूमंगलं भुवि॥ वीरभद्रः

शि०स्य १८२ त्रा

प्रचलितः कृतकार्यस्ततः परं॥ विनाशितदृढध्वांतो भानुमानिव सत्वरं॥ उत्फुल्लपद्मपत्राक्षो वीरभ
द्रो गणान्वितः॥ ददर्श पार्वतीकांतं ननाम च पुनः पुनः॥ कृतकार्यं वीरभद्रं दृष्ट्वा संतुष्टमानसः॥
वीरं वीरगणाध्यक्षं चकार परमेश्वरः॥ ततो हिमगिरिप्रांते शिवपूजापरायणान्॥ दृष्ट्वा स्वभक्तान्
गौरीशस्तद्देशं प्राप्य लीलया॥ ततस्तत्पूजितः शंभुः स्तुतश्च विविधैः स्तवैः॥ संतुष्टोऽभून्महाद
वः सगणो मंगलान्वितः॥ ततः कस्मैचिद्दीनाय ददौ विपुलमादरात्॥ दृष्ट्वा लक्ष्मीं तदा तस्मै द
दौ लक्ष्मीं गुणान्वितां॥ ततः कस्मैचिदीशानो ब्रह्मत्वं च ददौ ततः॥ दृष्ट्वा सरस्वतीं तस्मै ददौ वै वामनो
हरः॥ ददौ कस्मैचिदिंद्रत्वं शचीं स दृष्ट्वा ततः परं॥ तस्मै शचीं ददौ तस्मै स्वर्गलोकं च शंकरः॥ गंधर्व
दीस्तथा शंभुर्यथापूर्वमकल्पयत्॥ ततः शिवान्वितो रेमे स्वतंत्रः परमेश्वरः॥ अत एव यदा
ध्यांता गणपति न शंकरं॥ तदा नश्यति विघ्नाद्याः रुद्रो द्राक्ष्व वह्निना॥ कामः कृतशिवावज्ञः
पपात नरके पुरा॥ अतो वज्ञां महादेवे न कुर्वंति हितैषिणः॥ मदनेन मुदा पूर्वमितरा मरण्यैतु

श्री:॥ १८२

ल्पितं॥ विशाय शंकरं मोहास्त्वनाशः परिकल्पितः॥ इंद्रः पूर्वं समाहूय वरुणादीनुवाच तं॥ काश्चा
क्तिरस्ति भवतां तां वदंत्विति सादरं॥ इति तद्वचनं श्रुत्वा स्वस्वशक्तिं यथार्थतः॥ सर्वे निवेदयामासु
रिंद्रायेंद्रहितार्थिनः॥ ततो मन्मथमालोक्य स्वसभामध्यवर्तिनं॥ तव का शक्तिरस्तीति देवेंद्रः
प्राह मन्मथं॥ मन्मथ०॥ शचीपते मदीयानामस्त्राणां का मया गतिः॥ मदस्त्राणां गतिः क्वापि
नैव प्रतिहता ध्रुवं॥ मया मदीयशस्त्रेण मुनयोऽपि वशीकृताः॥ वशीकृता मया सिद्धा मदीयैः शा
स्त्रपंजरैः॥ कुसुमैर्यैर्वशास्त्राणि मृदुलानि तथापि तैः॥ लोकत्रयजयं कृत्वा वसाम्यहमहर्निशं॥ प्रयुक्ता
नि मयास्त्राणि शिवाद्येष्वपि शंकरे॥ यतो मदीयशस्त्राणां लक्ष्यभूतमिदं जगत्॥ इत्युक्तं सतद्वचः श्रु
त्वा शचीपतिरुवाच तं॥ शृणु मद्वचनं काम सावधानं यदुच्यते॥ इंद्र०॥ अवतीर्णोऽस्ति भूलोके प्रब
लस्तारकासुरः॥ तेनोपद्रविताः सर्वे सुरा मत्प्रमुखाः सदा॥ ४०॥ स शुक्ते तारको नित्यं यज्ञ
भागान्यथेच्छया॥ अत्रागत्य स्वर्गलोके पीडामपि करोति सः॥ समानगणयत्येव विलुप्त

C. BHAU DAJI MEMORIAL

शि०स्य
१८५

प्यति दुर्जनः॥ विधिम प्यमरानन्यानपि सर्वात्मनाबली॥ सचकार पुरा युद्धं विष्णुना सहवीर्यवान्॥ युद्धे
पराजितो विष्णुस्तेनैवामिततेजसा॥ तस्य हुंकृतिमात्रेण चूर्णा भवंति पर्वताः॥ विदारिता भवत्येव पृ
थिवी च सकानना॥ तत्कोपश्वासमात्रेण महापर्वतसन्निभाः॥ कोटिशः प्रबलाः सद्यो भवंत्यसुर
पुंगवाः॥ तस्य संहारकः कोपि नास्त्यस्मासु ततः सदा॥ अस्माभिः प्राप्यते दुःखं तत्कृतो योगसं
भवः॥ एतदर्थं स गुरुणा ब्रह्मलोकं गतं पुरा॥ मया निवेदितं दुःखं ब्रह्मणे कामतत्कृतं॥ तदापि
खिन्नवदनं मां दृष्ट्वा सगुरुं विधिः॥ प्राह मां विधिवद्ध्यात्वा बहुकालं प्रयत्नतः॥ ब्रह्मोवाच॥ तारका
सुरसंहर्ता रुद्रो रौद्रोथवा तयोः॥ यतस्तद्धनने शक्तिर्यतस्तावमिततेजसौ॥ रुद्ररौद्रसमो ना
स्ति सुरेष्वन्येषु वा ततः॥ तारको रुद्ररौद्रान्यतरेणैव मरिष्यति॥ तारकासुरसंहर्ता विष्णुस्तु न
भविष्यति॥ विष्णुनाल्पवीर्येण कार्यं तद्धननं कथं॥ श्रीरुद्रशक्तिकोद्यंशोप्युपेंद्रेनि यतस्ततः
तस्य तद्धनने शक्तिर्न भविष्यति वस्तुतः॥ स्वतंत्र श्रीमहारुद्रस्तस्य रुद्रस्य वस्तुतः॥ कर्तव्यं नास्ति कु

श्रीः॥
१८५

त्रापि नित्यानंदो यतः प्रभुः॥ तदिच्छास्मदद्वेष्टेन यदि संवलिता भवेत्॥ तदा करिष्यत्यस्माकं कार्यं
स गिरिजापतिः॥ तारकासुरसंहर्ता नरौद्रोपश्चकश्चन॥ तत्संहर्ता षण्मुखोन्यो रौद्रोपि न भवि
ष्यति॥ तथा च षण्मुखोत्पत्तिर्भविष्यति यथा तथा॥ प्रयत्नश्चिंतनीयोस्ति सर्वथा सर्वसाधनैः
षण्मुखो रुद्रवीर्येण भविष्यति यदा तदा॥ स संहर्ता तारकस्य भविष्यत्येव सर्वथा॥ अयमर्थो म
या ज्ञातो ध्यानेनाद्य मया ततः॥ विश्वासो मयि कर्तव्यो नान्यथा मद्वचो ध्रुवं॥ शिवयोः संगमेनै
व शिववीर्यसमुद्भवः॥ भविष्यति महावीर षण्मुखस्तारकाशनिः॥ शिवयोः संगमः शीघ्रं
भवेद्यदि तदा ततः॥ तारकासुरसंहर्ता जातस्तं नाशयिष्यति॥ इति तद्वचनं श्रुत्वा ब्रह्मणा
प्रेपितोधुना॥ समागतोस्मि कामातस्तत्कार्यं कुरु सादरं॥ इतींद्रवचनं श्रुत्वा मन्मथो मदमो
हितः॥ प्राह प्रगल्भवचनं सुविनाशैकसाधनं॥ मन्मथ उ०॥ मदीयपुष्पशस्त्राणि योगि
नामपि मानसं॥ मोहयिष्यंत्यतस्तद्वन्मोहयिष्यति शंकरं॥ यथा मदीयशस्त्रेण मोहिता

भवदादयः॥ भविष्यति तथैशोपि भवंत इव मोहितः॥ भवतु श्रीमहादेवो वस्तुतः सुरपुंगवः॥ मद
स्त्रलक्ष्यभावेन भवद्भिः समो ध्रुवं॥ इति तद्वचनं श्रुत्वा संतोष्य कुसुमायुधं॥ बाणप्रयोगं गौरीशे
कुरुष्वेत्याह सत्वरं॥ ८४॥ इति तद्वचनं श्रुत्वा मन्मथः परमेश्वरे॥ बाणप्रयोक्तुमुद्योगं चकार भ्रां
तमानसः॥ ततः समागतः शीघ्रं ज्वालामालासमाकुलः॥ भालाक्षभालसंभूतश्चित्रभानु
र्भयंकरः॥ स पावकः समागत्य प्रज्वाल्य कुसुमायुधं॥ भस्मावशेषं कृत्वैव प्रशांतस्तदनंतरं
स मन्मथस्ततो नीतस्तैर्दैवयमकिंकरैः॥ पातितश्चातिघोरेषु नरकेषु प्रयत्नतः॥ अतो नान्य
समं शंभुमन्यतुल्यतया भ्रमात्॥ ये भिजानंति दुर्वृत्ता स्तेषामेतादृशी गतिः॥ सत्यात्मा हम
खिलं अत एव भवानपि॥ सर्वदेवोत्तमत्वेन जानीहि गिरिजापतिं॥ महादेवोखिलाराध्यः सर्वदेव
शिखामणिः॥ न ततोस्त्यधिको विप्र न तत्तुल्योथवा ध्रुवं॥ शिवतत्वान्यतुल्यत्वमुक्तं मोहवशा
त्वत्ततः॥ त्वया तदुक्तिमात्रेण पातकं महदर्जितं॥ अतस्तत्पापशांत्यर्थं श्रीशैलस्य प्रदक्षिणं

सहस्रवारं यत्नेन कुरु मौनपुरःसरं॥ तत्प्रदक्षिणकालेषु रुद्रमावर्तयादरात्॥ रुद्राध्यायजपादेव य
तो नाशं यास्यति पातकं॥ उद्धूलनं त्रिपुंड्रं च तथा रुद्राक्षधारणं॥ कुरु यत्नेन तन्नित्यं मनसापि न लंघय
यस्मादुद्धूलनादीनि द्विजैः कार्याणि संततं॥ तस्मात्त्वयापि यत्नेन तानि कार्याणि संततं॥ मापि वो
द्धूलनं त्यक्त्वा जलमल्पमपि द्विज॥ त्रिपुंड्रधारणं त्यक्त्वा मापिबापस्तथा द्विज॥ रुद्राध्यायजपं
त्यक्त्वा मापिबापस्तथा द्विज॥ पंचाक्षरजपं त्यक्त्वा मापिबापस्तथा द्विज॥ अयं धर्मोपदेशस्तु यः
कृतोस्ति मया द्विज॥ सोयं मोक्षप्रदः सत्यं सत्यं सत्यं न संशयः॥ शिवं देवोत्तमं मत्वा पूजायस्व
भृति द्विज॥ शिवान्यसुरतुल्यत्वं शिवे स्वप्नेपि मा वद॥ शिवान्यसुरतुल्यत्वं ये वदंति सदा शिवे
तेषां वंशक्षयः शीघ्रं भविष्यति न संशयः॥ शिवान्यसुरतुल्यत्वं ये वदंति सदा शिवे॥ ते पतिष्यं
ति नरके यावदाचंद्रतारकं॥ शिवान्यसुर०॥ नैतैः सहस्रभ्रमेणापि कुरु संभाषणं द्विज॥ देवोत्तमं
महादेवमन्यथा ये वदंति ते॥ चंडालयोनिसंभूता जन्मजन्मांतरे ध्रुवं॥ देवोत्तमं महादेवमन्यथा

शि० रह
१८६

ये कुर्वंति ते॥ भूयो भूयो भविष्यंति चंडालाएव सर्वथा॥ अतः संतः सावधानं सततं शांतचेतनाः
उमाकांतं प्रयत्नेन भजंति भवभीरवः॥ संसारानलतप्तानामुमाकांतार्चनामृतं॥ संसारतापं
पापं च सद्यो दूरीकरोति हि॥ भगवंतमुमाकांतं सततं शंसितव्रताः॥ संतः प्रशांतमनसः प्रज
यंति स्तुवंति च॥ कः कृतांत कृतांतं तं न चिंतयति संततं॥ एतः स्वांते संवसते नितांतं श्रुति संततं॥
स्कंद०॥ इति शैववचः श्रुत्वा निर्धूताखिलकल्मषः॥ सर्वोपनिषदां सारं श्रुत्वा तुष्टो बभूव सः
ततः स्वपापनाशार्थं श्रीशैलस्य प्रदक्षिणं॥ कर्तुं संकल्प्य विधिवत्तं नत्वा सपर्यया मुदा॥ अतः सर्वो
त्तमः सांबो नंदिकेश प्रयत्नतः॥ नित्यमव्यभिचारेण पूज्यस्त्यक्त्वान्यदैवतं॥ भानुरुवाच॥ इति श्री:॥
स्कंदवचः श्रुत्वा नंदिकेशोऽतिहृष्टधीः॥ शिवप्रेषितवृत्तांतं वक्तुं समुपचक्रमे॥ नंदिकेश्वर उवा १८६
च॥ स्कंद योगरतं शंभुस्त्वां दृष्ट्वा शैलवर्त्तिनं॥ वृत्तांतमपि विज्ञाय समायाहीति चाब्रवीत्॥ इति
तद्वचनं श्रुत्वा स्कंदः संतुष्टमानसः॥ दध्यौ महेश्वरं सांबमानंदाश्रूणि संत्यजन्॥ ततः प्राह

तदा स्कंदो नंदिकेशं मुदावहं॥ समागतं त्वया नंदिन्केन मार्गेण तद्वद॥ ५०॥ नंदिके० श्वर०
कैलासान्निर्गतः काशीं संप्राप्तोसि शिवप्रियां॥ यस्यां त्यक्ततनुर्मर्त्यः प्राप्नोति शिवमव्ययं॥ यस्यां स्थि
तो नरो त्वेपि सुरैः संपूज्यते सदा॥ सा काशी मुक्तिदा भाग्यान्नयनेरतिथीकृता॥ यस्यां तीर्थं महत्पु
ण्यं मणिकर्ण्याभिधं शुभं॥ सा काशी०॥ यस्यां काश्यां महादेवः क्रीडते वामसमन्वितः॥ सा का०
यस्यां वैश्वेश्वरं लिंगं मुक्तिलिंगं प्रकीर्तितं॥ सा काशी०॥ यस्यामंबा मोक्षभिक्षां प्रयच्छति शि
वप्रिया॥ सा काशी०॥ यस्यां समस्तदेवानां शास्ता श्रीकालभैरवः॥ सा काशी०॥ भानुरुवाच॥
इति तद्वचनं श्रुत्वा षण्मुखोत्यंतहृष्टधीः॥ शिवं द्रष्टुं समुद्युक्तः काशीं पापविनाशिकां॥ संप्राप्या
नंददां काशीं स्कंदः संतुष्टमानसः॥ मणिकर्णीजले स्नात्वा ययौ विश्वेश्वरालयं॥ ततः स्नात्वा ज्ञा
नवाप्यां मुहूर्त्तं च समाहितः॥ ज्ञानेशादीन्समभ्यर्च्य मुक्तिमंडपमाश्रितः॥ ततो ददर्श विश्वेशं
सर्वदेवोत्तमोत्तमं॥ दृष्ट्वा समर्चयामास पूजाद्रव्यैरनेकधा॥ ततस्तुष्टाव रुद्रेण रुद्रसूक्तेन तथेश्वरं

शि०र० १८६ ततः प्रसन्नो विश्वेशस्तमुवाचातिहृष्टधीः॥ विश्वेश्वर०॥ अत्र मत्पूजनासक्तो नित्यं मां वीक्ष्य
न्मुदा॥ संवसेतो न गंतव्यं स्कंद कुत्रापि सर्वथा॥ कृत्वा लहृद्दर्शनपूर्वं मत्पुरस्थितमास्तिकाः॥ ततो
मामर्चयिष्यंति स्कंदातः संवसादरात्॥ इति दत्वा वरं तस्मै नंदिकेशः स्वपूजकं॥ त्वमप्यत्रैव सततं वस
स्वित्याह शंकरः॥ इतीतीशोक्तो नंदिकेशस्तस्थौ विश्वेश्वरायतः॥ स्कंदोपीशपुरस्तस्थौ समक्षं शं
कराग्रतः॥ पूजयित्वा स्थितः शंभुं सर्वदेवोत्तमं प्रभुं॥ शिवपूजाप्रभावेन काशीं संप्राप्य षण्मु
खः॥ अतो भवंतो मुनयः पूजयंत्व महेश्वरं॥ स सर्वदेवदेवेशश्चतुर्वर्गफलप्रदः॥ श्रीशिवउवाच॥
इति भानुवचः श्रुत्वा श्रीशैलं मुनयो ययुः॥ तपसा तत्र मां नित्यं पूजयामासुरन्वहं॥ मय्येवार्पितकर्मा श्रीः॥
णामनुदिनं मय्येवसक्तात्मना मत्पूजारतचेतसां नियमतो मद्ध्यानपूतात्मनां॥ सौभाग्यं सुख १८६
मक्षयं च सततं दास्याम्यपवर्गं ततः॥ सत्यं सत्यमिदं गिरीन्द्रतनये सत्यं पुनः शोभने॥ ६२०॥
इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे चतुर्दशोऽध्यायः॥ १४॥ ॥छ॥ ॥छ॥

श्रीपार्वत्युवाच॥ महेशदेवदेवेश तव पूजनमन्वहं॥ कथं कार्यं साधनानि कानि शंभो तवार्चने॥ १॥
शिव उवाच॥ नंदिकेशः पुरा देवी मामभ्यर्च्य प्रयत्नतः॥ पूजाविधानं पप्रच्छ ममैव परमात्मनः॥
नंदिकेश०॥ गौरीवल्लभ देवेश सर्वज्ञ करुणानिधे॥ शिवपूजाविधानं मे निरूपय कृपानिधे॥ शि
वस्य पूजनात्पूर्वं किं कर्त्तव्यं प्रयत्नतः॥ शिवपूजासाधनानि कानि पापहराणि च॥ कीदृशः शिवपू
जायामधिकारी महेश्वर॥ कीदृशेन कृता पूजा तव प्रियकरा विभो॥ कथं ध्येयोसि भगवन्पूज
नीयः कथं भवान्॥ कथं वा पूजितो मोक्षं प्रयच्छसि सदाशिव॥ शिवउवाच॥ साधु साधु गण
श्रेष्ठ प्रश्नोयं शुभदस्तव॥ वक्ष्ये पूजाविधिं सम्यक्शृणु सर्वार्थदायकं॥ मत्स्वेविधाय यां पूजां म
द्भक्तो मत्परायणः॥ मुच्यते सर्वपापेभ्यः सेयं पूजा मयोच्यते॥ पूज्योहमेव सर्वेभ्यो देवेभ्यो देवपुं
गवः॥ सर्वोत्कर्षेण पूज्योहं सर्वेभ्यो प्युत्तमो यतः॥ देवाधिदेवं विश्वेशं महादेवं जगत्प्रभुं॥ सर्वो
त्कर्षेण संपूज्य मुच्यते सर्वकिल्बिषैः॥ सर्वदेवाधिदेवं मामनन्यसदृशं शिवं॥ योन्यतुल्य

शि०स ॥१८७॥

तयोवेत्ति स एव श्वपचाधमः॥ विश्वाधिकं विभुं रुद्रं यान्यतुल्यं वदिष्यति॥ स जारज इति ज्ञेयः सं
ततिस्तस्य जारजा॥ ईशानं सर्वविद्यानां यो मामन्यसमं वदेत्॥ स मद्यपवरो ज्ञेयः सत्यं सत्यं
न संशयः॥ ईश्वरं सर्वभूतानां यो मामन्यसमं वदेत्॥ स ब्रह्महेति विज्ञेयो न तेन सह संवदेत्॥
उमापतिं महादेवं यो मामन्यसमं वदेत्॥ स गोसहस्रहा नित्यं न तेन सह संवदेत्॥ श्रीनीलकंठं
विश्वेशं यो मामन्यसमं वदेत्॥ स चांडाल इति ज्ञेयः सत्यं सत्यं न संशयः॥ शिवोन्यसुरतुल्योप
मिति यस्तु वदिष्यति॥ तज्जिह्वां द्रुतमुत्पाद्य पुरीषेण विलेपयेत्॥ यो मामन्यसमं मत्वा क्षणार्धं
वा वसेन्नरः॥ स महाघोरनरके स्थास्यत्याकल्पमन्वहं॥ शिवोयमन्यदेवेभ्यः कनिष्ठ इति यो
वदेत्॥ स सर्वयातनाभोक्ता कल्पांतेपि न मुच्यते॥ स नष्टः स महापापी स मातृपितृहा शिवे॥ य
स्तु मां शिवमाराध्य मनाराध्येव संवसेत्॥ स मद्यप इति ज्ञेयः सर्वदा सर्वदेहिभिः॥ यस्तु मां
शिवमाराध्यमना०॥ स ब्रह्महेति विज्ञेयः सर्वदा सर्वदेहिभिः॥ यस्तु मां०॥ स नित्यं स्वर्णहारी

श्रीः॥ ॥१८७॥

विज्ञेयः सर्वदेहिभिः॥ यस्तु मां०॥ स गुरुस्त्रीरतो ज्ञेयः सर्वदा सर्वदेहिभिः॥ यस्तु०॥ यो नित्यं शि
वपूजायां निरतः शिवतत्परः॥ स विष्णुमुख्यैरमरैः पूजनीयो न संशयः॥ शिवपूजापरं दृष्ट्वा देववि
ष्णुपुरोगमाः॥ पूजनीयं प्रस्तुवंति नमंति च मुहुर्मुहुः॥ अयं धन्यतरो मर्त्यः शिवपूजापरायणः॥ भाग्य
वानिति सर्वेपि वदंत्येवामराः सदा॥ यद्देहापगमे मोक्षो यस्य तस्यैव देहिनः॥ महादेवस्य पूजायाम
तिर्भवति नान्यथा॥ शिवोयं सर्वदेवानां प्रभुरित्यस्ति या मतिः॥ सा तस्य यस्य यद्देहापगमे शांकरं पदं
सर्वोत्कृष्टं शिवं मत्वा मामर्चयति यो नरः॥ तस्मै दास्यामि कैवल्यं नान्यस्मै सत्यमुच्यते॥ तस्मात्साधार
णा भक्तिर्मयि सेवात्र मे शिवे॥ स स्वमुक्तिं कांतायाः कांतः सत्यं वरानने॥ सर्वदेवाधिदेवं मां शिवं योन्य
र्चयिष्यति॥ स देवोरगगंधर्वयक्षपूज्यो भविष्यति॥ यो मत्पूजापरो मर्त्यस्तद्द्वारि सकलासुराः॥ कृतांज
लिपुटा नित्यं स्थास्यंत्येव न संशयः॥ अनन्यशरणो यस्तु शिवपूजां करिष्यति॥ न तस्य नरकावासः
कदाचिदपि सर्वथा॥ अनन्यशरणो यस्तु शिवपूजापरायणः॥ न तस्य संपदो दूरे सत्यं सत्यं न संशयः॥

शि॰ रह
॥१८८॥

तस्यैश्वर्यं तस्य विद्या यस्य भक्तिः सदा शिवे ॥ तस्यैव मुक्तिरप्यंते सत्यं सत्यं न संशयः ॥ यस्य नास्ति गृहे
नित्यं शिवलिंगार्चनं शिवे ॥ तद्गृहं चंडचंडालगृहमेव न संशयः ॥ शिवलिंगं न यस्यास्ति गृहे बिल्वदला
र्चितं ॥ तद्गृहं दूरतस्त्याज्यं चंडालागारवद्ध्रुवं ॥ शिवलिंगं न यस्यास्ति गृहे बिल्वदलार्चितं ॥ तद्गृहं० ॥
शिवलिंगं न यस्यास्ति गृहे बिल्वादिपूजितं ॥ तद्गृहे जलमप्यल्पं न पेयं सर्वथा द्विजैः ॥ येन नाभ्यर्च्य
ते लिंगं तेन भाषणमपि सर्वथा ॥ न संवदेत् भ्रमेणापि तेन सार्धं न संवसेत् ॥ शिवलिंगार्चनं यस्तु
न करिष्यति सन्मतिः ॥ तत्स्पर्शे भानुमालोक्य सचैलं स्नानमाचरेत् ॥ शिवलिंगार्चने यस्य नास्ति
साधारणी मतिः ॥ तत्स्पर्शे भानुमालोक्य स० ॥ शिवलिंगार्चने कश्चः शिवलिंगार्चकस्तदा ॥ चंडा
लोपि वरः सत्यं न शिवान् न चैको द्विजः ॥ शिवलिंगार्चनं नित्यं यस्त्यजेदविवेकतः ॥ स याति नरकं घोरं
यावदाचंद्रतारकं ॥ शिवलिंगं समभ्यर्च्य यः पश्यति शिवं मुदा ॥ स एव सर्वभाग्यानामालयो भवति
ध्रुवं ॥ शिव किं बहुनोक्तेन नित्यं यः शिवपूजकः ॥ स ममातितमः सत्यं सत्यं सत्यं न संशयः ॥ एक

श्रीः ॥
१८८

मेव महादेवं भक्त्या योभ्यर्चयिष्यति ॥ स शंकर इति ज्ञेयः स एव मम संमतः ॥ एकोहं पूजितो नित्यं दास्या
मि परमां गतिं ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ अनन्यशरणो यस्तु सर्वान्धर्मान्विहाय मां ॥
यार्चयिष्यति पुण्यात्मा स एव मम संमतः ॥ यः शंकरैकशरणो यः शिवैकार्चनप्रियः ॥ स एव सर्वधर्मा
णामाश्रयो भवति ध्रुवं ॥ धर्मार्थमोक्षकामार्थी मामभ्यर्च्य सदाशिवं ॥ धर्मार्थकाममोक्षाणां क्षिप्रं
भवति भाजनं ॥ ऐहिकामुष्मिकं वापि यः समाकांक्षते फलं ॥ समामभ्यर्च्य विश्वेशं समवाप्नोति तत्फ
लं ॥ मामभ्यर्च्य महादेवं स्वशक्त्या मनुजाः सदा ॥ कदाचिदपि दुःखानि न प्राप्नोत्येव मानवः ॥
यामदर्पितं तत्कर्म मदाराधनतत्परः ॥ समद्भक्तस्ततस्तेन कृता पूजा मम प्रिया ॥ यस्यास्ति मत्तमात
ग स्वामित्वेच्छाति सौख्यदा ॥ तेन मल्लिंगमभ्यर्च्य सत्यं सत्यं मयोच्यते ॥ यस्योच्चैःश्रवस्तुल्याश्वस्वामि
त्वेच्छाति सौख्यदा ॥ तेन० ॥ यस्य राज्याधिपत्येच्छा मोक्षेच्छापि वरानने ॥ तेन० ॥ यस्य विष्णुपदवां
छा मोक्षवांछापि शोभने ॥ तेन० ॥ यस्य ब्रह्मपदवांछा मोक्षवांछापि शोभने ॥ तेन० ॥ यस्येंद्रपदवां

शि०स्य च्छामोक्षं वांछापि०॥ तेन०॥ यस्य वह्निपदे वांछा मोक्ष०॥ तेन०॥ यस्य चंद्रपदे वांछा मोक्ष०॥ तेन०॥
१८९ यस्य सूर्यपदे वांछामोक्ष०॥ तेन०॥ यस्य कालपदे वांछामोक्षस्य॥ तेन०॥ यस्याप्पतिपदे वांछामो
क्ष०॥ तेन०॥ यस्य वित्तेशता वांछामोक्ष०॥ तेन०॥ यस्य विद्याधिपत्ये च्छामोक्ष०॥ तेन०॥ गाणप
पत्यस्य वांछापि यस्य संजायते शिवे॥ तेन०॥ परमेश्वरमाराध्यं सर्वैश्वर्यपतिं शिवं॥ अनाराध्ये
कमप्यर्थं नैव प्राप्नोति मानवः॥ धनवानेन धनदो नदीद्रो धनप्रदः॥ ते ताहमेव धनवान्पूज
नीयो धनार्थिभिः॥ ब्रह्मोपेंद्रचंद्राद्यैः शेषैरमैरपि॥ पूजनीयो ततएवाहं पूजनीयो नरैरपि॥
ब्रह्मोपेंद्रप्रभृतयो देवाः सर्वमुनीश्वराः॥ मामर्चयंति मामेव शरणं प्राप्नुवंति च॥ सर्वेभ्य एव श्री:॥
देवेभ्यो यत एव महानहं॥ तत एव महादेवं वदंति निगमाश्रमा॥ राजमध्ये महान्राजा महाराजे १८९
ति कीर्त्यते॥ यथा तथैव देवेषु महादेवोहमेव हि॥ नमत्तोप्यधिको देवः सर्वेभ्योपि महानहं॥ अत एव
महादेवः प्रथितो निगमेष्वहं॥ यं यमुद्दिश्य कर्माणि करिष्यंति फलेप्सवः॥ तानि कर्माणि मय्येवं

प्रविशंति फलप्रदे॥ विष्णुमुद्दिश्य यत्कर्म कृतं तद्धि स्मृतं मयि॥ निवेद्यते फलं दातुं मया शक्तेन स्वयं शि
वे॥ एवमिंद्राग्निवरुणसूर्यचंद्रादिभिः शिवे॥ निवेद्यतेखिलं कर्म स्वमुद्दिश्य कृतं मयि॥ फलप्रदाता
भगवान्कर्मणामहमेव हि॥ तस्मान्मदन्यः फलदः कर्मणां नास्ति सर्वथा॥ प्रजाभ्यः करमादाय राज्ञे
प्रकृतिभिर्यथा॥ निवेद्यते तथा मह्यं कर्म देवैर्निवेद्यते॥ विष्णुब्रह्मादयः सर्वे मम प्रकृतयस्ततः॥
निवेद्यतेखिलं कर्म तेरानीय मयि प्रिये॥ यं यं देवं समुद्दिश्य नमस्काराः कृता नरैः॥ ते सर्वेपि
नमस्काराः प्रविशंत्येव मां शिवे॥ यं यं देवं समुद्दिश्य या या पूजा कृता मुदा॥ सा मय्येव प्रविशत्य
व पूः सर्वापि सर्वथा॥ यथाधिकारिणे दत्तापुष्टभारत्न संचयः॥ राजानं प्रविशत्येवं मयि पूजा
धितिष्ठति॥ साक्षान्मत्पूजने येषामधिकारो न विद्यते॥ तेषामन्यत्र चेत्पूजा सा मय्येवाधिति
ष्ठति॥ राज्ञे साक्षाद्धनं दातुमशक्तो मनुजाधमः॥ धनं तु प्रकृतिद्वारा प्रवेशयति भूपतौ॥ ८८
साक्षान्मत्पूजने यस्तु समर्थस्तेन सर्वदा॥ ममैव पूजा कर्तव्या नान्यस्याल्पस्य सर्वथा॥ ८९

द्रव्यदाने समर्थो यः साक्षाद्दातेतरस्ततः॥ राज्ञा द्रव्यं ददात्येव साक्षान्मानपुरःसरं॥ अतः साक्षा
द्दत्तं दत्तं येन राज्ञा मनीषिणा॥ तेन राजप्रसादेपि प्राप्यते सर्वसौख्यदः॥ यः साक्षाद्वृत्तिराजानेय
स्तु राजप्रसादितः॥ स राजान्यान्प्रधानांस्तु नाराधयति सर्वथा॥ एवमेव मदार्चायामधिकारीस्व
तः स तु॥ मदन्यान्नार्चयत्येव मत्स्वरूपविदेतरा॥ किमन्याराधनेनापि मदन्यः फलदस्तु न॥ त
तोहमेक एवार्यैः पूजनीयः प्रयत्नतः॥ शिवान्यः फलदास्तीति प्रवदंत्यशिवास्ततः॥ तादृशानशि
वान्स्पृष्ट्वा सचैलं स्नानमाचरेत्॥ मदन्यः कर्मफलदः कथं भवितुमर्हति॥ मत्प्रेय मदधीनास्ते
विष्ण्वाद्याः फलदास्तु न॥ पुरा तु विष्णुमद्दिव्यं तपस्तेपे जडाकरः॥ विष्णुपूजापरो नित्यं शालग्रा
मशिलास्थले॥ तद्घोरतपसा क्षुब्धं सर्वं च पृथिवीतलं॥ फणिदिक्करिमुख्याश्च क्षुब्धाः सर्वेप्यह
र्निशं॥ देवाश्चेंद्रादयः सर्वे क्षुब्धं दृष्ट्वा महीतलं॥ क्षुब्धा बभूवुः कर्तव्याकर्तव्यज्ञानविह्वलाः॥
ततश्चेंद्रादयो देवा ब्रह्माणं शरणं गताः॥ परिम्लानमुखाः सर्वे कृतांजलिपुटाः शिवे॥ देवान्

दृष्ट्वा स देवेंद्रप्रमुखांश्चतुराननः॥ जगाद करुणाचारु सुरदुःखविनाशकं॥१००॥ ब्रह्मोवाच॥ किं भो
देवा भयग्रस्ताः किं वा तद्भयकारणं॥ किमीदृशं भयं येन बहुदुःखमवाप्यते॥ कुर्वंतु देवदेवस्य महादेव
स्य शूलिनः॥ स्मरणं पूजने भक्त्या भवसंहर्तुरादरात्॥ शंकरार्चनशीलानां शिवैकासक्तचेतसां॥ भ
यलेशोपि नास्त्येव क्क महद्भयमुच्यतां॥ गौरीकांतो यदा चित्ते संचरत्यमरोत्तमः॥ तदा भयानि
यांत्येव दूरतः शिवशासनात्॥ लाभः प्रतिपदं तेषां तेषां प्रतिपदं जयः॥ येषां चेतसि कुंदेंदुधवलः
पार्वतीपतिः॥ संपदेनुदिनं तेषां तेषां कल्याणमन्वहं॥ येषां०॥ तेषां पुत्राश्च पौत्राश्च वेदशास्त्र
विशारदाः॥ येषां०॥ तेषामारोग्यमैश्वर्यं तेषामौदार्यमुत्कटं॥ येषां०॥ तेषां भाग्यानि पुण्यानि ते
षामानंदमन्वहं॥ येषां०॥ तेषां द्वारि मदोन्मत्तमातंगोत्तमकोटयः॥ येषां चेतसि कुंदेंदुधवलः
पार्वतीपतिः॥ तेषां गृहे घटोध्न्याः गावः क्षीरामृताशयाः॥ येषां०॥ तेषां करस्थितः स्वर्गो
नानायागफलः सदा॥ येषां०॥ तेषां करस्थितो मोक्षः पुनरावृत्तिवर्जितः॥ येषां०॥ भाग्यंशि

शि॰स्व
१९१

करभक्तानां ममैव परमं ध्रुवं॥ येषां परमपीड़ाद्याः सेवकानात्र संशयः॥ धन्याः शंकरपादाब्ज
ध्यानमात्रपरा नराः॥ येषां०॥ धन्यास्ते शिवलिंगार्चासक्तांतःकरणा नराः॥ येषां०॥ धन्यास्ते शि
वपूजार्थमुपात्तद्रविणा नराः॥ येषां०॥ धन्यास्ते मंत्रपूताच्छभस्मभाला नरोत्तमाः॥ येषां०
धन्यास्ते कंठसंसक्तरुद्राक्षाभरणा नराः॥ येषां०॥ धन्यास्ते शिवनामैकजीवनाः शिवपूजकाः
येषां०॥ धन्यास्ते शिवनामांककथाश्रवणतत्पराः॥ येषां०॥ धन्यास्ते शिवनामांकाः शिवैक
कुलदेवताः॥ येषां०॥ धन्यास्ते शिवनामांकागायनासक्तचेतसः॥ येषां०॥ धन्यास्ते शिवपूजार्थं
नित्यमुद्युक्तमानसाः॥ येषां०॥ धन्यास्ते शिवभक्तार्थदत्तवित्ता नरोत्तमाः॥ येषां०॥ न भयं शि
वभक्तानां अभयप्रदमीश्वरं॥ यतोर्चयंति सततमप्रमत्ताः शिवार्चकाः॥ उदेतु भानुरप्येषः पश्चि
मादिशि सर्वदा॥ तथापि शिवभक्तानां भयलेशोपि न ध्रुवं॥ भवंतु सागराः सर्वे प्रोद्वेलाः क्षोभहे
तवः॥ तथापि०॥ कंपयेत्वनिशं भूमिः सशैलवनकानना॥ तथापि०॥ अमायामुदयं यातु चंद्रः श्री॥ १९१

पूर्णो भयप्रदः॥ तथापि०॥ उदयं यांतु नक्षत्राण्यपि नित्यमहर्निशं॥ तथापि०॥ वर्षंतु पुष्करावर्ताः प्ला
वयंत्ववनीमिमां॥ तथापि०॥ उल्काः पातंतु सततमासमुद्रांतमंडले॥ तथापि०॥ धूसराः संतु सर्वा
श्च दिशः प्रतिदिशः सदा॥ तथा०॥ पतंत्वशनिसंघाश्च बहवः सततं भुवि॥ तथापि०॥ देवाः किं
बकुर्नात्केन सर्वथाशंकरेजनैः॥ पदे पदे पि कल्याणं प्राप्तव्यं नात्र संशयः॥ शंकरासक्तचित्ता
नां शंकरः करुणाकरः॥ ददाति मंगलं यस्मान्मंगलापतिरीश्वरः॥ ध्यातो ददाति गौरीशो मंगलं
मंगलाश्रयः॥ मंगलापतिसंसक्तचित्तानां नास्त्यमंगलं॥ अत एव मुनिश्रेष्ठाः शिवतत्वविशार
दाः॥ शिवमेव शिवप्राप्त्यै ध्यात्वा तिष्ठंत्यनाकुलाः॥ अनेकजन्मभिर्येन तप्तं घोरतरं तपः॥
तेनैव शंकरे भक्तिः क्रियते नान्यसेविना॥ अनन्यभाङ्महादेवं योर्चयिष्यति सर्वदा॥ स एव धन्यः
पुण्यात्मा तस्याप्राप्यं न किंचन॥ यजंति शंकरादन्यं केचिन्मायाविमोहिताः॥ न तेषां सुखसं
पत्तिः कल्पकोटिशतैरपि॥ अप्रमेयमनाद्यंतं नित्यं शंकरमीश्वरं॥ अनाराध्य जडाः केचिदर्चे

यंति स्वनीश्वरं॥ ईश्वरत्वेन विज्ञाया नीश्वरं ये भजंति ते॥ स्वेष्टं न प्राप्नुवंत्येव कल्पकोटिशतैरपि॥
रजतत्वेन विज्ञाय रजतं यः प्रवर्तते॥ तस्य किं शुक्तिशकलं कंकणायोपयुज्यते॥ ईश्वरः शिव एवेति वे
दस्यैव श्रुतिरुत्तमः॥ सर्वभावेन सततं भजनीयो महेश्वरः॥ महादेवं विहायान्यं सुरं यः समुपासते
स मूर्ख इति विज्ञेयः सत्यं सत्यं न संशयः॥ यः शंकरं विहायान्यं सुरमर्चितुमिच्छति॥ स मुखस्थां
सुधां त्यक्त्वा क्षारांभः पातुमिच्छति॥ यः शंकरं विहायान्यं सुरमर्चितुमिच्छति॥ स करस्थं निधिं त्य
क्त्वा वंडालमुपसेवते॥ यः शंकरं०॥ स कामदोग्ध्रीं त्यक्त्वा वित्सल्पामनुसेवते॥ यः शंकरं०॥ स रत्नं
स्ववशं त्यक्त्वा काचं संप्राप्तुमिच्छति॥ यः शंकरं०॥ स भार्यां युवतीं त्यक्त्वा गर्दभीमनुसेवते॥ यः
शंकरं विहायान्यं०॥ स भक्ष्यं सघृतं त्यक्त्वा लोष्ठभक्षणमिच्छति॥ यः शंकरं०॥ स विहाय स्वर्ग
भोगं नरकावासमिच्छति॥ यः शंकरं वि०॥ स पायसान्नं सघृतं त्यक्त्वा पिष्टं समिच्छति॥ यः
शंकरं०॥ स पीनमंबरं त्यक्त्वा कंबलं प्राप्तुमिच्छति॥ यः शंकरं०॥ स विहायैव कस्तूरीं विष्ठालेप

नमिच्छति॥ यः शंकरं०॥ स लसन्मालिकां त्यक्त्वा काष्ठमालां समिच्छति॥ यः शंकरं०॥ स विहाय ग
जाधिरोहं गर्दभारोहणमिच्छति॥ यः शंकरं०॥ स विहाय धराधीशं किरातमनुसेवते॥ यः शंकरं०॥
स विहाय महाराज्यं नीचभृत्यत्वमिच्छति॥ यः शंकरं०॥ स परित्यज्य विप्रत्वं चंडालत्वं समिच्छति॥ यः
शंकरं०॥ ते सर्वे शंकरेणैव वंचिताः सत्यमुच्यते॥ यस्यास्त्यनन्यगा भक्तिर्महादेवे सुरोत्तमे॥ तस्य
तज्जन्मविगमे मुक्तिरेव न संशयः॥ शिवे परमकल्याणनिदाने परमेश्वरे॥ धन्या एव हि कुर्वंति भक्तिं
मुक्तिप्रदायिनीं॥ यं यं सदाशिवो नित्यमनुगृह्णातुमिच्छति॥ तस्यैव शंकरे श्रद्धा भक्तिश्चानन्यगा ध्रुवं
यः शंकरैकशरणो न भविष्यति सर्वदा॥ स एव दुर्भगो भाग्यः स एवाद्योऽपभाजनं॥ यः शंकरार्चानि
रतो न भविष्यति सर्वदा॥ स एव०॥ यः शंकरं कथालापं सत्कवितो न सर्वथा॥ स एव०
यः शंकरं समभ्यर्च्य पूजितं नाभिनंदति॥ स एव०॥ यः शंकरं समालोक्य सादरं नाभिनंद
ति॥ स एव०॥ यः शंकरं समालोक्य नर्तनं न करिष्यति॥ स एव०॥ यः शंकरं समालोक्य प्रणा

शि॰रह॰ १९३ मान्न करिष्यति॥ स एव०॥ ७७॥ यः शंकरं समालोक्य न सम्यक्प्रणिवर्त्तते॥ स एव०॥ यः शंकरं सम
लोक्य तत्स्पर्शं न करिष्यति॥ स एव०॥ यः शंकरं समालोक्य न स्तोत्रं कर्तुमिच्छति॥ स एव०॥ यः शंक
रं समालोक्य पूजां नैव करिष्यति॥ स दग्धकर इत्येव ज्ञेयः पापकुलाश्रयः॥ यः शंकरं [illegible] प समालोक
प्रणामान्न करिष्यति॥ स दग्धहस्त इत्येव ज्ञेयः पापकुलाश्रयः॥ यः शंकरं समालोक्य स्तोत्रं नैव
करिष्यति॥ स दग्धजिह्व इत्येव ज्ञेयः पापकुलाश्रयः॥ यः शंकरं समालोक्य नाभिनंदति सत्वरं॥
स दग्धचित्त इत्येव ज्ञेयः ०॥ पूजितः प्रणतः स्पृष्टश्चिंतितः संस्तुतः शिवः॥ ददाति सौख्यमतुलं
मुक्तिमप्यमरोत्तमः॥ स भाग्यवान्स पुण्यात्मा स धन्यो धन्यपूजितः॥ यः शंकरार्चनध्याननति श्री॥
स्तुतिरतः सदा॥ तस्यैव जननी धन्या जन्म तस्यैव सार्थकं॥ यस्य सांबो महादेवे संसक्तं चित्तमन्व १९३
हं॥ तस्यैव हि पिता धन्यस्तस्यैव कुलमुन्नतं॥ येन सांबो महादेवः पूज्यते सर्वदा मुदा॥ सर्वोत्तमं महादे
वं विदित्वा योर्चयिष्यति॥ नमस्तस्मै नमस्तस्मै नमस्तस्मै नमो नमः॥ सर्वोत्तमं महादेवं विदित्वा

स्तौति यः सदा॥ नमस्तस्मै०॥ सर्वोत्तमं महादेवं विदित्वा योभिनंदति॥ नमस्तस्मै०॥ सर्वोत्तमं मह
देवं विदित्वा यो नमेन्मुहुः॥ नमस्तस्मै०॥ सर्वोत्तमं महादेवं विदित्वा योनुसक्ते॥ नमस्तस्मै०॥ अन
न्यशरणाः संतः सक्तांतःकरणाः शिवे॥ सर्वैरपि नमस्कार्याः स तत्सत्यं मयोच्यते॥ अनन्यशर
णो धन्यः शंकरो येद्दशंकरः॥ अतः शंकर एव सर्वैः पूजनीयः प्रयत्नतः॥ विदित्वा शंकरं धन्या॥
श्छिन्नसंसारबंधनाः॥ श्रयंति शंकरं रूपमतः पूज्या हि ते सदा॥ अनेकजन्मभिर्येन तपस्तप
स्तनेकधा॥ सेवते शंकरं तस्मात्स पूज्योस्माभिरन्वहं॥ यावंतः संति भूलोके शांकराः शंकरार्च
काः॥ तावंतोपि नमो नित्यं नमो नित्यं नमस्कृताः॥ शंकरः शंकरः साक्षात्तयोर्भेदो न वस्तुतः॥
अतस्तस्मै नमस्तस्मै नमस्तस्मै नमो नमः॥ शंकरार्चारतं शैवं दृष्ट्वा यो नाभिनंदति॥ न तस्मा
दधिकः पापी सत्यं सत्यं न संशयः॥ शंकरार्चारतं शैवं यो नार्चयति सादरं॥ स याति नरकं घो
रं यावदाचंद्रतारकं॥ शंकरार्चापरः शैवः सर्वपुण्यनिधिस्ततः॥ स पूजनीयः सर्वैश्च सत्यमेवो

न्यतेमया॥ शंकरः पूजितो नूनं साक्षाच्छंकरपूजया॥ शंकरस्तोषितस्तेः साक्षात्तोषिते शंकरे बुधाः॥
कर्मणामनसा वाचा शंकरार्चपरायणाः॥ अतीव दुर्लभा लोके भविष्यंति न संशयः॥ अन्यदेवप
रा दुष्टाः शंकरध्यानवर्जिताः॥ नष्टधर्मा दुराचारा भविष्यंति कलौ युगे॥ २०॥ सर्वदेवोत्तमं सां
बं महादेवमनामयं॥ अन्यदेवसमं ज्ञात्वा विनंक्ष्यंति कलौ युगे॥ सर्वाराध्यं महादेवमनाराध्यान्नभो
जिनः॥ संत्यक्तशंकरध्याना भविष्यंति कलौ युगे॥ अनाराध्य महादेवं प्रातर्नियमपूर्वकं॥ जलपान
रता मर्त्या भवि०॥ अनाराध्य महादेवं प्रातर्नियमपूर्वकं॥ अन्परता मर्त्या भवि०॥ भस्मानुलेपनं
कार्यमित्युक्तं श्रुतिभिर्मुहुः॥ तत्त्यक्त्वा लापयिष्यंति मद्गात्रेषु कलौ युगे॥ रुद्राक्षधारणं त्यक्त्वा
दृष्टहज्जा बाल्य चोदितं॥ काष्ठमालालग्नकंठा भवि०॥ श्रीरुद्राले कृता न्वेदाननधीत्यैव दुर्जनाः॥
अन्याभ्यासपरा नित्यं भवि०॥ सर्ववेदश्रुतं पुण्यं शिवनामातिपावनं॥ त्यक्त्वान्यनामसंसक्ता
भविष्यं०॥ सायं शिवार्चनं त्यक्त्वा दुर्वार्त्तासक्तचेतसः॥ शिवान्यार्चनसंसक्ता भवि०॥ शिव

मायामोहितानामभाग्यानां दुरात्मनां॥ शिवार्चने कलौ प्रीतिर्न भविष्यति सर्वथा॥ कलिं प्राप्य
महादेवं योर्चयिष्यति सर्वदा॥ न तस्मादधिको धन्यः सत्यं सत्यं न संशयः॥ यावत्पुण्यं कृतयुगे शि
वस्याभ्यर्चने भवेत॥ ततः शतगुणं पुण्यं त्रेतायां शिवपूजने॥ त्रेतायां पूजने शंभोर्यावत्पुण्यम
वाप्यते॥ ततो युगगुणं पुण्यं द्वापरे शिवपूजने॥ द्वापरे शिवपूजायां यावत्पुण्यमवाप्यते॥ ततो लक्ष
गुणं पुण्यं कलौ शंकरपूजया॥ कलावपि महाद्वीपो जंबूद्वीप इति स्मृतः॥ तत्र शंकरमभ्यर्च्य दुः
खं नाप्नोति मानवः॥ श्वेतद्वीपादयो द्वीपा ये तेषु शिवपूजया॥ यत्पुण्यं तच्छतं पुण्यं जंबूद्वीपे शिवा
र्चनात॥ जंबूद्वीपेपि संत्येव शिवक्षेत्राणि भूरिशः॥ तेषु शंकरमाराध्य लभ्यते सुकृतं बहु॥ जं
बूद्वीपे शिवक्षेत्रं कुंभकोणाभिधं महत॥ तस्मिन्क्षेत्रे जन्ममात्राज्जन्म न प्राप्यते पुनः॥ तत्र शंक
रमभ्यर्च्य यावत्पुण्यमवाप्यते॥ ततः शतगुणं पुण्यं शिवार्चायां चिदंबरे॥ चिदंबरे शिवार्चातो या
वत्पुण्यमवाप्यते॥ ततः शतगुणं पुण्यं श्रीमद्वृद्धाचलेश्वरे॥ वृद्धाचले शिवार्चातो यावत्पुण्यम

शि० स्प
१९५

वाप्यते॥ ततः शतगुणं पुण्यं शिवार्चातो निलेश्वरे। ततोप्युत्तमं क्षेत्रं मरुणाचल नामकं। ततः
शतगुणं पुण्यं तत्र शंकरपूजया॥ ततोप्युत्तमं क्षेत्रं कांचीक्षेत्रं शिवात्मकं। ततोयुत गुणं पुण्यं तत्र
शंकरपूजया॥ ततो दक्षिणकैलासः शिवप्रियकरो वरः॥ ततोयुत गुणं पुण्यं तत्र शंकरपूजया॥
ततः पुण्यतमं क्षेत्रं श्रीशैलक्षेत्रमुत्तमं॥ ततोयुतगुणं पुण्यं तत्र शंकरपूजया॥ ततः श्रेष्ठतरं क्षे
त्रं काशीक्षेत्रमनुत्तमं॥ ततः कोटिगुणं पुण्यं तत्र पू०॥ तत्र श्रेष्ठतमं क्षेत्रं श्रीमदंतर्गृहाभिधं॥
तत्र कोटिगुणं पुण्यं प्राप्यं०॥ तत्राप्युत्तमं क्षेत्रं ज्ञानवापीतटं वरं। तत्र कोटिगुणं पुण्यं प्राप्तं शं
करपूजया॥ तत्राप्युत्तमं स्थानं मुक्तिमंडपनामकं। तत्र कोटिगुणं पुण्यं प्राप्य०। तत्राप्युत्त
मं क्षेत्रं सर्ववेदस्तुतं सदा॥ शिवागारमिति ख्यातं तत्तु सर्वोत्तमोत्तमं॥ तत्र सांबो महादेवः सर्वदेवो श्रीः॥
त्तमोत्तमः॥ सर्ववेदस्तुतो नित्यं लिंगाकारेण तिष्ठति॥ यस्य भासा विभातीदं सर्वं च सचराचरं॥ १९५
स एव भगवांस्तत्र लिंगरूपेण तिष्ठति॥ न यं भासयितुं शक्तः सहस्रकिरणो रविः॥ स एव भग

वांस्तत्र०॥ न यं भासयितुं शक्तश्चंद्रोनेककलाश्रयः॥ स एव०॥ न यं भासयितुं शक्ता स्तारकाः स
प्रभा अपि॥ स एव०॥ न यं भासयितुं शक्तः सर्वथा विद्युतां गणः॥ स एव०॥ यो निष्कलो निर्गुण
श्च निराकारो निरंजनः॥ स एव०॥ यः शांतो निष्क्रियो नित्यो निरवद्यो निरामयः॥ स एव०॥ यः स
र्वरूपी सर्वात्मा यः सर्वांतरगः सदा॥ स एव०॥ यः प्रविश्यांतरं सुप्तं प्रबोदयति मानसं॥ स एव०
यः प्रविश्यांतरं वाचं प्रबोदयति सर्वगः॥ स एव०॥ यः प्रविश्यांतरं चक्षुः प्रबोदयतिर्वगः॥ स ए
व०॥ यः प्रविश्यांतरं श्रोत्रं प्र०॥ स एव०॥ यः प्रविश्यांतरं घ्राणं प्र०॥ स एव०॥ यः प्रविश्यांतरं
त्वक्प्र०॥ स एव०॥ यद्भीत्या पवते वायुर्यद्भीत्योदेति भानुमान्॥ स एव०॥ यद्भीत्या पवते वह्निरिं
द्रश्चंद्रश्च सर्वदा॥ स एव०॥ यः सोमो जनितान्नित्यो मतीनां सकलात्मकः॥ स एव०॥ यः सोमो ज
निता शंभुर्दिवोपि सकलात्मकः॥ १ स एव०॥ यः सोमो जनिता शंभुः पृथिव्याः सकलात्मकः।
स एव०॥ यः सोमो जनिता शंभुरग्नेश्च सकलात्मकः॥ स एव०॥ यः सोमो जनिता शंभुर्भा

नोऽश्च सकलात्मकः॥ स एव०॥ यः सोमो जनिता शंभुर्वायोश्च सकलात्मकः॥ स एव०॥ यः पश्चंद्रश्च
सकलात्मकः॥ स एव०॥ यः० रिंद्रस्य स०॥ स एव०॥ यः सोमो जनिता शंभुर्विष्णोश्च सकलात्मकः॥
स एव०॥ यः सोमो जनिता शंभुर्ब्रह्मणो मम सर्वगः॥ स एव०॥ यः सोमो जनितान्येषां द्विपदां च चतु
ष्पदां॥ स एव०॥ यः सोमो जनितान्येषां वृक्षादीनां च सर्वगः॥ स एव०॥ यः सोमो जनितान्येषां शैला
दीनां च सर्वगः॥ स एव०॥ यत्प्रसादेन वैकुंठं प्राप पूर्वं जनार्दनः॥ स एव०॥ यत्प्रसादेन लोकानां पा
लको भूज्जनार्दनः॥ स एव०॥ यत्प्रसादात्स्वचक्रं पूर्वं प्राप जनार्दनः॥ स एव०॥ यत्प्रसादान्महा
लक्ष्मीं प्राप पूर्वं जनार्दनः॥ स एव०॥ यत्प्रसादेन दीनोपि भवत्येव धनेश्वरः॥ स एव०॥ यत्प्रसादे
न मोक्षोपि सुलभस्तपसा विना॥ स एव०॥ न यस्मादधिको देवः सुरासुरनमस्कृतः॥ स एव०॥ य
तो वाचो निवर्त्तंते अप्राप्य मनसा सह॥ स एव०॥ यस्य स्मरणमात्रेण मुच्यते कर्मबंधनात्॥ स ए
व०॥ यस्य पूजनमात्रेण त्रैलोक्यश्रीरवाप्यते॥ स एव०॥ यत्पूजामात्रसंसक्तो विष्णुस्त्रैलोक्यवं

दितः॥ स एव०॥ यत्पूजया जगत्सर्वं स्ववशीक्रियते नरैः॥ स एव०॥ यत्पूजासक्तचित्तानां यमोप्युत्थाय
ते सदा॥ स एव०॥ यत्पूजासक्तचित्तानां वयं सर्वेपि सेवकाः॥ स एव०॥ यत्पूजासक्तचित्तानां न किंचि
दपि दुर्लभं॥ स एव०॥ यो विष्णुब्रह्मवेंद्रप्रभृतीनां प्रशासकः॥ स एव०॥ वयं वेत्रप्रहरणा पात्रं यद्द्वा
रि सर्वदा॥ स एव०॥ अचिंत्यामेयमहिमा यस्तु देवशिखामणिः॥ स एव०॥ अमितानंतविभवो य
स्तु सर्वसुराधिपः॥ स एव०॥ यः सदा विष्णुनेत्राब्जपूजितांघ्रिशिरोरुहः॥ स एव०॥ यः प्रभुः सर्व
देवानां सर्वदेवार्चितः सदा॥ स एव भगवांस्तत्र लिंगरूपेण तिष्ठति॥ तल्लिंगपूजयानंतफलं
संप्राप्यते जनैः॥ तल्लिंगपूजापुण्यस्य नेयत्ता सत्यमुच्यते॥ तल्लिंगं वीक्षितं येन पृष्टमभ्यर्चितं
मुदा॥ तत्पुण्यमन्यपुण्येभ्यो भवत्यत्युत्तमोत्तमं॥ चतुर्दशानि भुवनान्यपि काशीसमानि न॥ सा
यतः शिवरूपात स्तत्तुल्यं किं भविष्यति॥ यत्र काश्यां महादेवो जंतुमात्रस्य सादरं॥ देहांते परमं मं
त्रं शैवं दत्तं समुद्यतः॥ यत्र काश्यां महादेवो लीलारूपधरः सदा॥ उमयासहितः प्रीत्या विचर

त्र्यंबिकापतिः॥ यत्र काश्यां महादेवः स्वभक्तेभ्यो यथायथं॥ स ददाति वरान्सर्वार्थान्सा काशी श्रुतिसंम
ता॥ पश्यंति पुण्यपुरुषाः शिवपूजापरायणं॥ एनमेतस्य सततं पूजनं क्रियते मया॥ अयं धन्यतमो
मर्त्यः काशीं प्राप्य महेश्वरं॥ पूजयित्वा स्थितः प्रीत्या बिल्वपत्रादिसाधनैः॥ चैत्रशुक्लाष्टमीं प्राप्य
सायमुद्वल्य सन्मना॥ कृत्वा विश्वेश्वरार्चां बीजजापं षडक्षरं॥ ९१॥ अन्नपूर्णां ततः सम्यक्संपूज्य
तदनंतरं॥ अष्टोत्तरशतं चक्रे मौनेनायं प्रदक्षिणाः॥ नमस्कारांस्ततश्चक्रे तावदष्टोत्तरं मुदा॥ पु
नः समर्चयामास देवीं त्रिभुवनेश्वरीं॥ ततः सायं पुनः प्रीत्या कृत्वा विश्वेश्वरार्चनं॥ अन्नपूर्णाल
ये प्रीत्या चक्रे जागरणं सुराः॥ वाचयन् शंकरस्यैव कथाः श्रव्या मनोहराः॥ उपवासं च कारायं नि
राहारेण सादरं॥ तस्यां रात्रौ महानासीत्संमर्दः सुरसत्तमाः॥ प्रदक्षिणनमस्काराः संमर्देपि
कृता मुदा॥ आ ब्रह्मन्नितिमंत्रेण कृतो होमो मुनीश्वरैः॥ क्षीरेणाज्येन मधुना सर्वसंपत्समृद्धिदः॥
अन्नेनापि कृतो होमः क्षीराज्यादिभिरादरात्॥ आ वा हंतीति मंत्रेण सर्वसंपत्तिकाम्यया॥ त

तः प्रातः समुत्थाप्य विश्वेशार्चनपूर्वकं॥ अन्नपूर्णामपि प्रीत्या पूजयामास शक्तितः॥ ततोयं भोज
यामास शैवांश्चैव सतीस्तथा॥ स्वयं च पारणं चक्रे शिवध्यानपुरःसरं॥ ९०॥ इदं व्रतं पुरा काश्यां
स्थित्वापि तदनंतरं॥ चैत्रशुक्लाष्टमीं प्राप्य नार्चयामास शांकरीं॥ क्रमेण शांकरीं देवीमनभ्यर्च्य स्थि
तं शिवा॥ येनदंशं तं प्रभुमुद्युक्तं च चकार सा॥ ततः परमयं विप्रा नर्मदां प्राप्य निर्मलां॥ तत्र स्नात्वा
ततोन्यत्र मृतः सर्पेण दंशितः॥ ततोयं भूपतिर्जातः सर्वभूचक्रपालकः॥ सर्वसौभाग्यसंपन्नः
पुत्रपौत्रसमन्वितः॥ ततो मृतोयं राजेंद्रो विमानवरमाश्रितः॥ गीतस्तुतश्च गंधर्वैर्मम लोकमु
पागतः॥ मयायं पूज्यते भक्त्या मत्सभासद्भिरप्ययं॥ संपूज्यते सुरैर्नित्यं सादरं भक्तिपूर्वकं॥ कल्पा
ष्टकमुषित्वात्र ततो भूत्वा नराधिपः॥ काशीं प्राप्य मुदा तत्र देहत्यागं करिष्यति॥ शिवयोः पूजनं
पूर्वं कृतमेतेन यत्नतः॥ यतस्ततः पुनः काशीं संप्राप्य शिवाज्ञया॥ सर्वसंसारविच्छित्यै काश्यां म
रणपूर्वकं॥ मोक्षं महेशकृपया प्राप्स्यत्येव न संशयः॥ एतादृशैर्द्विजवरैः पुरा काशीमुपाश्रितैः॥

मुक्तिः प्राप्यामहेशस्य कृपया सत्यमुच्यते॥ कलौ तु मानुषं जन्म भवत्यंत्यं तदुर्लभं॥ तत्र चेन्मानु
षं जन्म कर्तव्यं शिवपूजनं॥ मानुष्येष्वपि चेज्जन्म ब्राह्मण्यां ब्राह्मणाद्यदि॥ तदप्यत्र शुभं कर्तव्यं शिव
स्यैवार्चनं सदा॥ अत्यंतदुर्लभं जन्म कलौ प्राप्यापि मानुषं॥ यदि नाराधयेच्छंभुं तस्य जन्म निरर्थ
कं॥ शिवैकशरणो भूत्वा कलौ यदि वसेन्नरः॥ तस्य मोक्षो भवत्येव सत्यं सत्यं मयोच्यते॥ मोक्षो भव
ति मर्त्यानां शंकरस्यैव पूजया॥ सत्यं सत्यं पुनः सत्यमुध्रृत्य भुजमुच्यते॥ यथा विना सुवर्णेन दुर्ल
भे हेमकुंडले॥ तथा विना महादेवपूजां मोक्षोपि दुर्लभः॥ यथा विना भोजनेन तृप्तिरत्यंतदुर्लभा॥
तथा विना महादेवपूजां मोक्षोपि दुर्लभः॥ यथा चक्षुर्विना ज्ञानं चाक्षुषं त्वतिदुर्लभं॥ तथा॰
यथा श्रोत्रं विना ज्ञानं श्रौतमत्यंतदुर्लभं॥ तथा॰॥ यथाधी रसनाभावे रासना त्वतिदुर्लभा॥
तथा॰॥ यथाधी घ्राणविरहे घ्राणपात्वति त्वतिदुर्लभा॥ तथा॰॥ यथा त्वगिंद्रियाभावे त्वाचे
या दुर्लभा मतिः॥ तथा॰॥ यथा मनो विना ज्ञानं मानसं त्वतिदुर्लभं॥ तथा॰॥ यथानुमानविर

हे दुर्लभानुमतिर्मता॥ तथा॰॥ यथोपमानविरहे दुर्लभोपिमतिर्मता॥ तथा॰॥ यथा सुखस्य विरहे
न सुखानुभवो मतः॥ तथा॰॥ यथा वृष्टिं विनान्नाद्यं न भविष्यति सर्वथा॥ तथा॰॥ यथा विना त्रिपु
ण्ड्रेण ब्राह्मण्यमतिदुर्लभं॥ तथा॰॥ शिवपूजां विना ज्ञात्वा मोक्षं यस्तु कामयते नरः॥ स मूर्ख इति विज्ञेयः
सत्यं सत्यं न संशयः॥ मया यदि कलौ जन्म मानुषं प्राप्यते तदा॥ शिवपूजां करिष्यामि मोक्षार्थम
तियत्नतः॥ क्रियते याधुना पूजा महादेवस्य सा मया॥ अनुयुक्तस्यैव सततं क्रियते शिव संमता॥
देवत्वमेव देवानां मोक्षस्य प्रतिबंधकं॥ ततः कृतापि सा पूजा नाधुना मोक्षदायिनी॥ कदा देव
त्वसंबंधनाशो स्माकं भविष्यति॥ कदा दास्यति गौरीशो मोक्षं विश्वेशपूजया॥ पुरा शंकरम
भ्यर्च्य ब्रह्मत्वं प्रार्थितं मया॥ तद्दत्तं शंकरेणेदं कदेतन्मे विनश्यति॥ पुरा शंकरमभ्यर्च्य विष्णु
नाप्यति यत्नतः॥ विष्णुत्वं प्रार्थितं तेन तत्प्राप्तं शंकरार्चया॥ एवं शंकरमभ्यर्च्य देवैरन्यैश्च स्वांस्वां
दं महादेवप्रसादेन तत्तत्पदमुपार्जितं॥ इदानीं मानुषं जन्म विष्णुः प्रार्थयति स्वयं॥ मया

पिप्रार्थ्यते नित्यं न तत्कदाचा भविष्यति॥ इदानीं विष्णुरनिशं शिवपूजापरायणः॥ शिवपूजां
करोत्येव मोक्षार्थमतियत्नतः॥ महेशं पूजयेन्नित्यं शिवलिंगं प्रयत्नतः॥ भवद्भिश्च महादेवः पूज
नीयः सदा सुराः॥ वसामः शंकरं नित्यं संपूज्यात्यंतयत्नतः॥ एवं सति महादेवः कृपां किं न क
रिष्यति॥ कदाचिन्मानुषं जन्म प्राप्य काशीमवाप्य च॥ संपूज्य शंकरं मोक्षं प्राप्स्यामः शिवपू
जया॥ स्मरध्वं देवदेवेशं शंकरं सांबमव्ययं॥ तेनैव दुःखलेशोपि भवतां न भविष्यति॥ भवद
गमने हेतुरीतरेव मयाधुना॥ तत्तपो भवतां दुःखं न करिष्यति सर्वथा॥ यमो यद्वैष्णवं धाम वि
ष्णुः किं वा वदिष्यति॥ श्रुत्वा तद्वाक्यमप्यग्रे यत्नतः कार्यं भविष्यति॥ ॥श्रीमहादेव उवाच॥ श्रीः॥
इत्युक्त्वा देवि वैकुंठं जग्मुर्ब्रह्मादयः सुराः॥ मदेकसक्तचित्तास्ते स्मरंतो मामनुत्तमं॥ ये नि १९९
त्यमव्याहतचित्तवृत्ताः सदा शिवाराधनसक्तचित्ताः॥ अन्याश्रया नाश्रयता निवृत्ताः संत्येव
धन्याः शिवदत्तचित्ताः॥ ३४५॥ ॥ इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादे ॥५॥

पंचदशोऽध्यायः॥१५॥ ॥पार्वत्युवाच॥ वैष्णवं धाम संप्राप्य किमुक्तं ब्रह्मणा विभो॥ तदा ज
नार्दनेनापि किमुक्तं तद्वदस्व मे॥ श्रीमहादेव उवाच॥ शिवविष्णुसमालोक्य ब्रह्मादीनमरांस्तदा
पप्रच्छ स्वागतं तेषां वचोयम्नुदमादरात्॥ कुतः समागतं ब्रह्मन्निंद्राद्यैरमरैः सह॥ स्वस्वाधिका
रे सर्वेषामधुना कुशलं खलु॥ तावत्कुशलमस्माकं सर्वेषामिति निश्चितं॥ यावत्संभावो महा
देवः पूज्यते ति प्रयत्नतः॥ अशुभं तु तदाभाविय दानाभ्यर्च्यते शिवः॥ शिवानभ्यर्चनादेव
संप्राप्यमशुभं ध्रुवं॥ शिवाराधनसंसक्तो दावानलगतोपि सन्॥ दुःखं सर्वात्मना ब्रह्मन्न प्रा
प्नोति न संशयः॥ अस्माभिः शिवपूजायां यत्नः कार्यः पुनः पुनः॥ शंकराभ्यर्चनं त्यक्त्वा न स्था
तव्यं कदाचन॥ शंकराभ्यर्चनादेव सर्वे सिध्यंति सिद्धयः॥ तथा च शंकरस्यैव पूजां कुर्मो निरं
तरां॥ स्मर तत्त्वः शंकरो नित्यं शं करोतीति शंकरः॥ शं नाम नित्यमानंदमनिर्वाच्यमनामयं॥
संततं नाम जिह्वाग्रे शंकरेत्यस्ति यस्य सः॥ दुःखभाङ्न भवत्येव सत्यं सत्यं न संशयः॥

शिवेति नामविमलं शिवनामोत्तमोत्तमं॥ नयेन स्मर्यते नित्यं तस्य दासोभवाम्यहं॥ त्रिपुं
ड्रधारणं कृत्वा महादेवमनुस्मरन्॥ यो याति यत्र तत्रैव महादेवोधितिष्ठति॥ महादेव महादेव
महादेवेतिवादिनं॥ वत्सं गौरिव गौरीशो धावंतमनुधावति॥ महादेव महादेव महादेवेत्ययं ध्व
निः॥ सुधियो मुक्तिकांतायाः पाणिग्रहणडिंडिमः॥ महादेव महादेव महादेवेत्ययं ध्वनिः॥ अ
पमृत्युहरो नूनं कालमृत्योश्च नाशकः॥ महादेव०॥ संसारबीजदावाग्निः सत्यं सत्यं न संश
यः॥ महादेव०॥ संसारसर्पदष्टानां दिव्यौषधमनुत्तमं॥ महादेवेति वाग्वल्ली चतुरक्षरपल्लवा
भक्तिसिक्ताभवत्येका चतुर्वर्गफलप्रदा॥ महादेवेति विमलो नाम कल्पतरुर्विधो॥ यं यं का
मयते कामं तं तं कामं ददाति सः॥ महादेव महादेवेत्यरण्ये संचरन् जनः॥ वशीकरोति व्या
घ्रादीन् पिसत्यं मयोच्यते॥ महादेव महादेवेत्युच्चरन्नियतेंद्रियः॥ मृत्युं न गणयत्येव स
त्यमेवाच्युत मया॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः॥ सद्यः प्रलयमायांति महादे

वेतिकीर्त्तनात्॥ महादेवेतिनामेदं यः शृणोति वदिष्यति॥ न तस्य नरकावासः सत्यं सत्यं न संश
यः॥ पुरा कश्चिद्द्विजवरो महादेवमनुस्मरन्॥ वदन्नुच्चैर्महादेवेत्यरण्ये संचचार हि॥ तदाक
श्चिद्घाररूपो महापर्वतसन्निभः॥ सूक्ष्मग्रमात्रवदनो दीर्घपिंगशिरोरुहः॥ ज्वलदग्निगणाका
रो महानिश्वासमोचकः॥ दूरादृदर्शतं विप्रं महादेवेतिवादिनं॥ तं दृष्ट्वा सोतिसंतोषाद्भक्ष्यं
प्राप्तमिति द्रुतं॥ संतमेव भवामीति विप्रास्याक्रमुपाथयौ॥ विप्रोपिता दृशं दृष्ट्वा पिशाच
मतिविह्वलः॥ सोयं मयप्रदो मह्यमिति चिंतापरो भवत्॥ यः कश्च नाप्यभवत्तु चिंताकुमम वर्त्तते
महादेवामराधीशो रक्षां मम करिष्यति॥ भस्मोद्धूलितसर्वांगं महादेवेति वादिनं॥ स्पृष्टुमी
शात्तः भूत्वा कालमृत्युरपि स्वयं॥ विदाः प्रमाणस्युस्तदातु भयदोप्ययं॥ महानामवदः सत्यं शैव
यात्र न संशयः॥ ममशंकर भक्तस्य भयं यदि भवेत्तदा॥ कथं देवाः प्रमाणस्युः श्रीरुद्राक्षकृता
ध्रुवं॥ इत्युक्त्वास्य नांगानि संस्पृश्याह्वितमानसः॥ शिवलिंगमुपस्पृश्य जगादवचनं

शि०स्व
२०१

तदा॥ कथं देवाः प्रमाणस्युः श्रीरुद्राक्षकृताश्रवै॥ इत्युक्त्वा भस्मनाङ्गानि संस्पृश्याहितमानसः
शिवलिङ्गमुपस्पृश्य जगाद स्ववनं तदा॥ गौरीवल्लभ कामारे कालकूटविषादन॥ मामुद्धरापदं
भोधेस्त्रिपुरध्वांतकान्तक॥ पाहि पाहि महादेव भक्तवर्गैकजीवन॥ भयं दूरीकुरुष्वाद्य किमेतद
नुवर्तते॥ महादेवं स्मरंतं मामयं चेदनुधावति॥ तदा संसारभीतिर्मे कथं दूरी भविष्यति॥ महाद
वस्मृतिर्यस्य तस्य नास्ति भयं ध्रुवं॥ इति वेदा वदंत्येवं नूते त्वनृतवादिनः॥ अद्यैव सत्यं द्र
ष्टव्यं वेदानामपि सर्वथा॥ भयं यदि भवेदद्य तेषां सत्यं क्व वर्तते॥ विघ्नुरुवाच॥ इत्युक्त्वापु
नरुद्धृत्य भस्मनाङ्गानि संस्पृशन्॥ बिल्वपत्रं समाघ्राय दध्यौ देवोत्तमं शिवं॥ ततोस्य श्रेम श्रीः॥
हादेवेत्यवादीन्नाम शंकरं॥ तन्नाम सर्वपापघ्नं पिशाचेन श्रुतं तदा॥ तन्नामश्रुतिमात्रेण पि २०१
शाचोपि स्वकां तनुं॥ धरां जहो क्षणार्धेन बहुदुःखप्रदां सदा॥ स पिशाचतनुं त्यक्त्वा दिव्यरू
पधरस्ततः॥ ननाम दंडवद्भूमौ विप्रमालोक्य सादरं॥ धन्योस्मि त्वत्प्रसादेन शैवोत्तम शिवार्चक

पिशाचतनुरेषाद्य त्यक्ता पापकुलाश्रय॥ अल्पकल्पान्यतीतानि बहूनि द्विजसत्तम॥ पिशाच
तनुरेषा मे न गता घोरदुःखदा॥ महादेवेति नामैतदधुना त्वन्मुखाच्छ्रुतं॥ वेदोपगीतमनिशं सर्व
पापभयापहं॥ महादेवेति नामैतच्छ्रुतं सर्वार्थदायकं॥ कदापि नश्रुतं पूर्वं महाभयनिवारकं॥
विप्र॰॥ दुष्कृतं किं कृतं पूर्वं येनैतत्तनुभाग्यवान्॥ तद्वदस्वाविशेषेण लज्जां त्यक्त्वा विचार्यच
कः पिता तव का माता किं नाम तव किं कुलं॥ का जातिस्तव का वृत्तिस्तत्सर्वं वद सत्वरं॥ पिशाच
तनुरुवाच॥ पिता कुलंजको माता सुशीला नाम कर्कशा॥ कुलं तु मम सावित्रं ब्राह्मणोहं ब
हुश्रुतः॥ कृतमध्ययनं पूर्वं वेदानामेव सादरं॥ तथापि भस्मनाङ्गमिदमुद्धूलितं पुरा॥
त्रिपुंड्रं भस्मना धृतं महापातकनाशकं॥ शिरोललाटकंठोरःस्कंधादौ न कृतं मया॥ रुद्रा
क्षाः सर्वपापघ्नाः जाबालश्रुतिसंमताः॥ न धृताः कंठकर्णादिष्वंगेष्वादरपूर्वकं॥ नित्यं
त्रिसंध्यमभ्यर्च्य देवदेवोत्तमं शिवं॥ अनाभ्यर्च्याशितं पूर्वं मया भाग्यपरिपालकः॥ बिल्वपत्रैर्ज

लालुष्टैरछिद्रैः कोमलैर्नवैः। नारदाधिगिरिजानाथः प्रत्यहं भक्तिपूर्वकं॥ अभिषिच्य महादेवं रुद्रा
ध्यायेन सादरं। रुद्राभिषेकपानीयं न पीतमघनाशकं। संपूज्य शंकरं पुष्पैर्बिल्वपत्रैश्च कोमलैः
प्रदक्षिणनमस्काराय थेष्टं न कृतामया॥ क्षणमप्यदंडवद्भूमावुत्थायोत्थाय भूरिशः। प्रणामा न
कृताः पूर्वमतिभक्तिपुरःसरं। नर्त्तनं शंकरस्याग्रे सम्यगास्येदमादरात्। न कृतं सर्वपापघ्नमाल
स्येन परामया॥ मुहुर्मुहुर्बिल्वपत्रैराराध्य परमेश्वरं। दृष्ट्वा संस्पृश्य मंत्रेण नानंदमगमं पुरा
शंकरेति महेशेति महादेवेति सादरं। न स्मृतं शंकरं नाम महापातकनाशकं। मुक्तिप्रकाशिका
काशी साक्षादीश्वररूपिणी। न दृष्टा न स्तुता पूर्वमभाग्यपरिपाकतः। यस्यां काश्यां महादेवः
पार्वतीरमणः प्रभुः। लीलां करोति सा काशी न दृष्टा पापयोगतः॥ या काशी संस्तुता दृष्टा मृता
प्यघविनाशिनी॥ सा काशी न मया दृष्टा घोरदुष्कृतकर्मणा॥ यस्यां संसारबीजानां विनाशो जा
यते द्विज॥ सा काशी०॥ यस्यां मृतस्य विश्वेशो मुक्तिं कांतां प्रयच्छति॥ सा काशी०॥ यस्यां काश्यां

महत्तीर्थं मणिकर्णीति संज्ञितं॥ सा काशी०॥ यस्यां काश्यां महत्तीर्थं ज्ञानवापीति संज्ञितं॥ सा काशी०
यस्यां काश्यां महत्स्थानं मुक्तिमंडपसंज्ञितं॥ सा काशी०॥ यस्यां काश्यां महल्लिंगं श्रीमद्विश्वेश्व
राभिधं॥ सा काशी०॥ यस्यां काश्यामन्नपूर्णा सर्वसौभाग्यदायिनी॥ सा काशी०॥ यस्यां संसार
विटपो दग्धो नैव प्ररोहति॥ सा काशी०॥ यस्यां मरणमात्रेण मंगलं परमं द्विज॥ सा काशी०॥ यस्यां
विभूतिः परमं भूषणं पापनाशकं॥ सा०॥ यस्यां स्थितो नरोऽप्यल्पो नेच्छति स्वर्गजं सुखं॥ सा०॥
यस्यां स्थितो नरोऽप्यल्पः पूज्यते देवतागणैः॥ सा०॥ किं च पूर्वं तु सा याद्भिः पुत्रलालनतत्परः॥
भार्यां विलोकयुवतीं वाक्यमेतदवादिषं॥ सन्नद्धां कुरु शय्यां मे महोत्साहकरीं परां॥ क्षीरमानय
पानार्थं शर्करा घृतसंयुतं॥ इत्युक्तं उमालोक सा बभाषे वचस्तदा॥ सायंकाले महादेवं पू
जयस्वेति यत्नतः॥ पश्य पश्यामलोल्लोकांश्छिवपूजापरायणान्॥ पूजाद्रव्यकराः सर्वे प्रयांति
शिवमंदिरं॥ इत्युक्तं तद्वचः श्रुत्वा भार्यां तामसीत्यहमुद्वान्। तच्छ्रुतं शिवभक्तेन वित्तदवस्तदा॥
केन

शंकरेण तदा शप्तस्तदैवाहं द्विजोत्तम॥ तच्छापेन तनुः प्राप्ता पैशाची दुःखदायिनी॥ नाराधय
ति यः सायं देवदेवं जगन्मंगलं शिवं॥ स पिशाचो भवत्येव स्युक्तं शैव न ते नहि॥ तेन शापेन पैशाची तनुः प्रा
प्ता मया तदा॥ तेनैवात्र वने दुःखं बहु प्राप्तं मया द्विज॥ बहवोस्मिन् वने संति पिशाचास्तनुभागिनः॥
अनर्चित महादेवः सायंकाले यथाविधि॥ अहं तु त्वत्प्रसादेन मोचितः कर्मबंधनात्॥ त्वच्छि
ष्योभविष्यामि पालय स्वयथोचितं॥ विप्र उ०॥ इत्युक्त्वा प्रणतं विप्रमुत्थाप्य विनयान्वितं॥ पंचाक्ष
रं महामंत्रं संस्मार घविनाशकं॥ ततस्तस्मै ददौ विप्रो मंत्रं शैवमनुत्तमं॥ संगृहीत्वा मनुं शैवम्
ति तुष्टोऽभवत्तदा॥ अतो ब्रह्मन् महादेवः पूजनीयः प्रयत्नतः॥ स्मर्तव्यः सततं स्वेष्टं ध्यातव्यश्च यथ
थया॥ महेशनामस्मरणं संसारच्छेदकारणं॥ तत्किं पिशाचदेहस्य नाशकं न भविष्यति॥ अनेक
जनसंसारमलच्छेदकरो हरः॥ न किमेकस्य संसारं नाशयिष्यति शंकरः॥ मया प्राप्तोसि वैकुंठे
यत्पादांबुजसेवया॥ तमेव०॥ लक्ष्मीः प्राप्ता मया पूर्वं तत्पादांबुजपूजया॥ तमेव०॥ विष्णुत्वं म

याप्राप्तं यत्प्रा०॥ तमेव०॥ जगत्पालकता प्राप्ता यत्प्रा०॥ तमेव०॥ मृत्युः स्ववशमायातिय०
तमेव०॥ संपदः स्ववशं याति यत्प्रा०॥ तमेव०॥ सर्वे देवा वशं याति यत्प्रा०॥ तमेव०॥ सिद्धयोष्ट
वशं यांति यत्प्रा०॥ तमेव०॥ स्वर्गः स्ववशमायाति य०॥ तमेव०॥ १००॥ सत्यलोको वशं याति य
त्प्रा०॥ तमेव०॥ वैकुंठोपि वशं याति यत्प्रा०॥ तमेव०॥ मोक्षः स्ववशमायाति य०॥ तमेव०॥ वाज
पेयादियागानां स्वर्गमात्रं फलं स्मृतं॥ फलं तु मोक्षपर्यंतं शंकरस्मरणस्य तु॥ यागाश्च यदि संग
स्युर्वाजपेयादयस्तदा॥ स्वर्गोन्यथा तु नास्त्येव तादृशी न शिवस्मृतिः॥ शिवस्मरणमात्रेण स्व
र्गनाप्यघहारिणा॥ मोक्षलक्ष्मीः प्रयत्नेन प्राप्तव्या नात्र संशयः॥ शिवस्मरणसंसक्तं य
स्य चित्तमहर्निशं॥ न तस्य दुर्लभं वस्तु ब्रह्मन् ब्रह्मांडमंडले॥ शिवस्मरणसंसक्तो वैकुंठमपि
वस्तुतः॥ मन्यते यत्र सत्यस्य तत्र नास्त्येव संशयः॥ शिवपूजापरो नित्यं शैवः शिवपरायणः
न सत्यलोकं वैकुंठं गणयत्येव सर्वथा॥ शिवनाम समं नाम नास्ति नास्ति न संशयः॥ शिवं

शि०स्प
२०३

शंकरेण तदा शप्तस्तदैवाहं द्विजोत्तम ॥ तच्छापेन तनुः प्राप्ता पैशाची दुःखदायिनी ॥ नाराधय
तियः सायं देवदेवोत्तमं शिवं ॥ स पिशाचो भवत्येव सत्यं शैव न तेन हि ॥ तेन शापेन पैशाची तनुः प्रा
प्ता मया तदा ॥ तेनैवात्र वने दुःखं बहु प्राप्तं मया द्विज ॥ बहवोस्मिन्वने संति पिशाचास्तनुभागिनः ॥
अनर्चितमहादेवाः सायंकाले यथाविधि ॥ अहं तु त्वत्प्रसादेन मोचितः कर्मबंधनात् ॥ त्वच्छि
ष्योऽभविष्यामि पालय त्वं यथोचितं ॥ विप्र उ० ॥ इत्युक्त्वा प्रणतं विप्रमुत्थाप्य विनयान्वितं ॥ पंचाक्ष
रं महामंत्रं संसाराघविनाशकं ॥ ततस्तस्मै ददौ विप्रो मंत्रं शैवमनुत्तमं ॥ संगृहीत्वा मनुं शैवम
ति तुष्टो भवत्तदा ॥ अतो ब्रह्मन्महादेवः पूजनीयः प्रयत्नतः ॥ स्मर्तव्यः सततं चेष्टं ध्यातव्यश्च यथे श्रीः ॥
च्छया ॥ महेशनामस्मरणं संसारच्छेदकारणं ॥ तत्किं पिशाचदेहस्य नाशकं न भविष्यति ॥ अनेक २०३
जनसंसारमलच्छेदको हरः ॥ न किमेकस्य संसारं नाशयिष्यति शंकरः ॥ मया प्राप्तासि वैकुंठे
यत्पादांबुजसेवया ॥ तमेव० ॥ लक्ष्मीः प्राप्ता मया पूर्वं तत्पादांबुजपूजया ॥ तमेव० ॥ विष्णुत्वम

याप्राप्तं यत्पा० ॥ तमेव० ॥ जगत्पालकता प्राप्ता यत्पा० ॥ तमेव० ॥ मृत्युं स्ववशमायांति य०
तमेव० ॥ संपदः स्ववशं यांति यत्पा० ॥ तमेव० ॥ सर्वदेवा वशं यांति यत्पा० ॥ तमेव० ॥ सिद्धयोष्टौ
वशं यांति यत्पा० ॥ तमेव० ॥ स्वर्गः स्ववशमायाति य० ॥ तमेव० ॥ १०० ॥ सत्यलोको वशं याति य
त्पा० ॥ तमेव० ॥ वैकुंठो यं वशं याति यत्पा० ॥ तमेव० ॥ मोक्षः स्ववशमायाति य० ॥ तमेव० ॥ वाज
पेयादियागानां स्वर्गमात्रं फलं स्मृतं ॥ फलं तु मोक्षपर्यंतं शंकरस्मरणस्य तु ॥ यागाश्च यदि संग
स्यु वीजपेयादयस्तदा ॥ स्वर्गोन्यथा तु नास्त्येव तादृशी न शिवस्मृतिः ॥ शिवस्मरणमात्रेण व्य
गेनाप्यघहारिणा ॥ मोक्षलक्ष्मीः स्वयं तेन प्राप्तव्या नात्र संशयः ॥ शिवस्मरणसंसक्तं य
स्य चित्तमहर्निशं ॥ न तस्य दुर्लभं वस्तु ब्रह्मन्ब्रह्मांडमंडले ॥ शिवस्मरणसंसक्तो वैकुंठमपि
वस्तुतः ॥ मन्यते यव सत्यस्य त्वत्र नास्त्येव संशयः ॥ शिवपूजापरो नित्यं शैवः शिवपरायणः
न सत्यलोकं वैकुंठं गणयत्येव सर्वथा ॥ शिवनाम समं नाम नास्ति नास्ति न संशयः ॥ शिवं

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।। सर्ववेदश्रुतं पुण्यं सर्वाभीष्टप्रदायकं।। अनन्यसदृशो
शुद्धः शिवनामेति निश्चितं।। ब्रह्मन्सुरासुरैर्मर्त्यैर्गंधर्वैर्यक्षपन्नगैः।। पूजनीयः प्रयत्नेन शिव
एव महेश्वरः।। येन संपूज्यते नित्यं लिंगरूपी सदाशिवः।। स धन्यस्तत्कुलं धन्यं धन्यं तज्जन्म स
र्वथा।। उद्धूलनत्रिपुंड्राभ्यामलंकृततनुः शिवं।। यो र्चयिष्यति तत्तुल्यो भुवि कोवा भविष्यति।।
अनभ्यर्च्य महादेवं योश्नाति फलमंबु वा।। संप्राप्नोति मुहुर्जन्म क्षुद्रचंडालयोनिषु।। १५।।
स्मृतोपि मुक्तिदः सांबः शंकरः करुणाकरः।। पूजितो बिल्वपत्राद्यैर्मुक्तिं किं न प्रयच्छति।। अ
नन्यसदृशमत्वाद देवदेवोत्तमं शिवं।। योनार्चयति पुष्पाद्यैः स शिवेनैव वंचितः।। अनन्यसदृशो
देवः शिव एव महेश्वरः।। तमन्यसदृशं मत्वा नरकं याति मानवः।। पुरा कश्चिद्द्विजवरो हिमवद्देश
संस्थितः।। ददर्शान्ये द्विजे तत्र तमुवाच समादरात्।। विप्र०।। द्विजदेवेषु कः पूज्यः सर्वदेवोत्तम
श्च कः।। यत्पूजया मोक्षलक्ष्मीः प्राप्तव्या तं वदस्व मे।। इत्युक्तं तद्वचः श्रुत्वा भ्रमाद्वाक्यमुवाच

सः।। शिवोपेंद्रादयो देवाः समा इत्येव सोत्तरं।। ततस्तद्वचनं श्रुत्वा भ्रांतोयमिति तं द्विजं।। भ
र्त्सयित्वा ययौ विप्रः शिवं देवोत्तमं स्मरन्।। शिवेन्यसुरतुल्यत्वं येनोक्तं भ्रांतिपूर्वकं।। तेनोग्रसर्प
दष्टेन तत्तनुस्त्यक्ता कदाचन।। ततो यमांतिकं नीतः सयामैरतिदारुणैः।। यमाग्रे ताडितो घोरं प्रल
पन्नतिदारुणं।। यमदूता ऊचुः।। यमायं ब्राह्मणः पूर्वं हिमवद्गिरिसंश्रयः।। सर्वदान्यसुरैः साम्यं शि
वं वदति मोहतः।। विष्णुरुवाच।। इत्युदीरितमाकर्ण्य यमदूतवचो यमः।। विवृत्तलोचनं घोरं क्रो
धसंकुलितेक्षणः।। तीक्ष्णमत्यंतकुटिलं हेतिमत्यंतलोहितं।। जयाहात्यंतसंतप्तं कंपयन्न
खिलानपि।। ततस्तद्दशनामाशु विच्छेद कुपितेक्षणः।। ततः प्रवेशयामास नरके चातिदारुणे
तस्मादनन्यसदृशं महादेवं सुराधिपं।। योन्यतुल्यतया वदेत्स याति नरकं ध्रुवं।। अन्यसाधारणं
मत्वादेव देवोत्तमं शिवं।। पिशाचवत नवाभूत्वा वसंति बहवो वने।। ममैव पुत्रो मदनो देवदेवो
त्तमं शिवं।। अन्यसाधारणं मत्वा दग्धएव हि सत्वरं।। यथा पतंति शलभाः पावकेनत्तमज

सा॥ तथा पतंति नरके शिवद्रोहरता जनाः॥ शिवद्रोहात्परं पापं नास्ति कुत्रापि सर्वथा॥ तद्द्रो
हेणाति घोरेषु नरकेषु पतिष्यति॥ पातकानां विचित्राणां विचित्रा यातना स्मृताः॥ विचित्रयात
नाभाजो विचित्रा एव निश्चिताः॥ शिवद्रोहरते रेताः सर्वा एव हि यातनाः॥ मात्क्रमा नात्र संदेहः
सत्यमेवाभ्युतं मया॥ अनंतब्रह्महत्याभ्यो यावत्पापमवाप्यते॥ तावत्पापं शिवद्रोहात्प्राप्तव्यं नात्र
संशयः॥ शिवेनिशावान्यतुल्यत्वधीः शिवद्रोह उच्यते॥ तेन द्रोहेण नरके तिष्ठति सततं जनाः॥ वि
श्वाधिकं महारुद्रं विश्वस्येशानमव्ययं॥ कोन तुल्यतया वेद विनाबेडालरूपो निजं॥ ईशानं सर्व
विद्यानां सर्वभूतेश्वरं शिवं॥ योन्यतुल्यतया वेद तन्माता व्यभिचारिणी॥ सर्वाधारमनाधारं ह
रमाद्यंतवर्जितं॥ योन्यतुल्य०॥ त्रियंबकं महादेवं सांबमव्यक्तलक्षणं॥ योन्य०॥ अनंतं शंक
रं सांबमंबिकाप्राणवल्लभं॥ योन्य०॥ सोमं रुद्रं तमात्मैकमरुणं रागमक्षरं॥ योन्य०॥ कं
दर्पगौरं विश्वेशं सर्वज्ञं मदनांतकं॥ योन्य०॥ वंद्यवंद्यं सुराधीशमप्रमेयमनामयं॥ योन्य०

निष्कलं निर्गुणं नात्तं शिवमक्षरमव्ययं॥ योन्य०॥ अष्टमूर्तिं महादेवं सृष्टिस्थित्यंतकारिणं॥ योन्य
तुल्य०॥ कलौ कलिहतामर्त्या देवदेवोत्तमं शिवं॥ अन्यसाधारणं मत्वा यास्यंति नरकं ध्रुवं॥ जगतां ज
ननी गौरी यद्देवार्धांगभागिनी॥ स देवोन्यामरैस्तुल्यो भविष्यति कथं वद॥ यस्य पुत्रो गणाध्यक्षः स
र्वविघ्नविनाशकः॥ स देवोन्यामरैस्तुल्यो भविष्यति कथं वद॥ यस्य पुत्रो महासेनः षण्मुखः सु
ररक्षकः॥ स देवो०॥ यस्य प्रसादलेशेन वैकुंठं प्राप्तवाहेने॥ स देवो०॥ यदाज्ञावशगं सर्वं जग
त्स्थावरजंगमं॥ स देवो०॥ यद्द्वारपालका नित्यमस्मात्कमतिशासकाः॥ स देवो०॥ पात्रे वेत्रग्रहा
राणां यद्द्वारि वयमन्वहं॥ स देवो०॥ यद्भृत्यैरूर्ध्वमप्रापि पृथिवी पृथुशक्तिभिः॥ स देवो०॥ य
स्यैश्वर्याण्यनंतानि यस्तु देवशिखामणिः॥ स देवो०॥ यस्य निश्वासितं वेदा नानाशाखाविजृंभि
ताः॥ स देवो०॥ यल्लिंगार्चनमात्रेण त्रैलोक्यश्रीनवाप्यते॥ स देवो०॥ यद्ध्यानात्प्राप्यते मर्त्यैर्मु
क्तिः कांतातिदुर्लभा॥ स देवो०॥ यतंते योगिनः सर्वे यमुपासितुमन्वहं॥ स देवो०॥ यजंति या

गैर्विविधैर्यज्ञैर्नोयमनामयं।। स०।। यस्य न ज्ञायते तत्त्वमनेनैरपि साधनैः।। सदेवो०।। यः कल्पं
तेरखिलानस्मात्संहृत्यैकोधितिष्ठति।। सदेवो०।। यद्वामांगाद्देहजातो दक्षिणांगाद्द्वान्विधेः।। स०
यस्य नेत्रत्रयं शुद्धं सोमसूर्याग्निसंज्ञकं।। सदेवो०।। यस्त्वप्रमेयविभवो यो नन्यशरणप्रियः।।
स०।। यः शास्ता सर्वदेवानां पिता माता च रक्षकः।। यस्तु दापयिता दाता भोज्यभोजक एव च
स०।। यः सत्यज्ञानमानंदो विज्ञाय द्रूयमेव च।। स०।। यः साक्षात्परमाद्वैतं परब्रह्म परात्परं।।
स०।। अतः सर्वात्मराधीशः शंकरः करुणाकरः।। पूजनीयः प्रयत्नेन चतुर्वर्गफलार्थिभिः।।
शिवस्मृतेरनायासान्मोक्षलक्ष्मीरवाप्यते।। अतोनंतो विहायान्यः स्मर्तव्यो मुक्तिकांक्षि
भिः।। अतः कार्यं विहायान्यत्कुरु शंकरपूजनं।। तत्पूजया मोक्षलक्ष्मीः प्राप्तव्या नात्र सं
शयः।। तमापदो न स्पृशंति यो नित्यं शिवपूजकः।। अतः कार्यं विहायान्यत्कुरु शंकरपूज
नं।। तमेव भजते लक्ष्मीर्यो नित्यं शिवपूजकः।। अतः कार्यं०।। तमेव सर्वे सेवंते यो नित्यं शिवपू

जकः।। अतः०।। स एव पुत्रपौत्राढ्यो यो नित्यं शिवपूजकः।। अतः०।। स एवाश्रयतां याति यो नि
त्यं शिवपूजकः।। अतः०।। स एव पुण्यनिलयो यो नित्यं शिवपूजकः।। अतः०।। स एव सर्वधर्मा
णामाश्रयः सततं विधेः।। अतः०।। स एव स्वर्गभाग्ब्रह्मन्यो नित्यं शिवपूजकः।। अतः०।।
स एव लभते मोक्षं यो नित्यं शिवपूजकः।। अतः।। आलोड्य वेदानखिलान्सारमेतत्समुद्धृतं।।
शिवपूजनमेवात्र चतुर्वर्गफलप्रदं।। शिवस्याप्यर्चनात्तुष्टे किमलभ्यं जगत्त्रये।। यत्पूजनान्मो
क्षलक्ष्मीः सुलभा दुर्लभापि सा।। अस्माकं तु शिवादन्यो नास्ति संरक्षकस्ततः।। व्रजामः शर
णं सांबं शंकरं करुणाकरं।। शिवोस्माकं धनं दाता शिवोस्माकं प्रभुः पिता।। शिवोस्माकं प
रः सेव्यः सत्यं सत्यं मयोच्यते।। स्मर्तव्यः पार्वतीनाथः कर्तव्यं शिवपूजनं।। स्थातव्यं शंकर
स्थानमंतेऽथ शिवसन्निधौ।। यस्य स्वर्गापवर्गौ च ज्ञानेन पूज्यः सदाशिवः।। स्वतंत्रः पार्वतीना

शि०रह २०७

थोयतः स्वर्गापवर्गदः॥ रहस्यं शृणु वक्ष्यामि गोपनीयं प्रयत्नतः। यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो मु
क्तिं च विंदति॥ पुरा तु हिमवत्प्रांते कश्चिदासीद्द्विजोत्तमः॥ लिंगपूजापरो नित्यं निःकामः शंकरप्रि
यः॥ ऐहिकामुष्मिका भोगा न बधीर्ये शिवार्चकः॥ सर्वदा बिल्वपत्राद्यैरर्चयामास शंकरं
उद्धूलनत्रिपुंड्राभ्यामलंकृत्य तनुं मुदा॥ रुद्राक्षैरप्यलंकृत्य ध्यालेशं स तु संस्थितः॥ रुद्राक्ष
कंकणो नित्यं वहन् रुद्राक्षमालिकां॥ पंचाक्षरं परं मंत्रं जजापाथ महर्निशं॥ पूजयित्वा महादेवं
नृत्यत्यग्रेपि नाकिनः॥ आस्वदमतियत्नेन करताडनपूर्वकं॥ स्तौति शंभुं कृपासिंधुं सर्वदेवशिखा
मणिं॥ अनन्यशरणो नित्यं शिवैकशरणो मुदा॥ एवं प्रत्यहमाराध्य माराधयति शंकरं॥ कार्यांत
रं विहायैव कायक्लेशविवर्जितः॥ जलैः शुद्धैर्महादेवमभिषिच्य पुनः पुनः॥ मुहुर्मुहुर्बिल्वपत्रैर श्रीः॥
भ्यर्चयति शंकरं॥ शिवपूजां करोत्येषः शिवध्यानपुरःसरं॥ प्रदक्षिणप्रणामादीन्यपीषु २०७
ध्यानपूर्वकं॥ शिवमाराध्य बिल्वाद्यैः शृण्वन् शिवकथां मुहुः॥ विप्रस्तिष्ठत्यहोरात्रमन्यकार्य

विवर्जितः॥ २००॥ एतादृशं द्विजं दृष्ट्वा तत्पत्नी पतिदेवता॥ कृतांजलिरुवाचेदं वचनं ललितानना
स्वस्मि भावद्भिरनिशं क्रियते शिवपूजनं॥ अनेन नो मोक्षो भवतां भविष्यत्येव सर्वथा॥ स्वकृदप्य
र्चितः शंभुर्ददाति परमां गतिं॥ करुणासागरः सांबः किंपुनर्मुहुरर्चितः॥ अनन्यशरणो य
स्तु नित्यं शंकरमर्चयेत्॥ तमभ्यायाति मुदिता मुक्तिकांता न संशयः॥ शिवाराधनसंसक्तम
नन्यशरणं सदा॥ कथं त्यक्ष्यति विप्रेंद्र मुक्तिकांता विवेकिनी॥ मुक्तिकांताकामुकस्तु न शि
वान्वेकस्ततः॥ शिवार्चकं विहायेयं क्व गमिष्यति तद्वद॥ यथा कामयते वेश्या धनिकं धनदं मु
हुः॥ तथा कामयते नित्यं मुक्तिकांता शिवार्चकं॥ न शिवाराधकादन्यो मुक्तिकांतामनोहरः
तथा च मुक्तिकांतायाः पतिस्तु शिवपूजकः॥ किंचान्यदहं तु मिच्छामि तच्छ्रोतव्यं प्रयत्नतः॥
तत्सम्यगस्त्वसम्यग्वा तत्त्वचित्तेन दीयतां॥ विप्र उ०॥ धर्मप्रजार्थमुद्वाहः कृतस्सम्यग्य
थाविधि॥ एतावत्कालपर्यंतं प्रजा मयि न दृश्यते॥ यद्येको वा भवेत्पुत्रस्तस्मादप्यपि संतति

वृद्धिमेष्यत्यन्यथा सा कथं वा वृद्धिमेष्यति॥ शिवभक्तः सदाचारः सर्वदा शिवपूजकः। यस्यवं
शोनसंजातस्तत्कुलं किं न नश्यति॥ इत्युक्त्वा नम्रवदना कंपयंती मुहुर्मुहुः। तूष्णीमुवासवि
मलां तामुवाचाथ सद्द्विजः॥ शृणु कौतूहलं भद्रे यदुक्तं तत्तथैव हि। परंतु मोहमायाया साध्वि
छिन्ना न हि त्वयि॥ शिवैकशरणः पुत्रो भवेद्यदि तथैव हि। सुखं भवत्यन्यथा तु सुखलेशोपि
न ध्रुवं॥ जातोपि पुत्रः सततं शिवैकशरणः सदा॥ शिवं संपूज्य सततं लक्ष्मीपतीति न निश्चयः
पुरा लक्ष्मीरुवाचैवं विष्णुं प्रतिहीस्ततः। एवमेवोत्तरं दत्वा पुनरन्यदुवाच च। पुत्रस्ते भवि
ता लक्ष्मीः कश्चिदत्यंतसुंदरः॥ सपुष्पबाणो भविता जगन्मोहकरः सदा। कदाचित्तादृशः
पुत्रो भगवत्कृपया विना॥ यदि न स्यात्तदा दुःखं न कार्यं सर्वथा त्वया॥ अन्यसाधारणत्वेन न
यदि जानाति शंकरं। सति जातेपि तत्पुत्रो मरिष्यति न संशयः॥ अन्यसाधारणत्वेन मत्वा
देवोत्तमं शिवं॥ कोवा जीवति कोवा तं सुखं प्राप्नोति तद्वद। को वा माहेश्वरीमाज्ञामन्यथाक

र्तुमिच्छति॥ शिवद्वेषात्तो येन न पुनर्जीवयिष्यति॥ चंद्रेण विधिनेंद्रेण मया वा शिवदूषकः
नष्टो द्वेष्योरक्षणं तु दूरतोपास्ति मद्द्विजे॥ कदाचिद्यदि पश्यामो वयं शंकरदूषकं॥ तदास्माकं व
तस्थानं न कुत्रापि भविष्यति॥ ताडयिष्यति शूलाग्रैरस्मान्छंकरकिंकराः॥ तेयतो निर्भया वीरा
नास्मांस्ते गणयिष्यंति हि॥ शिवभक्तिं प्रकुर्वाणैरप्यस्माभिरहर्निशं॥ कंपायमानैरमरैः स्थी
यते सत्यमुच्यते॥ पुरा तु शिवपूजार्थं रस्माभिरमरैर्गतं॥ सायंकाले हरद्वारि प्रवेष्टो नाभव
त्तदा॥ ततोस्माभिः सुरैः सर्वैः समूहीभूय सत्वरं। द्वारि प्रवेष्टुमुद्युक्तो मादायार्चनसाधनं
तदा वत्रं समादाय कश्चिच्छंकरकिंकरः॥ अभ्यापपाव तिक्रुद्धः क्रोधसंरक्तलोचनः॥ स त
तो भ्रामयामास वत्रं कांचनं राजितं। वत्राग्रसंगमात्रेण सर्वे पिपतिता वयं॥ कः समर्थोन्यथा
कर्तुं शिवाज्ञां जगतीतले॥ सुराणामपि शास्तारस्ते यतः क्रूरशासनाः॥ आदौ सायं महादेवं
पूजयत्यंबिका ततः॥ षण्मुखोप्यर्चयत्यंबां शंकरं च सुरेश्वरः। ततो गणपतिः सांबमप्य

र्च्चयति सादरं॥ ततोर्चयति सर्वज्ञं नंदिकेशोतिभक्तितः॥ ततोर्चयति सर्वेशं प्रमथाः सुधु
साधनाः॥ अनंताः प्रमथास्तेषां संख्या कर्तुं न शक्यते॥ ततः परं सुरैः सर्वैरस्माभिः पूज्यते शिवः
ततः परं प्रयत्नेन गंधर्वैः पूज्यते शिवः॥ ततः संपूज्यते शंभुः किन्नरैर्भूरिसाधनैः॥ ततः संपूज्य
ते शंभुः शेषाद्यैरुरगेश्वरैः॥ ततो मुनिगणैरन्यैः पूज्यते परमेश्वरः॥ ततो नरवरैरन्यैः पूज्यते
सततं शिवः॥ एवमेव क्रमेणैव सायमन्यहमीश्वरः॥ सर्वैरभ्यर्च्यते सांबो देवदेवोत्तमः शि
वः॥ शैवे वै त्वप्रहाराणां पात्रं वेदमरावयं॥ कान्यः समर्थः शैवाज्ञामन्यथा कर्तुमुच्यतां॥ पुरास
मागतः कश्चिदिह शंकरकिंकरः॥ समागतेन तद्दासी प्रार्थ्यमानेन बोधितं मया॥ तदाजहार वैकु
ठं ससिंहासनसंस्थितः॥ पतितोहं महारण्ये जलान्नादिविवर्जिते॥ ततः पानिराहारां समा
श्रित्य स्वकं वपुः॥ तपश्चीर्णं मया पूर्वं शिवमुद्दिश्य सादरं॥ ततः परं मया प्राप्तो वैकुंठो यं शि
वाज्ञया॥ शिवपूजाप्रभावेन लब्धोयं नान्यथा ध्रुवं॥ अत्यंत सावधानेन तदा प्रभृति सर्वदा

शिवपूजारतेनैव स्थीयते च मया ध्रुवं॥ शिवलिंगं कृसेंगश्चे क्रियते भ्रांतितो मया॥ तदाजीवनमे
वास्य मम सत्यं तेहि दुर्लभं॥ इत्युवाच पुरा लक्ष्मीं विष्णुः शिवपरायणः॥ तथापि संततिः शुद्धा दुर्ल
भा सत्यमुच्यते॥ अशुद्धा संततिर्जाता ह्यस्माकं त्वत्प्रयोजिका॥ सा संततिर्यतोस्माकं सुखदा न
भविष्यति॥ शिवव्रतपरो नित्यं सर्वदा शिवपूजकः॥ पुत्रोप्यस्य भवेज्ज्ञाग्यन्तस्य भाग्यं महत्तरं
जातेपि पुत्रः सष्टधायो नष्टो वा सभविष्यति॥ वर्षद्वजीवनेतस्य शिवार्चादिसुखस्य तु॥ अ
शिवाय दि यद्गेहे शोभवत्सेकोपि का मत्वं॥ संवंशः सर्वथा प्राप्तिनरकं सत्यमुच्यते॥ विष्णुरुवाच॥
इत्युक्त्वा यामिनीमध्ये भार्यासंगमकामिनी॥ संवीक्ष्य संगमं चक्रे ततो गर्भं दधार सा॥ ततो सूतव
सा पुत्रं पद्मपत्रायतेक्षणं॥ दृष्ट्वा तमिति संतुष्टा बभूव सुतवत्सला॥ ततः पुत्रे समुत्पन्ने श्रुत्वा
तज्जनकस्तदा॥ जातकर्मादिकं कर्म चकार मुदिताननः॥ ततोन्नप्राशनादीनि तत्तत्का
ले सुतस्य पिता॥ कृत्वोपनयनं चक्रे सुमुहूर्ते यथाविधि॥ तमेवाध्यापयामास सांगान्वेदान्य

शि०रह
२१०

था क्रमं॥ शास्त्राणि धर्मशास्त्रादीन्यपि मेध्याविनं श्रुतं॥ तादृशं तं सुतं वीक्ष्य पितरौ मुदिताननौ॥
पुत्रपोषणसंसक्तौ स्थिताव न्वादिभिः सदा॥ ततः कदाचित्तं पुत्रं विलोक्यातीव सुंदरं॥ किमस्य भा
ग्यपद्मावीति दध्यौ योगपरः पिता॥ ततः स षोडशे वर्षे मृत्युपाशं गमिष्यति॥ अल्पायुरिति निश्चित्य
क्षणं दुःखवशेऽभवत्॥ ततश्चिंतां समाधाय सर्वद्विजपुंगवः॥ पुत्रमाहूय संश्लिष्य बभाषे वचनं
तदा॥ श्रुतिपारगपुत्राह दृष्टा नानाव सर्वदा॥ तुष्ट एव वसाम्यद्य संतोषो नोपलभ्यते॥ ध्यानं त्वदि
षयं पुत्र कृतं मयद्यमयाततः॥ अल्पायुस्त्वं त्वयि ज्ञातं पितुर्दुःखप्रवर्धकं॥ इत्युक्तं तद्वचः श्रुत्वा तदा त
ज्जननी सुतं॥ समालिंग्य॥ ययौ दुःखेन रोदभृशमंजसा॥ ततस्तां जननीं दृष्ट्वा शोकसंतापि
तां स्वतः॥ उवाच वचनं पुत्रः पितृसंतापवर्धकः॥ पुत्र णकिमर्थं क्रियते दुःखं मातर्मे शृणु माशु
चः॥ शरीरं चेदिदं गच्छेन्मम हानिर्न सर्वथा॥ नित्योहमजरो नित्यो मम नाशः कथं भवेत्॥ का
लत्रयेऽपि नाशोऽस्तु मयि बाधित एव हि॥ शरीरमेतदनिशं स्थातव्यमथवालि चेन्मतिः. जन्यस्य

श्रीः॥
२१०

स्य शरीरस्य दुर्लभावस्थितिः सदा॥ शरीरनाशो विज्ञातो दैवादद्य मयाधुना॥ अतः परं सदा ध्या
नं पूजयामि महेश्वरं॥ भस्मनोद्धूल्य सर्वांगं धृत्वा त्रिपुंड्रकं ततः॥ रुद्राक्षधारणं कृत्वा पूजयामि स
दाशिवं॥ शिवकाशीति सततं प्रवक्ष्ये नाम शांकरं॥ एतन्नामद्वयं यस्मान्मोक्षदं सर्वसिद्धिदं॥
शिवेत्यक्षरद्वंद्वं येन संस्मृतमादरात्॥ तेन सर्वाणि पापानि निर्जितान्येव वस्तुतः॥ काशीति
परमो मंत्रो गर्भरक्षामणिस्ततः॥ स येन जप्यते तेन जितं लोकत्रयं ध्रुवं॥ शरीरस्यावसानेस्मि
न्काशीप्राप्तिर्ममाधुना॥ दुर्लभा सा यतः काशी देवानामपि दुर्लभा॥ यस्यां काश्यां सुराधी
शो विश्वेशो विश्ववंदितः॥ सोवस्तिष्ठति सा काशी दुर्लभैव नृणां ध्रुवं॥७४॥ यस्यां काश्यां निवि
ष्टेन स्वर्गभोगस्तृणीकृतः॥ सा काशी मोक्षदा नित्या कथं प्राप्स्याम्यथाधुना॥ यस्यां काश्यां तु
वैडालः पूज्यते विबुधोत्तमैः॥ सा काशी दुर्लभा जाता मरणावसरे मम॥ यस्यां न कलिपापानि
प्ररोहंति कदाचन॥ सा काशी मुक्तिदा साक्षान्मरणे दुर्लभा मम॥ जननीगर्भदुःखानि काश्यां

तुमरणे सति॥ न बाधंते न बाधंते न बाधंते न संशयः॥ संसारबीजनाशस्तु कारणमेव प्रजायते॥ सब
जनाशोनान्यत्र सत्यं सत्यं न संशयः॥ मम जन्मान्यनीतानि कोटिशो दुष्टयोनिषु॥ तेषु दुःखानि
भुक्तानि कोटिशो हि मुहुर्मुहुः॥ मातृगर्भे मलाक्रांते मूत्रशोणितसंकुले॥ बहु दुःखं मया भुक्तं ब
हुधा नात्र संशयः॥ प्रसवावसरे दुःखं यद्भुक्तं पूर्वमुल्बणं॥ तादृशं दुःखमन्येन भोक्तुमेव न शक्य
ते॥ नारकेषु विचित्रेषु संस्थितिश्चाभवन्मम॥ तेषु दुःखानि भुक्तानि बहुधा लमतः परं॥ यतो ना
राधितः शंभुः पूर्वमादरपूर्वकं॥ अतो दुःखानि बहुधा प्राप्तान्येवमया पुरा॥ विज्ञातं तनुना
शोहं भस्मोद्धूलनपूर्वकं॥ पूजयित्वा महादेवं शिवनाम वदाम्यहं॥ ममास्य तु शरीरस्य नापक्ष
वर्त ते ध्रुवं॥ स्नेहपाशेन भवतां शरीरे प्रीतिरस्ति मे॥ कियत्कालमवस्थानं शरीरस्यास्य रोचते
तवतन्मे वदस्वाद्य तत्करिष्ये न संशयः॥ इत्युक्तं तद्वचः श्रुत्वा जननी निजगाद सा॥ नसमा लिंग
शुपूर्णाक्षि पुत्रं वीक्ष्याश्रुसंकुरा॥ आब्रह्मकल्पं पुत्रेदं शरीरं तव तिष्ठतु॥ तावता मम संप्रीति

र्न्यथा दुःखमेव मे॥ इत्युदीरितमाकर्ण्य मातुस्तद्वचनं सुतः॥ भविष्यतितथैवेति जगाद वचनं मुदा॥
शरीररक्षणोपायस्तिष्ठत्येको महान्मम॥ तेनोपायेन मे मातः शास्यत्येषा तनुः सदा॥ शिवपूजैव
सर्वेषां चतुर्वर्गफलप्रदा॥ ततः सा किममुं देहं सम्यग्रक्षितुमक्षमा॥ शिवपूजैव सर्वेषां सर्वाभी
ष्टप्रदायिनी॥ ततः शिवार्चनं नित्यं करिष्यामीष्टसिद्धये॥ ब्रह्मत्वं ब्रह्मणे दत्तं शिवेन शिवपूज
या॥ तादृशः किं महादेवः शरीरं मे न रक्षति॥ विष्णुत्वं विष्णवे दत्तं शिवेन शिवपूजया॥ तादृशः
किं महादेवः शरीरं मे न रक्षति॥ इंद्रत्वं दत्तमिंद्राय शिवेन०॥ तादृशः०॥ इत्युक्त्वापि तरं नत्वा ब
भाषे वचनं मुदा॥ मृत्युंजयमनुमहामंत्रं सोपदिशतु सः॥ ततस्तमास्तिकं दृष्ट्वा शंकरार्चनत
त्परं॥ आनंदपरिपूर्णोभूदाश्लिष्य सुतमादरात्॥ ततस्तं भस्मरुद्राक्षालंकृतांगमकल्म
षं॥ पुत्रं स्वांके सन्निवेश्य मनुं त्र्यंबकं ददौ॥ ततः स तुष्टहृदयः प्राप्य त्र्यंबकं मनुं॥ संपूज्य
पितरः सम्यङ्नत्वा निर्ययौ गृहात्॥ शूर्पतस्तं निर्गतं दृष्ट्वा पुत्रं तज्जननी तदा॥ हा पुत्र पुत्र

शि०स्य
२१२

पुत्रेतितेनैवसहनिर्ययौ॥ ततःसगत्वामेधावीसरस्तीरमनुत्तमं॥ स्नानंचक्रेविधानेनमनुंत्र्यं
यंबकंस्मरन्॥ स्नात्वावासःसमादायप्रोक्षितंभस्मवारिणा॥ उद्धूलनंचकारादौमंत्रपूतेनभस्म
ना॥ त्रिपुंड्रालंकृतंचक्रेललाटंसितभस्मना॥ त्र्यायुषमितिवेदोक्तंस्मरन्मंत्रंशिवात्मकं॥ आदौ
मूर्ध्निविहायैवत्रिपुंड्रंसितभस्मना॥ त्रिपुंड्रधारणंचक्रेललाटेतदनंतरं॥ ततोंगेष्वपिसर्वेषुत्रि
पुंड्रंविधिपूर्वकं॥ जाबालोक्तेनमार्गेणचकारासितभस्मना॥ ततःपरंयथायोगंरुद्राक्षालं
कृतःशुचिः॥ संध्यांसमाप्यतदनुनत्वामातरमादरात्॥ संपाद्यबिल्वपत्राणिपुष्पाणिवि
विधानिच॥ विधायमृन्मयंलिंगंपूजयामासशंकरं॥ एवंदिनाष्टकंतस्थौसंपूज्यपरमेश्वरं
ततोह्निनवमेप्रातःपुनःपूजापरोभवत्॥ आदायजलपुष्पादीन्यनेकानिशिवार्चकः॥ संक
ल्पपूर्वकंशंभोश्चक्रेरुद्राभिषेचनं॥ तदैवमृत्युर्विविधैर्दूतैरुग्रैःसमावृतः॥ समाययावति
रुद्रोविमन्युःस्तिमितस्ततः॥ तदासमागतंवीक्ष्यपुत्रंसंवीक्ष्यबालकंउवाचस्वजनीभीत्यात

श्री०॥
२१२

न्मातास्वसुतंप्रति॥ मेधावीजननीविमला॥ पुत्रकोयमिहायातिपश्यपश्यातिभीषणं॥ प्रा
यशोमृत्युरेवायंभविष्यतिनसंशयः॥ विशीर्णंजायतेनूनमिदानींहृदयंमम॥ नानुभूतंम
यापूर्वंभयमेतादृशंध्रुवं॥ इत्युक्तंतद्वचःश्रुत्वापूजयन्शंकरंमुदा॥ मौनीधैर्यंवहंस्तेनाशापय
माससंशयं॥ ततोयथाक्रमंपूजांकृत्वादेवस्यशूलिनः॥ त्र्यंबकंमहामंत्रंजजापस्थिरमान
सः॥ ततःस्तोत्रंचकारेदंमहामृत्युविनाशकं॥ अंजलिंमूर्ध्निविन्यस्यध्यायन्नेवात्रिशूलिनं॥ ॥
मेधावीउवाच॥ ॐनमःशंभवेनित्यंमृत्युंजयनमोस्तुते॥ ॐनमःपार्वतीनाथशरणागतवत्सल
ॐनमोविश्वरूपायॐनमोऽनंतमूर्तये॥ ॐनमोरूपहीनायनानारूपायतेनमः॥ ॐनमोनि
ष्कलायशंॐनमोनिर्गुणायते॥ ॐनमोनिर्विकारायशांताकारायतेनमः॥ ॐनमोनिष्प्रपंचाय
नमःश्रुत्यात्मकायते॥ ॐनमःकालरूपायकालातीतायतेनमः॥ ॐनमःश्रीमहेशायसर्वा
धारायतेनमः॥ ॐनमःपुण्यरूपायपुण्यातीतायतेनमः॥ ॐनमोभूस्वरूपायॐनमो

शि०स्य
२१३

जलमूर्तये॥ ॐ नमोग्निस्वरूपाय ॐ नमो वायुमूर्तये॥ ॐ नमो काशरूपाय दिक्स्वरूपायते न
मः॥ ॐ नमः कालरूपाय यज्ञरूपायते नमः॥ ॐ नमो भानुरूपाय चंद्ररूपायते नमः॥ ॐ नमः
सर्वरूपाय शरण्याय नमो नमः॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः॥ इत्यादितं वाजं भेदधामी
तिपर्यंतं नमं पठित्वा पुनः स्तोत्रं॥ प्रणतोस्मि महादेव प्रपन्नोस्मि सदाशिव॥ निवारय महामृत्युं
मृत्युंजय नमोस्तुते॥ गौरीपते विरूपाक्ष शरणागतवत्सल॥ निवारय महामृत्युं मृत्युंजय नमो
स्तुते॥ कालकूटधर श्रीमन्काल कालकृपानिधे॥ निवारय०॥ चंद्रशेखर विश्वात्मन करुणाकर
शंकर॥ निवारय०॥ ऋग्यजुः सामरूपेश त्रिलोचन सुरोत्तम॥ निवारय०॥ अनंताभेय कल्या
णकल्याणगुणसंश्रय॥ निवारय०॥ सुरेश्वर सुराराध्य दग्धत्रिपुरकानन॥ निवारय०॥
त्रिशूलपाणे पापारिन कल्पक्षयकरानघ॥ निवारय०॥ पाशांकुशधर श्रीमन्नमोड
मरुभूषण॥ निवारय महामृत्युं मृत्युं०॥ भस्मोद्धूलितसर्वांग हरानिर्धूतकल्मष॥ निवा०

श्री:॥
२१२

प्रदर्शीय महाशूलं कल्पक्षयकरेहर॥ निवारय०॥ भुजंगभूषण श्रीमन्वृषभध्वजविश्वग॥ निवा
रय०॥ इति स्तुत्वा महादेवं दत्वा पुष्पांजलिं ततः॥ प्रणम्य बहुधा प्रीत्या नर्तनं स्वेदमादरात॥ पु
नः संपूज्य विश्वेशं बिल्वपत्रैर्मनोहरैः॥ पुनर्मृत्युहरं मंत्रं जजाप द्विजपुंगवः॥ तदानीं द्विजमालोक्य
शिवपूजापरायणं॥ चित्रगुप्तं विलोक्येदं मृत्युर्वचनमब्रवीत॥ मृत्युरुवाच॥ एनमल्पायुषं वि
प्रमहं नेतुमुपागतः॥ पाशप्रहरणे शक्तिः कुंठितेव ममाधुना॥ अतः परं कथं नेयो मृत्युक
लोकं मया स्य हि॥ धैर्येण शिवलिंगाग्रे कथं तिष्ठति पश्यतं॥ एनमुद्दिश्य बहुधा व्याधयः प्रेरिताः
पुरा॥ तेपि नैनं स्पृशंत्येव बहुदुःखप्रदा अपि॥ मया श्येन वेगेन नेतुमेनं समागतं॥ तेन वेगे
न कार्यं तु दृश्यते नाद्य सर्वथा॥ धृत्वा समानयिष्यामि यद्य ये गम्यते मया॥ परं तु गतिर्नेवा
त्र कुंठिता मम सर्वथा॥ अव्याहतं तु गमनं मम पूर्वमभूत्तदा॥ अद्यैव कुंठितं जातं गमनं द्वि
जबालके॥ नायं जीवन लोकस्य मृत्युकालोयमिस्य हं॥ समागमोस्मि मरणं कथमस्य न

शि०स्य
२१४

जायते। मया तु ताः दृष्ट्वा नीता यादृशाः सुरवंदिताः॥ कथं मे कुंठिता शक्तिरस्मिन्न् द्विजबालके॥
इंद्रपुत्रो मया नीतः पूर्वमत्यंतलीलया॥ ब्रह्मपुत्राश्च बहवो नीता एव मुहुर्मुहुः॥ विष्णुपुत्रोपि म
दनो लक्ष्मीप्रियविवर्धनः॥ अत्यंतबलवान्नीतः क्षणेनैव हि लीलया॥ एतादृशस्य शक्तिर्मे
कथमद्यैव कुंठिता॥ किं कर्त्तव्यं मयेदानीं कर्त्तव्यं नोपलभ्यते॥ कथमेतादृशाः काला मयेदानीं
समागताः॥ अयमल्पायुरत्यल्पो मयानेतुं न शक्यते॥ अधिकारः शिवेनाद्य मम दूरीकृतोथ
वा॥ यदि दूरीकृतोन्योपि मृत्युर्नैवाद्य दृश्यते॥ इत्युक्तं तद्वचः श्रुत्वा चित्रगुप्तो महामतिः॥
वचो मृत्युरुवाचेदमतिविस्मयकारणं॥ चित्रगुप्त उ०॥ महामृत्युहरं मंत्रं जपत्ययमिहार्भकः॥
संपूज्य शांकरं लिंगं बिल्वपत्रादिभिर्मुदा॥ स्वर्गापवर्गदातारं शंकरं योर्चयिष्यति॥ स न मृत्यु
वशं याति सत्यं सत्यं न संशयः॥ अभीप्सितार्थदं नित्यं महेशं योर्चयिष्यति॥ स न मृत्युव
शं याति०॥ अनन्यशरणो नित्यं योर्चयिष्यति शंकरं॥ स न०॥ मृत्युंजयं महारुद्रं योर्चयिष्य

श्रीः॥
२१४

ति शंकरं॥ स न०॥ सर्वदेवोत्तमं सांबं योर्चयिष्यति शंकरं॥ स न०॥ ६१॥ अप्रमेयमनाद्यंतं योर्चयि
ष्यति शंकरं॥ स न०॥ उमाकांतं प्रयत्नेन सततं योर्चयिष्यति॥ स न०॥ श्रीनीलकंठं विश्वेशं सततं
योर्चयिष्यति॥ स न०॥ मृत्युंजयं समभ्यर्च्य बिल्वपत्रादिसाधनैः॥ कालमृत्युं तरत्येव किमुताल्प
पमृत्यवः॥ यत्पूजया महाविष्णुर्विष्णुत्वं प्राप दुर्लभं॥ तदर्चनपरः कोपि न मृत्युवशमेष्यति॥
यत्पूजया पुरा ब्रह्मा ब्रह्मत्वं प्राप दुर्लभं॥ तदर्चनपरः कोपि न मृत्युवशमेष्यति॥ यत्पूजया
पुरा देवाः सर्वे देवत्वमाप्नुयुः॥ तदर्चन०॥ यत्पूजया परो मोक्षोप्ययत्नेनैव लभ्यते॥ तदर्चन०॥
यस्य स्मरणमात्रेण विनश्यत्यापदः क्षणात्॥ तदर्चन०॥ मत्प्रभावं न जानंति वेदा अपि सह
स्रशः॥ तदर्चन०॥ यः सच्चिदानंदघनः सर्वशश्चिन्मयः प्रभुः॥ तदर्चन०॥ यः सर्वात्मा सर्वरू
पः साक्षी सर्वत्र कर्मणां॥ तदर्चन०॥ यः कालकालः कालात्मा कालरूपी सदाशिवः॥ तद
र्चन०॥ यस्त्रिनेत्रो विश्वकर्ता विश्वाशापरिपूरकः॥ तदर्चन०॥ यमर्चयंति योगींद्राः सर्वदा सा

बमीश्वरं॥तदर्चनेन०॥सर्वसुखमवाप्नोति सर्वाखिलसंपदः॥यस्यनित्यंमहादेवे भक्तिर्व्यभि
चारिणी॥तस्यैवजन्मसफलंजीवितंचसुजीवितं॥यस्य०॥तस्यैवजननीधन्यातस्यैवकुलं
मुन्नतं॥यस्य०॥तस्यैवजनकोधन्योधन्यास्तस्यापितामहाः॥यस्य०॥तस्यैवारोग्यमनिशं
आयुर्वृद्धिःक्षणेक्षणे॥यस्य०॥तस्यैवभाग्यमुत्कृष्टंतस्यैवसकलोत्सवाः॥यस्य०॥तस्यैववि
मलंज्ञानंतस्यैवविमलंमनः॥यस्य०॥तस्यैवविमलंशीलंतस्यैवविमलंयशः॥यस्य०॥अ
त्यास्तिकोबालकोपिमृत्युंजयमनामयं॥जपत्ययंमहामंत्रंपूजयित्वासदाशिवं॥मृत्युंजय
नमंत्रेणमृन्मयंलिंगमुत्तमं॥सम्यग्बिल्वतरोर्मूलेपूजयत्यवलोकय॥यस्तुबिल्वतरोर्मूले
शुद्धोमृत्युंजयंजपेत्॥तस्यमृत्युभयंनास्तिसत्यंसत्यंमयोच्यते॥बिल्वमूलेमहादेवंलिंगरू
पिणमास्तिकः॥प्रजपंस्तत्यितेनमृत्युपाशाद्विमुक्तये॥सिद्ध्यंतिसंपदस्तस्यबिल्वमूले
शिवार्चनात्॥यस्यास्त्यनन्यगाभक्तिर्महादेवेसुरोत्तमे॥त्वरितास्येनरुद्रेणशिवेवशो

र्णायदि॥पूजयिष्यतिगौरीशंसमोक्षमधिगच्छति॥बिल्वमूलेबिल्वपत्रैःक्षीराप्लुष्टैरखंडितैः॥
कृत्वार्चनंचमनुनागोलक्षाधिपतिर्भवेत्॥बिल्वमूलेबिल्वपत्रैर्घृताप्लुष्टैरखंडितैः॥कृत्वार्च
नंमनुनालभतेसंपदोखिलाः॥पूतोबिल्वतरोर्मूलेत्रैवंयदिमनुंजपेत्॥तदासद्गुरुसंदिष्टो
मंत्रःसिद्धिंप्रयच्छति॥एतस्यहिपिताशुद्धोमहाशैवोयतः — — ॥ततस्तदुपदिष्टोस्यमंत्रः
सफलितोध्रुवं॥ज्वलज्ज्वलनसंकाशंपश्यत्रैवोतमार्भकं॥उद्धूलनत्रिपुंड्राभ्यांरुद्राक्षैर
पिभूषितं॥रुद्राक्षकंकणःसांबलिंगरूपिणमद्वयं॥अभ्यर्चयतिपश्यासुबिल्वपत्रैरखंडि
तैः॥आब्रह्मकल्पमेतस्यमरणंनभविष्यति॥सिद्धमृत्युंजयमनोरस्यस्यान्मरणंकथं॥
यस्यमृत्युंजयोदेवोयस्यमृत्युंजयोमनुः॥तस्यदूरतरोमृत्युर्व्याधयःकिमुतापरे॥मृत्युंज
यतियोदेवःसतुमृत्युंजयःस्मृतः॥सतुशंकरएवान्यस्तादृशोनास्तिसर्वथा॥येतुमृत्युं
जयंनित्यंप्रजपंतिप्रयत्नतः॥तेषांस्वप्नेपिमरणंनभविष्यतिसर्वथा॥४००॥अथपंचशिवक्त्र

रणः श्रीमृत्युंजयजापकः ।। कथं मृत्युवशं गच्छेन्मृत्युधिक्कारणात्ततः ।। बालोपिबलवानेषोय
तो मृत्युंजयपारगः ।। अतो धिक्कारणं तस्य कर्तुमत्र न शक्यते ।। सकिं शास्यपितुं शक्यो मृत्युंजयप
रायणः ।। यं मृत्युंजयमाश्रित्य स्थितो न्यैः पूज्यते सदा ।। सा किं स्पृष्टुं त्वया शक्यो मृत्युंजयवशंग
तः ।। सर्वथा न वशं यास्यत्ययं तव तथा सति ।। आयाहि यामो निलयं यामेनात्र प्रयोजनं ।। विष्णु०
इत्युदीरितमाकर्ण्य मृत्युस्तद्वचनं तदा ।। सत्यमुक्तमिति ज्ञात्वा खिन्नः स्वनिलयं ययौ ।। ततस्तज्ज
ननी मृत्युं परावृत्तं विलोक्य सा ।। आनंदपरमं प्राप विलोक्य स्वतमर्भकं ।। ततः सा हर्षसंपन्ना आ
नंदाश्रूण्यमुंचत ।। मृत एवायमधुना पुनर्जीवितवानिति ।। तदा पुत्रोपि संतुष्टो बिल्वपत्रैर्महे
श्वरं ।। संपूज्य स पुनः स्तोत्रं चकाराघविनाशकं ।। मेधाव्युवाच ।। जय विश्वोत्तम श्रीमन् जय म
गिजनप्रिय ।। जय मृत्युंजयानंत जय मृत्युहराव्यय ।। जय गौरीपते ब्रह्मन् जय शंकर शाश्वत ।। ज
य विश्वैकवंद्येश जय विष्णुवरप्रद ।। जय मन्मथकालाग्ने जय कालहरानघ ।। जय पिंगजटाजू

ट जय भूतिविभूषण ।। जय त्रिलोचनामेय जय शूलवरप्रिय ।। जय कल्याणनिलय जय कल्याणदायक
जय कैलासजनाधार जय कैलासजनप्रिय ।। जय कैलासमाराध्य जय पंचमुखानघ ।। जय निष्कलंकाकार जय
निर्मल निर्गुण ।। जय शांत महादेव जय शंकर शाश्वत ।। जय भस्मोद्धूलितांग जय रुद्राक्षभूषण ।।
जय शंभो सुराधीश जय सर्वामरार्चित ।। जय भानुगणाकार जय चंद्रकलाधर ।। जयानेकगुणा
कार जयानेकगुणाश्रय ।। जय पुण्यैकनिलय जय लिंगार्चनप्रिय ।। जय भक्तैकमंदार जय बि
ल्वदलप्रिय ।। जय यज्ञफलाकार जय यज्ञफलप्रद ।। जय श्री मंगलाकार जय श्री मंगल
प्रद ।। जयापाय जयपापारे जय भूतेश्वर प्रभो ।। जय भीमभवावद्य भववैद्याभयप्रद ।। जय श्रीकं
ठ सर्वद जय सर्पविभूषण ।। जय मंडितसर्वांग जय भक्तार्तिभंजन ।। जय भर्ग महेशान जय शर्व
शिवाप्रिय ।। जय ब्रह्मादिवंद्याघ्रे जय ब्रह्मादिवंदित ।। जय श्री विष्णुनेत्राब्जपूजितांघ्रिसरोरु
ह ।। जयोज्ज्वलजटाजूट जय श्री वृषभध्वज ।। जय विद्वन्निरूप जय देवशिखामणे ।। जय क

शि०स्य
२१७

धरगौर्यर्धरो जय शाश्वत सर्वग॥ जय सर्गकरानाश जय स्थितिकराश्रय॥ जय मायागुणाती
त ब्रह्मांडक्षयकारण॥ जयाप्रधृष्य निर्लिप्त निरंजन निरामय॥ जयाखंडमयाकार जय श्रीकं
ठेश्वर॥ जय वेदांतवेद्येश जय मंगलविग्रह॥ जयामितप्रभावाढ्य जयागम्यगुणाश्रय॥ ज
याश्रितामरतरो जय बिल्वदलार्चित जय सर्वागमस्तव्य जय सर्वागमप्रिय॥ जय रुद्रज
पामेश जयोत्कृष्ट जयेश्वर॥ जय शंगजयाराध्य जय सर्वोत्तमोत्तम॥ जयानाथैक
शरण शरण्यपदपंकज॥ जय पंचाक्षराकार जय पंचाक्षरप्रिय॥ जय गौरीप्रियानंत जय पू
र्णमनोरथ॥ जयोंकारमयाकल्प जय सर्वात्मक प्रभो॥ जय कुंदेंदुधवल जय ब्रह्मपितामह॥ जय
षण्मुखनंदीशगणनाथादिसेवित॥ जय चिन्मय चिन्मूर्ते जयानंदमनोन्मय॥ जयान्नमय निर्द्वं
द्व निरीह निरुपाधिक॥ प्रसीद प्रसीद प्रभो चंद्रमौले प्रसीद प्रसीद प्रभो चंद्रमौले॥ प्रसीद प्रसी
द प्रभो शूलपाणे प्रसीद प्रसीद प्रभो मृत्युमृत्यो॥ प्रसीद प्रसीद प्रभो नाथबंधो प्रसीद प्रसी

श्री:॥
२१७

द प्रभो पुण्यसिंधो॥ प्रसीद प्रसीद प्रभो देवबंधो प्रसीद प्रसीद प्रभो मृत्युमृत्यो॥ विष्णुरुवाच॥
इति स्तुत्वा महादेवं पुनः संपूज्य सादरं॥ प्रणम्य भक्तिभावेन ननर्त स्वेदमादरात्॥ ततः शिवम
भिस्नाप्य समालिंग्य मनुं जपेन॥ मत्वा कृतार्थमात्मानं परमं पर्यपद्यत॥ ततो माध्याह्निकीं पू
जां कृत्वा बिल्वदलादिभिः॥ स्तुत्वा प्रणम्य बहुधा पुनः संपूज्य शंकरं॥ पूजां समाप्य पूतात्मा वि
रामादाय मृन्मयं॥ जले संस्थापयामास सबिल्वदलमर्भकः॥ ततो मातरमालोक्य प्रणम्य
चरणौ स्थितान्॥ मात्रा सह गृहं प्राप दुंदुभिध्वनिपूर्वकं॥ ततो ददर्श जनकं शिवपूजापरायणं॥
त्रिपुंड्ररेखाविलसद्भालभागमकल्मषं॥ रुद्राक्षमालावलयं भस्मोद्धूलितविग्रहं॥ शिवपा
दांबुजध्यानसंसक्तं शुचिमानसं॥ मंत्राधिराजममले सर्ववेदांतसंस्तुतं॥ वेदावृत्ते समारा
ध्यं जपंतं शिवसंमतं॥ मंत्राणामाश्रयं नित्यं शिवमंत्रं जपोत्सुकं॥ शिवनामामृतं भूयः
पिबंतं मुकुरादरात्॥ ततः प्रणम्य बहुधा कृतांजलिपुटोर्भकः॥ तादृशं पितरं दृष्ट्वा स्वकृता

शि०रह्य २१८ र्थमनन्यस्य॥ शिवोत्तमस्त्वयितमपि समाप्य शिवपूजनं॥ ददर्श विनयानम्रं सुतं मेधाविनं तदा॥
ततस्तमंकमारोप्य शिरो जिघ्राय सादरं॥ समालिंग्याति संतुष्टो बभूव सुतवीक्षणात्॥ इदमु
क्तं मया ब्रह्मन्कौतुकार्थमिहाधुना॥ किं न वा ज्ञायते पूर्णं शिवपूजाविधेः फलं॥ समभ्यर्च्य महाद
वं मानवोपि सकृन्मुदा॥ तृणीकरोति सहसा सुरान्स्मानपि ध्रुवं॥ न पश्यत्येव दुःखानि शिव
पूजापरायणः॥ स्वप्नेपि सर्वथा ब्रह्मन्सत्यं सत्यं न संशयः॥ ततो यत्नेन सततं श्रीमहादेवपूज
ना॥ कर्तव्यमन्यदेवानां सत्कापूजनमादरात्॥ शिवपूजा कल्पवृक्षो यथाकामान्प्रयच्छति॥ त
थास्मदादिपूजा तु न भविष्यति कामदा॥ सर्वकामाश्रयो यस्मान्महादेवस्ततः शिवः॥ श्री:॥ २१८
कामितार्थप्रदः सम्यग्भविष्यत्येव पूजितः॥ यदि कामेश्वरः कामान्पूजितो न प्रयच्छ
ति॥ तदा कामप्रदोन्यः किं भविष्यति वद स्वयं॥ अतः सर्वात्मना सर्वं परित्यज्य प्रयत्नतः॥
पूजयध्वं महादेवं सर्वाभीष्टप्रदायकं॥ विधेविनाप्रयासेन पत्रेणाप्यर्चितः शिवः॥ दद

ति परमां मुक्तिं सकृन्नेह न पूज्यते॥ महेशपूजया ब्रह्मन्यापतापं च नश्यति॥ ततः शिवार्चनं मे स्तु
ण्यं क्वापि न विद्यते॥ यदि नाराध्यते शंभुरस्माभिरतियत्नतः॥ तदाधिकारानस्माकं शिवो
दूरीकरिष्यति॥ देवता सार्वभौमस्तु महादेव श्रुतिश्रुतः॥ ततो वयं तु सर्वेपि महादेवस्य सेव
काः॥ सेवकैर्यदि सेव्यस्य पूजनान्क्रियते तदा॥ सेव्यात्तु केक खं प्राप्य मस्माभिः शिवसेवकैः॥
शिवपूजापरं ब्रह्मन्नापदो न स्पृशंति हि॥ ततः सर्वं परित्यज्य पूजयामः सदा शिवं॥ शंकरं शर
णं यामो भक्ताभीष्टप्रदायकं॥ शरणं शंकरादन्यो नास्माकं सत्यमुच्यते॥ यः शंकरं विहायान्यं श
रणं याति मोहतः॥ स दुर्भग इति ज्ञेयो मोहमात्रविवर्जितः॥ किमत्र बहुनोक्तेन सारमेतद्वचः
शृणु॥ भजस्व शिवमेवैकमस्माकं शरणं शिवः॥ भवदागमनस्यापि ज्ञातमेव प्रयोजनं॥ त्वया
विमर्शमिंद्रस्य मोहः स न निवर्तितः॥ कश्चिन्नाम्नाश्वरंमत्वाभ्रमणं ऋषिवल्कलः॥ तपः करोति
मूढात्मा शाकग्रामशिलातटे॥ तत्र यास्याम्यहं ब्रह्मंस्त्वमप्यायाहि सानुगः॥ निपर्तनीयस्तपसो

शि०रह मामुद्दिश्य जटाकरः॥ शिव उवाच॥ इत्युक्ते शक्रादिभिः सार्कं शालग्रामशिलास्थले। सोपि विष्णुः स
२११ लक्ष्मीको गरुडाद्यैश्च संयुतः॥ ददर्श स महाविष्णुर्ब्रह्मेंद्रादिसमन्वितं॥ ततः प्रणम्य बद्धांजलि
स्तास्तोत्रैरुपस्थितः॥ स यथा वरं देवी मोक्षं देहीति सादरं। ततो विष्णुरुवाचेदं वचनं स्वानुसारतः
अत्र घोरं तपस्तप्तं मामुद्दिश्य जटाकर। मोक्षदाने न शक्तोहं सत्यं सत्यं न संशयः॥ मोक्षप्रदाता
भगवान्देवदेवोत्तमः शिवः॥ न शिवादन्यो मोक्षदाता सत्यं सत्यं न संशयः॥ स्वर्गापवर्गदातारं स्व
ष्टिस्थित्यंतकारिणं॥ मोक्षार्थमतियत्नेन शरणं व्रज शंकरं॥ ईश्वरत्वभ्रमेणैव महादेवेन वंचिताः
मामर्चयंति बहवः शिवमायाविमोहिताः॥ शुक्तिस्तु रजतत्वेन सम्भ्रमं संकल्पिता। तां किं रजत
यते॥ तथाहमीश्वरत्वेन ज्ञातश्चेदीश्वरोस्मि किं। ईशानः सर्वविद्यानामित्यादौ ईश्वरः शिवः॥ श्रीः॥
विज्ञातो न तदन्यस्तु वस्तुतस्त्वीश्वरो ध्रुवं॥ महादेवः॥ इति विष्णुवचः श्रुत्वा बभाषे वचनं मुदा॥ २११
मम वैकुंठवासो वा दीय इत्यभिनम्रतः॥ ततो विष्णुरुवाचेदं वचनं सुरसन्निधौ॥ विप्र वैकुंठवासो
पि मया दातुं न शक्यते॥ अधिकारो मया प्राप्तो वैकुंठस्य शिवार्चनात्॥ यथेच्छमधिकारोपि

मम नास्त्यधुना ध्रुवं॥ तुभ्यं वैकुंठवासोपि मया दातुं न शक्यते॥ शिवपूजां विना तत्र वासस्त्वत्यंत
दुर्लभः॥ क्षणार्धमपि यद्वासान्महत्सुखमवाप्यते॥ तत्सुखं दुर्लभं विप्र विना शंकरपूजया॥
स्वतंत्रः पार्वतीनाथः सर्वदेवशिखामणिः॥ स समाराधितोभीष्टं प्रयच्छति न संशयः॥
अस्वतंत्रा वयं सर्वे ब्रह्माद्या नात्र संशयः॥ अतोस्माकमभीष्टार्थदाने सामर्थ्यमेव न॥ मामु
द्दिश्य तपश्चर्या या कृता त्वया द्विज॥ मत्कृतोपद्रवः कोपि नाभविष्यतिति ध्रुवं॥ तुभ्यम
यापि साहाय्यं कार्यं शक्त्यनुरोधतः॥ यजस्वाभीष्टसिद्ध्यर्थं देवदेवोत्तमं शिवं॥ शिवं यजस्व
यत्नेन त्यक्त्वान्याशामहर्निशं॥ प्रयच्छति महादेवः पूजितोभीष्टमन्वहं॥ संतुष्टश्च महादेवस्त
स्याद्देयं न दृश्यते॥ ददाति मोक्षपर्यंतं पूजितः पार्वतीपतिः॥ अनाप्यमेमहादेवं यः सुखं प्राप्तुमिच्छ
ति। समूर्ख इति विज्ञेयस्तत्त्वज्ञैः सत्यमुच्यते॥ मया विचार्य देवेभ्यः सर्वेभ्यस्तत्त्वमादरात्॥ शि
वः संपूज्यते नित्यं शिवमंत्रजपात्सुखं॥ पश्य ब्रह्मादिकान्देवान् शिवनामजपात्सुखान्॥ भ

शि०रह
२२०

स्माद्धूलितसर्वांगांल्लिंगपूजापरायणान्॥ देवर्षियक्षगंधर्वकिन्नरैरगैरपि॥ पूजनीयः प्रयत्ने
न शिव एवेष्टसिद्धये॥ शिवपूजैव सर्वेषामभीष्टफलदायिनी॥ ततस्त्वमतियत्नेन कुरु शंकरपू
जनं॥ शिवपूजनमात्रेण मोक्षश्च लप्स्यते त्वया॥ किमर्थमन्यपूजार्थं प्रयत्नोपि वद स्व मे॥ त्रिपुं
ड्रधारणं कृत्वा भस्मोद्धूलनपूर्वकं॥ रुद्राक्षधारणं कृत्वा जयदेवोत्तमं शिवं॥ विभूतिधारणं त्यक्त्वा
रुद्राक्षधारणं॥ मामापूजय विश्वेशं शिवलिंगस्वरूपिणं॥ शिवः॥ इत्युक्तेंद्रादिभिः सार्कं विष्णु
र्विधिसमन्वितः॥ वैकुंठं प्राप विमलमारुह्य गरुडं मुदा॥ अतो मदर्चनादेव मोक्षः संप्राप्यते
शिवे॥ विना मदर्चनं देवि मोक्षो न भवति ध्रुवं॥ पूजितोहं महादेवो यस्य यद्यदभीप्सितं॥ तत्त
द्दास्यामि सुभगे सत्यं सत्येन संशयः॥ देवता सार्वभौमोहं भुक्तिमुक्तिप्रदायकः॥ सत्यमे
तत्पुनः सत्यमुधृत्य भुजमुच्यते॥ सर्वाधारं सुके(?)लोकैकवंद्यं सर्वेशास्यं सर्ववेदांतवेद्यं॥ सर्वा
तीतं सर्वमोक्षैकहेतुं विज्ञायेशं मामनन्या भजंति॥ ५०१॥ ॥ इति श्रीशिवरहस्ये सप्तमां

श्री०
२२०

शे शिवगौरीसंवादे षोडशोऽध्यायः॥ १६॥ ॥ शिव उवाच॥ अथातः संप्रवक्ष्यामि पूजोपक
रणं शिवे॥ अधिकार्येपि पूजायामुच्यते शृणु सादरं॥ ब्रह्मक्षत्रियविट्शूद्रदेवगंधर्वमानवाः॥ यक्षा
द्येपि स्वसिद्ध्यै मामीशं पूजयंति हि॥ ब्राह्मणैर्देवमुनिभिर्वेदैश्चाहरहः शिवे॥ वेदमंत्रैरहं पूज्य
स्तदन्यैस्तंत्रमार्गतः॥ आदौ मत्पूजनात्पूर्वं यत्कर्तव्यं तदुच्यते॥ कर्तव्यकरणाभावे नाधिकारी
भविष्यति॥ प्रातः शौचादिकं कृत्वा स्नानं कार्यं प्रयत्नतः॥ रुद्रसूक्तैर्मार्जनं च कर्तव्यं स्नानतत्परैः
जले निमज्ज मामीशं ध्यात्वा सांबमहेश्वरं॥ महादेवेति मंत्रोयं जपनीयः सदा शिवे॥ ततः प्रय
त्नतो देवि कर्तव्यं जलतर्पणं॥ परिधानं ततः कार्यं वस्त्रं वार्क्षादिभिः शिवे॥ तदनंतरमाचम्य भ
स्म ग्राह्यं प्रयत्नतः॥ सद्योजातादिभिर्भस्म मंत्रैः समभिमंत्रयेत्॥ ततः शरीरं सर्वांगं भस्म
नोद्धूलयेत्ततः॥ त्रिपुंड्रधारणं कार्यं जाबालोपनिषत्क्रमात्॥ रुद्राक्षधारणं कार्यं ततोंगेषु
यथाक्रमं॥ ततः संध्याप्रयत्नेन कर्तव्या स्वकुलात्ततः॥ गोमयेन भुवं सम्यगनुलिप्यास्त्रिपेज्ज

तं॥ ततोपविश्य सकुशेश्यासने जलशोधितं। पूजोपकरणं द्रव्यं सर्वस्वीकार्यमादरात्॥ अष्टौ पा
त्राणि संस्थाप्याणि अर्घ्यार्थमतिशोभने॥ तानि संप्रोक्ष्य सकुशं जलं तेषु प्रपूरयेत्॥ पूरयित्वा ततो
मंत्रं शुद्धः शैवं जपेत्ततः॥ सौवर्णं राजतं ताम्रमथवा मृन्मयं शिवे॥ शिवलिंगाभिषेकार्थं पात्रं स्था
प्य प्रयत्नतः॥ तदुपर्येव संस्थाप्य शिवलिंगं प्रयत्नतः। ततो रौद्रेण मंत्रेण संप्रोक्ष्यार्चनसाधनं
भस्मनांगानि संमृज्य संकल्पं च समाचरेत्। ततः कुंदेंदुधवलं मनुमारमणे शिवे॥ ध्यात्वा नमः शि
वायेति मंत्रेण समुपस्पृशेत्॥ जलकुंभं समापूतं स्मृत्वा मूलमनुं पठेत्॥ मूलमंत्रस्तु सर्वत्र शिवपं
चाक्षरः स्मृतः। पठनीयाश्च मंत्रास्ते मूलमंत्रस्तु सर्वतः। मूलमंत्रोपमंत्रास्तु सर्वमंत्रा यतः स्मृ
ताः॥ सुगंधं जलमीशान पवित्रं कलशाहृतं। अभिषेकार्थममलमर्घ्यार्थं च महेश्वर॥ इत्युक्त्वा
शंकरं ध्यात्वा सर्वदेवशिखामणिं॥ पंचाक्षरजपः कार्यो दशवारं प्रयत्नतः॥ ततोऽष्टमूर्तये
मह्यमर्घ्याण्यपि निवेदयेत्॥ अर्घ्यमंत्राश्च विविधास्ते प्रोच्यंते मयाधुना॥ पृथिवीरूप वि

श्वेश पृथिवीजनकप्रभो॥ गृहाणार्घ्यमिदं शंभो प्रसीद सुरसत्तम॥ जलरूप महादेव जलप्रभवका
रण॥ गृहाणार्घ्यं०॥ तेजोरूप महेशान तेजोजनक शंकर॥ गृहाणार्घ्यं०॥ वायुस्वरूप सोमात्मन्
वायुप्रभवकारण॥ गृहाणार्घ्यं०॥ आकाशरूप सर्वेश आकाशजनक प्रभो॥ गृहाणार्घ्यं०॥
सूर्यस्वरूप सूर्येश शिवसर्वैककारण॥ गृहाणार्घ्यं०॥ चंद्रस्वरूप चंद्रात्मं श्चंद्रेश स्वरसेवग॥
गृहाणार्घ्यं०॥ यज्वमूर्ते यजन्मूर्ते यज्ञकर्मफलप्रद॥ गृहाणार्घ्यं०॥ अष्टावर्घ्याणि दद्यानि मं
त्रैरेतैर्यथाक्रमं॥ श्वेतशाल्यक्षतान्पुष्पबिल्वपत्रैर्युतैर्जलैः॥ ततः पंचामृतैः शुद्धैरभिषेकंस
माचरेत्॥ पंचामृतस्नानमध्ये जलस्नानं समाचरेत्॥ क्षीरं गव्यमिदं शुद्धं जलाक्तं पुतमीश्वर
अभिषेकार्थमानीतं गृहाण मामहेश्वर॥ दधि गव्यमिदं शुद्धं परिष्कृतमुमापते॥ अभिषेका
र्थं०॥ घृतमेतन्महादेव सुगंधं गव्यमुत्तमं॥ अभि०॥ नवं मधु समानीतमिदं कीटाद्यदूषितं
अभिषेकार्थं०॥ शार्करेयं समानीता सिता कीटाद्यदूषिता॥ अभि०॥ एवं पंचामृतैरीशमभि

शि॰रु
२२२

षिच्य ततः परं। सांगेन नमकेनेशं सम्यगभिषेचयेत्॥ जलधाराऽविच्छिन्ना संपाद्या मयि भ-
क्तितः॥ सा धारामृतधारा सा मुक्तिधारा मम प्रिया॥ ततः परं कल्पनीयं बिल्वपत्रोत्तरासनं॥ हे-
मादिनिर्मितं महेश मूलमंत्रेण भक्तितः॥ ततो नवेन शुद्धेन वस्त्रेण परिमृज्य मां॥ सितेन भस्मना सम्-
यगर्चयेन्मूलमंत्रतः॥ चंदनेन सुगंधेन मूलमंत्रेण पूजयेत्॥ मध्ये त्वेकैकपूजांते दद्यादाचमनं मम॥
ततः शाल्यक्षतैः श्वेतैरर्चयेन्मातिलान्वितैः॥ ततो बिल्वदलैः शुद्धैरर्चयेदघनाशकैः॥ बिल्वपत्रं
गृहाणेश बिल्वपत्रप्रिय प्रभो॥ प्रसीद भगवंश्चाभो पातकानि हरस्व मे॥ अमुं मंत्रं समुच्चार्य मूलमं-
त्रमपि प्रिये॥ बिल्वपत्रैः समभ्यर्च्य पुष्पैरपि समर्चयेत्॥ साज्येनागरुसारेण सुगंधेन मनोहरः
धूपस्ततः कल्पनीयो मह्यं यत्नपुरःसरं॥ धूपं गृहाण देवेश सुगंधं सघृतं शिव॥ पातकानि हरस्वे-
श धूपदानेन सादरं॥ दीपं गृहाण देवेश पातकध्वांतनाशक॥ प्रसीद पार्वतीनाथ दीनबंधो दया-
निधे॥ इति दत्वा धूपदीपौ नैवेद्यं परिकल्पयेत्॥ ततः परं कल्पनीयं करोद्वर्तनमादरात्॥ ततः परं

श्रीः॥
२२२

धूपदीपौ तांबूलं च ततः परं॥ ततः पुनर्धूपदीपौ देयावत्यंतभक्तितः॥ गृहाण परमेशान तांबूलमिदमु-
त्तमं॥ एलालवंगकर्पूरपरिष्कृतमुपासते॥ ततः प्रदक्षिणा कार्या द्वादशैकादशाथवा॥ ततः प्रणा-
माः कर्तव्या एकविंशति संख्यया॥ नर्तनं च ततः कार्यं सावधानपुरःसरं॥ शिवपंचाक्षरः शुद्धो
जपनीयः प्रयत्नतः॥ अष्टोत्तरसहस्रं तु न्यासध्यानपुरःसरं॥ शिवपंचाक्षरो जप्यो यद्वा न्यासादिकं
विना॥ ततः परं बिल्वपत्रैः पुष्पैर्नानाविधैरपि॥ पुनः पूजा प्रयत्नेन कर्तव्या मम सादरात्॥
ततो नानाविधैः स्तोत्रैः स्तोतव्योऽहं प्रयत्नतः॥ ततश्छत्रं चामरं च दर्पणं च निवेदयेत्॥ पुनर्नत्वाऽस्मि-
न्निति संस्पृश्य ध्यानपूर्वकं॥ स्पर्शयित्वा पुनर्मंत्रममुमेव पठेच्छिवं॥ अयं मे हस्त इति मंत्रेण स्पृष्ट्वा हस्तत-
लेन मां॥ अष्टोत्तरशतं मंत्रो जपनीयः षडक्षरः॥ एवं पूजा त्वहं कार्या त्रिषु कालेषु सादरं॥ नित्या
पूजेयममले भुक्तिमुक्तिफलप्रदा॥ प्रातः संध्यां विधायादौ पूजनीयास्त्वहं शिवाः॥ कार्यमन्ये-
न कर्तव्यं मामनभ्यर्च्य सर्वथा॥ एवं प्रयत्नतः कार्यं शक्त्या मम पूजनं॥ यथाकथंचित्कर्तव्यमश-

शि०स्प० के नापि सर्वथा॥ न पेयं जलमप्यादौ मामनभ्यर्च्य सर्वथा॥ पिबेद्यदि प्रमादेन रेतः पायी भविष्य
२२३ ति॥ असत्कुलप्रसूतानामभाग्यानां दुरात्मनां॥ नित्यं मदर्चने श्रद्धा कलौ तु न भविष्यति॥ अ
न्यकर्मरता दुष्टा वेदमार्गविवर्जिताः॥ द्विजाः कलौ भविष्यंति शिवपूजापराङ्मुखाः॥ अ
र्च्यं शिवमनभ्यर्च्य देवानभ्यर्चनतत्पराः॥ द्विजाः कलौ०॥ शिवमभ्यर्च्य नभ्यान्यमनर्चयोऽर्चयि
ष्यति॥ स जारज इति ज्ञेयो वेदमार्गबहिष्कृतः॥ अर्च्यो ह्यहमेव सर्वेषु देवेषु हरहो यतः॥ ततोऽर्च
स्य महेशस्य पूजाकार्या मुमुक्षुभिः॥ मदर्चनपरो नित्यं यस्त्रिकालं भविष्यति॥ तमूर्ध्वं नेतु
मिच्छामि प्रतिज्ञेयं मम प्रिये॥ भस्मोद्धूलनसंसक्तो यस्त्रिकालं भविष्यति॥ तमूर्ध्वं नेतुमिच्छा
मि प्रतिज्ञेयं मम प्रिये॥ त्रिपुंड्रधारणे सक्तो यस्त्रिकालं भविष्यति॥ तमू०॥ पंचाक्षरजपास श्रीः॥
क्तो यस्त्रिकालं भविष्यति॥ तमूर्ध्वं०॥ मदेकशरणो नित्यं यो मामभ्यर्चयिष्यति॥ तमूर्ध्वं० २२३
नेतुमि०॥ मत्कथाश्रवणासक्तो मन्मना यो भविष्यति॥ तमूर्ध्वं०॥ मद्भक्तासनते युक्तो यो मां

द्याजी भविष्यति॥ तमूर्ध्वं०॥ मामेव सततं ध्यात्वा यस्तु हृष्टो भविष्यति॥ तमूर्ध्वं०॥ रुद्राध्याये
न सततं यो मां संस्नापयिष्यति॥ तमूर्ध्वं०॥ बिल्वपत्रैस्त्रिशाखैर्मां यो नित्यं पूजयिष्यति॥ तमू०
अर्चयिष्यति यो नित्यमखंडैः शालितंडुलैः॥ तमूर्ध्वं०॥ यस्तु नित्यं तिलैः कृष्णैः श्वेतैर्वा पूजयिष्य
ति॥ तमूर्ध्वं०॥ येऽर्घ्यैः सततं भक्त्या पूजयिष्यति मामजं॥ तमूर्ध्वं०॥ गोधूमैश्चणकैर्माषैर्यो माम
भ्यर्चयिष्यति॥ तमूर्ध्वं नेतुं०॥ असितैर्वा सितैर्वा मां सिद्धार्थैर्योऽर्चयिष्यति॥ तमूर्ध्वं०॥ नीवा
रतंडुलैः स्नापयेद्यो मां०॥ तमूर्ध्वं०॥ श्यामाकतंडुलैर्नित्यं यो मां०॥ तमूर्ध्वं०॥ प्रियंगुतंडुलैर्नित्यं
यो मां०॥ तमू०॥ रत्नैर्मुक्ताफलैर्यो मां शिवमभ्यर्चयिष्यति॥ तमूर्ध्वं०॥ नित्यं सुवर्णपुष्पैर्मां
योऽर्चयिष्यति भक्तितः॥ तमूर्ध्वं०॥ नित्यं चंपकपुष्पैर्मां योऽर्चयिष्यति सादरं॥ तमूर्ध्वं०॥ नि
त्यं कुशेशयैर्यो मां शिवमभ्यर्चयिष्यति॥ तमू०॥ कमलैरमलैर्भक्त्या यो मामभ्यर्चयिष्य
ति॥ तमू०॥ नीलोत्पलैः पुंडरीकैर्यो मामभ्यर्चयिष्यति॥ तमू०॥ कल्हारैः परया भक्त्या यो

मामभ्यर्चयिष्यति।।तमू०।।पुन्नागैः सततं भक्त्या यो मामभ्यर्चयिष्यति।।तमू०।।शतपत्रैरनघैर्मां
यो र्चयिष्यति सादरं।।तमू०।। कदंबपुष्पैरमलै र्यो र्चयिष्यति सादरं।।तमू०।।नागचंपकपुष्पैर्मां
यो र्चयिष्यति भक्तितः।।तमू०।।सितासितैः पारिजातैर्योर्चयिष्यति मां द्विजः।।तमू०।।अर्चयि
ष्यामी मां यस्तु करवीरैः सितासितैः।।तमू०।।विविधैर्मल्लिकापुष्पैर्यो मामभ्यर्चयिष्यति।।तमू०
धुत्तरकुसुमैः शुद्धैर्योर्चयिष्यति मां प्रभुं।।तमू०।। १००।। विविधैरर्कपुष्पैर्मां योर्चयिष्यति भक्ति
तः।।तमू०।।द्रोणपुष्पैः शमीपुष्पैर्योर्चयिष्यति मां प्रभुं।।तमू०।।यस्तु दाडिमपुष्पैर्मां सांबमभ्य
र्चयिष्यति।।तमू०।।नित्यमर्जुनपुष्पैर्मां यो र्चयिष्यति सादरं।।यस्तु कुंदलपुष्पैर्मां नित्यमभ्यर्च
यिष्यति।।तमू०।।यो विष्णुक्रांतकुसुमैर्नित्यमभ्यर्चयिष्यति।।तमूर्ध्वं०।।यो नित्यं बृहती पुष्पै
र्मामीशं प्रजयिष्यति।।तमू०।।जंबूपुष्पैराम्रपुष्पैर्यो मा०।।तमू०।।यस्तु वंतसपुष्पैर्मां सादरं
पूजयिष्यति।।तमू०।।कुरपुष्पैः काशपुष्पैर्यो मामभ्यर्चयिष्यति।।तमू०।।जंबूकपुष्पैरमलै

र्योर्चयिष्यति मामजं।।तमू०।।पलाशपुष्पैरमलैर्यो र्चयिष्यति मामजं।।तमू०।।लोध्रपुष्पै
रतिश्वेतैर्यो मामभ्यर्चयिष्यति।।तमू०।।जंबाम्रतुलसीपत्रैर्योर्चयिष्यति मानवैः।।तमू०।।
पूजयिष्यति यो भक्त्या नित्यं दमनकेन मां।।तमू०।।पूजयिष्यति मां यस्तु जंबाम्रबदरीफलैः।।
तमू०।।यो मां द्राक्षाफलै रीशमभ्यर्चयति सादरं।।तमू०।। नारीकेलफलैर्यस्तु मामर्चयति सा
दरं।।तमू०।।पूजयिष्यति मां भक्त्या यः पक्वैः कदलीफलैः।।तमू०।।पक्वदाडिमबीजैर्मां शुद्धै
र्यः पूजयिष्यति।।तमू०।।दूर्वापामार्गदर्भैर्मां भक्त्या योभ्यर्चयिष्यति।।तमू०।।भृंगराजशमीपत्रै
र्यो मामभ्यर्चयिष्यति।।तमू०।।दध्यन्नेनाज्ययुक्तेन यो मा०।।तमू०।।क्षीरान्नेनाज्ययुक्तेन
यो०।।तमू०।।शर्कराघृतमध्वन्नैर्यो०।।तमू०।।मदालये दीपमालां यस्तु नित्यं करिष्यति।।त
मूर्ध्वं०।।कर्पूरदीपदो यस्तु महाभक्त्या भविष्यति।।तमू०।।साज्यगुग्गुलधूपेन यो मां संधूपयि
ष्यति।।तमू०।।यः साज्यागरुधूपेन नित्यं मां धूपयिष्यति।।तमू०।। आर्यावर्तेषु राक्षि

ब्राह्मणो वेदवित्तमः॥ भसितोद्धूलितवपुस्त्रिपुंड्रांकितमस्तकः॥ रुद्राक्षमालाभरणः सांबेमाम
जमीश्वरं॥ संपूज्यबिल्वपत्राद्यैरालोक्यमुदितस्थितः॥ तदानीमागतः कश्चिन्मदन्यसुरपूजकः
मृद्भूषितललाटांगोभ्रांतो ब्राह्मणवंशजः॥ सवेदवित्तमोविप्रस्तं दृष्ट्वा मूढचेतसं॥ धैर्यं कृत्वा
कियत्कालं तृणपाणिरुवाचतं॥ ब्राह्मण०॥ मृन्निंदितललाटांगगच्छदुर्मुखदूरतः॥ मादृशं यमु
खेमसंशिवं चिंतयन्स्थितं॥ भस्मालयमिति प्रोक्तं ललाटं वेदवित्तमैः॥ तद्भस्मलेपनार्हं तत्
त्कथं निंदितं मृदा॥ त्रिपुंड्रं भस्मनेत्यादिश्रुतिभिर्भस्मधारणं॥ आवश्यकमिति प्रोक्तं तत्कथं ने
कृतं त्वया॥ त्वया वेदमनूच्येति श्रुतिर्न स्मर्यते कथं॥ सत्यं वदेत्यादिधर्मान्सावधानेन संस्मर
अनुलिप्य मृदं भाले वृथा पापमुपार्जितं॥ भ्रमेणापि कृतं कर्म पापसंपादकं ध्रुवं॥ उद्धूलनं त्रिपुं
ड्रं च क्षणमात्रमपि द्विजैः॥ नत्याज्यमेव नत्याज्यं नत्याज्यं सत्यमुच्यते॥ उद्धूलनं त्रिपुंड्रं च ब्राह्मणो
यदि संत्यजेत्॥ प्रमादादथवा मोहात्सयाति नरकं ध्रुवं॥ संध्यात्यागेन विप्राणां ब्राह्मण्यप्रच्य

वो यथा॥ तथैव भस्मत्यागेन ब्राह्मण्यप्रच्यवो ध्रुवं॥ यज्ञोपवीतत्यागेन ब्राह्मण्यप्रच्यवो यथा
तथैव भस्मत्यागेन॥ तथैव भस्मत्यागेन०॥ मादृश्यमुखेमत्वमूर्ध्वपुंड्रं विनिंदितं॥ स्वयं नष्टो
न्यनाशार्थमुद्योगं कुरुषे कथं॥ त्रिपुंड्रधारणं कृत्वा प्रातः कार्यं शिवार्चनं॥ तदिहत्य कथं भ्रांत्या
सेवारः क्रियते त्वया॥ प्रातः शिवार्चनं कार्यं भस्मधारणपूर्वकं॥ तस्मान्नप्रमदोभूयादिति वेदः
स्मृतो न किं॥ त्रिसंध्यमपि संपूज्यं शिवलिंगमिति श्रुतिं॥ कथं न स्मर्यते मूर्ख भ्रांतो जातः क
थं वद॥ शिव०॥ इत्युक्तमादावचनं विप्रः श्रुत्वा ततः परं॥ तं प्रणम्य जगादेवं कृतांजलिपुटः शि
वे॥ द्विज०॥ द्विजोत्तम मयाप्तिालं मृदा भ्रांत्या ५ घदूषितं॥ प्रायश्चित्तं करिष्यामि ब्रूहज्ञाबाल
च्चेदितं॥ शिव०॥ इत्युक्तस्तं द्विजं सम्यक् प्रणम्य च पुनः पुनः॥ स्नात्वा च कार्यविधिवत्प्रायश्चित्तं त
मंतद्विजः॥ ततो भस्मोद्धूलनादि सर्वं कृत्वा यथाविधि॥ शिवलिंगार्चनं सम्यक्यथाविधिपथा
क्रमं॥ तदाप्रभृति वेदोक्तकर्माचरणतत्परः॥ उवास द्धूलनादीनि नित्यं कुर्वन्न तद्विजः॥ ततः प्रयत्ने

तः कार्यं विप्र उद्धूलनादिकं ॥ तत्त्यागे सर्वथा विप्रो भ्रष्टो ब्राह्मण्यतः शिव ॥ धर्मार्थकाममोक्षार्थं येषां
तेषां तु सर्वथा ॥ मेदर्चनं प्रयत्नेन कर्तव्यं विधिपूर्वकं ॥ सदाराधनसंसक्ता यमदूतपरायणाः ॥ तेषां तु
नारकावासो न भविष्यति सर्वथा ॥ पुरा यमभटाः क्रूरा यमशासनकारिणः ॥ संचरंतो वनीपृष्ठे से
त्साहं संस्थितास्त्रिव ॥ तदा कश्चिद्द्विजवरो मदर्चनपरायणः ॥ उद्धूलनत्रिपुंड्राभ्यां रुद्राक्षैस्तु वि
भूषितः ॥ पंचाक्षरजपासक्तो मत्पूजानिरतः सदा ॥ उवास बिल्वच्छायायां बिल्वपत्रार्जनप्रि
यः ॥ तदा तं द्विजमालोक्य ब्राह्मणः कश्चिदागतः ॥ ततस्तमभिवाद्यैव भाषेव वने द्विजः ॥ ॥
ब्राह्मण० ॥ द्विजोत्तम मया पूर्वं पातकं बहुधा कृतं ॥ इदानीमपि पापेभ्यो न निवृत्तं मनो मम ॥ ॥ ॥
किं चिह्नं शतं जातं वत्सराणामपि द्विज ॥ सर्वथाश्वः परश्वो वा मरणं मे भविष्यति ॥ किं च ल श्री:॥
भोपि जातो नास्ति कश्चित्सर्वदिने द्विज ॥ तद्द्य स्वप्नदृष्टांतं शृणु सम्यक् द्विजोत्तम ॥ नी २२६
लाद्रिसन्निभा दृष्टा यमदूता भयानकाः ॥ अतः परं द्विजाधीश किं कर्तव्यं वदस्व मे ॥ एवमुक्ते

तद्वचः श्रुत्वा तमुवाच द्विजोत्तमः ॥ परदुःखप्रहारैकसततः शिवचिंतकः ॥ द्विज ते यदि मोक्षे
च्छा तदा यत्नेन सादरं कुरु देवाधिदेवस्य महादेवस्य पूजनं ॥ महादेवार्चनात्पूर्णं विनश्यंत्यघ
कोटयः ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ शंकरस्मरणादेव विनश्यंत्यघकोटयः ॥ पि
तृजन्मार्जितं नश्यंति पापानीत्यत्र नाद्भुतं ॥ शिवपूजनमात्रेण मुच्यते दुःखसागरात् ॥ सत्यमि
त्यादि वाक्यानि संति वेदेषु भूरिशः ॥ वेदाः प्रमाणमस्माकं ब्राह्मणानां तथा सति ॥ मोक्षः
शिवार्चनादेव भविष्यति न संशयः ॥ शिवपूजां विना मोक्षो न भविष्यति सर्वथा ॥ सत्यमित्या
दिवाक्यानि संति वेदेषु भूरिशः ॥ न सत्याचरणान्मोक्षो न यागैर्विविधैरपि ॥ किंतु मोक्षो महा
देवपूजयैवेति हि श्रुतिः ॥ धर्मार्थकाममोक्षास्तु शिवपूजाविधेः फलं ॥ सत्यमित्यादि वाक्यानि
संति वेदेषु भूरिशः ॥ ततः पूजयदेवेशं महादेवमुमापतिं ॥ उद्धूलनादिकं कुरु त्वं जाबालोक्तवि
धानतः ॥ इति तद्वचनं श्रुत्वा विप्रस्य द्विजपुंगवः ॥ स्नात्वा कृत्वोद्धूलनादि चकार शिवपूज

शि०स्क
२२७

नं।।ततो नत्वा महादेवं सम्यक्कृत्वा च नर्तनं।।ततः प्राणान् जहौ मर्त्यः कुर्वन्नेव मदर्चनं।।ततः सदुः
खोन्यखिलान्यपास्य मदनुग्रहात्।।मद्रूपमगमद्विप्रस्तन्मत्पूजाविधेः फलं।।तदानीं द्विज
संवादं श्रुत्वा ते यमकिंकराः।।तत्सुद्गले च पतितं विलोक्य तमुपाययुः।।ततस्ते दूरतो नत्वा बिल्वा
र्जनपरं द्विजं।।किमयं पुरुषो मुक्त इति पप्रच्छुरादरात्।।मुक्त एवेति तद्वाक्यं श्रुत्वा तमभिपूज्य ते।।ययु
स्त्वंतवेगेन यमस्यैव निकेतनं।।ततस्ते यममालोक्य सभासद्भिरुपासितं।।दंडं निवेद्य काला
यतस्तुः खिन्नमुखा भटाः।।यमः खिन्नमुखान्दूतान्विलोक्यालयत दुःखितः।।किं निासीदिति
पप्रच्छ ते वृत्तांतं निवेदयन्।।५।।ततस्तद्वचनं श्रुत्वा प्रहस्य मुदिताननः।।बभाषे वचनं चारु
यमदूतहितावहं।।यम उवाच।।महादेवार्चने प्रीतिर्यस्य तिष्ठत्यचंचला।।तस्यापि मुक्तिर्भा
लाक्षपूजकस्य तु किं पुनः।।प्राप्यते सर्वथा मुक्तिः शिवपूजकपूजके।।मुक्तिर्न लभ्यते किं ते।।
साक्षाच्छिवपूजके।।शिवलिंगार्चनं कृत्वा शिवलिंगस्य सन्निधौ।।येन त्यक्तास्तनुस्तेन

श्री:।।
२२७

मुक्तिः प्राप्यैव सर्वथा।।भस्मधारणमात्रेण मुक्तिः संप्राप्यते नरैः।।ततः कथं न संप्राप्या मुक्तिः
शिवपूजया।।शिवपूजनरुद्राक्षभस्मधारणतत्पराः।।कीटकेपि तनुं त्यक्त्वा शिवरूपं प्रयांति
हि।।शिवपूजनमाहात्म्यं शिवेन ज्ञायते ध्रुवं।।तदन्यैस्तु कथं ज्ञेयं तत्वतोस्माभिरादृशैः।।रत्न
स्वरूपं जानंति सम्यग्यत्नपरीक्षया।।तथा शिवार्चनस्यापि माहात्म्यं वेद शंकरः।।अतः परं हि
तं वक्ष्ये शृण्वत्वत्तं तयत्नतः।।कर्तव्यमपि रक्ष्येहमप्रमादेन सादरं।।त्रिपुंड्रमात्रं यद्भाले भासते
भस्मनाकृतं।।तान्दृष्ट्वा प्रियमेधासः प्रार्च्यतार्घ्यादिसाधनैः।।त्रिपुंड्ररुद्राक्षधरः शिवपूजा
परायणः।।शिव एवेति विज्ञेयो भवद्भिः सर्वथा भटाः।।भासते भालमनिशं यस्य केवलभस्मना
तस्य भालाक्षता भाले लिखितैव न संशयः।।भस्मलेखात्रयं शुद्धं तद्भालाक्षाक्षरत्रयं।।भा
लाक्ष इति संज्ञापि तदाकारे च तिष्ठति।।भालपट्टे भस्मरेखा स्वरूपैस्त्रिभिरक्षरैः।।भालाक्षता
भाविनीति भालाक्षाक्षरलेखनं।।अतः केवलभस्मांकाः शिवपूजापरायणाः।।शिवाका

राइतिहैयाः सत्यंसत्येनसंशयः ॥ भस्मोद्धूलितसर्वांगान्दृष्ट्वा सोत्साहमन्वहं ॥ पूजयंत्यतियत्ने
न ॥ नत्रमालस्यपराः श्रुत्वाः ॥ रुद्राक्षमालाभरणा भस्मधारणपूर्वकं ॥ पूजयंत्यतियत्नेन० ॥ शिव
लिंगार्चनासक्ता भस्मधारणपूर्वकं ॥ पूजयं० ॥ शिवनामजपासक्ता भस्मधारणपूर्वकं ॥ पूज
यं० ॥ २०१ ॥ शिवप्रदक्षिणासक्ता भस्मधारणपूर्वकं ॥ पूजयं० ॥ शिवाभिवादनासक्ता भस्म
धारणपूर्वकं ॥ पूजयं० ॥ शिवाग्रेनर्तनासक्ता भस्म० ॥ पूजयं० ॥ धूपदानशंकरस्थाने भस्म०
पूजयं० ॥ दीपदानशंकरस्थानेभस्म० ॥ पूजयं० ॥ सोमवारव्रतपरा भस्मोद्धूलनपूर्वकं ॥
पूजयं० ॥ प्रदोषपूजनासक्ता भस्मो० ॥ पूज० ॥ नित्यंशिवकथासक्ता भ० ॥ पूज० ॥ भूताष्ट
मीव्रतपरा भ० ॥ पूज० ॥ त्रयोदशीव्रतपरा भ० ॥ पूज० ॥ रुद्राध्यायजपासक्ता भस्मो० ॥ पूज
यं० ॥ रुद्राभिषेकसंसक्ता भ० ॥ पूज० ॥ शिवध्यानरता नित्यं भस्मो० ॥ पूजयं० ॥ शिवभक्ता
र्चनपरा भ० ॥ पूज० ॥ बिल्वपत्रार्चनरता भ० ॥ पूज० ॥ बिल्वपोषणसंसक्ता भ० ॥ पूज० ॥

बिल्वारोपणसंसक्ता भ० ॥ पूज० ॥ बिल्वमूलजपासक्ता भ० ॥ पूज० ॥ बिल्वपूजनसंसक्ता भ०
पूज० ॥ बिल्वस्पर्शनसंसक्ता भ० ॥ पूज० ॥ बिल्वदर्शनसंसक्ता भ० ॥ पूजयं० ॥ शिवहर भुवभ
र्गभीम शंभो त्रिनयन शंकर शर्व चंद्रमौले ॥ भवशरणमितीरयंनिपेता भजतमुक्तु विनय
नपूजयध्वं ॥ पुरहरसुरनाथमन्मथारे हरिनयनांबुजपद्मपूजितांघ्रे ॥ भवशरण० ॥ निरुपाधिकरु
णाब्धे सुधैकसिंधो गिरीशगिरीश महेश पार्वतीश ॥ भवशरण० ॥ धृतभसितभुजंगराजराज
प्रियहरिवल्लभ हिमनीलकंठ ॥ भव० ॥ विनिहतनरसिंहचर्मवस्त्र स्फुरदुरुकंधर कंधराग्निमूर्ते ॥
भवशरण० ॥ विनिहतविधिमुंडमुंडमालाकलनकरालविलोलशूलपाणे ॥ भवश० ॥ विविध
विभववेदगीतकीर्ते विहितविनोदितताष्टमूर्ते ॥ भवशरण० ॥ शरणदशिपिविष्ट कालकाल त्रिद
शवरामरसेवितांघ्रिपीठ ॥ भव० ॥ ये भस्मधारणं त्यक्त्वा संध्यां कुर्वंति मानवाः ॥ तांस्तान्पातयं
तु नरके घति घोरयुपतेनतः ॥ ये भस्मधारणं त्यक्त्वा होमं कुर्वंति मानवाः ॥ तान० ॥ ये भस्मधारणं

त्यक्त्वा पिबंति जलमादरात्॥ तान०। ये भस्मधारणं त्यक्त्वा भक्षयंति फलादिकं॥ तान०॥ ये भस्मधा
रणं त्यक्त्वा स्वेछं कुर्वंति भोजनं॥ तान०। ये रुद्राक्षानधृत्वैव संध्यां कुर्वंति मानवाः॥ तान०। ये रु
द्राक्षानधृत्वैव होमं कुर्वंति मानवाः॥ तान०। ये रुद्राक्षनधृत्वैव पिबंति जलमादरात्॥ तान०। ये रु
द्राक्षानधृत्वैव भक्षयंति फलादिकं॥ तान०। ये रुद्राक्षानधृत्वैव स्वेछं कुर्वंति भोजनं॥ तान०। ये शि
वाराधनं त्यक्त्वा पिबंति जलमादरात्॥ तान०। ये शिवाराधनं त्यक्त्वा भक्षयंति फलादिकं॥ तान०
ये शिवाराधनं त्यक्त्वा स्वेछं कुर्वंति भोजनं॥ तान०। ये च रुद्रजपं त्यक्त्वा पिबंति जलमादरात्॥
तान०। ये च रुद्रजपं त्यक्त्वा भक्षयंति फलादिकं॥ तान०। ये च रुद्रजपं त्यक्त्वा स्वेछं कुर्वंति भोजनं॥
तान०। पंचाक्षरजपं त्यक्त्वा ये पिबंति जलं जनाः॥ तान०। पंचाक्षरजपं त्यक्त्वा यैः फलादि च
भक्षितं॥ तान०। पंचाक्षरजपं त्यक्त्वा भुक्तं यैरादराज्जलैः॥ तान०। रुद्राभिषेकपानीयं न पिबं
त्यन्वहं च ये॥ तान०। ये न कुर्वंत्यहरहः प्रणामं शूलपाणये॥ तान०। ये न कुर्वंत्यहरहर्बिल्वप

त्रैः शिवार्चनं॥ तान०। ये न कुर्वंत्यहरहः शिवाये नर्तनं मुदा॥ तान०॥ ये न कुर्वंत्यहरहस्त्रिकाले शंकरा
र्चनं॥ तान०। ये न कुर्वंत्यहरहर्भस्मोद्धूलनमादरात्॥ तान०। ये न कुर्वंत्यहरहस्त्रिकालं भस्मधारणं
तान०। ये न कुर्वंत्यहरहः पंचाक्षरजपं द्विजाः॥ तान०। ये न कुर्वंत्यहरहः श्रीमद्रुद्रजपं द्विजाः॥ ता
न०। ये सोमवासरे स्वेछं दिवा कुर्वंति भोजनं॥ तान०॥ शिवरात्रिव्रतं पुण्यं ये न कुर्वंति दुर्धियः॥
तान०। येषां शिवकथालापश्च श्रद्धा दुष्टमेधसां॥ तान०। ये न कुर्वंति सततं शैवेषु प्रीतिमादरात्
तान०। ये न कुर्वंति सततं स्वशक्त्या शिवपूजनं॥ तान०। ये कुर्वंति भ्रमेणापि शिवनिंदां महाभयां॥
तान०॥ सुरापानादिसंसक्ता ये पापिष्ठा नराधमाः॥ तान०। ये च संति द्विजा भूमौ शिवपूजाप
राङ्मुखाः॥ तेभ्यः सृष्टानि नरकाण्येतान्यत्र मया भटाः॥ ये भस्मधारणं त्यक्त्वा तिष्ठंति त्रि
क्षणाभुवि॥ तेभ्यः०॥ ये भस्मोद्धूलनं त्यक्त्वा संध्याद्याचारतत्पराः॥ तेभ्यः०। ये भस्मधारणं त्य
क्त्वा जलाद्याहारतत्पराः॥ तेभ्यः०॥ चकार भोजनं मत्तस्त्यक्त्वा यं भस्मधारणं। अतो यमग्नि

कुंडेस्मिन्पतितः पुनिवर्त्तते॥ प्रज्वलच्छस्त्रकुंडेषु पतिष्यत्ययमीदृशः॥ ततः संतप्तरुधिरे पतिष्य
त्ययमीदृशः॥ सार्धार्बुदेषु नरकेष्वयं परिस्थितास्ततः परं॥ चंडालयोनिष्वियं मुक्तः उत्पत्तिमेष्यति॥
एकैकनरकावासः कृतः शतयुगावधि॥ तावत्पर्यंतमनिशमतिदुःखं भविष्यति॥ ये भस्मधा
रणं त्यक्त्वा सुखं कुर्वंति भोजनं॥ तेषामेतादृशी घोरा यातना त्वहि जायते॥ ये शिवाराधनं त्य
क्त्वा सुखं कुर्वंति भोजनं॥ तेषामेतच्छतगुणा यातनात्र भविष्यति॥ महापातकिनोप्येते शिवपू
जां विधाय ये॥ प्राणांस्त्यजंति तेषां तु यातना न भविष्यति॥ शिवार्चनं शिवध्यानं अंतकालीन
मस्ति यत्॥ तद्दूरीकृत्य दुरितं मोक्षदास्यत्यसंशयं॥ दुर्लभं दुर्लभं पुंसामंतकाले शिवार्चनं॥
सत्यं सत्यमिदं सत्यमुधृत्य भुजमुच्यते॥ शंकरानुग्रहे जाते कुर्वंत्येते शिवार्चनं॥ तेन सद्योभ
वंत्येव जना निर्धूतकल्मषाः॥ शिवार्चनेन नश्यंति विविधे विविधेष्वपि॥ ततः संप्राप्नुवंत्येव शि
वरूपमकल्मषाः॥ शिवार्चनं विना नास्ति पापनाशस्तथा सति॥ शिवार्चनेन नश्यंति पापा

नि विविधान्यपि॥ शिवार्चनपरः पापान्नबिभेति कदाचन॥ कृते शिवार्चने पापान्यपयांत्येव स
र्वथा॥ यथा दावानलाच्छीघ्रं नश्यंति शलभादयः॥ तथा शिवार्चनेनैव नश्यत्यघकुलं क्षणात्
यः शंकरार्चनपरो भस्मोद्धूलनपूर्वकं॥ अनन्यशरणो नित्यं स स्वधन्यतराश्रुतं॥ येषामुद्धूल
नेप्रीतिर्नित्यं स्वाभाविकी भवेत्॥ त एव धन्याः पूज्याश्च प्रपत्ते नानुवासरं॥ त्रिपुंड्रधारणेप्रीति
र्येषां स्वाभाविकी भवेत्॥ तएव०॥ शिवलिंगार्चनेप्रीतिर्येषां स्वाभाविकी भवेत्॥ तएव०॥ रुद्रा
क्षधारणेप्रीतिर्येषां स्वाभाविकी भवेत्॥ तएव०॥ रुद्राध्यायजपप्रीतिर्येषां स्वाभाविकी भवेत्
तएव०॥ पंचाक्षरजपप्रीतिर्येषां स्वाभाविकी भवेत्॥ तएव०॥ शिवार्चनपराः सर्वे चतुर्वर्गफला
श्रयाः॥ ततः शिवार्चनपरैरप्राप्यं नास्ति सर्वथा॥ ययजे विप्र महादेवमुपचारैस्तु षोडशैः॥
ते सर्वे भाग्यनिलया भविष्यंति न संशयः॥ यस्य स्मरणमात्रेण मोक्षः संप्राप्यते जनैः॥ तस्या

वेनेन सौभाग्यमक्षय्यं प्राप्यते जनैः॥ भुक्तिमुक्तिप्रदं नृणां महादेवस्य पूजनं॥ सत्यं सत्यं पुनः स
त्यमुद्धृत्य भुजमुच्यते॥ शिवपूजां विहायान्यन्नाभीष्टफलदायकं॥ सत्यं सत्यं पुनः सत्यं॰॥
वैकुंठलोकं संप्राप विष्णुः शंकरपूजया॥ सत्यं॰॥ सत्यलोकं विधिः प्राप शंकरस्यैव पूजया॥
सत्यं॰॥ शंकराभ्यर्चनादेव स्वर्गं प्राप शचीपतिः॥ सत्यं॰॥ किं वर्णितं बहूक्तेन शृण्वंतु लोकाब
वाः मम॥ अशैवानां न पंथास्तत्र शैवास्तु न कदाचन॥ स॰॥ शैवास्ते ये महादेवमनन्यशरणाः
सदा॥ पूजयंत्यतियत्नेन ते संपूज्या मम ध्रुवं॥ ये भस्मच्छन्नसर्वांगास्त्रिपुंड्रांकितमस्तकाः॥
ते शैवाः शंकरासक्तास्ते तु पूज्या मम ध्रुवं॥ ये कंठादंगसंसक्तरुद्राक्षाभरणाः सदा॥ ते शैवा॰
येषामस्ति महादेवे भक्तिरव्यभिचारिणी॥ तेषां मुक्तिर्भवत्येव मा कुर्वत्र संशयं॥ येषामस्
स्मिन् रुद्राक्षे भक्तिरव्यभिचारिणी॥ तेषां॰॥ ये कुर्वंति शिवध्यानमप्रमादेन सर्वदा॥ तेषां
मु॰॥ ये न कुर्वंति यत्नेन सोमवारव्रतं जनाः॥ तेषां॰॥ ये कुर्वंति शिवस्थाने धूपदानं प्रयत्नतः॥

तेषां॰॥ ये कुर्वंति शिवस्थाने दीपमालां प्रयत्नतः॥ तेषां॰॥ ये कुर्वंति प्रयत्नेन बिल्वपत्रैः शि
वार्चनं॥ तेषां॰॥ ये कुर्वंत्यतियत्नेन भस्मरुद्राक्षधारणं॥ तेषां॰॥ ये कुर्वंत्यतियत्नेन रुद्राध्या
यजपं मुदा॥ तेषां॰॥ ये कुर्वंत्यतियत्नेन पंचाक्षरजपं मुदा॥ तेषां॰॥ शैवास्तु रुद्ररुद्राक्षभोगिभो
गविभूषणाः॥ त्रिपुंड्रं चंद्रार्धधरा नित्यं शंकरकिंकराः॥ कः समीक्षयितुं शक्तो भुवि शंकरकिं
करान्॥ यैरिंद्रोपेंद्रचंद्राद्यास्तृणवत्समुपेक्षिताः॥ इंद्रोपेंद्रादयो देवाः शैवान्दृष्ट्वातियत्न
तः॥ अभ्युत्थायार्घ्यपाद्याद्यैः पूजां कुर्वंति सादरं॥ भूरिभाग्यप्रभावेन शैवो भवति मानवः॥ तेनो
चैर्यंति यभक्त्या ते मृडाः शिववंदिताः॥ अतो भवंतः सततं यदि जीवितुमिच्छथ॥ तदा शैवान्पूजयं
तु प्रयत्नेन स्वशक्तितः॥ रुद्राक्षभस्माभरणाः शिवैकपरदेवताः॥ पूज्या भवंति यत्नेन ब्रह्म
नारायणादिभिः॥ मा गच्छंतु भ्रमेणापि यूयं शैवगृहान्प्रति॥ भवद्रूपं समालोक्य तेषां पीडा भविष्य
ति॥ भवत्कृतं यदि भवेत्तेषां दुःखं तदा मया॥ त्याज्या भवंतः सर्वेपि शिक्षणीयाश्च यत्नतः॥

शि०स्व
२३२

भावद्भिः शैवपूजार्थं गम्यते यदि सादरं॥ सौम्यरूपधरैरेव गृहीतं पुष्पपाणिभिः॥ यथा शिवार्च
ने प्रीतिस्तथा शैवजनार्चने॥ प्रीतिः कार्या तया प्रीत्या प्रीतो भवति शंकरः॥ पुरा विष्णुप्रभृति
भिः कदाचिद्भूतलं गतं॥ तदा हि मालयप्रांते ददृशुः शिवपूजकं॥ भस्मोद्धूलितसर्वांगं त्रिपुंड्रांकि
तमस्तकं॥ रुद्राक्षमालाभरणं पंचाक्षरपरायणं॥ बिल्वपत्रैर्महादेवं पूजयंतं प्रयत्नतः॥ पश्यंत
देवदेवेशं महेशं पूजितं मुदा॥ एतादृशं विलोक्यैते रोमांचांचितविग्रहाः॥ शिवं संपूज्य नत्वा तं श
णमुरतिभक्तितः॥ ततः कृतांजलिपुटा विष्ण्वाद्यास्तत्र संस्थिताः॥ शिवः समाप्य पूजां तां विष्ण्वा
दीन वलोकयेत्॥ कृतांजलिपुटानेतान् दृष्ट्वा संतुष्टमानसः॥ प्रणम्य शैवबुध्या तान् कुशलं
पर्यपृच्छत॥ ततः प्रसन्नवदनो विष्णुः शिवपरायणः॥ उवाच वचनं चारु श्रद्धाभक्तिपुरःसरं॥
यद्भवद्दर्शनं जातं तत्तु पुण्येन भूयसा॥ अतः परं तु कुशलमस्माकं भावि सर्वदा॥ शिवैकशरण
स्याद्य दृष्टे त्वत्पदपंकजे॥ अतः परं तु कल्याणमस्माकं भावि सर्वथा॥ शिवभक्तस्य संसर्गः क

श्रीः॥
२३२

ल्याणं तनुते न किं॥ शिवपूजापरैः शैवैर्बहवः पूर्वमुद्धृताः॥ अस्यांगे भसितं भाति भवरोगभयाप
हं॥ तद्दर्शनं भावुकानि भूयांसि जनयिष्यति॥ यस्यास्ति शंकरे नित्यं भक्तिरव्यभिचारिणी॥ तद्दर्श
नेन पापानि विनश्यंति बहून्यपि॥ त्रिपुंड्रबालचंद्रांका रुद्राक्षफणिभूषणाः॥ शैवाः शिवैकश
रणाः शिवस्यापरविग्रहाः॥ शिवनामामृतास्वादमोदमाना मनीषिणः॥ भूरिपुण्यप्रभावे
न दृश्यंते खलु शांकराः॥ ईदृशी शांकरी निष्ठा किन्नाम तत्तपःफलं॥ धन्योसि वयमप्येते धन्या
स्म तव दर्शनात्॥ शंकरार्णादर्शनेन धन्या जाताः पुरा यतः॥ अतो वयं च धन्याः स्म तव शांकर
दर्शनात्॥ इत्युदीरितमाकर्ण्य विष्णुवाक्यं स शांकरः॥ कृतांजलिपुटो भूत्वा विष्णुं प्रत्याह शांकरं
भस्मभासितभालाय रुद्राक्षाभरणाय ते॥ चंद्रचूडकिरीटाय नमः शैवाय विष्णवे॥ शैवोत्तमस्त्व
मेवासि विष्णो धन्योहि सर्वथा॥ ज्ञातं यतस्त्वया तत्त्वं शैवं सम्यगसंशयं॥ स एव धन्यः पूज्यश्च
यतस्त्वं वेद शांकरं॥ अतः शंकरतत्त्वज्ञः पूजनीयो भवान्मया॥ विष्णुत्वं यत्प्रसादेन तत्प्राप्तं

शि०स्य सशंकरः।।शंकरोतुतदातुभ्यंशिवैकत्राणोभव।।यम०।। इत्युक्तंतद्वचःश्रुत्वा विष्णुरानंदपूरितः
२३३ प्रणम्यापश्चैवतंशैवंजगामचतदाज्ञया।।अतःशैवाःपूजनीयाःप्रयत्नेनयथाशक्ति।तथाशैवाःशिव
कृपाकारणायतः शंकरविग्रहाः।।स्वप्नेपि शैवधिक्कारो नकर्त्तव्यःशुभेप्सुभिः।।सत्यमेतत्सत्यमेत
मुद्धृत्यभुजमुच्यते।।शैवद्रोहोभ्रमेणापि न कार्य इतियाच्यते।।कदापिनैवकर्तव्यायान्नंयेविफला
मम।।क्रियतेयदिमोहान्न भवद्भिः शैवपीडनं।।तदातुनरकावासोभविष्यतिममध्रुवं।।ममैवन
रकावासोनकिंतुभवतामपि।।भविष्यतिनसंदेहः सत्यमेवाच्यतेमया।।भूयोभूयोतियत्नेन
याच्ञेयंक्रियतेमया।।नमोभवद्भिः शैवानांपूजयंतुपदांबुजं।।सदेशोयत्नतस्त्याज्योयत्रतिष्ठं श्रीः।।
तिशंकराः।।भवद्भिःक्रूररूपैस्तुतत्रगंतव्यमेवन।।किमुक्तेनात्रबहुनासारंवच्मिनसंशयः शैवाः २३३
पूज्याःप्रयत्नेन भवद्भिःसाधुसाधनैः।।शिव०।इत्युक्त्वास्वभटाःसर्वधर्मेनविनयान्विताः।।
दुःखंविहायतेकालंप्रणेमुर्भक्तिपूर्वकं।।एतस्मिन्नंतरेदेवीदुंदुभिध्वनिपूर्वकं।।नंदिध्वजस

MEMORIAL

माकीर्णविमानेददृशुर्दिवि।।तद्विमानस्थमालोक्यतेजःपुंजमयंद्विजं।।यमःसंतुष्टहृदयोश्चि
त्रगुप्तमुवाचह।।यम०।चित्रगुप्तविमानस्थःकोयंयातिवदस्वमे।।किमनेनकृतंपुण्यंक्रियार्थी
दरपूर्वकं।।चित्रगुप्त०।किंवक्तव्यंमयाकालकालकालस्यकीर्त्तनात्।।पापिनोपिप्रयांत्येतेकै
लासनिलयालयं।।ब्राह्मणोप्ययमासीत्संत्यजत्पापिसंगमात्।।स्वकुलाचारसंगस्तुत्यक्त
एवदुरात्मना।।अनेनबहवःशिष्टाब्राह्मणाएवसंहताः।।एतद्धतब्राह्मणानांसंख्याकर्त्तुनश
क्यते।।गावोहताब्राह्मणानामनेनैवहिकोटिशः।।वित्तापहारोबहुधाब्राह्मणानांकृतमु
ना।।बहुधानेनभुक्ताहियुवत्योब्राह्मणस्त्रियः।।मद्यमांसपरेणैवंभुक्ताश्चान्याःपरस्त्रियः।।
कदाचिद्युवतींदृष्ट्वास्वकन्यामतिसुंदरीं।।तामाकार्यप्रयत्नेनरेमेरतिविशारदः।।तस्यामु
त्पादयामासकन्यकाद्वयमुत्तमं।।कालेनयौवनंप्राप्तस्थितंतत्कन्यकाद्वयं।।ततःका
मातुरोरमेसुंदरंकन्यकाद्वयं।।तत्रापिजनयामासपुत्रान्दुःसंगमप्रियान्।।एवमन्यानि

पापानि कृत्वार्थसंस्थितः पुरा॥ एवं स्थितो वनं प्राप कदाचिद्दयमुद्धतः॥ तत्रापश्यद्द्विजान्मा
र्गे दृशाख्यकरान्मुदा॥ ततस्तान्हंतुमुद्युक्तः शास्त्रं जग्राह पाणिना॥ ततो जघान तेष्वेको द्वि
जानवितविक्रमान॥ ततस्तांस्तद्धतान्दृष्ट्वा विप्रौ दुःखवशं गतौ॥ ततस्तौ तादृशं दृष्ट्वा विप्रा
वुर्वीरतावुभौ॥ तमेव हंतुमुद्युक्तौ द्रव्यलोभवशीकृतौ॥ ततस्तच्छस्त्रमादाय द्विजौ तौ तं नि
जघ्नतुः॥ ताभ्यां हतः स पापिष्ठः पपात पृथिवीतले॥ तदा वने वरः कश्चिच्छस्त्रपाणिरुपा
ययौ॥ तं विलोक्य जगादैवं पतितोप्यवनीतले॥ आहरस्त्रं संहरेतो प्रहर प्रहराधुना॥ इत्युक्त्वा
स जहौ प्राणान् शस्त्रघातनिपीडितः॥ ततस्तद्वचनाद्देवतोहतो विप्रसत्तमौ॥ ततो गृहीत्वा
तद्द्रव्यं सपर्ययौ विप्रघातकः॥ प्रहृष्टवदनोभिज्ञो विप्रो निक्षिप्य भूतले॥ तावत्तत्र मृदा स्वकैरु
पले श्च बहत्तरे॥ आहरेत्यादितद्वाक्यं सर्वसाक्षी सदाशिवः॥ श्रुत्वा पार्श्वस्थितान्स्वाह गणान
प्रतिकृपानिधिः॥ रेरे सौम्य गणायाहि शृणु कौतूहलं स्वकः॥ पश्यत्वा भवतो चेत प्रसादमुपगच्छ

ति॥ अद्य कश्चिन्महापापी मृतो ब्रह्मवधप्रियः॥ तत्कृतानां तु पापानां संख्या नास्त्येव सर्वथा
तेनैवोक्तमिदं वाक्यं शृणु तद्दृश्यते मया॥ आहरास्त्रं संहरेतो प्रहर प्रहराधुना॥ इत्युक्त्वा सम्
तः पापी कृतब्रह्मवधः खलु॥ तत्पातकानि नष्टानि तद्वाक्योच्चारणात्तदा॥ आहरेत्यादिवाक्यस्य
हरनामाघनाशकं॥ जातं हि मृतकालीनं सर्वपापविनाशकं॥ अतः परं संहरेति वाक्यस्य हरनाम
तः॥ तस्मै विनष्टपाय मोक्षदास्याम्यसंशयं॥ प्रहर प्रहरेत्यत्र यन्नामद्वयमस्ति तत्॥ मत्स्व
जार्थमतस्तस्य मुधत्वभुजमुच्यते॥ आहरेत्यादिवाक्यस्य हरनामचतुष्टयं॥ सर्वाभीष्टप्रदं स
त्यमुपसर्गे विनाकृते॥ अबुद्धिपूर्वकं वास्तु बुद्धिपूर्वकमेव वा॥ मन्नामोच्चरितं पुंसां मुक्तिदं मृ
तिकालिकं॥ तस्मै मोक्षं ददाम्येव स्वभावस्तस्य तादृशः॥ मम नामानि यावंति तावतामपि स
र्वथा॥ मुक्तिदत्वस्वभावोस्ति तादृशान्येव तानि हि॥ मृतिकालीनमन्नामस्मरणाद्बहुभिः
पुरा॥ मोक्षः प्राप्तः किमस्य त्र विचित्रं नामैव तादृशं॥ हरनाम महत्स्वेव पातकानि बहून्यपि॥

यतः पापहरत्वेन प्रसिद्धं नाम तादृशं। सद्यः कृतमहापापोप्यंतकाले शिवस्मृतेः॥ मोक्षं प्राप्नो
त्यतः सोप्येतमिहानय सत्वरं॥ इत्युक्तः स महेशेन तमेवनयति द्विजे। अतः परं न तस्यास्ति
दुःखलेशोपि सर्वथा॥ इत्युक्तं तद्वचः श्रुत्वा यमः संतुष्टमानसः॥ श्रुतं किं चित्रगुप्तोक्तमिति
दूतानुवाच सः॥ ततः स विप्रः संप्राप मामेव सुरपुंगवं॥ सोपि मां प्राप सुभगे यमेन परिपूजि
तः॥ अतएवातियत्नेन मदर्चनपरायणाः॥ निःश्रेयसं प्राप्नुवंति सुलभेन वरानने॥ दिवता
सार्वभौमोहं मदेकशरणात्मनां॥ मोक्षं दास्यामि सुभगे सत्यं सत्यं न संशयः॥ रुद्राक्षां
गदकंकणाः सितलसद्भस्मांगरागाः सदा शंभो शंकर चंद्रशेखर महादेवेति संवादिनः॥
मन्नामैकसुधासमुद्रलहरीकल्लोललोलोल्लसज्जिह्वाजिह्मविवर्जिता मम हिताः सत्यं ब्र
वीमि प्रिये॥ २०७॥ ध्रु॥ ध्रु ॥ इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादो नाम स
प्तदशोऽध्यायः॥ १७॥ ॥ ॥ शिव उवाच॥ शृणु देवि कथां पुण्यां मन्यामतिसंतोषदामि

मां॥ यत्कथाश्रवणादेव हृष्टचित्ता भविष्यति॥ पुरा स्वर्गे शचीनाथं दृष्ट्वा गुरुरतिप्रियं॥ उवाच
वचनं वाग्मी सस्मितं प्रीतिपूर्वकं॥ भूलोके तीर्थसेवार्थं सयागतमनेकधा॥ दृष्टानि शिवती
र्थानि वेदोक्तान्येव सादरं॥ तीर्थेषु बहवो दृष्टाः शैवा एव शिवार्चकाः॥ तेषां तु दर्शनादेव संतो
षो वर्धते महान्॥ भस्मोद्धूलितसर्वांगा दृश्यंते भाग्यतो यदा॥ तदा ममातिसंतोषो भवत्ये
व न संशयः॥ दृश्यंते यत्र यत्रैव भस्मरुद्राक्षभूषणाः॥ तत्र तत्र तदा तेषु शिवबुद्धिः प्रजायते
तत्संगतिं विहायात्र बलादागम्यते मया॥ तत्संगतिपरित्यागः कर्तुमेव न शक्यते॥ यथात्र सुरवं
भूरि तथा नात्र मम ध्रुवं॥ शैवानामेव संगेन स्थातव्यमिति धीर्मम॥ शैवाः शंकरतत्त्वज्ञा बहवः
संति भूतले॥ तेषां दर्शनमात्रेण नश्यत्यघकुलं क्षणात्॥ यदा ते बिल्वपत्राद्यैरर्चयंति महे
श्वरं॥ तदा तदर्चनं सम्यक् दृष्ट्वैव स्थीयते मया॥ तद्दर्शनेन संतोषो जायते यादृशस्तथा॥ ता
दृशस्त्वत्र संतोषः कदाचिन्न भविष्यति॥ शिवलिंगार्चनं कृत्वा भक्तिश्रद्धापुरःसरं॥ प्रणम्य

नेत्रेनं कृत्वा स्तुवंति विविधैः स्तवैः॥ शिवनामामृतं पीत्वा संतुष्टाः संति सर्वदा॥ तदुत्साहसमो
त्साहो न केनाप्यनुभूयते॥ तेषां शिवार्चनं त्यक्त्वा कार्यमन्यन्न विद्यते॥ प्रदक्षिणं विनान्यत्र संचारो
पि न दृश्यते॥ शिवोत्कर्षप्रधानैव कथा संश्रूयते हितैः॥ वेदार्थ एव सततं विचार्यश्चीयते मुदा॥
बहिस्तु तेषां गमनं बिल्वपत्रार्थमेव हि॥ तदन्यार्थं तु गमनं तेषां नैव हि दृश्यते॥ एतादृशाः शि
वाचारनिरताः शिवपूजकाः॥ बहवः संति भूलोके शिवपारिषदा इव॥ एवं सति मया दृष्टम
पूर्वं तद्वदाम्यहं॥ यच्छृणुष्वालिपतेन कौतूहलकरं परं॥ कश्चिद्बिल्वदलैः शंभुं संपूज्यालं
तयत्नतः॥ स्तोत्रैरनेकधा स्तुत्वा हृष्टचित्तो बभूव सः॥ तदा कश्चिद्द्विजस्तत्र समागत्य त
मब्रवीत्॥ एनमेवालिपतेन किमर्थं पूजयस्ययं॥ २०॥ यथा मे वनमेवान्याः पूज्यास्तिष्ठं
तिदेवताः॥ ता विहायालिपतेन पूजयस्येनमेव किं॥ देवाः सर्वे समा एव तथा चैनं विशे
षतः॥ एकमेवात्र संपूज्य मोहेनायं तु तिष्ठति॥ इत्युक्तं तद्वचः श्रुत्वा सक्रोधः शिवपूजनं

त्रीं प्रसमाप्य यत्नेन निर्ययौ शिवमंडपात्॥ ततो जग्राह तं विप्रं शिवानुत्कर्षवादिनं॥ गृहीत्वा त
स्य रसनां मुखायस्स जघान तं॥ विष्टानुलिप्तां रसनां मुखे तस्य ततः परं॥ प्रक्षिप्य विष्टया पूर्वं
मुखे तस्य चकार सः॥ ततः परमुपानद्भ्यां ताडयित्वा तदाननं॥ शिश्नमुत्खाय तद्वक्त्रे प्रक्षि
प्याताडयत्ततः॥ ततः परं तच्छरीरं चकर्त क्रोधसंकुलः॥ ततः परं सुखं प्राप स शिवाराधन
प्रियः॥ एतादृशः सशैवेंद्रः शिवानुत्कर्षवादिनं॥ हत्वैव चंडचांडालगृहमध्ये विनाक्षि
पत्॥ ततः परं स चंडालैर्गर्तमध्ये निपातितः॥ एवं बहुविधं दुःखं प्राप शंकरदूषकः॥ सशै
वेंद्रस्तु तं हत्वा प्रापानंदमखंडितं॥ ततः परं यमभटैः स नीतोस्ति द्विजोधुना॥ तस्य किं शासनं
भावि तद्द्रष्टव्यं प्रयत्नतः॥ वक्तुं वार्तामिमामिंद्र संप्राप्तोस्मि तवांतिकं॥ त्वमप्यायाहि देवेंद्र सत्व
रं सानुगोधुना॥ द्रष्टव्यं कालसदने अत्रैव भयदं सदा॥ इति तद्वचनं श्रुत्वा देवेंद्रो गुरुणा सह॥ या
यावत्यं तवगेन यमदर्शनकांक्षया॥ ततस्समागतं दृष्ट्वा यमो देवेंद्रमादरात्॥ पूजयामास स

शि०रस्य
२३७

गुरुमुपवेश्यासने शुभे ॥ तदानीमेव याम्याः शिवानुत्कर्षवादिनं ॥ प्राथयित्वैव शूलाग्रे तमा-
नीय निचिक्षिपुः ॥ ततः परं चित्रगुप्तं विलोक्य समयस्तदा ॥ कोयमित्याह विनया चित्रगुप्तो
प्युवाच तं ॥ चित्रगुप्त उवाच ॥ यमायं ब्राह्मणो नेन कृतं शंकरदूषणं ॥ शिवाय दुःखदं तेन वै म-
हादेवस्य निंदया देवाधिदेवमजरमनन्यसदृशं शिवं ॥ अन्यदेवसमत्वेन ज्ञात्वा मोहात्तम-
ब्रवीत् ॥ इत्युक्त्वा चित्रगुप्तो किं श्रुत्वा कालो तिभीषणः ॥ क्रोधाविष्टो ब्रवीद्दूतान् द्विजमाशु नयं-
त्विति ॥ ततः पुरः स निक्षिप्तो यमदूतैर्भयाकुलैः ॥ ततः शूलमतिक्रूरो गृहीत्वा तमताडयत् ॥
ततः शतघ्नीमादाय कालस्तं क्रूरशासनः ॥ ताडयामास वेगेन क्रोधसंकुलितेक्षणः ॥ संतप्ता-
यसपिंडेन तमताडयदुद्धतं ॥ ततो विविधसंतप्तशस्त्रैश्च तमताडयत् ॥ ततः परं प्रयत्नेन संत-
प्तगिरिसन्निभां ॥ शतघ्नीं समुपादाय तया संताडयद्द्विजं ॥ ततस्तमायसस्तंभे संतप्ते वह्निशृं-
खलैः ॥ बध्वा तमतिवेगेन बबंध क्रूरशासनः ॥ ततस्तत्ताडनानायं दूतानामयुतं यमः ॥ श्री: ॥ २३७

प्रेरयामास शूलाग्रैस्ताडयंति स्म संततं ॥ एवमादिरयं कालो यं संदष्टाधरपल्लवः ॥ निःश्वासवायू-
न्निसृजन्नुवास क्रूरशासनः ॥ ततो दृष्ट्वा यमं दृष्ट्वा देवेंद्रो भयविह्वलः ॥ शनैरुवाच वचनं विनया-
न्नयकोविदः ॥ देवेंद्र उवाच ॥ यमास्य तु शिवाज्ञाकारिणः शासनं कृतं ॥ किमेतावद्वता न्यच्च शा-
सनं वर्त्तते वद ॥ इत्युक्तं तद्वचः श्रुत्वा बभाषे वचनं सुमः ॥ तदा स गुरुदेवेंद्रप्रभृतीनां भयप्रदं
यम उवाच ॥ किमद्य शासनं जातं शिवानुत्कर्षवादिनः ॥ आब्रह्मकल्पमेतस्य क्रूरं भाव्येव
शासनं ॥ ५० ॥ शिवानुत्कर्षवादी यः स गुरोस्तु नरोत्तम ॥ तस्याहमेव शास्तास्मि सोहमत्यु-
ग्रशासनः ॥ शिवभक्तोस्य हंत स्मात् शिवानुत्कर्षवादिनं ॥ पातयिष्यामि नरकेष्वशेषेषु संत-
यः ॥ सार्धार्बुदानि नरकाण्यतिदुःखप्रदानि हि ॥ तेषु यः प्रत्यहं दुष्टः पातनीयो न संशयः ॥
किं चैतत्पितरः संति स्वर्गे धर्मवरार्जिते ॥ तेप्यानेयाहि नरके पातनीयाः प्रयत्नतः ॥ सर्वदेवा-
नमं शंभुं योन्यथा वक्तुमिच्छति ॥ तस्यापि नरकावासः सम्यग्भविष्यति ॥ यश्शिवं देवदेव-

शि०रह्य
२३८

शामन्यथावदतिस्फुटं॥ तस्यवासोस्तिनरकेष्वित्यत्रास्तिकिमद्भुतं॥ भ्रमेणवाप्रमादेनयद्वामो
हेनशंकरं॥ जानातियोन्यथान्यस्य नरकेषुस्थितिर्ध्रुवं॥ इंद्राश्चबहवोजाताः शिवानुत्कर्षवादि
नः॥ नरकेष्वतिघोरेषुभुक्त्वातिष्ठंतियातनां॥ इंद्रेंद्रोस्त्वत्स्तुचंद्रोवायद्वोपेंद्रोस्तुकिंमम॥ प्र
दितेषुशिवद्रोहेनरकेपातयामितान्॥ शिवद्रोहीयदिभवेदुपेंद्रोपिप्रमात्तदा॥ पातयिष्या
मिनरकेष्वशेषेषुनसंशयः॥ मत्समहेशभृत्यायकिमुपेंद्रः करिष्यति॥ शिवद्रोहीयदिभवेत्त
दामच्छासपरवशः॥ शासनीयाः प्रयत्नेनशिवानुत्कर्षवादिनः॥ इत्याज्ञाकिंकरेणैवमसंदत्त
पुरामुदा॥ इत्युक्तंतद्वचः श्रुत्वादेवेंद्रोभयसंकुलः॥ उवाचवचनेनैवकृतांजलिपुटस्तदा॥ इंद्रउ०
एतैः किंकिंकृतंपापंनरकेपतितियम॥ तत्सर्वमविशेषेणवदमह्यंयथाक्रमं॥ शिव०॥
इत्युक्तेतद्वचः श्रुत्वायमोवक्तुमुपक्रमे॥ अंगुल्यग्रेणतीक्ष्णेनदर्शयन्नुग्रलोचनः॥ यम उ०॥
एतेसर्वेपिपापिष्ठाः शिवार्चनपराङ्मुखाः॥ एतेसर्वेपिपापिष्ठाः शिवस्मृतिपराङ्मुखाः॥

श्रीः॥
२३८

एतेशिवायसाष्टांगप्रणामाकारिणोत्रमाः॥ नित्यंसंदग्धसर्वांगास्तिष्ठंत्येतान्विलोकय॥ यः
शंकरायसाष्टांगप्रणामान्नकरिष्यति॥ सदग्धांगोग्निकुंडेषुपतित्वैवहितिष्ठति॥ एतेत्यक्तशि
वकथालापाः शिवध्यानपराङ्मुखाः॥ संदग्धशास्त्रकुंडेषुतिष्ठंत्येतान्विलोकय॥ एतेसर्वेमहा
देवकथाश्रवणवर्जिताः॥ भुजंगगर्त्तपतितास्तिष्ठंत्येतान्विलोकय॥ एतेसर्वेप्रदोषेषुत्यक्तशं
करपूजनाः॥ घोरवृश्चिककुंडेषुतिष्ठंतिपतिताःसदा॥ एतेशिवानर्पितान्नफलद्रव्यादिभो
जनाः॥ क्रिमिपूयस्त्रकुंडेषुतिष्ठंतान्विलोकय॥ एतेशिवाभिषेकांबुपानधारणवर्जिताः॥
सम्मूत्ररेतःकुंडेषुविलुंठंत्यवलोकय॥ त्यक्तपंचाक्षरजपाःसर्वेप्येतेदुराशयाः॥ संतप्तामेध्यकुं
डेषुतिष्ठंत्येतान्विलोकय॥ त्यक्तरुद्रजपाह्येतेरुद्राध्यायनवर्जिताः॥ संतप्ताम्रकुंडेषु
तिष्ठंत्येतान्विलोकय॥ एतेसर्वेपिमाहेनशिवानुत्कर्षवादिनः॥ बद्धान्दग्धायसस्तंभे
ष्वेतान्पश्यानलार्पितान्॥ एतेसर्वेश्रुतिप्रोक्तभस्मोद्धूलनवर्जिताः॥ तिष्ठंत्यजगराव

शि०रह
२३९

तैर्दुःखार्ता स्तान्विलोकय॥ भस्मत्रिपुंड्र रहिताः सर्वेप्येते शचीपते। दृश्यमाना लोहकाके स्ति
ष्ठंत्येतान्विलोकय॥ एते सर्वेपि देवेंद्र त्यक्त रुद्राक्षधारणाः॥ संतप्तवह्निकुंडे तिष्ठंत्येतान्विलो
कय॥ एते दिवाफललान्नादि भोक्तारः सोमवासरे॥ संतप्त श्लेष्मकुंडेषु तिष्ठंत्येतान्विलो
कय॥ काश्यां कृतपापातकानि ये तु काशी बहिर्मृताः॥ ते सर्वे पतिताः संति वह्निकुंडेषु पश्यता
न्॥ काश्यामंतर्गृहमध्ये मालादीनि विहाय ये॥ मृताः काशी बहिर्देशे ते तिष्ठंति मलह्रदे
ए तै काश्यामपि स्थित्वा विना विश्वेश्वरदर्शनं॥ भुक्तं काशी बहिर्देशे मृते रेतोह्रदे स्थितैः॥ एतैः
काश्यामपि स्थित्वा न कृतं भस्मधारणं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एतैः का
श्यामपि स्थित्वा त्यक्तं रुद्राक्षधारणं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एतैः काश्या
मपि स्थित्वा न कृतं भैरवार्चनं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एतैः काश्यामपि
स्थित्वा त्यक्तं रुद्राक्षधारणं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एतैः काश्यामपि स्थि

श्री॥
२३९

त्वा न कृतं शिवचिंतनं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एतैः काश्यामपि स्थित्वा न कृतं नै
वपूजनं॥ ततः काशी बहिर्देशे मृतं पूयह्रदस्थितैः॥ एते त्यक्तशिवाचाराः सर्वे त्यक्तशिवव्रताः॥ वि
विधेषु तिष्ठंति नरकेष्वेव लोकय॥ सार्धार्बुदेषु नरकेष्वेतेषां प्रतिवासरं॥ मुहुर्मुहुर्भवत्येव वासे
दुःसहदुःखदः॥ अशैवाः संति यावंतस्तावतामपि सर्वदा॥ भवत्येतेषु नरकेष्ववश्यं वसतिर्ध्रुवं॥
एतेनपश्यामि कुंडस्थं वार्ताप्यास्याश्रुतेमया॥ यद्वार्ताश्रवणात्सद्यो रोमांचोपि भविष्यति॥ अ
यं कुरूटको नाम ब्राह्मणो वेदपारगः॥ धनधान्यादिकं पन्नो गोमहिष्यादिपोषकः॥ काटको
टरहस्यकः पुत्रो स्याभवदुत्तमः॥ स सर्वदा शिवाचारनिरतः शिवतत्परः॥ उद्धूलनत्रिपुंड्राभ्यां
रुद्राक्षैश्च विभूषितः॥ स पूजयति पुष्पाद्यैः शिवलिंगं सपल्लवः॥ शिवनामामृतेनैव जि
ह्वा तेन पवित्रिता॥ नित्यं शिवकथामेव सुश्राव प्रीतमानसः॥ समवांप्रयत्नेनत्वहं गिरि
जापतिं सबिल्वपत्रपुष्पाद्यैः पूजयत्यतिभक्तितः॥ प्रणामान्बहुधा कृत्वा साष्टांगान्भक्ति

शि० स्य०
२४०

पूर्वकं॥ नित्यं स्वकार्यले न शिवं वीक्ष्याति हर्षितः। यदा भुंक्ते तदा भोज्यं यावदन्नमपेक्षितं। सो
पदंभ्रूं समानीय निवेदयति शंकरे। अनर्पितं महेशाय फलं वा जलमेव वा॥ न गृह्णात्येव नियमान्नि
त्यं शपथपूर्वकं। १०१। भस्मनोभिभवोभाव। स्युत्कृष्टमपि वंदने॥ लते न लापितं भाले विप्र स्नुप
रि सर्वथा। उद्धूलितांगमालोक्य हृष्टो भवति सर्वथा। करोत्युद्धूलनं भक्त्या नित्यमापादमस्तकं
नित्यमुद्धूलने तस्य भक्तिः श्रद्धापि तादृशी। भक्तिस्तस्योद्धूलनपूर्वकं। स्वेदे नोद्धूलितं भस्म देहा
न्मुञ्चति वेत्तदा। पुनरुद्धूलनं सम्यक् करोति विधिपूर्वकं। त्रिपुंड्रधारणं सम्यक् करोति व्रततः परं॥ उद्धू
लनत्रिपुंड्राभ्यां सर्वदापि सभूषितः। उद्धूलनानंकितांगं यदा पश्यति तत्क्षणे। दृष्ट्वाभानुप्रय
त्नेन शिवं ध्यात्वा स तिष्ठति॥ अयं केवलभस्मांगं विश्वं डालमेव वा। दृष्ट्वा संतोषपूर्णांगः करो
त्यभ्यर्चनं मुदा॥ नित्यं शिवकथामेव शृणोति प्रीतमानसः। शैवैः सहैव सततं तिष्ठति प्रीतिपू
र्वकं। सकदाचित्प्रयत्नेन बिल्वपत्रार्जनप्रियः। एकाकी बिल्ववृक्षाद्यं वनं प्राप मृगावृतं॥ तत्र

श्री:॥
२४०

कश्चिद्घोररूपः पिशाचः पर्वताकृतिः॥ विलोक्य बालं वं विप्रमाजगामातिवेगतः॥ तं तादृशं
समायांतं पिशाचं वीक्ष्य दूरतः॥ जगाद वचनं बालो हसन्विस्मयपूर्वकं॥ काकोटरउवाच॥
पिशाचोयं समागत्य किंवा मह्यं करिष्यति॥ मूर्खोयं नाभिजानाति प्रभावं भस्मनो ध्रुवं॥ पवि
वेषं करिष्यामि भस्मना सावधानतः॥ पविवेषमतीत्यायमागंतुं शक्नुयात्कथं॥ वेदाः स्तुवंति
बहुधा प्रभावं भस्मना सदा। जानंति महिमानं ते न देवा धियते मया॥ मंत्रपूतमिदं भस्म मम
रक्षां करिष्यति। सत्यं सत्यमिदं सत्यं संशयो नात्र सर्वथा॥ न करिष्यति चेद्भस्म पिशाचाद्रक्ष
णं मम। तदा भस्म कथं भूयाद्घोरसंसारनाशकं॥ संसारभर्तकं भस्म घोरपापौघभर्त्सकं।
भर्त्सनाद्भस्म इत्येषा श्रुतिरेव बलं मम। वेद एव प्रमाणं मे ब्राह्मणोत्तमजन्मनः॥ तथा वेदं
धृतं भस्म भयं मे नाशयिष्यति॥ इत्युक्त्वा भस्म संगृह्य शिवमंत्राभिमंत्रितं॥ चकारोद्धूलनं
विप्रस्त्रिपुंड्रं च यथा विधि। पविवेषं ततश्चक्रे भस्मनात्रित्रिरास्तिकः॥ ततः समागतः सोपि

शि०स्य २४१

पिशाचोविकृताननः ।गृहीतुकामस्तांसो धृतमुष्टिस्तमुद्यतः ॥ परिवेषाद्वहिः स्थित्वाबलवान्दुःखि
तोप्यभूत् ।अंतः प्रवेष्टुं शक्तोपि न शशाकाभिमंत्रितं ॥ तदभस्ममंडलं शुद्धं महादेवकृतं शुभं ॥ ३
बहुधापरिहृत्यायं परिवेषं मुहुर्मुहुः ॥ अत्यंतमलसोजातः स्वेदापूरितविग्रहः ॥ ततः सदूरतः
स्थित्वा परिवेषादुवाचतं ।बालकात्रत्वयाकिं वा कृतमस्ति वदस्वमे ॥ अहं तु पर्वताकारः सिं
हानामपिमर्दकः ॥ एतादृशस्य मे बाल कथं वा कुंठितं बलं ॥ २५ ॥ एवं विलोक्यतं दुष्टं विलोक्य
स्यतं दुःखितं ॥ उवाच वचनं बालः स्मितपूर्वमतंद्रितः ॥ काटकोटर० ॥ रेरे पिशाच किं पूर्वं पापमस्ति
कृतंत्वया ।येनप्राप्तं पिशाचत्वं बहुदुःखप्रदायकं ॥ इत्युक्तं तद्वचः श्रुत्वा दुःखितस्तमुवाचसः ॥ श्री:॥
नस्मरे तेमया पापमिति नत्वा पुनः पुनः ॥ इत्युक्तं तद्वचः श्रुत्वा दक्षाप्त्वा विनयान्वितं ॥ मंत्रितं २४१
भस्म संरक्ष्य तन्मूर्ध्नि सविनिक्षिपत् ॥ ततस्तद्भस्मयोगेन ध्वस्तपापः सतत्क्षणे ॥ दिव्यस्वका
ततुं प्राप सूर्यमंडलसन्निभां ॥ ततः संतुष्टहृदयः पुष्पैः संपूज्य बालकं ॥ नत्वा कृतांजलिपुटः

कृतार्थोस्मीत्युवाचसः ॥ तं दृष्ट्वा विस्मितो बालस्तमुवाचवचोमुदा ॥ किं पातकं त्वया पूर्वं कृतमित्य
नुमोदय ॥ ततस्तं बालकं दृष्ट्वा स्मितपूर्वकमादरात् ॥ उवाच वचनं चारु प्रतिज्ञापूर्वकं मुदा ॥
गंधर्वोहं द्विजश्रेष्ठ गानशास्त्रविशारदः ॥ मया दुःखं पुरा दत्तं शैवायामिततेजसे ॥ एवमुक्तं मया
पूर्वं शैवमालोक्य बालक ॥ भस्म नाश्येतमभवच्छरीरमितिहेतः ॥ ततः सदुःखितः शैवो मां
शापहितत्क्षणे ॥ पिशाचतनुमाश्रित्य वने तिष्ठतिसत्वरं ॥ तदाप्रभृति घोरोयं पिशाचतनुरा
गतः ॥ कल्पा नामयुतं जातं दुःखं भुक्तं मया बहु ॥ त्वत्प्रसादेन शैवेंद्र मुक्तोहं घोरपातकात् ॥
त्वदीयोयं नसंदेहः पालनीयोस्मि सर्वथा ॥ पुनर्मह्यं मंत्रपूतं भस्मं देहि द्विजोत्तम ॥ यद्योगेन
मया प्राप्ता गांधर्वी तनुरुत्तमा ॥ उपकारो मया कार्यः स्वशक्त्या शैवपुंगव ॥ किं वा तवार्पितं व
स्तु वदात्र भुवनत्रये ॥ शिवभक्ता भवान्नित्यमाप्तकामोसि यद्यपि ॥ तथापि वद शैवेंद्र मत्सं
तोषार्थमादरात् ॥ इत्युक्तं तद्वचः श्रुत्वा भस्म दत्वाभिमंत्रितं ॥ मयास्मृतस्त्वमायाहीत्युवा

शि०स्प २४२

चश्रीतिपूर्वकं॥ ततःस नत्वा शैवं दत्तथेत्युक्त्वाजगाम सः॥ ततः परं बिल्वपत्राण्याहर्तुंसमुपक्रमे
सतत्रात्यंतरम्याणि बिल्वपत्राणि सादरं॥ गृहीत्वा सर्वनेत्यक्त्वा स्वगृहाभिमुखो ययौ॥ तदा
नीमेवसविता संप्राप्तास्तगिरिं तदा॥ बालः प्रदोषकालीनां पूजां कर्तुं समारभेत्॥ स गोमयमयं लिं
गं संपाद्यात्यंतयत्नतः॥ ध्यात्वा सम्यङ्महादेवं चकारावाहनं मुदा॥ तदानीं तत्पिता पुत्रः क्वगतो
स्तीति दुःखितः॥ आजगामातियत्नेन सर्वतोपि विचारयन्॥ आगत्य वाहिते लिंगे स गोम
यमये द्विजः॥ निक्षिप्य चरणद्वंद्वं क्वगतोसीति संवदन्॥ लिंगोपरिस्थितं दृष्ट्वा तत्पितुश्चरणद्व
यं॥ चिछेद क्रूरशस्त्रेण क्रोधसंकुलितेक्षणः॥ ततः स भूमौ पतितः पिता दुःखादिकर्षितः॥
हाहा हतोस्मि पुत्रेति रुरोदाश्रूणि मोचयन्॥ ततः स जिह्वां मुखवाय प्राणेभ्योपि वियोजयन्॥
शिवलिंगं कथं दत्तचरणो द्येति संवदन्॥ एतस्मिन्नंतरे तस्य क्रोधः शांतोभवत्तदा॥ ततः पूजां च
कारायं शिवलिंगोत्तरे तदा॥ तदानी मतिसंतुष्टः शिवः प्रत्यक्षतां गतः॥ विलोक्य शंकरं शैवस्तु

श्रीः॥ २४२

ष्टाव बहुधा स्तवैः॥ ततो देवा मदस्वेति वरो दत्तः शिवेन हि॥ शैवस्तद्वचनमाकर्ण्य ययाचे न्यं वरं मुदा
त्वय्यस्तु मम गौरीश भक्तिरव्यभिचारिणी॥ सैव भक्तिरभीष्टानि महेदास्यत्यसंशयं॥ किं मेत्रि
दशाभावेन त्रिदशत्वेन मे मतं॥ निर्दशत्वं मया प्राप्तं महत्त्वास्तव पूजया॥ अधुना निर्दशत्वं मम मा
स्तु महेश्वर॥ भूलोके वसित्वाहं तव पूजां करोम्यहं॥ अनेकजन्मतपसा मानुषं जन्म लभ्यते॥ त
त्रास्ति द्विजजन्मेदं त्वत्प्रसादेन लभ्यते॥ तत्रापि भारते वर्षे जन्म दुर्लभमेव हि॥ ब्राह्मण्यं भारते वर्षे त्व
त्प्रसादेन लभ्यते॥ तत्रापि भूरिभाग्येन त्वयि भक्तिः प्रजायते॥ सा मोक्षदा भवत्येव त्वयि भक्तिरव्यभि
चारिणी॥ स्थित्वास्मिन्भारते वर्षे तव पूजां करोम्यहं॥ पुष्पैर्नानाविधैर्दिव्यैर्बिल्वपत्रैश्च कोमलैः॥
अविच्छिन्ना यथा पूजा क्रियते सर्वदा मया॥ तथा वरं महादेव देहि मह्यं सुरोत्तम॥ किंच मां प्रापयवि
भो काशीं देवोत्तमेश्वर॥ यत्र गत्वा नशोचंति देवा इव शिवार्चकाः॥ विश्वेशलिंगरूपेण यत्र त्वम
धितिष्ठसि॥ तत्रास्तु मम देहस्य विनाशः शीघ्रमीश्वर॥ तत्रत्यस्तत नोः शंभोः श्रीमत्पंचाक्षरः परः॥

देवत्वया कृपासिंधो फलं आमोक्षमाप्नुयां॥ भक्तिर्विश्वेश्वरे लिंगे कार्तव्यां निवसतो मम। यथा दृढा
तवेन्नित्यं यथाकुरु महेश्वर॥ अयं वरो मम शंभो वरोऽन्यो नैव याच्यते। अयमेव वरो यस्मादनेकक
पसंतापकं। यमण। इत्युक्ते तद्वचः श्रुत्वा तथास्त्वित्यनुमोदितः॥ तत्रैवांतर्दधे लिंगे लिंगरूपी सदा
शिवः॥ तत्पिता यः शिवद्रोही तत्पुत्रेण वमारितः॥ भुक्त्वा बहूनि दुःखानि स्थास्यत्यत्र न संशयः॥ प
श्य शंकरभक्तानां माहात्म्यमतिशोभनं॥ अगण्य यद्द्विजं तातं हत्वा हृष्टोऽपि तिष्ठति॥ स्नेह
श्रयः पिता तत्राप्ययं वेदविदुत्तमः॥ तथापि निजघानैनं शिवद्रोहवशात्सुतः॥ पिता पितामहो
वास्तु ब्राह्मणः क्षत्रियोऽथवा॥ शिवद्रोही यदि भवेत्स हंतव्य इति श्रुतिः॥ शिवद्रोहिण मार्यान्तं या
दृशं तादृशं द्विजं। हत्वा मोक्षमवाप्नोति। त्यस्ति श्रुतिरनेकधा॥ प्रबलश्चेच्छिवद्रोही यदि हं
तुं न शक्यते॥ तदा देशांतरं गच्छेदिति पत्नेन सादरं। तथा च श्रुतितलक्रूरः शैवं स्वपितरं द्विजं॥ श्रु
तिर्तं विचार्यैव जघान श्रुतिपारगः॥ शिवान्यसुरतुल्यत्वं यः शिवस्य तु मिच्छति॥ विपाजयति

तं शीघ्रं प्राणेभ्यो यं शिवार्चकः॥ शिवस्य वान्यदेवेभ्यो न्यूनता येन चोच्यते॥ तत्तनुं ककचैरेव वि
दारयति सत्वरं। दृष्टास्ते न तु यावंतः शिवानुत्कर्षवादिनः॥ तावतामपि सर्वेषां मुखानि ज्वालय
त्ययं॥ दिवा यत्न भ्रमेणापि भुज्यते सोमवासरे॥ तमानीय क्रूरचित्तः कशाभिस्ताडयत्ययं॥
यो भस्मधारणं त्यक्त्वा भोक्तुमिच्छति मानवः॥ तमानीयातियत्नेन पाषाणैस्ताडयत्ययं॥ रुद्राक्ष
धारणं त्यक्तं येन भ्रांत्यापि तं नरं॥ काराग्रहे प्रयत्नेन प्रवेशयति सत्वरं॥ शिवलिंगार्चनं त्यक्त्वा
भोक्तुमिच्छति यो नरः॥ तमानीयायसैः पिंडैः सुताडयति तत्तनुं॥ येन न क्रियते नित्यं प्रदोषे
शिवपूजनं॥ तमानीयातियत्नेन कूटैस्ताडयत्ययं॥ शिवव्रतानि त्यक्तानि येन नित्यं भ्रमादपि
तं नरं शृंखलैर्बध्वा गर्ते संपादयत्ययं॥ अधर्मनिरतान्दुष्टान्नरासयन्नेवमस्तिकः॥ बहून्धर्म
रतानेव चकारायं शिवार्चकः॥ एवमेतादृशं श्रुत्वा तद्देशाधिपतिर्घनी॥ तद्दर्शनार्थं यत्नेन सामा
त्यः समुपाययौ॥ आगत्य सात्यंत विनयात्स राजा कुसुमांजलिः॥ पूजयामास शैवं स सामात्यः

सानुगोमुदा। ततः स शैवस्तं दृष्ट्वा भस्मभूषितविग्रहं। कुशलं कि सुराजेंद्र त्याबभाषे नतानने
ततः स राजा विनयात्प्रणम्योवाच सादरं। बृहस्पतिरिवासंतं श्रमं वचनमुत्तमं॥ राजोवाच।
शैव द्रुत्वत्प्रसादेन कुशलं सर्वतो मम। राष्ट्रं सर्वं त्वत्प्रसादात् सुखेनैवाधितिष्ठति। यस्मिन् राष्ट्रे
त्वयानित्यं स्थीयते शैवपुंगव॥ यस्य राष्ट्रस्य सर्वस्य शुभमस्त्येव सर्वदा। तव दर्शनमात्रेण कृ
तार्थोस्मि शिवार्चक। आज्ञापय मया नित्यं किं कर्तव्यं प्रयत्नतः। इत्युक्तस्तद्वचः श्रुत्वा बभाषे
शैवपुंगवः॥ स्मितपूर्वं प्रयत्नेन वाक्यमेवं मनोहरं। काटकोटर ०। अप्रमादेन सततं भस्मनो
द्धूलनं कुरु। त्रिपुंड्रधारणं सम्यक् कुरु विध्युक्तमार्गतः। रुद्राक्षधारणं नित्यं कुरु यत्नेन सादरं
शिवपूजां प्रयत्नेन कुरु बिल्वदलैर्मुदा। शैवं पंचाक्षरं नित्यं जपयत्नेन पुरःसरं। कालत्रयेप्यर्चय
स्व शिवलिंगं प्रयत्नतः। रुद्राभिषेकपानीयं पिब प्रत्यहमादरात्। शंभुं ध्यानेत्र सततं सर्वं शिवाय
विनिवेदितं। शोकरायनिवेद्यैव पिबादकमपि प्रियं॥ निवेदितं शोकरायतांबूलं खादु रुप्रियं

शायने भोजने नित्यं शंकरं स्मर सादरं। नित्यं शिवकथामेव शृणु भक्तिपुरःसरं। शैवैः सह व सततं वार्तां
कुरु यथोचितां। शैवेभ्यएव यत्नेन धनं देहि स्वशक्तितः॥ २० ॥ शैवानदृष्ट्वाति यत्नेन पूजयोत्थाय सा
दरं शैवस्तुविनयेनैव वार्तां कुरु कृतांजलिः। शैवं न करकोटिल्यं प्रमादेनापि सर्वथा। शैवान्संतोष
य यत्नेन पूजया सर्वदा नृप। अशैवानतियत्नेन सह राद्रप्पूर्वकं। अशैवसंश्रयं देशे मापालय नरा
धिप। शिवालयानि यत्नेन कारय स्वस्वशक्तितः। शिवालयेषु सर्वेषु कारयस्वार्चनं मुदा। शि
वस्थानेषु रम्याणि जलकुंडानि कारय। शिवस्थानेषु विभवाः कारणीयाः प्रयत्नतः। कारयस्वालं
कृतानि शिवस्थानानि सादरं। नाट्यं कारय सर्वेषु शिवस्थानेषु सादरं। दीपमालालंकृतानि शिव
स्थानानि कारय। संमार्जितानि तिष्ठंतु शिवस्थानानि सर्वदा। दुंदुभिध्वनिपूर्णानि शिवस्था
नानि सा कारय। सपुष्पजलसिक्तानि शिवस्थानानि कारय। मा पालय स्वनद्राष्ट्रं यद्राष्ट्रे मृति
वालयः। मा विलोकय नेत्रेण यो द्रष्टा शिवालयः। मा विलोकय यत्नेन स्त्रियं त्यक्त शिवार्चनं

शि०स्य २४५ मा विलोकयाम्यहं त्वां शिवभक्तिविवर्जितान्॥ शिवव्रतानि सततं कुरु यत्नेन पार्थिव। नित्यं पार्थि-
वलिंगानि पूजयस्व नरेश्वर॥ यस्तु पार्थिवलिंगानि पूजयिष्यति सादरं॥ स महाभाग्यभुग्भूत्वा काम-
तश्शांकरं पदं॥ यस्यास्त्यैश्वर्यमोक्षेच्छा तेन यत्नेन सादरं॥ पूजनीयं विधानेन पार्थिवलिंगमुत्तमं
सजन्पार्थिवलिंगस्य पूजनादेव सर्वथा॥ मुक्तिकान्ता समायाति स्वयमेवातियत्नतः॥ मृन्मयं लिंग-
मभ्यर्च्य महादारिद्र्यनाशकं॥ तेन दारिद्र्यनाशस्तु भवत्येव हि सर्वथा॥ अर्चितं पार्थिवं लिंगं नाना-
शयत्यघपर्वतान्॥ ददाति महदैश्वर्यं मुक्तिमंते ददाति च। पार्थिवलिंगमभ्यर्च्य शिवैकपरदैवतैः
नान्यदित्याह जाबालस्तत्तथैव हि सर्वथा॥ शिवान्यदेवतासक्तः पार्थिवं लिंगमर्चयन्। न तत्फ- श्री:॥
लमवाप्नोति सत्यमित्याह गौतमः॥ अतः शैवो भवं प्रीत्या पार्थिवं लिंगमर्चय॥ तत्पूजया तवाप्ता-
र्थाः सिद्ध्यंत्येव न संशयः॥ कुबेरस्य धनं पूर्वं सर्वं विश्रवसा हृतं॥ ततो दरिद्रः समभूत्कुबेरो धन- २४५
वर्जितः॥ ततोऽति दुःखं संप्राप्य जगाम हिमवद्गृहं॥ हिमवान्पूजयित्वा तं प्रयच्छात्यंतदुःखितं

किमासीद्राजराजाद्य खिन्नस्त्वं हि दृश्यसे॥ खेदकारणमाचक्ष्व दुःखं त्यक्त्वा स्थिरो भव॥ एवं पृष्टो
हिमवता बाष्पधारापरिप्लुतः॥ जगाद वचनं दुःखी गतं धनमिति स्वकं॥ तच्छ्रुत्वा हिमवान्धीरो
विस्मितः पर्यपृच्छत॥ कथं गतं किमथासीदित्येवं प्रसुवावचः॥ पूर्वं धुरन्यासक्तेन त्यक्तं मयाशि-
वार्चनं॥ ततः परंमपाराज्ञोनकृतं शिवपूजनं॥ तदानीं विश्रवानाम गंधर्वः कश्चिदागतः॥ तेन
सर्वधनं नीतं तिरस्कृत्यैव मां ततः॥ इत्युदीरितमाकर्ण्य कुबेरस्य हितावहं॥ बभाषे वचनं धीमान्
विचार्य च पुनः पुनः॥ कुरुष्व पार्थिवं लिंगं षोडशांगुलमुन्नतं॥ अनावृता समावृत्त मामूला-
ग्रमनुन्नतं॥ सार्धवत्सरपर्यंतं पूजयस्व विवानतः॥ भस्मरुद्राक्षवीतांगो ब्रह्मचर्येण संस्थितः
आनयस्वातियत्नेन हेमपद्मानि सादरं॥ बिल्वपत्राणि हेमानि कैलासादानयान्वहं॥ एतैः प-
द्मैर्बिल्वपत्रैः पूजयस्व महेश्वरं॥ सहस्रं चयप्रीत्या दिवानां लिंगसन्निधौ॥ प्रदक्षिणशतं
नित्यं सम्यगष्टोत्तरं कुरु॥ प्रणामां तु कुरु साष्टांगं नित्यमष्टोत्तरं शतं॥ परमान्नेन नैवेद्यं

शि०स्व
२४६

कुरुयत्नेन सादरं। कर्पूरदीपानमलान्कुरु सार्धायुतत्रयं। गंडाख्यागरुधूपेन प्रीणयस्व महेश्वरं।
पूजयस्वातियत्नेन शिवं कृशाणाः सदा। सार्धवत्सरपर्यंतं एवं कृत्वा शिवार्चनं। ततः कुरु यथा
शास्त्रमुद्यापनमतंद्रितः। उद्यापनविधिं वक्ष्ये शृणु सर्वं विशेषतः। पलक्षैर्वा विलंबेन लप्स्यसे ध
नमुत्तमं। उक्तमृल्लिंगमानेन सौवर्णं लिंगमुत्तमं। संपादनीयं यत्नेन नवलक्षणलक्षितं। राजता
न्यपि लिंगानि तादृशानि चतुर्दश। संपाद्य हेमवृषभाः कार्याः पंचदशोत्तमाः। सुवर्णायुतविंशत्या
कार्यं लिंगं हिरण्मयं। राजतान्यपि लिंगानि तेन मानेन कारयेत्। सुवर्णैरयुतैः कार्य एकैको वृषभे
श्वरः। अन्यूनातिरिक्तास्तु वृषभेशाः प्रकीर्तिताः। एतानि सोपकरणान्युपादाय ततः परं। आस्तर
णि पट्टवस्त्राणि श्वेतान्युज्वलानि च। ततश्च श्रावणे मासि पौर्णमास्यां विशेषतः। उद्यापनं प्र
यत्नेन कर्तव्यं विधिपूर्वकं। तत्र वृणुः प्रयत्नेन विप्राः षोडश शांकराः। निमंत्रणीया विधिवदर्घ्य
दानपुरःसरं। आचार्यस्तत्र कर्तव्यस्तदन्यः शैवपुंगवः। तत्र ब्रह्मा तु कर्तव्यस्तदन्यः शांकरोत्तम-

श्रीः॥
२४६

ततो लिंगानि दुग्धाद्यै रभिषिच्य यथाविधि। मंडपे स्थापनीयानि वितानाद्यैरलंकृते। रात्रौ पूजा प्रय
त्नेन कर्तव्या विधिपूर्वकं। रात्रौ जागरणं कार्यमुपोषणपुरःसरं। ततः प्रातः समुत्थाय स्नात्वा पूजां विधा
स्व। ब्राह्मणैः सहस्रैश्च शांभवैर्यत्नपूर्वकं। मध्वाज्यशर्करायुक्तपरमान्नेन सादरं। होमः कार्यः प्र
यत्नेन पंचाक्षरविधानतः। पंचलक्षं प्रयत्नेन जुहुयात्परमान्नतः। ततः सबिल्वमधुना होमस्त्वा
न्विधीयते। ततः सक्षीरमधुना बिल्वपत्राणि तेन च। साज्यसक्षीरमधुना बिल्वपत्रान्वितेन च
एवं होमः प्रयत्नेन कर्तव्यस्तदनंतरं। लिंगदानानि कार्याणि जाबालोक्तविधानतः। भोजनीयाः
प्रयत्नेन ततः शांकरपुंगवाः। सुवर्णायुतमुत्कृष्टं दक्षिणा च विधीयते। वृषभान्वितलिंगानि द
त्वा वस्त्राणि चादरात्। स्वकृतं कर्म कर्तव्यं महादेवार्पणं ततः। एवं करोति यः सम्यङ्महादेवस्य
पूजनं। तेनैव विधायः प्राप्यान चाप्याशु न संशयः। एवमुक्तो हिमवता स चकार तदा व्रतं
ततः कुबेरः संप्राप शीघ्रं स निधयो नव। तत्प्रभृति यत्नेन कुबेरः शिवपूजनं। सप्तवारंप्रय

शि०रह्य २४७

तेन कर्तुं समुपक्रमे॥ अतः पार्थिव यत्नेन भवानपि शिवार्चने॥ कुरु यत्नेन सततं बिल्वपत्रादि
साधनैः। सर्वदा शंकरस्यैव कुरु ध्यानं प्रयत्नतः॥ निरीक्ष्य प्रयत्नेन पूजितं श्रीमहेश्वरं॥ जपं पंचा
क्षरं मंत्रमप्रमादेन सादरं॥ तेन सर्वार्थसिद्धिस्ते भविष्यति न संशयः॥ क्षणार्धमपि राजेंद्र शंकर
ध्यानवर्जितं॥ मा कुरुष्वोपदेशोयं सदार्थफलदायकः॥ सर्वसाधारणा धर्मा इदानीं मदुदीरिताः॥
राजधर्मेण सततं पालयस्व स्वकाः प्रजाः॥ यम उवाच। इत्युक्तं तद्वचः श्रुत्वा राजा विनयपूर्व
कं। शैवं संपूज्य यत्नेन जगाम नगरं स्वकं॥ तस्य शैवस्य जनकः शिवद्रोहवशादिह॥ पतितो भू
रिदुःखानि भुक्त्वा तिष्ठति दुःखितः॥ अनेन वर्णोदत्तः शिवलिंगोपरि भ्रमात्॥ तावताप्यनु
भूयंते दुःखान्येतानि सर्वदा॥ ध्मायमानाग्निकुंडस्थे लोहदृष्टो मन्मथस्त्वया॥ स्तंभं दहस्
मानं तं समालिंग्याधितिष्ठति॥ मन्मथोयं ताड्यते हि संतप्तायसशृंखलैः॥ कशाभिस्ताड्यते
तस्मिन्वक्रैर्दीर्घैश्च दारुणैः॥ भिंडिपालैस्ताड्यते यं तप्तैरत्यंतमुन्नतैः॥ संतप्तायसपिंडैश्च ताड्य

श्रीः॥ २४७

ते दुःखदायकैः॥ कथं वा तप्तशूलाग्रैः प्रोथितोस्यतिदारुणैः॥ कथं वा तप्ततैलेन सिच्यते दुः
सहेन च॥ अन्यदेवसमो रुद्रो न रुद्रो देवतोत्तमः॥ इत्युवाच पुरा कामुकस्तस्यैव कर्मणः फलं॥ सर्वदे
वाधिदेवं शशिशेखरं यो मनुतेन्यथा॥ तेनैवमेव दुःखानि प्राप्तव्यानि न संशयः॥ महाविष्णुप्रियत
मः शंबरारिस्तथाप्ययं॥ भुक्त्वा घोराणि नरकान्यत्र तिष्ठति सर्वदा॥ नरके पतितं श्रुत्वा मन्म
थं कमलापुरा॥ दुःखाद्विष्णुमुवाचेदं वचनं साश्रुरदन्मुखी॥ लक्ष्मीरुवाच॥ तव प्रियतमो मारो
नरके पतितो हरे॥ तमुद्धरातियत्नेन मम दुःखं निवारय॥ इति तद्वचनं श्रुत्वा स लक्ष्मीरमणोऽब्रवी
त्॥ दुःखं मा कुरु मुग्धेति पुनरन्यदुवाच च। अस्मदादिसमत्वेन शिवं वदति मन्मथः॥ देवाधि
देवः सशिवः सोस्मत्तुल्यः कथं भवेत्॥ अहं तु देवदेवस्य महादेवस्य सेवकः॥ मत्तुल्यः स कथं
भूयाच्छिवो देवशिखामणिः॥ सेवकादधिकः सेव्यः सर्वसेव्यो महेश्वरः॥ तथा च सेवकान्मत्तो
महानेव महेश्वरः॥ महेश्वर इति ख्यातः शिव एव तथा सति॥ सोस्मत्तुल्यः कथं भूयात्सर्वदेवम

शि०स्व २४८

हेश्वरः॥ अखिलेंद्रप्रमुखा देवाः शंकरस्यैव सेवकाः॥ ततस्तत्तुल्यता शंभोः कथं भवति तद्वद॥ सेव्यं
सेवकतुल्यं च मनुते मोहतस्तदा॥ स सेवको दंडनीयः सेव्येन भवति ध्रुवं॥ वयं अलादयो देवा नित्यं
यद्द्वारिकिंकराः॥ ताश्च तेतेन देवेन समाः स्यामः कथं प्रिये॥ अस्मान्तगणपत्येव कोपि शंकरकिंक
रः॥ तादृशः शंकरोस्माभिः कथं तुल्यो भविष्यति॥ मन्मथः समं देवत्वमस्मत्तुल्यमम न्यत॥ अ
तस्तेनैव पापेन नरके पतितो ध्रुवं॥ प्राप्तं यत्पूजया स्माभिः देवत्वं कमले मलं॥ तेन देवेन तुल्यत्वं
कथमस्मासु तद्वद॥ योन्यतुल्यतया वेद भ्रमेणापि महेश्वरं॥ स घोर नरके वासं प्राप्नोत्येव न सं
शयः॥ तदुद्धारप्रयत्नोपि मया कर्तुं न शक्यते॥ कृतोपि विफलो यत्नो भविष्यति न संशयः॥ प श्री:॥ २४८
तितोयं महस्त्रियः श्रीमहादेवनिंदकः॥ न तस्य निर्गमस्तस्मात्कल्पकोट्यर्बुदैरपि॥ यमस्तु देव
देवस्य महादेवस्य किंकरः॥ स किं मद्वचनं श्रुत्वा यातनां न करिष्यति॥ शासनीयः प्रयत्नेन पुत्रो
पि शिवनिंदकः॥ स शासनीय एवातः पालनीयो न तादृशः॥ तदुद्धाराय यत्नश्चेत् क्रियते यमया

प्रिये॥ तदा मयापि तेनैव सह स्थेयं भविष्यति॥ तदुद्धारार्थमुद्युक्तं विलुंमोसयमः प्रिये॥ अशैवोय
मिति ज्ञात्वा ग्रहिष्यत्येव सर्वथा॥ गृहीत्वा स तु कामं मोचयिष्यति न ध्रुवं॥ तद्भक्तपतिकः कापि
न मुक्तो ह्यापि दृश्यते॥ अतस्तत्र प्रयत्नस्तु न चलिष्यति सर्वथा॥ वसतूलीमिति प्राह लक्ष्मीं ल
क्ष्मीपतिः स्वयं॥ अतो मद्दत्तपतितः सुरोपि शिवनिंदकः॥ भुक्त्वा तिष्ठति घोराणि नरकाणि न
संशयः॥ अनंतब्रह्महत्याभिर्यावद्दुःखमवाप्यते॥ ततोपि दुःखमधिकं प्राप्यते शिवनिंद
या॥ ब्रह्महत्याः कृता येन तस्यैव नरके स्थितिः॥ तद्देशजानां नरकस्तेन पापेन न ध्रुवं॥ शिव॥७
निंदा कृता येन तस्यैव नरकस्तु न॥ किंतु तद्देशजानां च नरकेष्वेषु संस्थितिः॥ शिवनिंदासमं
पापं न भूतं न भविष्यति॥ तया यत्प्राप्यते दुःखं तद्दुःखमतिदुःसहं॥ काशीपते समुत्पन्नो यद्देशे
शिवनिंदकः तद्देशो नरके घोरे पतिष्यत्येव सर्वथा॥ ३००॥ न संरक्षति तद्देशं शिवनिंदाद
वानलः॥ यद्देशे कालकूटाभो जातोस्मि शिवनिंदकः॥ यस्य वंशे समुत्पन्नः शिवनिंदापरो न

र:॥ तद्देशे जलमप्यल्पं न ग्राह्यं सर्वथा द्विजैः॥ तच्चैव डालकुले ह्येवं यत्कुले शिवदूषकः॥ ततस्तत्र तु
न ग्राह्यं जलान्नादि विवेकिभिः॥ शिवनिंदकवंशे चेज्जलं पिबति मोहतः॥ तप्तकृच्छ्रं तदा कार्यं प्र
यत्नेन विवेकिनः॥ त्यक्तभस्मत्रिपुंड्रस्य गृहे भुक्त्वा तु मोहतः॥ प्रायश्चित्तं द्वादशाब्दं कर्तव्यमति
यत्नतः॥ त्यक्तलिंगार्चनगृहे यदि भुंक्ते भ्रमाद्द्विजः॥ तदा तद्द्विगुणं कार्यं प्रायश्चित्तं मतं द्वि
जैः॥ त्यक्तभस्मत्रिपुंड्रस्य यदि दृष्टं मुखं भ्रमात्॥ तदा सूर्यं विलोक्याथ दोषवासाजलमाविशे
त्॥ त्यक्तभस्मत्रिपुंड्रस्य स्पर्शो यदि भवेद्भ्रमात्॥ स्नात्वोपवासः कर्तव्यः शिवपूजापुरःसरं॥
त्यक्तभस्मत्रिपुंड्रेण यद्यालापः कृतो भवेत्॥ तदोपवासः कर्तव्यस्त्रिपंचब्रह्मवादिभिः॥ वि
भूतिधारणं त्यक्त्वा यदि भुंक्ते भ्रमाद्द्विजः॥ तदा तदन्ननिष्कास्य चैव चांद्रायणाष्टकं॥ शिवपूजां
विहायैव यदि भुंक्ते भ्रमाद्द्विजः॥ तदा तदन्ननिष्कास्य चैव चांद्रायणाष्टकं॥ रुद्राभिषकपानीयमपी
त्वा यदि भुज्यते॥ तदा तदन्ननिष्कास्य चैव चांद्रायणत्रयं॥ रुद्राक्षधारणं त्यक्त्वा यदि भुंक्ते प्रमाद

तः॥ तदा तदन्ननिष्कास्य चैव चांद्रायणद्वयं॥ यद्यैकैकं कर्तव्यं तत्प्रायश्चित्तमिदं तदा॥ तत्त्यागसं
रम्भे यत्कार्यं प्रायश्चित्तं यथोदितं॥ यदि भुंक्ते मासमात्रं संत्यक्त्वा भस्मधारणं॥ तदा तु स तु पापिष्ठो
न प्रायश्चित्तमर्हति॥ शिवपूजादिकं त्यक्त्वा ह्येवमेव द्विजाधमः॥ प्रायश्चित्तायुते नापि शुद्धो न भ
वति ध्रुवं॥ शिवपूजादिकं त्यक्त्वा ये मृताः पापिनो जनाः॥ ते एव तेषु नरकेषु नानीयानीय पातिताः॥
अत्यंतसुलभं पुण्यं त्यक्त्वा शंकरपूजनं॥ पतंति घोरनरकेष्वेते षु जडबुद्धयः॥ भस्मोद्धूलनमा
पुण्यं त्यक्त्वा जावालश्रुत्योदितं॥ पतंति॰ त्यक्त्वा त्रिपुंड्रमनघं केवलं श्रुतिचोदितं॥ पतंति च॰ रुद्रा
क्षधारणं त्यक्त्वा पापारण्यदवानलं॥ पतंति॰॥ श्रीरुद्राध्ययनं त्यक्त्वा पापारण्यदवानलं॥ प
तंति॰॥ पंचाक्षरजपं त्यक्त्वा पापारण्यदवानलं॥ पतंति॰॥ रुद्राभिषेकपानीयपानं त्यक्त्वाघनाश
कं॥ पतंति च॥ अरण्ये बिल्वपत्राणि संति रम्याणि भूरिशः॥ तैरीशो नार्चितस्तस्मादेते नरकपाति
नः॥ अत्यंतसुलभं पुण्यं शिवइत्यक्षरद्वयं॥ सुदानो च्चारितं तस्मादेते नरकपातिनः॥ मुक्तिकांता

वश्यहेतौ शिवमंत्रे विराजति। कथमेते पतंत्यत्र नरके महदद्भुतं॥ शिवमंत्रजपेनिष्ठा येषां नैव भ
विष्यति। तेषां तु नरको वासो भविष्यत्येव सर्वथा॥ शिवमंत्रो ह्यघहिरणो नरकध्वांतनाशकः॥ तस्मि
न्नसत्यपतंत्यत्र नरकेषु पतंत्यहो॥ पुरा कश्चिन्नराधीशो मित्रराडिति विश्रुतः॥ सुरापुष्टतनुर्गौरः
सुंदरः क्रूरशासनः॥ तद्रक्षितगजाश्वानां नसंख्यादृश्यते मया। सर्वसमंतभूपालास्तदाज्ञाकारिणः
सदा॥ एतादृशः स भूपालः स्वपत्नीमतिसुंदरीं॥ तिरस्कृतस्वर्गनारीं दृष्ट्वा वचनमब्रवीत्॥
राजोवाच॥ आयाहि सुभगे भद्रे राज्ञीजीनाद्य भूयसी॥ मम मालिंगनं देहि येन तुष्टो भवाम्यहं॥
त्वदालिंगनमात्रेण संतोषो या दृशो मम। तादृशो मे न संतोषो नान्यसंगेन जायते॥ बहिः स्थित्वात
वैवदं सौंदर्यमतिसुंदरं। अति सौख्यकरं चित्ते ध्यायते सर्वदा मया॥ इत्युक्तं तद्वचः श्रुत्वा सुभगाख्या
मनोहरा। जगाद वचनं चारु सत्यं वै राज्यसाधकं॥ सुभगोवाच॥ शंकरार्चनकालोयं क्रियते
शंकरार्चनं। अयं न भोगकालो हि नो मया नागम्यतेधुना॥ कुरु त्वमपि राजेंद्र महादेवस्य पूजनं॥

वृथा कालो न नेयोयं परलोकार्थिभिर्यतः॥ उपेंद्रेंद्रादयो देवाः गंधर्वा मुनिसत्तमाः॥ अस्मिन्काले
महादेवं पूजयंति प्रयत्नतः॥ या जगज्जननी साक्षाद्भवानी सापि शंकरं। संपूजयति यत्नेन साधने
र्बहुभिर्मुदा॥ कुमाराद्या गणाधीशाः सर्वे प्यत्यंतयत्नतः॥ पूजयंति महादेवं ब्रह्मविष्ण्वादिपूजितं॥
गंधर्वोरगयक्षाद्या विविधैः साधनैः शिवं। पूजयंति प्रयत्नेन सर्वदेवोत्तमोत्तमं॥ अयं सोमान्वि
तः कालस्त्रयोदश्यापि संयुतः॥ अतोधुना पूजनीयो महादेवः प्रयत्नतः॥ अर्धरात्रार्चनं शंभोः सो
मेप्रियकरं यतः॥ ततः पूज्योधुना शंभुर्बिल्वपत्रादिसाधनैः॥ त्वयापि शंकरः सम्यक्पूजनीयः
प्रयत्नतः। विलंबं माकुरु स्वांस्त्वा सावधानो भवाधुना॥ करिष्यसि सदा भक्त्या यदि शंकरपूज
नं। तदा विपुलभोगांते लप्स्यो मोक्षस्त्वया ध्रुवं। यम ऋष्यर्च्य महादेवं वैकुंठं प्राप केशवः॥ नमना
द्यंतमीशानं शंकरं शरणं व्रज। सर्वदेवोत्तमः सांबः सर्वदेवशिखामणिः॥ पूजनीयः प्रयत्ने
न भुक्तिमुक्तिफलेप्सुभिः। महद्भाग्यं न वास्त्यद्य तथा च बहुसाधनैः॥ पूजयस्व महादेवमप्र

मादेन सर्वदा॥ दीपांल्लक्षावधि प्रीत्या घृतकर्पूरराजितान्॥ रत्नयस्त्वाभियत्नेन महादेवालये सदा
लक्षपूजां कुरु प्रीत्या रत्नैरन्यैर्महादरात्॥ हेमपुष्पैश्च विपुलैर्हेमबिल्वदलैरपि॥ शालवारप्र
यत्नेन दधिदुग्धजलमिश्रितैः॥ नैवेद्यमतियत्नेन शंकराय निवेदय॥ यद्यस्मिन्नागपसमये शिव
रत्नार्चयिष्यसि। तदा कदाचिद्देवेशं शंकरं पूजयिष्यसि॥ राजैन्नैश्वर्यमखिलं तदेदं सफलं भ
वेत्॥ यद्यर्चयिष्यसि प्रीत्या देवदेवं महेश्वरं॥ शिवानर्पितरत्नानि भविष्यंति वृथा तव॥ तथा
हि मादिवस्तूनि भविष्यंति वृथा ध्रुवं॥ धिग्धिग्धिग्धिक् च वैश्वर्यं यन्नेशाराधनसाधनं॥ ईशोपि
श्रीमहेशान्यो नास्ति नास्त्येव सर्वथा॥ राजन्मा कुरु भोगेषु राज्ये च्छामपि संत्यज॥ कुरु यत्ने
न सततं श्रीमहादेवपूजनं॥ विहाय चंदनं राजन्भस्मनांगं विलेपय॥ विहाय रत्नाभरणं कुरु
रुद्राक्षधारणं॥ शृणु शैवीं कथां रम्यां कथामन्यां त्यजादरात्॥ जपपंचाक्षरं शैवं महापात
कनाशकं॥ अनित्यमिदमैश्वर्यं राज्यं तेदुःखदायकं॥ त्यजैश्वर्यमिदं शीघ्रं पूजयस्व महेश्व

रं मयि मा कुरु राजेंद्र स्नेहं दुःखैकसाधनं॥ स्त्री वनीनि रक्षयंतीति सत्यमेवोच्यते मया॥ मांसग्रंथी स्त
नावेतौ किमत्रास्ति वद स्व मे॥ विदारिते मांसमात्रं निःसरिष्यति सर्वथा॥ श्लेष्मागारं मुखं पत्रपने
त्रे च नवि नाश्रये॥ स्त्रिवक्त्री श्लेष्मपानार्थं यतते किं वद स्व मे॥ मूत्रागारे योनिदेशः सतु दुर्गंधिसर्व
दा॥ तत्रयः कुरुते प्रीतिं स एव हि नराधमः॥ अतस्त्यज मयि प्रीतिं कुरु शंकरपूजनं॥ भजनित्यं म
हादेवं ब्रह्मविष्ण्वादिसेवितं॥ देवतासार्वभौमस्य महादेवस्य सर्वदा॥ विष्णुब्रह्मादयः सर्वे पूजां
कुर्वंति यत्नतः॥ यौवनभ्रांतचित्तेन त्वया त्यक्तं शिवार्चनं॥ तत्यागे नरकावासो भविष्यति न संश
यः॥ राजंछिवार्चनत्यागात्पतंति नरके जनाः॥ प्राप्तानि नरकाण्युग्रापुरा त्वत्कांतिवार्चनैः॥ मि
त्रराडिति तद्वाक्यं श्रुत्वा वचनमब्रवीत्॥ कथं ज्ञातमिदं सर्वमिति सा तमुवाच च॥ अहं पूर्वभवे राज
न्किरातधमकन्यका॥ जातं हि जीवनं पूर्वं काष्ठविक्रयणादिना॥ न प्राप्तमन्नं संपूर्णं कदाचिदपि
सर्वथा॥ वस्त्रस्य वार्त्ता का तत्र पत्रं तु परिधीयते॥ वने गत्वा मया पूर्वं काष्ठान्याहर्तुमेकदा तत्रै

वोमया दृष्टः शिवपूजाविशारदः ॥ नाद्यैः स्तव्याछितैते नरं करात्ये प्रयत्नतः ॥ विवीध्यपशीकरं नत्वा
मया नाद्यैः कृतं तदा ॥ ततो दैवाद्गतस्तस्मिन्नरण्ये मरणं मम ॥ तदानीमागते मत्यं पुष्पकं स्वर्गलोकतः ॥
तत्र गत्वा स्वर्गलोके बहुकाले स्थितं मया ॥ ततो नराधिनाथस्य संभूत सुंदरे मया ॥ रंभाद्याश्च जि
ताः सर्वाः सौंदर्येण मया ध्रुवं ॥ सर्वदा सुखमेवास्ति मम दुःखं न किंचन ॥ शिवप्रमाण नाद्याभ्यां नि
रंतरं सुखं मया ॥ प्राप्तमंते मया मुक्तिः प्राप्तव्या सत्यमुच्यते ॥ अतीतानागतज्ञानं महादेवप्रसाद
तः ॥ मम जातमतः सर्वं स्मर्यते नात्र संशयः ॥ ७० ॥ स्वमुखं दृश्यते सम्यग्विमले दर्पणे यथा ॥
तथातीतानागतार्थो दृश्यते सर्वदा मया ॥ प्रणामनर्त्तनादीनि महादेवस्य पूजनं ॥ ततस्तत्पूजया
सर्वमपेदं ज्ञायते ध्रुवं ॥ ज्ञातिस्मरत्वं सौभाग्यं मोक्षश्च शिवपूजया ॥ प्राप्यते नात्र संदेहः श्रद्दस्व
पृथिवीपते ॥ एकवारं नर्त्तनेन प्रणामेन च शंकरः ॥ सौभाग्यमीदृशं मह्यमतिकारुणिको ददौ ॥
मया त्वहर्निशं सांबः पूज्यते बहुसाधनैः ॥ इदानीं तु विशेषेण पूज्यते पार्वतीपतिः ॥ इत्युदीरित

माकर्ण्य रोमांचिततनुस्तदा ॥ कोऽहं पूर्वभवे तत्सर्वं वद त्वाह स भूपतिः ॥ सुभगोवाच ॥ शृणु त्व
मसि राजेंद्र पूर्वजन्मनि दुर्बलः ॥ अतिकुत्सितवृत्त्यैव जाते हितव जीवनं ॥ क्रयार्थं बिल्वपत्राणि
समानेतुं त्वया पुरा ॥ वनं प्रविष्टं गहनं सुबिल्वतरुसंश्रितं ॥ तत्रैव बिल्वपत्राणि त्रोटितानि त्व
या वने ॥ बहूनि तानि संबध्वा परावृत्तं त्वया वनात् ॥ मध्ये मार्गं तदा चौरा बहवः समुपागताः ॥
तद्दर्शनेन भीतिस्ते बभूव प्राणहारिणी ॥ सर्वाणि बिल्वपत्राणि त्यक्त्वैव त्वरयात्वया ॥ प्रपलाय्य
गतं भीत्या तद्भयेन मृतं त्वया ॥ त्यक्तानि बिल्वपत्राणि शिवलिंगे तु नर्मदे ॥ पतितानि तदा ते
न संतुष्टः पार्वतीपतिः ॥ ततः परं लिंगरूपी स्वयमेव महेश्वरः ॥ कृपालुः पार्वतीयुक्तस्तव प्रत्य
क्षतां गतः ॥ वरः पृष्टस्त्वया राजन्प्रत्यक्षे परमेश्वरे ॥ राज्यं देहि महादेव मुक्तिं चेति प्रणम्य तं ॥ त
तः स पार्वतीनाथस्तथास्त्विति अनुमोद्य च तत्रैवांतर्दधे लिंगे बिल्वपत्राभिवेष्टिते ॥ ततः परं
समुत्पन्नं त्वया क्षोणीश्वरोदरे ॥ भुज्यते राज्यभोगादि शंकरानुग्रहात्सदा ॥ त्वया ज्ञातावि

शि॰स्य २५३

ल्वपत्रेणैमहेशार्चनं कृते। तथापि भाग्यमतुलं ददौ तुभ्यं सदाशिवः॥ एतादृशः कृपासिंधुस्त्वया
नाभ्यर्चितः शिवः। यत्प्रसादेन सौभाग्यं प्राप्तमेवं त्वयाधुना॥ सोऽहं त्वं जाघुना राजन्पूजयस्व म
हेश्वरं। नित्यमव्यभिचारेण शंकरं शरणं व्रज॥ इत्युक्तः स ततो राजा संत्यक्त्वा मोहमन्वहं। अत्यंतं
सावधानेन चकार शिवपूजनं॥ शिवस्थाननिबद्धा कारयामास भूपतिः। रत्नपुष्पैर्महादेवं पूज
यामास यत्नतः॥ सुवर्णबिल्वपत्रैश्च दशलक्षमितैर्नृपः॥ पूजयामास यत्नेन हेमपद्मैश्च
संततं॥४००॥ अन्यैश्च पुष्पैरनिशं संस्थाहीनैर्महेश्वरं। पूजयामास यत्नेन बिल्वपत्रैश्च कोम
लैः॥ दीपांल्लक्षावधिप्रीत्या ददावन्वहमादरात्। नैवेद्यानि प्रयत्नेन सबहूनि ददौ मुदा नृपः॥
एवं शिवार्थमखिलं रत्नागारं निवेद्य सः। शिवमेव सदाध्यात्वा स्थितः शिवपरायणः॥ ततस्त
स्याभवत्पुत्रः शिवपूजापरायणः। तस्मिन्निधाय तद्राज्यं सपत्नीको वनं ययौ॥ तत्र तेन प्रयत्ने
न बिल्वपत्रैर्महेश्वरः। पूजितः स ततस्तत्र सपत्नीकेन सादरं॥ नवानि बिल्वपत्राणि संपाद्य

श्री॰॥ २५३

गिरिजापतिं। पूजयित्वा प्रणम्याशु नर्तनं च चकार सः॥ ततः कदाचित्संपूज्य बिल्वपत्रैः सदाशि
वं। पंचाक्षरं जपं कुर्वन्सपत्नीको मृतो नृपः॥ तदैव करुणासिंधुर्महेशो वीक्ष्य तं नृपं। सहसैव प्रे
षयामास गणानां पुष्पकान्वितं। ततः पुष्पकमारुह्य सपत्नीको नराधिपः। अनेनैव हिमा
द्रिमार्गेण गतः शंकरसन्निधिं। तदा दुंदुभयो नेदुः पुष्पवृष्टिर्बभूव च॥ जगुर्गंधर्वपतयो ननृतुश्चा
प्सरोगणाः॥ स पूजितो मया राजा पुष्पैर्नानाविधैस्तदा॥ तदानीमेवमेवाहवचनं प्रीतमान
सः॥ राजोवाच॥ येन शास्यपयत्नेन शिवपूजापराङ्मुखान्॥ अशेषानग्निकुंडेषु पातयस्व दु
रा[illegible]नूयान्॥ भस्मरुद्राक्षविमुखान्नग्नो प्रज्वाल्यपत्नीतः॥ बद्ध्वैरवातिपत्नेन त्वं भ
वध्वाग्निशृंखलैः॥ इत्युक्त्वा स पपौ पूर्वं सोत्साहं मुदितानन॥ बद्ध्वैवेहैवमेवात्र कं बद्ध
भिः शंकरैर्मुदा। यच्छिवस्तस्य नियमात्पूजनं क्रियते मया। शैवे दृष्टे मनोत्साहो महाने
व हि जायते। रुद्राक्षधारणं शुद्धं केवलं भस्मधारणं। लिंगार्चनं केवलं च यस्य शैवः स उच्य

ते॥ तादृशस्य तु शैवस्य यः पूजां न करिष्यति॥ सोप्यस्मिन्नारके घोरे पतित्वा तिष्ठति ध्रुवं॥ शंकरस्य
प्रियः शैवस्ततः शैवार्चनं सदा॥ प्रयत्नेनैव कर्त्तव्यं तेन तुष्यति शंकरः॥ यस्यास्ति नरकाशंकेति तेन
न कार्यं शिवार्चनं॥ शैवार्चनं च कर्त्तव्यमप्रमादेन सर्वदा॥ पश्येनं मलकुंडस्थं मूत्रकं क्रिमिभक्षि
तं॥ संतप्तं तीक्ष्णशूलैश्च पीड्यमानमहर्निशं॥ अयं तु ब्राह्मणः पूर्वं वेदशास्त्रविशारदः॥ अनेन
बहवो यागाः कृताः स्वर्गार्थिमादरात्॥ अनेनैव कदा दृष्टः शैवः शिवपरायणः॥ तं दृष्ट्वा प्राह वचनं अ
यमेवाति गर्हितं॥ अनेन नियमेनेदं पूजते त्वां तवेतसा॥ भस्मनांगमयं श्वेतं करोतीति भ्रमा
त्तदा॥ इत्युक्तं तद्वचः श्रुत्वा शैवो दुःखमुपागतः॥ अनेन शिवलिंगस्य नाम नोच्चरितं मुदा॥ ज
गादेदमिति भ्रांत्या त्वया संपूज्यते ति च॥ श्रीसदाशिवलिंगस्य नामग्रहणमात्रतः॥ नश्यंति
पापगिरयो वज्रसंताडिता इव॥ भस्मनांगमयं श्वेतं करोतीत्युक्तवानयं॥ नवेत्ति भस्ममाहात्म्य
मयं पापच्छेदुत्तमः॥ इत्युक्तात्तद्वचः स्मृत्वा शैवो दुःखमुपागतः॥ ततोश्रुपूर्णनयनः हाहाहेति

रुरोद च॥ तदाददर्श राजानं शोभयंतिं वसेमतं॥ तादृशं खिन्नहृदयं तं दृष्ट्वा शैवपुंगवं॥ बभाषे
वचनं राजा दैवात्तत्र समागतः॥ राजोवाच॥ किमासीदधुना ब्रह्मन् किं वा दुःखस्य कारणं॥ दुः
खं चेत्तव मद्राष्ट्रे राज्ञहानिर्भविष्यति॥ इत्युक्तं राजवचनं श्रुत्वा शैवोत्तमस्तदा॥ यदृष्टं पैनमनेनो
क्तं वचनं तस्मै न्यवेदयत्॥ ततः स राजा धर्मज्ञो नाहूय द्विजपुंगवान्॥ एतस्य कीदृशी शास्तिः
पृत्ते मे त्यब्रवीत्तदा॥ ततस्ते ब्राह्मणाः सर्वे धर्ममार्गप्रवर्त्तकाः॥ शूलारोपोस्य कर्त्तव्यः शीघ्र
मित्यूचिरे तदा॥ इति तद्वचनं श्रुत्वा धर्मज्ञः स नराधिपः॥ तस्मै चकार शीघ्रेण शूलारोपं प्रय
त्नतः॥ शैवदुःखप्रदो मर्त्यः शिवपूजापराङ्मुखः॥ आततायीति विज्ञेय स्तेनो हंतव्य एव सः॥ य
द्याततायिनं राजा न हन्याधर्मवित्तमः॥ यास्यवनारकं घोरं यावदस्ति दुतारकं॥ अतएव हि धर्म
ज्ञा लोभमोहविवर्जिताः॥ अनेवा नां प्रयत्नेन कुर्वंत्येव हि शासनं॥ तदा दुःखमयं भुक्त्वा त
था त्रापि समागतः॥ एतस्य बहुधा येपि भविष्यत्येव यातनाः॥ कल्पकोट्यायुतं घोरं रौरवं

समुपाश्रितः॥ ततो यं पुल्कसो भूत्वा चंडालोपि भविष्यति॥ आलोक्यैतान्संतप्तांस्ताड्यमाना
नयाधनैः॥ तप्तस्तंभान्समालिंग्य संस्थितानुखितान्सदा॥ उपहासाः कृता यैस्तैः शैवस्य च
लितः पथि॥ तेन दुःखमिदं भुक्त्वा तिष्ठंत्येते हि सर्वदा॥ भिंडिपालैस्ताड्यमानान्पश्यैतान्माव
धानतः॥ एतैस्तु शैवधिक्कारः कृतो मोहेन सादरं॥ संतप्तांगारशकटे स्थितातेनान्विलोकय
एतैर्गर्वेण न कृतं शैवानां वंदनं मुदा॥ विदार्यमाणान्क्रकचैः पश्यैतान्सावधानतः॥ अभ्युत्था
य नरा नैतैः कृतं शैवाय भक्तितः॥ पश्यैतान्श्लेष्मकुंडस्थानेते वै दुरात्मभिः॥ अन्यतुल्यतया
ज्ञातः शैवः शिवपरायणः॥ पश्यैतान्मलकुंडस्थानूर्ध्वपुंड्रधरान्मुदा॥ पश्यैतान्कालकुंडस्थं
स्तप्तचक्रांकितं मुदा॥ पश्यैतान्पूयकुंडस्थानेते वै दुरात्मभिः॥ शंकराय निवेद्यैव जलं पी
तं प्रमादतः॥ पश्यैतान्मलकुंडस्थानेते वै दुरात्मभिः॥ शिवानर्पितमेवान्नं भुक्तं यत्नपुरः
सरं॥ पश्यैतान्मूत्रकुंडस्थानेते वै दुरात्मभिः॥ शिवायानर्पितं दुग्धं सा जं पीतं प्रयत्नतः॥

पश्यैतान्मलकुंडस्थानेते वै दुरात्मभिः॥ शिवतीर्थमपीत्वैव भुक्तं यत्नपुरःसरं॥ पश्य संतप्तस
त्रायस्तंभमतिदारुणं॥ अनेन न कृतं पूर्वं शंकराय प्रदक्षिणा॥ पश्यैतान्दारिताननस्तप्तलोहस्तंभेम
यपदे शिवाय न कृता ह्येतैः साष्टांगा नतयो भ्रमात्॥ पश्यैतान्मलकुंडस्थान्मूत्रमज्जाक्षणान्
एतैः पुरा हि विभुक्तं सर्वदा सोमवासरे॥ मूत्रगर्तस्थितान्पश्य नित्यं संतप्तमूत्रपान्॥ त्रिपुंड्रधारणं त्य
क्त्वा भुक्तमेतैर्दुरात्मभिः॥ पश्यैतान्मलकुंडस्थान्समूत्रमलपूयपान्॥ शिवार्चनं विहायैव भुक्त
मेतैर्दुरात्मभिः॥ पश्यैतान्क्रिमिकुंडस्थान्क्रिमिभक्षणतत्परान्॥ रुद्राक्षधारणं त्यक्त्वा भुक्त
मेतैर्दुरात्मभिः॥ अग्निकुंडादिकुंडस्थान्शैवान्पश्य सादरं॥ शूलादिभिस्ताड्यमानान्सर्वदा दुः
खदुःखितान्॥ अशैवाः संति यावंतः पातालपृथिवीतले॥ तावंतो ह्यत्र तिष्ठंति नरकेषु विलोक
य॥ अशैवा बहवो ह्यस्मिन्भविष्यंति कलौ युगे॥ ते पातनीयाः पतनेन नरकेषु मया ध्रुवं। अन्यमास्म
मे ज्ञात्वा ये तिष्ठंति महेश्वरं॥ अशैवास्ते रतिरेया स्ते घोरान्नरकाश्रयाः। शिवार्चनं विहायान्नं

येर्चयंति नराधमाः॥ अशैवा॰॥ शिवस्यैवालयं यत्नेन येन पश्यंति सादरं॥ अशैवा॰॥ ये न कुर्वंति यत्नेन त्रिकालं शंकरार्चनं॥ अशैवा॰॥ शिवमेवातियत्नेन येन पश्यंति सादरं॥ अशैवा॰॥ ये न कुर्वंति यत्नेन न नमस्यंति ये सदा॥ अशै॰॥ शिवमेवातियत्नेन नाभिध्यायंति ये सदा॥ अशैवा॰॥ शिवमेवातियत्नेन न स्मरिष्यंति ये सदा॥ अशैवा॰॥ शिवस्यैव कथां शुद्धां येन शृण्वंति भक्तितः॥ अशैवा॰॥ शिवस्यैवातियत्नेन नाम नोच्चारयंति ये॥ अशैवा॰॥ शिवमेवातियत्नेन न स्तुवंति सदैव ये॥ अशैवा॰॥ ये न कुर्वंति सततं केवलं भस्मधारणं॥ अशैवा॰॥ ये न कुर्वंति सततं भस्मनोद्धूलनं मुदा॥ अशैवा॰॥ ये न कुर्वंति सततं गले रुद्राक्षधारणं॥ अशैवा॰॥ ये न कुर्वंति सततं रुद्राध्यायजपं सदा॥ अशैवा॰॥ ये न कुर्वंति सततं पंचाक्षरजपं मुदा॥ अशैवा॰॥ दत्तं जपं कृतं तस्मै न शिवायार्पयंति ये॥ अशैवा॰॥ न नर्तयंत्यहरहः शिवाग्रे नर्तनं मुदा॥ अशैवा॰॥ ये भुंजते फलान्नादि शंकरानर्पितं सदा॥ अशैवा॰॥ नित्यमव्यभिचारेण शिवभक्तानये मुदा॥

अशैवा॰॥ सर्वदा सर्वभावेन शिवनिष्ठा न ये मुदा॥ अशैवा॰॥ शिवनिर्णेजनजलं न पिबंतु मुदा तु ये अशैवा॰॥ न भोजयंति ये शैवं क्षीराज्यादिभिरादरात्॥ अशैवा॰॥ न तोषयंति ये शैवं स्वशक्त्या द्रव्यदानतः॥ अशैवा॰॥ अतुल्यं शिवक्षेत्रं येन्यक्षेत्रैः समं विदुः॥ अशैवा॰॥ शिवयात्रां विहायान्यां यात्रां कुर्वंति ये मुदा॥ अशैवा॰॥ शिवे कृतारणा ये न मनोवाक्कायकर्मभिः॥ अशैवास्ते इति ज्ञेयास्ते घोरनरकाश्रयाः॥ ईदृशानामशैवानां नरकेभ्यो न निर्गतिः॥ अनेकब्रह्मकल्पेषु गतेष्वपि न संशयः॥ येनैषां कोटिशो जाता ब्रह्मकल्पास्तथा यमी॥ न निर्गच्छंति घोरेभ्यो नरकेभ्यो न निर्गतिः॥ ध्वस्त एव घटो भूयो यदि कर्मक्षयो भवेत्॥ अशैवानां तदा ये भ्यो नरकेभ्यो न निर्गतिः॥ भस्मसाद्दग्धमेवान्नं यदि पुष्टिकरं भवेत्॥ अशैवानां॰॥ मृतो दग्धो भस्मभूतो यदि जीवति मानवः॥ अशैवानां॰॥ सुगंधं पुष्पमुत्कृष्टं गगने यदि जायते॥ अशैवा॰॥ यदि स्वभावतो वह्निर्भवत्यत्यंतशीतलः॥ अशैवानां॰॥ यदि स्वभावतः शैत्यं जलं त्यजति सर्वदा॥ अ॰

पश्चिमायां दिशि स्वच्छं यदि भानुरुदेष्यति॥ अशैवानां०॥ यद्यपं देवनिलयः सुमेरुर्दक्षिणादि
शि॥ अशैवा०॥ क्षीराब्धिप्रमुखाः सर्वे समुद्राः यदि संगताः। शैपैतालो यदि भूमौ स्याद्भूमिः पाता
लगा यदि॥ अशैवा०॥ जलं वह्निर्यदि भवेद्वह्निर्यदि जलं भवेत्॥ अशैवा०॥ यदि वा पुष्पवेत्तेजो य
द्याकाशो जलं भवेत्॥ अशैवा०॥ ५०॥ बहुनोक्तेन किं वाक्यमेकं सत्यमुदीर्यते॥ अशैवानां अघो
रेभ्यो नरकेभ्यो न निर्गतिः॥ अतः प्रयत्नेनो नित्यं कर्त्तव्यं शंकरार्चनं॥ शैवो भूत्वा शिवं नित्यं
भजनीयः प्रयत्नतः॥ आर्यावर्त्ते पुरा कश्चिद्द्विजो वेदांगपारगः॥ शिवकारणो नित्यं शिवपू
जापरायणः॥ रुद्राक्षमालाभरणो भस्मोद्धूलितविग्रहः॥ भस्मत्रिपुंड्रनिटिलः शिवध्यान
परास्थितिः॥ एतादृशं द्विजश्रेष्ठं कश्चित्षोडशवार्षिकः॥ वेदाध्ययनसंपन्नो ददर्श वनमध्य
गं॥ तदानीं तं द्विजं दृष्ट्वा शिवपूजारतं मुदा॥ प्रणम्य विनयाद्वाक्यमुवाच स कृतांजलिः॥ स्वा
मिन्सर्वेश्वरी विप्रेंद्र मोक्षोपायं वदस्व मे॥ प्रसन्नोऽस्मि कृपासिंधो शिक्षयस्व यथोचितं॥ इति त

द्वचनं श्रुत्वा शिवपूजां समाप्य सः॥ उवाच वचनं चारु सर्वलोकहितावहं॥ ब्राह्मण शृणु मद्वा
क्यमप्रमादेन सादरं॥ श्रुतिसिद्धं वदिष्येऽहं मोक्षोपायमनाकुलं॥ यामिनी पश्चिमे यामे कुरु शंकर
चिंतनं॥ ततः शौचादिकं कृत्वा कुरु स्नानं प्रयत्नतः॥ स्नानकाले महादेवं स्मरस्व भक्तितो द्विजः
परिधाय ततो वस्त्रं भस्मनोद्धूलनं कुरु॥ ततः शिरो ललाटादौ यथायं त्र्यं यथाक्रमं॥ त्रिपुं
ड्रधारणं श्रौतं कुरु केवलमादरात्॥ त्रिपुंड्रधारणात्पूर्वं तदनंतरमेव वा॥ विप्रमृच्चंदनादी
नि ललाटादौ न लापय॥ विप्र जाबालमार्गेण कुरु रुद्राक्षधारणं॥ ततः कुरु यथायोग्यं होम
माज्यादिसाधनैः॥ ततो यत्नेन विधिवन्महादेवार्चनं कुरु॥ महादेवस्य पूजायां सावधानः स
दा भवः॥ रुद्राध्यायेन सततमभिषेकं कुरु प्रभोः॥ बिल्वपत्रैर्महादेवं पूजयस्व तिभक्तितः॥
शंभोः पंचाक्षरेणैव बिल्वपत्रार्पणं कुरु॥ पंचाक्षरो महामंत्रः सर्वमंत्रशिरोमणिः॥ तेन सं
पूजितः शंभुर्भुक्तिं मुक्तिं प्रयच्छति॥ वैदिको यं महामंत्रस्ततो वैदिकपूजने॥ शिवप्रियक

रंयस्मात्तेनपूजयत्वंशंकरं॥ फलेनान्नेनवाशंभोः कुरुनैवेद्यमादरात्॥ प्रदक्षिणविधानेनकुरुस
म्यक्प्रदक्षिणाः॥ साष्टांगान्कुरुयत्नेनप्रणामान्श्रीमहेशितुः॥ शंकराग्रेप्रयत्नेनकुरुनृत्तेन
मादरात्॥ पश्यनित्यंप्रयत्नेनपूजितंसांबमीश्वरं॥ पिबयत्नेनसततंशिवनिर्णेजनोदकं॥
एवमेवप्रयत्नेनमध्याह्नेपिमहेश्वरं॥ बिल्वपत्रादिभिः सम्यक्पूजयस्वातियत्नतः॥ सायं
कालेपियत्नेनपूजयस्वैवमीश्वरं॥ निवेदयशंकरायान्नंततोभुंक्ष्वयथोचितं॥ शृणुयत्नेनस
ततं॥ महादेवकथाः शुभाः॥ निरंतरमतिप्रीत्याकुरुशैवाभिवादनं॥ स्वशक्त्यापुत्रपौत्राद्यैः
शैवानांपूजनंकुरु॥ दूरेपियदितिष्ठंतिशैवाः शंकरपूजकाः॥ तत्रापिगत्वायत्नेनकुरुशं
करपूजनं॥ कुरुसंलापमनिशंशांकरैः सहसर्वदा॥ मासंत्यजभ्रमेणापिद्विजशांकरस
न्निधिं॥ कुरुप्रीतिंप्रयत्नेनशांकरेष्वेवसादरं॥ सदाशिवकृतांशिक्षांमारसासीकुरुद्विज॥ शि
वबुद्धिंकुरुप्रीत्याशैवेषुसततंद्विज॥ सहसाशांकरास्तुभ्यंतथानोपदिशंतिते॥ तथापिशैव

वार्त्तायासैवपापापनोदिनी॥ शैवाः शंकरतुल्याश्चवस्तुतोदुर्लभाभुवि॥ तादृशान्सावधानेनपूज
यस्वसुभक्तितः॥ अशैवायत्रतिष्ठंतितत्रमावसमावस॥ अशैवसंगमोदुष्टोनरकावाससाध
नं॥ अशैवंपथिवान्यत्रकदाचिद्यदिपश्यति॥ तदातुभस्मनांगानिसंमृज्यार्कंविलोकय॥ काय
मुद्धूलनंकृत्वाकुरुशंकरपूजनं॥ प्रदक्षिणनमस्कारनृत्तेनापिकुरुप्रियात्॥ जपंवाक्षांति
त्यंरात्रावप्यतियत्नतः॥ शिवस्यसन्निधावेवशयनंकुरुसादरं॥ उद्धूलनंत्रिपुंड्रंचकुरुस्वैवशा
यनंकुरु॥ यज्ञोपवीतवन्नित्यंकुरुरुद्राक्षधारणं॥ उद्धूलनंविहायांबुतृषितोपिनसंपिब॥ उद्धूल
नंविहायांबुमामंभुंक्ष्वद्विजोत्तम॥ उद्धूलनंत्रिपुंड्रंचतथारुद्राक्षधारणं॥ किंगार्वणंचविधिव
त्कृत्वाद्विजजलंपिब॥ सर्वदासावधानेनकुरुशंकरचिंतनं॥ कर्मणामनसावाचाशंकरश
रणंव्रज॥ शंकरस्त्राणदोयस्तुमनोवाक्कायकर्मभिः॥ सतारत्येवसंसारमनायासेनसर्वथा॥
शंकरंशरणंगत्वासर्वदेवशिखामणिं॥ संसारसागरेघोरेनपतिष्यतिमानवाः॥ संसारतर

शि०स्य
२५१

णोपायः श्रीमहादेवपूजनं॥ न तस्मादधिकोपायः सत्यं सत्यं वदाम्यहं॥ मोक्षमिच्छति यो मर्त्यः शंक
राभ्यर्चनं विना॥ समर्थ इति विज्ञेयः स तु संबाध्य एव न॥ शंकराभ्यर्चनं नित्यं तत्तु सर्वश्रुतिश्रुतं॥
त्यागे रौरवे घोरे भवत्येव हि संस्थितिः॥ महादेवार्चनादेव मुक्तिः संप्राप्यते जनैः॥ बहवो मोक्ष
मापन्नाः पूर्वं शंकरपूजया॥ कुरु नित्यं महादेवे भक्तिं त्वमभिचारिणी॥ शिवमव्यभिचारेण पू
जयस्व प्रयत्नतः॥ शिवमव्यभिचारेण योन्वहं पूजयिष्यति॥ न तस्य नरकावासः सर्वथैव नास्ति
हि श्रुतिः॥ यथा पतिव्रता नारी पतिसेवापरा तथा॥ शिवमेव भजप्रीत्या मनोवाक्कायकर्मभिः
महत्यपि घोरायां मा विस्मर महेश्वरं॥ नायास्यत्यापदं पुंसां शंकरस्मरणे कृते। शंकरस्मर
णादेव महापातककोटयः॥ विनश्यंति क्षणार्द्धेन सत्यमित्यस्ति हि श्रुतिः॥ कुरु सर्वप्रयत्नेन रुद्रा
क्षस्य संग्रहं॥ क्षणार्धमपि न स्थेयं भस्मयोगं विना द्विज॥ स्वेदादिना कदाचिच्च भस्म निर्याति
तत्क्षणे॥ कुरु जाबालविधिना भस्मनोद्धूलनं द्विज॥ सितकेवलभस्मांगं त्रिपुंड्राकितमस्तकं॥

श्रीः॥
२५१

शिवलिंगैकनिरतं नमंति खलु देवताः॥ शिवमव्यभिचारेण शरणं यदि यास्यसि। तदा त्वं सुरमु
निभिः पूजनीयो भविष्यसि॥ भूरिपुण्यवतां पुंसां शिव एवेष्टदैवतं॥ अन्येषामल्पपुण्यानां दैवतं सं
छि वेतरः॥ शिवैकदेवा ये तेषां शिवो भवति सर्वदा॥ शिवान्यदेवा ये तेषामशिवं सर्वदा भवेत्॥ म
न्दभाग्यपापिष्ठाः शिवान्यमशिवार्थिभिः॥ तेषां तु घोरसंसारान्निर्गमो न कदाचन॥ अ
शिवं यस्य निटिले तस्यैवाशिवदैवतं। शिवं यस्य ललाटेस्ति तस्य स्याद्दैवतं शिवः॥ भज त्वमपि य
त्नेन शंकरं लोकशंकरं॥ नित्यमव्यभिचारेण शरणं याहि शंकरं॥ संसारतरणोपायः शंकरस्यैव
पूजनं॥ सत्यं सत्यमिदं सत्यमुद्धृत्य भुजमुच्यते॥ संसारसर्पदष्टस्य शिवपूजनमौषधं॥ तद
न्यदौषधं क्वापि नास्ति नास्त्येव सर्वथा॥ ये मग्नाः संति सततं घोरसंसारसागरे॥ तान्नहं प्रयत्ने
न नाराधि गिरिजापतिः॥ तत त्वं सर्वभावेन पूजयस्व महेश्वरं॥ संसारसागरात् घोराद्यदि सं
तर्तुमिच्छति॥ इत्युक्तं तद्वचः श्रुत्वा संतुष्टहृदयस्तदा। सर्वमन्यत्परित्यज्य शिवपूजापरोभवत्

शि०स्प
२६०

ततः स बालकस्तत्र बिल्वपत्रैर्मनोहरैः॥ समर्च्य महादेवमुवास प्रीतमानसः॥ उद्धूलनत्रिपुंड्रा
भ्यामलंकृततनुर्द्विजः॥ शिवपूजां प्रकुर्वाणः कृतार्थस्त्वममन्यत॥ अम्लानबिल्वैस्ततामंत्रै
रसैश्चातेर्महेश्वरं॥ पूजयामास यत्नेन प्रत्यहं मुदिताननः॥ आश्चर्यमतियत्नेन प्रणामान्स्व
चकार च॥ चकार नर्तनं नित्यं शंकराग्रे प्रयत्नतः॥ स शंकरैककारुण्यः सर्वदा शंकरार्चकः॥ शं
करं पूजयते नजहौ प्राणान्कदाचन॥ ततस्तस्मै महेशो न विमानं प्रेषितं मुदा॥ स विमानं समा
रुह्य गतः शंकरसंनिधिं॥ अनेन वह्निमार्गेण स गतः शैवपुंगवः॥ तदा तस्मै यथा पूजा कृता श
त्रुनुरोधतः॥ ततः स भास्मवान्चैवं प्रहसन्नुन्नताननः॥ शिवपूजापुण्यपुंजो मंजुलं मंजुवा
ग्मुदा॥ यमकिंक्रियते नित्यं सर्वदा सावधानतः॥ अशैवास्त्वतन्त्रा स्त्रोधैः शास्यंते खलु सत्वरं॥ श्री:॥ २६०
अशैवेषु त्वया काल कृपा न क्रियते खलु॥ अशैवाः खलु यात्यंते नरकेषु यथायथं॥ अशैवान
ग्निकुंडेषु पातयस्व प्रयत्नतः॥ विदारयस्व क्रकचैरग्नितप्तैरशंकरान्॥ इत्युक्त्वा स ययौ शैवः

शिवाराधनतत्परः॥ इंद्रोपेंद्रादिभिः सम्यक्पूजितः शंकरालयं॥ यमालयाधिकारोयं यदा सां
बान्महेश्वरात् तदैवमाह वचनं शंकरः सुरसत्तमः॥ श्रीमहादेव उवाच॥ रे रे यम त्वया नित्यं यत्कर्त
व्यं तदुच्यते॥ शृणुष्व सावधानेन चित्तमन्यत्र माकुरु॥ ये मामव्यभिचारेण पूजयिष्यंति शंकरं॥ ता
न्वर्जयानिशं भक्त्या पुष्पबिल्वदलादिभिः॥ अनन्यचिंताः सततं ये मद्भक्तिं प्रकुर्वते॥ तान्व०
ये मामनन्याः सततं प्रणमंति स्तुवंति च॥ तान्व०॥ ये मदर्पितकर्माणो मदेकशरणाः सदा
तान्व०॥ ये कुर्वंति प्रयत्नेन भस्मनोद्धूलनं सदा॥ तान्व०॥ त्रिपुंड्रमाचनिटिला रुद्राक्षाभर
णाश्रये॥ तान्व०॥ रुद्राध्यायजपासक्ताः पंचाक्षरपराश्रये॥ तान्व०॥ नित्यं शिवकथासक्ताः
शिवनामपराश्रये॥ तान्व०॥ शिवलिंगं समभ्यर्च्य ये भिनंदंति सर्वदा॥ तान्व०॥ ये मां
सर्वोत्तमत्वेन ज्ञात्वा तिष्ठंति सर्वदा॥ तान्वर्जयानिशं भक्त्या पुष्पबिल्वदलादिभिः॥ उक्तलक्ष
णासंपन्नाः शैवा इत्यवगम्यतां॥ एतादृशानां शैवानां पूजया पूजितोस्म्यहं॥ उक्तलक्षणसं

पन्नाः शैवा इत्यवगम्यते॥ एतादृशानां शैवानां मां विष्यंति ये जनाः॥ अहं वासव ततस्तेषां कुरु
शासनमन्वहं॥ अहो याघोरनरकेष्वशेषेषु प्रपतंतु नः॥ पातनीयाः सर्वथैव मामाकुरु कृपां यम॥
अहो सुप्रमादाद्दा कृपां यदि करिष्यसि॥ तदातु पातयिष्यामि सवतां नारकेष्वहं॥ पशिवद्रोहिणस्ते
तु शासनीयास्त्वया नहं॥ अन्यथा त्वधिकारोयं मन्यस्मदीयते मया॥ इत्युक्तोहं महेशान प्रेषितो
स्मि शचीपते॥ तदाप्रभृति यत्नेन मयात्र स्थीयते ध्रुवं॥ सदाशिव०॥ इति कालवचः श्रुत्वा श
चीनाथ स्तदाशिवे॥ रोमांचिततनुर्जातो बाष्पपूरितलोचनः॥ एतस्मिन्नंतरे देवी ब्रह्मलोक
नि यासिनः॥ कोटिशः पतिता विप्रा निष्प्रभा नरकार्णवे॥ नरके पतितान् दृष्ट्वा तानिंद्रो यम
मब्रवीत्॥ कथमानो गलद्बाष्पो यमं दृष्ट्वा क्षयानकं॥ इंद्र०॥ यताकेकिं कृतं कर्म सिमं कुत्र पुराय
म॥ कीदृग्विधेषु नरकेषु तेस्थास्यंति तद्वद॥ ६००॥ न भूलोकात्समायाता मेतः किंतूर्ध्वलोक
तः॥ समागतमतः कालकिमेतन्नाद्भुतं वद॥ यम०॥ इंद्र वच्म्यद्भुतं वृत्तं॥ एतांस्त्वं शृणु सादरं

यदृत्तांतस्य कथनं श्रवणं चाभयप्रदं॥ पितृकुल समुत्पन्नः काश्यां श्राद्धविधानतः॥ काश्यां पिंडप्रदाने
नि चकार विधिपूर्वकं॥ एतेनैव पुण्येन ब्रह्मलोकमुपागतः॥ पुरा तु स्थितमत्रैव नरकेषु तिदुःखितः
एतत्कुल समुत्पन्नैः काश्यां स्थितायदायदा॥ चकारतर्पणं तेन प्रीत्या स्थितस्तदातदा॥ सुधापानेन
न यः प्रीतिर्देवानामभवत्सदा॥ ततोप्यत्युत्तमा प्रीतिरेतैराप्ता शचीपते॥ काश्यां सलिलदानेन
पितृतृप्तिर्यथा तथा॥ सुधापानेपि न प्रीतिः सत्यमत्र न संशयः॥ काश्यां स्थ सलिलं तोयं पितृभ्यो
दत्तमस्ति यत्॥ तत्पितृभ्यो मृतं भूत्वा संप्रीणयति तान् पितॄन्॥ मणिकर्णीजलं येन पितृभ्यो दत्त
मादरात्॥ तेन दत्तः सुधासिंधुः पितृभ्यो नात्र संशयः॥ पितॄनुद्दिश्य सततं लक्षीरान्नं मधु
संयुतं॥ मणिकर्ण्यां येन दत्तं स पितॄंस्तारयिष्यति॥ अमासोमवतीं प्राप्य काश्यां श्रीवृष
भध्वजे॥ यः करोति पितृश्राद्धं स पितॄंस्तारयिष्यति॥ अमां सोमवतीं प्राप्य पुरेतद्दशसंभ
वः॥ श्राद्धं चकारयत्तेन वृषभध्वजसन्निधौ॥ अथर्वशिरसां पतला श्राद्धकाले समाप्तिमान्

शि०स्य
२६२

ब्राह्मणान् श्रावयामास श्राद्धभोजनतत्परान्॥ पठन्नथर्वशिरसं यः कुर्याच्छ्राद्धमादरात्॥
सपितॄं स्तारयेत्सेव वाराणस्यां विशेषतः॥ तेन पुण्यप्रभावेन पुरैते मुदितानना:॥ तिरस्कृता मृ
तेनस्युः पूजिता ब्राह्मणेः पुरा॥ नित्यं ब्रह्मसभा सद्भिर्ब्राह्मणैरपि सम्पिताः॥ प्रतिसंतोषमासा
द्य ब्रह्मलोके स्थिता ध्रुवं॥ अद्यैव घटिकापूर्वं कारयामेत तु लोद्भवः॥ श्रीमदंतर्गृहे रम्ये चक्रेमू
त्रविसर्जनं॥ तेनैव पातकेनैते सर्वेन्त्विप तेऽधुना॥ प्रच्युता ब्रह्मसदसः पतितानरकार्णवे॥ अ
तः परं तप्तशस्त्रैरेते संताडितास्ततः॥ पतिष्यंत्यग्निकुंडेषु घोरेषु विविधेष्वपि॥ ततः पाप्म
क्वकुंडे पतिष्यंत्यतिदारुणे॥ ततः पुरीषकुंडेषु पतिष्यंत्यतिदारुणे॥ ततस्तप्तकटाहेषु तप्त
तैलाप्लुतेष्वपि॥ पतित्वा वह्निकुंडेषु पतिष्यंति ततः परं॥ ततस्त्वन्यायसस्तंभेष्वेते बद्धाः प्रयत्नतः॥
ताडनीया तप्तशस्त्रैराकल्पं नात्र संशयः॥ अनंतब्रह्मकल्पांते यतेनरक लोकतः॥ निर्ग
ता न भविष्यंति सत्यं सत्यं शचीपते॥ शिव०॥ इत्युक्त्वा प्रेरयामास सद्भूतांस्ताडनाय सः॥

श्रीः॥
२६२

ततस्तन्मायसास्त्वग्रे स्ताडिताः पितरः शिवे॥ पार्वत्युवाच॥ अंतर्गृहे कृतो येन मूत्रोत्सर्गो दुरात्मना॥
स गतः कुत्र तद्वार्तां वद शंभो दयानिधे॥ शिव०॥ अंतर्गृहे समोहेन कृत्वा मूत्रविसर्जनं॥ कृत्वा तो स्मी
ति दुःखेन रुरोद बहुधा शिवे॥ स यदांतर्गृहे मोहाच्चक्रे मूत्रविसर्जनं॥ तदांतं ददृशुर्विप्रा जाबालश्रु
तिपारगाः॥ दृष्ट्वा तमूचुः सर्वेपि क्रोधताम्रविलोचनः॥ पाषाणैस्ताडयंतस्ते तृणहस्ता वरानने॥ विप्रा॰
रे विप्र शंकरागारे श्रीमदंतर्गृहे त्वया॥ मूत्रोत्सर्गः कृतो मोहात्तेन दुःखमवाप्स्यसि॥ सर्वपापा वलिं
गानि श्रीमदंतर्गृहे सदा॥ तिष्ठंति तेषु पतितं मूत्रमेतत्त्वयाधुना॥ अनेन मूत्रपातेन यावत्तावत्तेक
मर्जितं॥ तावत्पापं ब्रह्महत्याकोटिभिश्च न वार्जितं॥ अनंतब्रह्महत्यादि पातकानि कदाचन॥ वि
नश्यंतीदृशं पापं कदापि न विनश्यति॥ अंतर्गृहस्य शास्तृ सुराणामपि दुर्लभः॥ ईदृशांतर्गृहेशो
यमूत्रोत्सर्गः कथं कृतः॥ यथा कथं विद्याचार्थमंतर्गृहप्रविश्यते॥ करोंकरानुग्रहान्तो वै
त्ववेशोप्यतिदुर्लभः॥ अंतर्गृहे पूजयंति देवाबिल्वदलादिभिः॥ स्तुवंत्यंतर्गृहे देवाः कृतांज

शि०रह
२६३

त्रिपुरः सदा॥ यस्मिन्नंतर्गृहे सांबो विश्वेशो देवता तमः॥ तमंतर्गृहमुत्सृज्य कोवानाराधयिष्य
ति॥ अंतर्गृहं पूजयंति ये बिल्वकुसुमादिभिः॥ तान्वंदयंति यत्नेन देवा विष्णुपुरोगमाः॥ अंतर्गृ
हस्य माहात्म्यं शिवो वेद नराधिप॥ तदन्ये नैव जानंति सत्यं सत्यं न संशयः॥ अनंतशारेवोवे
दो वा शेषो वा मुनयोथवा॥ अंतर्गृहस्य माहात्म्यं न जानंत्येव वस्तुतः॥ एतादृशे शिवागारे श्री
मदंतर्गृहे त्वया॥ कथं कृतं दुराचार मूत्रस्योत्सर्जनं वद॥ न त्वदन्यो महापापी पापराशिस्त्व
मीदृशः॥ तवेदृशस्य दुष्टस्य मुक्तिरस्ति दुर्लभा॥ नरकेषु पतिष्यंति पितरस्तव सर्वथा॥ तवा
पि यातना घोरा भविष्यति न संशयः॥ तव तु ब्रह्मकल्पांतेप्यनल्पा यातना द्विज॥ भविष्यंति
न संदेहो वेदा एवात्र साक्षिणः॥ यद्यत्रैतत्तनुत्यागस्तदा भैरवयातना॥ अनंतकल्पपर्यंतं भ
विष्यति न संशयः॥ अन्यत्रापि तनुत्यागे घोरा तेयमयमयातना॥ अनेककल्पपर्यंतं भविष्य
ति न संशयः॥ पितृभिः सह दुःखानि यमलोके त्वया द्विज॥ भोक्तव्यान्यतिघोराणि न तस्मात्र श्रीः॥
२६३

च्युतिस्तव॥ तपोभिरुग्रैर्दानैर्वा यागैर्वा बहुदक्षिणैः॥ त्वत्कृतस्यास्य पापस्य विनाशो न भविष्यति
संततं मूत्रकुंडेषु तव वासो भविष्यति॥ ततः पुरीषकुंडेषु वासस्तव भविष्यति॥ संततं लोहस्तंभ
ये बध्वा संततं शृंखलैः॥ भवंतं ताडयिष्यंति यमदूताः शरोत्करैः॥ ततस्तप्तायसैः पिंडैर्भवं
तं पापकृत्तमं॥ ताडयित्वा तमशास्त्रैस्ताडयिष्यंति संततं॥ शिव उ०॥ इत्युक्त्वा ते ततो विश्रामतस्थि
पित्वा तु तं द्विजा॥ यमपुर्यां तथार्थमुद्युक्ता मन्त्रामस्मतिपूर्वकं॥ ततः स भर्त्सितो विप्रो बहुभिर्निर्दि
तो मुहुः॥ जहौ काशीमिमां पुण्यां शिवे सर्वश्रुतिश्रुतां॥ ततः सदुःखितो विप्रः काश्यां क्षुत्क्षा
तृषातुरः॥ जहौ प्राणांस्ततो नीतः सदुष्टो यमकिंकरैः॥ ततः स पातितो विप्रो यमाग्रे क्रूरशासनैः॥
तं दृष्ट्वा प्राह शमनश्चित्रगुप्तं विशारदं॥ यम उ०॥ चित्रगुप्तायमानीतो मदीयैः किंकरैरिह॥ अ
नेन किं कृतं कर्म तद्वद त्वं यथार्थतः॥ इत्युक्तश्चित्रगुप्तोपि यमेन यममाह तं॥ तत्कृतं दुष्कृतं कर्म
विचार्याद्रपूर्वकं॥ चित्रगुप्त उ०॥ अयं काश्यां शिवागारे श्रीमदंतर्गृहे यम॥ त्रिमासान्मूत्रविसृ
ज्यादो ततः काशीबहिर्गतः॥ काश्यामंतर्गृहे येन कृतं मूत्रविसर्जनं॥ तेन घोराणि दुःखा

निश्चायूद्यानिन संशयः॥ यमस्तमतिवेगेन ताडयित्वायसैः शरैः॥ श्रांतो भटानुवाचेदं ताडयं त्विति
सत्वरं त्वौ॥ ततस्तु ते यमभटा यमेनेशीरिता द्विजे॥ तं द्विजं ताडयामासुस्तप्तमात्रैरतिदारुणैः॥ त
तः स पातितो विप्रस्तप्तमूत्रह्रदे भटैः॥ ततः स पातितो विप्रो वह्नितप्तमलह्रदे॥ प्रतप्तलोहस्तं
भाग्रे संबद्धस्तप्तशृंखलैः॥ ताडितस्तमरास्त्रोपर्णिडिपालैश्च ताडितः॥ गमते लकुटोहेषु ता
तितः स ततो भटैः॥ प्रज्वलद्वह्निकुंडेषु पतितः स ततः परं॥ एवं प्राप्य स्थितो विप्रः पितृभिः स
ह यातनां॥ अनंतदुःखदां देवि पुनरावृत्तिदुर्लभां॥ ये काश्यां मामनभ्यर्च्य स्थिता काश्यां ब
हिर्मृताः॥ येषामपि भवत्येवं घोरा नारकयातना॥ ये काश्यां मत्कथां त्यक्त्वा स्थिता काश्यां ब
हिर्मृताः॥ तेषां०॥ काश्यां मन्मात्रवायेतु भक्त्या नाराधयंति मां॥ तेषां०॥ विभूतिधारणादीनि
त्यक्त्वा तिष्ठंति ये नराः॥ तेषां०॥ सोमवारव्रतं शैवं न करिष्यंति ये जडाः॥ तेषां०॥ एवं यमभ
टैः क्रूरैः शास्यमाने द्विजाधमे॥ तं दृष्ट्वा प्राह वचनं शचीपतिरकल्मषः॥ इंद्र०॥ यमदमेवंते

ते कार्यमन्यत्कार्यं न किंचन॥ कार्यांतरं यदि भवेत्तद्दस्व दायुना॥ यम०॥ अशैवशिक्षणादन्य
दत्र नास्ति प्रयोजनं॥ अशैवान्यतितान्यस्य नरकेषु यथाक्रमं॥ यावद्दुःखमिह प्राप्य मनुद्धूलितं
भस्मना॥ तावद्दुःखं ब्रह्महत्याकोटिभिश्च न लभ्यते॥ यावद्दुःखमिह प्राप्यं त्यक्तभस्मत्रिपुंड्रकैः॥
ताव०॥ यावद्दुःखमिह प्राप्यं त्यक्तरुद्राक्षधारणैः॥ ताव०॥ यावद्दुःखमिह प्राप्यं त्यक्तशंकर
पूजनैः॥ ताव०॥ यावद्दुःखमिह प्राप्यं शिवानुत्कर्षवादिभिः॥ ताव०॥ यावद्दुःखमिह प्राप्यं
शैवदुःखप्रदैनरैः॥ यावद्दुःखं०॥ त्रिपुंड्रोद्धूलनादीनि न करिष्यंति ये द्विजाः॥ तेषामघोरनरकेष्व
शेषेष्वन्वहं स्थितिः॥ इदं विचार्य बहवः कुर्वंत्युद्धूलनादिकं॥ उद्धूलनादिसंसक्तानपरः स्पृशते
व यातना॥ यस्य भाले महद्भाग्याद्भस्मरेखा विराजितं॥ स घोरतरसंसारं तरिष्यत्येव सर्वथा
मुक्तिकारणमित्याहुः केवलं भस्मधारणं॥ तत्रापि शिवभक्तिश्चेत्किं वक्तव्यमतः परं॥ भाग्ये
न भूषितं भूयाद्भाले केवलभस्मना॥ तस्यानुमीयते भाग्यं भालभासितभस्मना॥ किमत्र

बटुनोक्तेन सामेवं वचः शृणु॥ अशैवदुःखदानार्थं शिवेन प्रेरितोस्म्यहं॥ वैकुंठसत्यस्वर्गाये
प्यशैवानानयाम्यहं॥ पातयामि प्रयत्नेन नरकेषु यथेच्छया॥ भूपातालातलादिभ्योप्यशैवानान
याम्यहं॥ पातयामि०॥ श्वेतद्वीपादपि स्वच्छादशैवानानयाम्यहं॥ पात०॥ क्षीराब्धिप्रमुखाब्धि
भ्योप्यशैवानानयाम्यहं॥ पात०॥ हिमवत्पर्वतादिभ्योप्यशैवानानयाम्यहं॥ पात०॥ अशैवे
षु मुकुंदेपि पक्षपाती भवेद्यदि॥ मुकुंदमपि घोरेस्मिन्नरके पातयाम्यहं॥ अशैवमपि तूल
द्भः प्रलयाग्निरहं यमः॥ मत्कोपानलदग्धांगा नशैवान्यस्यसादरं॥ मत्कृतायातनासूये
नभविष्यति सार्वथा॥ अशैवेषु कृपालेशोप्यस्य मे न भविष्यति॥ अशैवमात्रदाहार्थं सृष्टो
हमतएव मे॥ अशैवदाहकः कालो यम इत्यांकुरास्तिकाः॥ अशैवाः संति यावंतस्तावंतः श
त्रवो मम॥ अतएव हि घोरेषु तिष्ठंति नरकेषु ते॥ अतएव शचीनाथ यदि ते नरकाद्भयं॥ तदा
भज स्वसततं देवदेवात्तमं शिवं॥ इदमत्तैव सततं विष्णुशंकरपूजनं॥ करोति सावधानेन बिल्व

पत्रादि साधनैः॥ ब्रह्मापि प्रत्यहं सांबं शिवलिंगस्वरूपिणं॥ पूजयत्यतियत्नेन यातनाभीस
रादरात्॥ कश्यपात्रिवशिष्ठाद्या ऋषयः शैवपुंगवाः॥ पूजयंति महादेवं सावधानेन सर्वदा॥
गंधर्वोरगयक्षाद्याः सर्वेपि गिरिजापतिं॥ पूजयंति प्रयत्नेन प्रत्यहं विधिपूर्वकं॥ ७००॥
शिव०॥ इत्युक्तः सशचीनाथो यमं संपूज्य सादरं॥ यमाज्ञयास्वर्गलोकं सगुरुः सानुगोययो॥
यमोक्तं प्रतिसंधाय विस्मितः सशचीपतिः॥ तदाप्रभृति यत्नेन शिवपूजापरोभवत्॥ बृह
स्पतिश्च यत्नेन शिवलिंगस्वरूपिणं॥ मामर्च्य प्रत्यहं रहे बिल्वपत्रादि साधनैः पुराविप्र
सती काचीदार्याव्रते स्थितानिशि॥ कामातुरं पतिं प्राह स्वयं मत्पूजने रता॥ विप्रसती०॥
बाल्येनाराधितः शंभुरज्ञानेन त्वयाधुना॥ कामातुरेण नाराधि भगवान्गिरिजापतिः॥
अधुना गानि सर्वाणि तिष्ठंति तपदूनि मे॥ अद्य वेद्मार्चितः शंभुर्वनीयः कदा त्वया॥
गत्वारण्ये बिल्वपत्रैः कोमलैर्बहुभिर्नवैः॥ कृत्वा पार्थिवलिंगानि पूजयस्व यथाविधि

कुशपुष्पैः काशपुष्पैः पालाशकुसुमैरपि॥ पूजयस्व महादेवं सर्वलोकाधिपं सदा॥ नीलोत्पलकृतां
मालां कृत्वा यत्नपुरःसरं॥ लिंगरूपाय सांबाय महेशाय समर्पय॥ नवबिल्वकृतां मालां तथा धत्तूरमा
लिकां॥ लिंगरूपाय सांबाय महेशाय समर्पय॥ पुण्ये वैशाखमासेऽस्मिन्मास्यरुणोदये॥
लालापूजय गौरीशं बहुभिर्बिल्वपल्लवैः॥ अस्मिन्मासि महेशाय जलधारां प्रकल्पय॥ शिवाल
यं जलैः शुद्धैः परिहरस्व सादरं॥ चंदनं देहि देवाय सकर्पूरं सुशीतलं॥ ततो नवैर्बिल्वपत्रैः पूजयस्व
सदाशिवं॥ धूपयस्व महादेवं गुग्गुलेन यथाविधि॥ दीपयस्व महादेवं दीपैः कर्पूरसंभवैः॥ दध्यन्ने
न महेशाय नैवेद्यं कल्पयादरात्॥ पुनर्धूपादिकं दत्वा चामरैर्वीजयेश्वरं॥ ततः शिवप्रसादार्थं
शैवान्यत्नपुरःसरं॥ भोजयस्वाज्यदध्यन्नैर्भक्तिश्रद्धासमन्वितः॥ एवमाराध्य याराध्यं महा
देवं कृपानिधिं॥ सुप्रसन्नो महादेवो भुक्तिं मुक्तिं प्रयच्छति॥ न यौवनं स्थिरं विद्धि त्वैश्वर्यमपि चं
चलं॥ इदमेवं विदित्वैव पूजयस्व महेश्वरं॥ अधुना यौवनं धैर्यं देवदेवा जमे शिवं॥ नोदेति भ

क्तिरमला भुक्तिमुक्तिफलप्रदा॥ अहो मोहस्य माहात्म्यमीदृशं दुरतिक्रमं॥ येन मोहेन विश्वेशपूज
नं विस्मृतं लयं॥ विश्वेशः करुणासिंधुः सर्वदेवशिवोमणिः॥ येन नाराध्यते नित्यं तस्य जन्म निर
र्थकं॥ विश्वेशपूजनं कर्तुं निर्मितं यत्करद्वयं॥ तेनैव नार्चितः शंभुस्तद्वृथा दग्धकाष्ठवत्॥ विश्वेश
पूजनं द्रष्टुं निर्मितं नयनद्वयं॥ तेन चेन्न क्षितो विश्वेशस्तद्वृथा नयनद्वयं॥ श्रोत्रे शिवकथां श्रोतुं
निर्मिते सादरं मुदा॥ ताभ्यां चेन्न श्रुता श्रोत्रे व्यर्थे नाशान्ति संशयः॥ शिवनामजपं कर्तुं स
ष्टा जिह्वा तया यदि॥ न जप्यते मनुः शैवः सा जिह्वा चर्मवद्वृथा॥ येन चित्तेन न ध्यातो भगवान्पा
र्वतीपतिः॥ मज्जितेपि तच्चित्तं न बाधयति किंवदा॥ दंडवत्प्रणिपत्येशं स्वतनुं सार्थकां कुरु॥
अन्यथा तनुरेषा ते संदग्धतनुवद्वृथा॥ प्रणमंति महादेवं दंडवद्ये यदा तदा॥ पतंति पापगिरयो
वज्रसंताडिता इव॥ नित्यं शिवशिवेत्येव शिवं यज शिवं जप॥ विहितं यच्छ्रुतं कर्म तत्कुरुष्व शिवा
र्पणं॥ परलोकस्य पाथेयं मोक्षोपायमनामयं॥ पुण्यसंचैकनिलयं शिवइत्यक्षरद्वयं॥

श्रीसदाशिव उवाच॥ इति तद्वचनं श्रुत्वा कथं ज्ञातमिदं त्वया। तद्वदस्वेति तामाह सा तमाह ततः शि
वे॥ विप्रसती उ०॥ पूर्वजन्मन्यहं विप्रकन्या विप्रस्य मेधसः। अस्मद्गृहप्रान्त्यदेशे च कश्चिद्बिल्वतरुः स्थि
तः॥ बिल्वाख्यात्तु जलं दत्तं कदाचित्यत्नतो मया॥ तेन पल्लविता वृक्षास्तद्बिल्वतरुपल्लवैः॥ मत्पिता
पूजयामास महादेवमुमापतिं॥ शिवं संछादयामास तद्बिल्वतरुपल्लवैः॥ तेन पुण्यप्रभावेन ज
न्मनामेशातत्रयं॥ मयापि ज्ञायते विद्धि मुक्त्युपायोपि तत्त्वतः॥ श्रीशि०उ०॥ इति तद्वचनं श्रुत्वा
त्यक्तास्मद्दर्शनं यथा॥ शिवार्चनपरो जातो मुक्तश्च तद्दिनं तां॥ मामुपाश्रित्य यो भक्त्या मामारा
धयति प्रिये॥ स मुक्तिं लभते नूनं सत्यं सत्यं न संशयः॥ शिवे मदर्चनप्रीतिर्महद्भाग्यफलं त
तः॥ मदर्चनं प्रयत्नेन कर्तव्यं विधिवत्सदा॥ तारकः सर्वलोकानामहमेव ततः सदा॥ पूजनीयः
प्रयत्नेन सर्वोपायैर्यथाविधि॥ सर्वेषामेव वेदानां सारभूतमिदं वचः॥ मदर्चनं सदा कार्यं मुधृत्य
भुजमुच्यते॥ मुक्तिदाताहमेवास्मि सर्वस्य जगतः शिवे॥ ततः सर्वं परित्यज्य पूजनीयोहमाम्बि

के॥ सर्वोत्तमः सर्ववंद्यः सर्वपूज्योहमम्बिके॥ अयमर्थस्तु विविधैर्वेदैरेवोच्यते ध्रुवं॥ सर्वभावेन
सततं पूजनीयोहमम्बिके॥ मदर्चनाद्भुक्तिमुक्ती संप्राप्य सत्यमुच्यते॥ संसारपाशनाशार्थं मामेव
मुनिपुंगवाः॥ पूजयंत्यतियत्नेन भस्मोद्धूलितविग्रहाः॥ विचार्य वेदवेदान्तानिदं निष्पादितं बु
धैः॥ शिव एव सदा ध्येयो मुक्तिकामैरिति ध्रुवं॥ मुक्तिस्तु सर्वथा नास्ति शंकराराधनं विना॥ सत्यं
सत्यं पुनः सत्यमिति वेदोपि वर्तते॥ अतोहं प्रयत्नेन पूजनीयोहमम्बिके॥ बिल्वपत्रादिभिः
सम्यक्चतुर्वर्गफलादिभिः॥ मदर्चनपरा धीरा मद्भक्तपरदेवताः॥ निर्दग्धकल्मषा देवि प्रविश
ति मयि ध्रुवं॥ विश्वाधिकोहमजरो निष्कलो निर्गुणोम्बिके॥ मयि प्रविष्टोपि भूयोन्यं न विशत्येव स
र्वथा॥ ये मामनन्यशरणाः सितभस्मभाला रुद्राक्षकंकणलसत्करदंडयुग्माः॥ संपूजयंत्यहरह
हः श्रुतितत्त्वभूतं तानेव घोरनरकादहमुद्धरिष्ये॥ १८॥ ॥ इति श्रीशिवरहस्ये सप्त
मांशे शिवगौरीसंवादो नामाष्टादशोध्यायः॥ १८॥ ॥ ४॥ ॥ ४॥ ॥ ४॥

श्रीसदाशिव उवाच ॥ शिवे दक्षिणकैलासो विलासस्याश्रयो मम ॥ स यथोत्तरकैलासस्तथैव सुख
दः सदा ॥ सुवर्णमुखरी नाम नदी तत्रास्ति शोभना ॥ यज्जलस्नानमात्रेण मुच्यंते सर्वकिल्बि
षैः ॥ तत्तीरे कोटिशः संति बिल्ववृक्षा मनोहराः ॥ अखंडबिल्वपत्राणि तेषु तिष्ठंति कोटिशः ॥
सुवर्णमुखरीतीरे कोटिशः संति शांकराः ॥ ते सर्वे नियताहारा भस्मोद्धूलितविग्रहाः ॥ त्रिपुंड्रम
वविलसद्भालाद्यंगाति शोभनाः ॥ रुद्राक्षमालाभरणा जटामंडलमंडिताः ॥ शिवपूजैकनिरता
निरीहा निर्मलाशयाः ॥ शिवनामैकनिरतास्त्यक्तभोगा निराकुलाः ॥ स्वप्नेप्यनन्यशरणा म
हेशपरदेवताः ॥ मन्नाममात्रपीयूषामोदकशरणाः सदा ॥ शिवलिंगार्चने नित्यं सर्वदा सक्तमा
नसाः ॥ ध्यायंति तं महादेवं मामनाद्यंतमव्ययं ॥ निष्कलं निर्गुणं शांतं शिवमक्षरमव्ययं ॥ सर्वा
धारमनाधारं विदित्वा मां व संस्थिताः ॥ तत्र त्यक्त्वा तनुं मर्त्यः कीटो वा मशको पि वा ॥ भुक्त्वा भोगा
न्यथाकामं मत्स्वरूपं प्रयांति वै ॥ तत्रास्ति पर्वतः कश्चित्स मदात्मक एव हि ॥ स तु लिंगमयो

यस्माल्लिंगाकारः स पर्वतः ॥ तत्पर्वतस्य विधिवद्दर्शनेनापि मासि वा ॥ कृत्वा प्रदक्षिणं सम्यग्ब्रह्महा
पि विमुच्यते ॥ कैलासनामकं लिंगं पश्चिमाभिमुखं सदा ॥ वर्णांतरं प्रतियुगे तस्य लिंगस्य जायते ॥ वि
ष्णुब्रह्मादयो देवाः सततं शिवपूजकाः ॥ तल्लिंगमतियत्नेन पूजयंति मुमुक्षवः ॥ तल्लिंगदर्शनात्स
द्यो नश्यत्यघकुलं शिवे ॥ तल्लिंगं सावधानेन पूजनीयं मुमुक्षुभिः ॥ सुवर्णमुखरीतीर्थे स्ना
त्वा सम्यग्यथाविधि ॥ अशेषपापनिर्मुक्ता भविष्यंति न संशयः ॥ स्नात्वा तत्र विधानेन पितॄ
न्संतर्प्य वारिणा ॥ अन्नादिभिश्च संतर्प्य सर्वपापैः प्रमुच्यते ॥ तत्तीरे श्राद्धकरणात्पितॄणां स्व
र्णबंधनात् ॥ मुच्यते मनुजः सद्यः पद्मपत्रमिवांभसा ॥ तत्र स्नात्वा विधानेन स्वशक्त्या शिव
योगिने ॥ देयं सुवर्णं रत्नेन मत्प्रीत्यर्थमतंद्रितैः ॥ भोजनीयः प्रयत्नेन शिवयोगी यथासुखं ॥
सदुग्धपरमान्नाद्यैर्यथेष्टं घृतमिश्रितैः ॥ तत्तु क्षेत्रं शिवक्षेत्रमत एव हि शांकराः ॥ भोजनी
याः प्रयत्नेन तोषणीया धनादिभिः ॥ एकस्मिन्भोजिते शैवे भोजिताः कोटिशो द्विजाः ॥ ततेः य

शैवस्तु सदा रा भुज्यते गिरिजे मया॥ परं तु श्रद्धया भक्त्या विनयेन विचक्षणैः॥ भोज्यते यदि शैवेंद्र
स्तदा तद्भुज्यते मते॥ शिवयोगिनि संतुष्टे संतुष्टोस्म्यहमंबिके॥ शिवयोगिस्वरूपेण संचराम्यहमे
व हि॥ शैवक्षेत्रेषु सर्वेषु पूज्या हि शिवयोगिनः॥ अहं तु पूजितः सत्यं शिवयोगिनि पूजिते॥ तत्राद्री
कृत्तिकायोगे पातायामष्टमीदिने॥ संपूज्य मां बिल्वपत्रैर्ब्रह्महापि विमुच्यते॥ वैशाखपौर्णमास्यां
यः संपूजयति तत्र मां॥ यदिपाताद्विमुक्तायां स मोक्षमधिगच्छति॥ यो मां बिल्वदलैस्तत्र कोमलैः
पूजयिष्यति॥ स सद्य एव संसारान्मुक्तो भवति सर्वथा॥ शेषः प्रत्यहमागत्य तत्र रत्नैर्मनोहरैः॥ त
देवलिंगममलं संपूजयति सादरं॥ अत्युत्तमैर्लक्षरत्नैः शेषः प्रत्यहमादरात्॥ समर्चयति तल्लिं
गं संपूजयति सादरं॥ तत्रैकश्चिद्द्विजो नित्यं नियमेनैव सादरं॥ तुंडनजलमानीय मुदा माम
भिषिंचति॥ ततः परं बिल्वपत्राण्यादाय चास्वतुंडतः॥ मामर्चयति यत्नेन पुष्पैर्नानाविधैरपि
अयं सदा समायाति मत्पूजार्थं मदद्विपः॥ ततः सर्वफणिराड्रत्नैः पूजां कृत्वा स गच्छति॥ तानि र

त्नानि दृष्ट्वायं हस्ती पाषाणशंकया॥ दूरीकरोति रत्नानि सकोपः सततं शिवे॥ एवं प्रत्यहमेवायं रत्ना
नि विमलान्यपि॥ दूरीकृतैर्वबिल्वैर्मां पूजयामास भक्तितः॥ तद्दूरीकृतरत्नानि दृष्ट्वा शेषः सविस्
मितः॥ केन दूरीकृतानीति दुःखं प्राप्नोत्यहर्निशं॥ अत्युत्तमानि रत्नानि समानीय मया मुदा॥
समर्पिते महालिंगे केन दूरीकृतान्यहो॥ शिवपूजापनयनात्पातकं यदुपार्ज्यते॥ तत्कृतादुः
खलेशोपि किं न तस्याभिजायते॥ इति कृत्वा महद्दुःखं रत्नैः संपूज्य मां पुनः॥ स याति नागकु
हरं नानानागविराजितं॥ एवमेव समागत्य पूजयित्वा पुनः पुनः॥ स यात्यायाति सततं पुनरा
यातियाति च॥ उभाभ्यां हस्तिनागाभ्यामेवमन्वहमादरात्॥ लिंगरूपे मयि प्रीत्या पूजां कृ
त्वा मुदा स्थितं॥ ततः कदाचित्स फणिः पूजां कृत्वा प्रयत्नतः॥ क्वायमायाति तं द्रष्टुं नून
मयेति संस्थितः॥ दृष्ट्वा महति यत्नेन शिवपूजाविनाशकं॥ विनाशयामि देवो वा नरो वासु
न संशयः॥ मयात्वयं तत्र यत्नेन रत्नैरन्वहमादरात्॥ पूज्यते शंकरस्तानि नातिष्ठत्यपशंकरे

शि०स्य २७०

इतिनिश्चित्य नागेंद्रः स्वविलेकोणे निलीयसः॥ स्थितः सदा द्विपः सोपि पूजार्थं समुपागतः॥ द्विपः
सतानि रत्नानि दूरीकृत्य ततः परं॥ बिल्वपत्रैः प्रसूनैश्च पूजयामास सादरं॥ द्विपस्तस्मिन्दिने
भूयो बिल्वपत्रार्थमादरात॥ संपूज्य नत्वा यत्नेन त्वरया बहिरागतः॥ बहिरागत्य रम्याणि बि
ल्वपत्राणि शोभने॥ गृहीत्वा पूजयामास सम्यग्भक्तिपुरःसरं॥ ततस्तं दंतिनं दृष्ट्वा नागः सत्व
रमुन्मुखः॥ तद्दंतितुंडद्वारेण शिरोमध्यं जगाम सः॥ ततस्तद्दंतिना दंती दारस्तंभे शिलामये
शिलः संघर्षयामास सक्रोधं क्रोधसंयुतः॥ ततः संघर्षणेनैव स्फुटिते तच्छिरस्तदा॥ नि
र्जगाम ततो भोगी मृतस्तच्छिरस्तदा॥ ततो विषार्दितो दंती मृतो भूमौ पपात च॥ पतिते दंतिव
र्येस्मिन्नागे च पृथिवीतले॥ प्रादुरास महादेवी तल्लिंगमध्यतः॥ स्तुतस्ताभ्यां ततो यत्ना श्रीः॥ २७०
च्छ्रीरुद्रेण यथाक्रमं॥ ततस्ताभ्यां प्रयत्नेन वृतोयं वर उत्तमः॥ उभयोरपि नामैतद्लिंगं प्रख्या
तिमेष्यतु॥ नाम्नानुवृत्तिरस्त्वीश पृथिव्यामावयोः सदा॥ मुक्तिस्तद्दर्शनादेव भविष्यत्यय

सर्वथा॥ इत्युक्तं तद्वचः श्रुत्वा वरो दत्तः सदाशिवे॥ तयोर्मुक्तिरभूद्देवि मत्साक्षात्कारतस्ततः॥
पार्वत्युवाच॥ महादेव गजस्यास्य भक्तिरेतादृशी त्वयि॥ कथं जाता भोगिनोपि तद्वदस्व महे
श्वर॥ अनेन जन्मनि घोरं यदि तप्तं तपस्तदा॥ त्वयि भक्तिर्महादेव भविष्यत्यन्यथा न तु॥ शरी
रं यस्य वा मे तस्यैव त्वयि शंकर॥ भक्तिर्भवति सा भक्तिर्मुक्तिदानन्यगा शुभा॥ येषां संसार
विच्छित्तिर्ये देहापगमे सति॥ त एव सर्वभावेन शरणं यांति शंकर॥ सालकंठ नीलकंठेति श्रीकंठे
ति वदंति ये॥ तेषां शरीरं चरमं सत्यमित्यस्ति हि श्रुतिः॥ विश्वाधिक महादेव विश्वेशेति व
दंति ये॥ तेषां०॥ देवतासार्वभौमेति शंकरेति वदंति ये॥ तेषां०॥ सर्वदेवाधिदेवेति महेशे
ति वदंति ये॥ तेषां०॥ सर्वोत्तमोत्तमानंत श्रीसर्वेति वदंति ये॥ तेषां०॥ विदारितनृसिंहेति
श्रीरुद्रेति वदंति ये॥ तेषां०॥ गरुडध्वजवंद्येति सर्वज्ञेति वदंति ये॥ तेषां०॥ विष्णुनेत्रार्चि
तांगुष्ठ महादेवेति वादिनः॥ जीवन्मुक्ता इति ज्ञेया सत्यमित्यस्ति हि श्रुतिः॥ अनन्यशर

णानि त्वं येर्चयंति महेश्वरं॥ तानहं पूजयामीति वेदोपि वदति स्वयं॥ अनन्याः शंकरं नित्यं येर्चयं
ति सुरेश्वरं॥ तेषां न गर्भ[illegible]वासादि दुःखानी स्यत्ति हि श्रुतिः॥ एवं सति द्विपो नित्यं बिल्वपत्रज
लादिभिः॥ करोति पूजनं नित्यं कथं त्वयि महेश्वरा॥ कोयं पूर्वभवे स्वामीन्किमनेन कृतं तपः॥
यच्छरीरस्य विगमे सद्यो मोक्षमवाप्स्यते॥ नागोप्ययं सदा भक्त्या रत्नैरस्तु तमेर्मुदा॥ पू
जयत्याईभावेन लिंगरूपे त्वयि प्रभो॥ एकैकस्य च रत्नस्य मौल्यमेव न विद्यते॥ तादृशानि स
मानीय करोति कथमर्चनं॥ एतत्सर्वं विशेषेण श्रोतुमिच्छामि वर्तते॥ वद सर्वज्ञ विश्वेश करु
णाकर शंकर॥ इत्युक्तं तद्वचः श्रुत्वा सर्वदेवशिखामणिः॥ उवाच वचनं चारु श्रोत्रानंदकरं परं

सदाशिव॥ हस्ती पूर्वभवे देवी ब्राह्मणो वेदपारगः॥ मलयात्तलदेशस्थो दरिद्राभ्याधिपी
डितः॥ अन्यार्थं शिवभूतायामनेनोपोषणं कृतं॥ कृतं जागरणं रात्रौ तेन यामचतुष्टयं॥
रात्रावन्यकृतां पूजां शिवलिंगे मदात्मके॥ ददर्शायमतिप्रीत्या दीपमालां च तत्कृतां॥ न

तः कदाचित्सर्पेण दष्टोभूत्स ततो मृतः॥ ततोयमभवद्दंती धर्मविक्रमदोषतः॥ पूजादि लोकिता
तेन रात्रौ भक्त्याप्यतो मम॥ तेन जातिस्मरो जातो द्विपजन्मन्यपि प्रिये॥ आबाल्यमतियत्नेन
मम पूजां करोत्ययं॥ कदाचिदपि नत्यक्तमनेन मम पूजनं॥ बिल्वपत्रैर्जलैः पुष्पैर्मामभ्यर्च्यान्वहं
ततः॥ जलं पिबति तन्माद्यं निवेद्यैव घयत्नतः॥ एतादृशं द्विपं दृष्ट्वा ब्रह्मविष्ण्वादयः सुराः॥
पूजयंत्यतियत्नेन नमंति च मुहुर्मुहुः॥ यादृशास्तादृशो वास्तु शंकरार्चनतत्परः॥ पूजनीयः प्र
यत्नेन सर्वथेत्यस्ति हि श्रुतिः॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चांडालएव वा॥ माननीयः पूजनी
यो मदर्चनपरायणः॥ भार्यापि यदि यत्नेन शिवपूजापरा तदा॥ तस्यां निष्ठुरमुक्तं तेन रौरवं या
ति सर्वथा॥ पुत्रोपि यदि यत्नेन मदर्चनपरस्तदा॥ तस्मिन्निष्ठुरमुक्तं तेन नारकं याति सर्वथा॥
अप्रमादेन सततं निष्ठा यस्य शिवार्चने॥ स पूजनीयो यत्नेन तस्मिन्नम्रः सदा भवेत॥ अतएव ग
जं सर्वे प्रणमंति सुराः सदा॥ बिल्वार्जनप्रियं नित्यं मदर्चनपरायणं॥ स सर्पोपि पुरा विप्रो वदन्ना

स्त्रिविरागादः॥ मत्पूजानिरतो नित्यं हिमवत्पर्वते स्थितः॥ स ददर्शाथ गंधर्वं शिवपूजापरायणं
सुरत्नैरुत्तमैर्नित्यं मामर्चयति सादरं॥ द्विजस्तमुग्रं गंधर्वं प्रणिपत्याभिपूज्य च॥ रत्नानि कुत्र
संतीति प्रपच्छ विनयान्वितः॥ ततस्तद्वचनं श्रुत्वा गंधर्वस्तमभाषत॥ विनयेन प्रणम्यैनं मदर्च
नपरायणं॥ गंधर्व उवाच॥ समुद्रः सहसंरत्नमेवह्यावर्तते द्विज॥ तेन दत्तानि रत्नानि दीयं
ते मया समन्वहं॥ रत्नैः प्रत्यहमभ्यर्च्य शंकरं लोकशंकरं॥ ततः परं जलादीनि गृह्यंते नियमान्म
या॥ रत्नैरभ्यर्चिते लिंगे सर्वपापैः प्रमुच्यते॥ रत्नपूजनमात्रेण मुक्ताश्च बहवः पुरा॥ भवत्यव
हि संतुष्टः शंकरो रत्नपूजया॥ संतुष्टः शंकरो मुक्तिं ह्यलभ्यैरवस्तुतः॥ नागलोकेपि रत्नानि
तिष्ठंत्यनुत्तमानि च॥ गच्छ पूजय यत्नेन पातालं नागजन्मना॥१०४॥ इत्युक्तः स तदा विप्र
स्त्यक्त्वा सद्यस्तनुं स्वकं॥ नागो बभूव नागः सन्स तु जातिस्मरोभवत्॥ तदाप्रभृति यत्नेन स ना
गोन्वहमादरात्॥ रत्नैरनुत्तमैः सम्यक्पूजयामास भक्तितः॥ एतावतोद्दष्टो देवी शिवपूजाप

रायणे॥ तन्नाम्नैव हि तल्लिंगं प्रख्यातं मुक्तिदायकं॥ पश्चिमाभिमुखं लिंगं कालहस्तीश्वरं मुदा॥ स्म
त्वापि सर्वपापेभ्यो मुक्तिर्भवति सर्वथा॥ पश्चिमाभिमुखं लिंगं शेषाकारमनुत्तमं॥ बिल्वप
त्रैः समभ्यर्च्य प्रयाति मम सन्निधिं॥ न दृष्टं येन तल्लिंगं तस्य जन्म निरर्थकं॥ नार्चितं येन तल्लिं
गं जीवन्नपि मृतो हि सः॥ द्रष्टव्योपि प्रयत्नेन कालहस्तीश्वरो मुदा॥ यष्टव्यो बिल्वपत्राद्यैः संसारा
यनाशकः॥ श्रीमद्दक्षिणकैलासे सर्वे ब्रह्मादयः सुराः॥ तिष्ठंति देवदेवेशं मामभ्यर्च्यान्वहं मुदा
नित्यं श्रीकालहस्तीशं येनुसेवितुमिच्छति॥ स मदीयो गणेंद्रो यो मम प्रियकरश्च सः॥ प्राणवि
श्लेषसमये कालहस्तीश्वरेति मां॥ यः स्मरिष्यति भाग्येन तस्मै मोक्षं ददाम्यहं॥ यं यं कामय
ते कामं प्राणविश्लेषक्षणे॥ तस्मिन्क्षेत्रवरे देवी तं तं कामं स विंदति॥ तन्मोक्षदं कामदं च तत्तु
क्षेत्रमनुत्तमं॥ अत एव हि तत्क्षेत्रं सेवनीयं प्रयत्नतः॥ पुरा कश्चिद्द्विजः स्नात्वा सुवर्णमुखरी
जले॥ पूजयामास यत्नेन कालहस्तीश्वरं मुदा॥ ततः प्रदक्षिणादीनि कृत्वा सुष्वाप चिंतया॥

शि०स्प
२७३

ततः स प्रोवाच भूदेवं नं तस्यचिंताविनाशकः॥ यत्त्वत्प्रश्नश्रवणादेव रोमांचस्ते भविष्यति॥ सुभगेतादृशं
वक्ष्ये शृणु स्वप्नप्रयत्नतः॥ शिव०॥ चिंतामाकुरु विप्रेंद्र क्षेत्रेस्मिन्कामदे मम॥ चिंतितार्थप्रदो
ऽहं निवसामि न संशयः॥ आदेहपातं यत्नेन कुरु मत्पूजनं सदा॥ तेनाहं सर्वथा कामान्पूरयि
ष्य एव संशयः॥ मामाश्रितस्य महादेवं सर्वाभीप्सितदायकं॥ न कोपि चिंतावशगो न जातो न भवि
ष्यति॥ तावद्दुःखानि चिंतापि यावन्मां नोपसेवते॥ मयि संसेविते नित्यं भवत्यानंद एव हि॥ अहं
त्वनन्यसदृशः सर्वदेवशिखामणिः॥ उपेंद्रेंद्रादयो देवाः सर्वेपि मम सेवकाः॥ मत्त एवाभवद्वि
ष्णुर्मत्त एवाभवद्विधिः॥ मत्त एव मदन्यच्च जगदासीच्चराचरं॥ चिंता न कार्या विप्रेंद्र तवाभीष्टं ददा
म्यहं॥ मद्भक्ताय सुशीलाय नादेयं मम वर्तते॥ द्विजोपेंद्रत्वमिंद्रत्वं ब्रह्मत्वं वापदित्वथा॥ प्रार्थ्यते
तन्मया तुभ्यं देयमेव न संशयः॥ किं चेदं कामिकक्षेत्रं मम प्रियकरं द्विज॥ अत्राभीष्टं ददाम्येव म
द्भक्ताय न संशयः॥ एतादृशीं स्वप्नवार्तां प्रातरुत्थाय यत्नतः॥ कथयामास शैवेभ्यो विनीतो

श्रीः॥
२७३

भक्तिपूर्वकं॥ ततस्ते स्वप्नवार्तां तां श्रुत्वा शैवोत्तमास्तदा॥ संतोषं परमं प्रापुरपूर्वस्वप्नवार्तया॥
तदाप्रभृति विप्रोसौ प्रयत्नेन मदर्चनं॥ कृत्वा कदाचिद्द्विजहौ प्राणान्मामनुसंस्मर॥ तदानीमेव
शैवाय सोहं प्रत्यक्षतां गतः॥ ततः प्रणम्य मां विप्रश्चकार स्तोत्रमादरात्॥ ततः स विप्रो विनय
नेत्रो संपूज्य मां शिवं॥ इदमेव वचः प्राह कृतांजलिपुटस्तदा॥ द्विज०॥ अनामयं पदं देहि म
ह्यं शंकर सर्वग॥ यत्प्राप्य न निवर्तंते कल्पांतेप्यक्षयं पदं॥ मया न याच्यते शंभो विष्णुत्वेते न किं
मम॥ विष्णोरपि यतो घोरो गर्भवासोखिलैः श्रुतः॥ संसारोपि महानेव विष्णुनाप्यनुभूयते॥
उत्पत्तिर्बहुधा जाता तस्य मत्स्यादियोनिषु॥ त्वया दत्तोस्ति वैकुंठः शिवभक्ताय विष्णवे॥ त्वयि भ
क्तिः कृता तेन तदर्थं पूर्वमीश्वर॥ अलब्ध्वान्यपरस्यासीत्तद्विष्णोः परमं पदं॥ नित्यं निष्कंटकं
राज्यं भाग्यवानभिवांछति॥ क्षुत्पीडितो दरिद्रस्तु कुत्सितान्नानि वांछति॥ अलब्ध्वान्यपदो वि
ष्णुस्तदा वैकुंठवांछया॥ त्वयि भक्तिं चकारातो वैकुंठं प्राप केशवः॥ मया वैकुंठलोकस्तु मनसा

शि०रह
२७४.

पि न गण्यते॥ तस्मात्त्वं महादेव देहि मह्यमनामयं॥ मया ब्रह्मत्वमिदं लब्धं तव सर्वत्र भो॥ न
तत्र वांछा स्वेऽपि शापेतमन्मनस्त्वया॥ इत्युक्तं तद्वचः श्रुत्वा शंकरस्य महात्मनः॥ तस्मै मुक्तिम
पादत्ता प्रीतिपूर्वकमादरात्॥ षष्ठ्यब्दसहस्राणि शंकरास्तत्र सर्वदा॥ अनन्यमनसः संति
मदर्चनपरायणाः॥ तेष्वेवमेव ब्रह्मादीन्कदाचिदपि शोभने॥ शैवा नगणयंत्येव मदर्चनप
रायणाः॥ अस्माभिरत्र मरणान्मुक्तिः प्राप्यैव सर्वथा॥ विष्णुब्रह्मादिदेवानां कदा मुक्ति
र्भविष्यति॥ संसारपाशसंबद्धा विष्णुब्रह्मादयः सुराः॥ तेषां तु ब्रह्मकल्पांते मुक्तिरीशप्रसा
दतः॥ अस्माभिरल्पकालेन शंकरार्चनपूर्वकं॥ श्रीमद्दक्षिणकैलासे तनुस्त्याज्यहमुक्तये॥ अस्मा
भिर्भारते वर्षे जन्म प्राप्तं तपस्यया॥ तत्राप्युत्तमक्षेत्रे शैवं प्राप्तमिदं महत्॥ अस्माभिः साव
धानेन प्राप्तोऽद्य लिंगविग्रहः॥ नित्यं श्रीकालहस्तीशः पूजनीयो यथाविधि॥ पश्चिमाभिमुखं
लिंगमिदमत्यंत दुर्लभं॥ एतस्य दर्शनं नास्ति विना बहुतपस्यया॥ पश्चिमाभिमुखं लिंगं यत्र

श्री:॥
२७४

न्यत्रापि तिष्ठति॥ तत्रापि मरणे मुक्तिर्भविष्यत्येव सर्वथा॥ सर्वेषां मुक्तिदानार्थमाविर्भूतोऽत्र शंकरः
महापद्यपि न त्याज्यमिदं क्षेत्रं शिवात्मकं॥ कालहस्तीश्वरं लिंगं बिल्वपत्रैर्जलाप्लुतैः॥ यः पूजय
ष्यति श्रीत्या न तस्य नरकाद्भयं॥ शंकरायात्र दुग्धान्नं शर्कराघृतसंयुतं॥ देयमस्यं तत्फलेन शिवप्री
त्यर्थमादरात्॥ यत्र कुत्रापि यत्नेन भोजिते शिवयोगिनि॥ तत्रापि शंकरप्रीतो भवत्यत्र तु किं पु
नः॥ यद्यत्र शंकरो भक्त्या पूज्यते शंकरार्चकैः॥ तदा तुष्टो भवत्येव सांबसर्वोत्तमः शिवः॥ अत्रा
ल्पमपि चेज्जप्तं यदानंत्याय कल्पते॥ अत्राल्पमपि चेद्दत्तं तदानंत्याय कल्पते॥ भूरिपुण्यप्रभा
वेन प्राप्यते क्षेत्रमीदृशं॥ अभिरतिपलेन स्थातव्यं शिवपूजकैः॥ इत्यन्योन्यं वदंति स्म मुनयो
ब्रह्मवादिनः॥ श्रीमद्दक्षिणकैलासे निवसंति मनोरमे॥ पुरा निःकल्मषो नाम मुनिर्महालि
गपूजकः॥ श्रीमद्दक्षिणकैलासे चकार वसतिं शिवा॥ तेन तप्तं तपो घोरं तेनैवातिप्रफुल्लतः
तेनैव तपसा देवाः क्षुब्धाः सर्वेऽपि शांकरी॥ भस्मनोद्धूल्य सर्वांगं समर्चन तत्परः॥ मामेव सत

तंप्रीत्या पूजयित्वा स्तुतिभिः शिवे॥ तं ददर्श महाशैवं विनीतेइति शंकरः॥ दृष्ट्वा तं पूजया मास बि
ल्वपत्रेण भस्मना॥ ततस्तमब्रवीद्विप्रो निष्कल्मषमनाकुलं॥ मुक्तिक्षेत्रोत्तमं क्षेत्रं किमस्तीति य
थार्थतः॥ ततो निष्कल्मषो विप्रो विनीतं तमभाषत॥ मुक्तिक्षेत्रोत्तमं क्षेत्रं काश्येव श्रुतिसंमता
मुक्तिक्षेत्रमिदं विप्र मुक्तिक्षेत्रोत्तमं तु न॥ मुक्तिक्षेत्रोत्तमं काशी नान्येति श्रुतिरस्ति हि॥ महत्त्वात्
जघानीया सा सर्वश्रुतिसंश्रुता॥ सा तु काश्येव नान्येति वेदाः संति सहस्रशः॥ व्याचष्टे तारकं
ब्रह्म यत्र सांबः सदाशिवः॥ तदेव मुक्तिक्षेत्रेषु श्रेष्ठमित्युच्यते बुधैः॥ इदं मुक्तिप्रदं क्षेत्रं का
शी संप्राप्ति साधनं॥ ततस्तद्देवहिक्षेत्रं मुक्तिक्षेत्रोत्तमोत्तमं॥ यत्र देवाधिदेवोस्ति विश्वेशो वि
श्वनायकः॥ ततः क्षेत्रोत्तमं नान्यत्क्षेत्रमित्यस्ति हि श्रुतिः॥ काश्यां विश्वेशरूपेण मुक्तिः पुं
जीकृता द्विज॥ ततस्तत्सदृशं क्षेत्रं नास्ति नास्तीत्यपि श्रुतिः॥ यत्र स्थितः पुल्कसोपि धिक्क
रोपि शचीपतिं॥ तत्तु काश्यभिधं क्षेत्रं तत्तु विश्वेश्वराश्रितं॥ यत्र विश्वेश्वरं लिंगं दृष्ट्वापि

मुनिपुंगव॥ न गर्भभाक् पुनः सत्यं सत्यं सत्यमिति श्रुतिः॥ तत्रास्ति मणिकर्ण्याख्यं कुंडं केशवनि
र्मितं॥ तत्रपीत्वा पयो भूयस्तन्यं यो न भविष्यति॥ मणिकर्ण्यां यः प्रविष्टः स प्रविष्टः शिवोदरे॥
शिवोदरे प्रविष्टो यः स पुनर्जन्मभाक् न॥ मणिकर्ण्यां सेवयस्तु नियमेन समन्वितः॥ स वस
त्यवकैलासे नानागणनिषेवितः॥ मणिकर्ण्युपविष्टेन सुखं यदनुभूयते॥ सुखं तु तादृशं विप्र
न कुत्राप्यनुभूयते॥ मणिकर्ण्यां नरः स्नात्वा दृष्ट्वा विश्वेश्वरं प्रभुं॥ स्ववंशकोटिसंयुक्तः प्रयाति
शिवमव्ययं॥ परं तु काशीक्षेत्रस्य प्राप्तिरत्यंतदुर्लभा॥ सा महेशप्रसादेन भवतीत्यनुशुश्रुम॥ तत
स्तत्प्राप्तिकामेन कार्यमत्र तपो मुदा॥ संतुष्टस्तपसा चेशो काशी प्राप्तिर्भविष्यति॥ इतितद्वचनं
श्रुत्वा तपश्चक्रे ततो द्विजः॥ तत्र दक्षिणकैलासे सर्वकामप्रदे शुभे॥ पुरा तत्र मम क्षेत्रे कश्चिद्भिल्लो
वनाश्रयः॥ पूजयामास यत्नान्मां बिल्वपत्रादिभिर्मुदा॥ प्रत्यहं मामनभ्यर्च्य न गृह्णाति जला
दिकं॥ करोति स ततं भक्त्या भस्मरुद्राक्षधारणं॥ अरण्ये प्रत्यहं तेन स्थीयते वनवासिना॥ तत्र

स्थित्वापि मामेव स्मृत्वा स्मृत्वा जिनेद्दति॥ समहं मां स मम रुमा स्वाद्यास्वाद्यभक्तितः॥ उपहारं
प्रयत्नेन कल्पयत्यन्वहं मुदा॥ कुसुमैर्बिल्वपत्रैश्च मुखमध्यस्थितैर्जलैः॥ मामर्चयति यत्नेन भि
ल्लो नियमपूर्वकं॥ तं दृष्ट्वा मुनयः सर्वे भिल्लं तादृशमन्वहं॥ दुःखिता एव तिष्ठंति मुखमध्यजलार्च
कं॥ उच्छिष्टोदकमानीय किं नित्यमभिषिंचति॥ मांसोपहारं शैवाय निवेदयति किं जडः॥ प्रत्य
हं नियमेनैव बिल्वपत्रैर्मनोहरैः॥ पूजयत्ययमीशानं शिवलिंगस्वरूपिणं॥ ईदृशो मुखमध्य
स्थैः शिवं समभिषिंचति॥ दुर्बुद्धिरीदृशो जातः कथमेतस्य संवेद॥ एवं न कार्यं भिल्लेति यद्यस्मा
भिरिहोच्यते॥ शरपाणिर्नियं क्रूरः सर्वानेव हनिष्यति॥ एवं स्थिता मुनिवराः प्रत्यहं दुःखिताः
शिवे॥ तत्र स्थितेषु तेष्वेवं नित्यं कृत्वा स संस्थितः॥ ततपोव्ययभीत्येनं न त्र्यंपति कदाचन॥ किं
वास्मिन्शिवभक्तत्वं दृष्ट्वा तत्रस्थिताः शिवे॥ सदाचारे दुराचारो नियमेन शिवार्चकः॥ प्र
जानीयादिति यत्नेन न तस्मिन्निष्ठुरं वदेत्॥ कदाचित्स वरो भिल्लो वनमध्यगतः शिवे॥ भिल्लोध

र्मी सुसंतप्तस्तृषितश्च बभूव सः॥ तस्यैव निकटे कुंडं शीतलोदकसंभृतं॥ स्थिते तथापि भिल्लेन नपीतं
शीतलं जलं॥ मया श्रीकालहस्तीशो बिल्वपत्रादिसाधनैः॥ नाराधितः प्रयत्नेन न नतश्च पुनः पु
नः॥ विभूतिर्न धृता शुद्धा सर्वपापप्रणोदिनी॥ शैवः पंचाक्षरः शुद्धो न जप्तः शिवसन्निधौ॥ ए
वं सति तृषार्तेन जलं पेयं कथं मया॥ तृषया यदि गच्छंति गच्छंत्वद्यासवो मम॥ तृषार्दितेन त्य
क्त्वा तनुरेषा तदा मम॥ सर्वथा नरकावासो न भविष्यति शाश्वतः॥ विभूतिधारणं त्यक्त्वा म
यैवं पीयते जलं॥ तदा तु नरकावासो भविष्यत्येव सर्वथा॥ २०॥ विभूतिधारणं त्यक्त्वा पी
तं केश्चित्पुरा जलं॥ ते दुःखमनुभुक्त्वैव स्थीयते नरकार्णवे॥ त्यक्त्वा शिवार्चनं केश्चित्पुरा पी
तं जलं ततः॥ तैरिदानीमपि ध्माते भुज्यते दुःखमायसे॥ पंचाक्षरजपं त्यक्त्वा भस्मनो धारणं
तथा॥ पंचाक्षरजपं त्यक्त्वा नपेयमुदकं मया॥ किमेतैर्मम कर्तव्यं प्राणैर्देहेन वा मम॥ मया
शिवार्चनादीनि त्यक्त्वा पेयं जलं कथं॥ एवमत्यंतयत्नेन शरीरं यदि रक्ष्यते॥ तदा किमिद

माकल्पं शरीरमेव विशिष्यति॥ श्लेष्मशोणितमूत्राद्यं पुरीषनिलयं सदा॥ शरीरमेतद्दुर्गंधि किमेतेन सु
खं मम॥ अंत्राण्यस्थिबद्धं समलमपायशतसंकुलं॥ क्षयिष्णु रोगसंबद्धं शरीरमेन रोचते॥ अनेता
नि शरीराणि लब्धान्येव पुरा मया॥ इदमप्यधुना त्याज्यं तृषार्तेन मया ध्रुवं॥ वस्त्राणि कतिनष्टा
नि कटिबद्धानि सादरं॥ तन्नाशेन यथा दुःखं तथेहापि न संशयः॥ मया पूर्वं स्थितं नूनं शंकरा
राधनं विना॥ अतः प्राप्तानि बहुधा शरीराणि मया पुरा॥ शिवपूजनमेवाद्य संसारच्छेदका
रणं॥ तथा सत्यद्यमनसा शंकरं पूजयाम्यहं॥ सर्वव्यापी सर्वभूतान्तरात्मा साक्षी चेता निर्गु
णश्चेश्वरश्च॥ सोमो नित्यो निर्विकारश्चिदात्मा नीलग्रीवः पातु मामादिदुःखात्॥ मायातीतो
मोहिताशेषलोकः सामाकारः सामवेदस्वरूपः॥ सर्वाशास्यः सर्वरूपो महेशो नीलग्रीवः पातु
मामादि०॥ व्यक्ताव्यक्तानादिकर्माभिगम्यो व्यक्ताव्यक्तानादिधर्माभिगम्यः॥ व्यक्ताव्यक्ताना
दिवेदाधिगम्यो नीलग्रीवः पातु०॥ यं वेदांता नैव जानंति शंभुं यस्मान्नित्यं वेदवाचो निवृत्ताः॥

यं ब्रह्मा नैव जानंति सोयं नीलग्रीवः पातु०॥ यत्संयोगादुद्भवः सृष्टिकर्तुर्यद्वामांगाज्जन्म संप्रापवि
ष्णुः॥ यः सर्वज्ञः सोयमाद्यंतशून्यो नीलग्रीवः०॥ यत्पादाग्राज्जज्ञिरे देववर्गा यन्निश्वासो वेदजातं
समस्तं॥ योपरेशः सोयमेवासमेतो नीलग्रीवः०॥ यं सर्वे शांतत्वतो वेदनिष्ठा विज्ञा यत्नं पूजयं
पूजयंत्यादरेण॥ सोयं सार्वः सर्ववेदांतवेद्यो नीलग्रीवः०॥ यस्याप्यागः स्पंदमात्रेण नित्यं ब्रह्मोपे
न्द्राद्यः कंपमानाः॥ दूरे तिष्ठंत्यन्वहं सोयमीशो नीलग्रीवः०॥ यत्पादाब्जं विष्णुरत्यंतभक्त्याभ्य
र्चयन्नेत्रं सम्यगुत्पाद्य रम्यं॥ स्वाभीष्टार्थं पूजयामास सोयं नीलग्रीवः०॥ यस्य स्मृत्वा सर्वपापौघ
नाशो यत्सज्जातो घोरसंसारनाशः॥ यस्य स्तुत्या मुक्तिरात्मैव सोयं नीलग्रीवः०॥ शिव उवाच॥
एवं स्तुत्वा स भिल्लो मामानंदाश्रुलसन्मुखः॥ दध्यौ देवाधिदेवं मामनंताश्रुतविग्रहं तदानी
मभवद्वृष्टिर्मंदारकुसुमान्विता॥ शरीरे सिक्तमभवत्तस्य दृष्ट्या दयान्विते॥ यदा वृष्टिरभूत्तस्य
स पिधाय मुखं तदा॥ स्थितामुखे जलस्यास्य प्रवेशो मा भवत्विति प्रिये॥ ततास्य तृट् तदा नष्टा जलपा

शि०स्प
२७८

ने विना प्रिये॥ जलं न पीतं भिल्लेन पात्रमानमपि ध्रुवं॥ ततः स बिल्वपत्राणि पुष्पाण्यत्युत्तमानि च॥ मां
सान्यपि विचित्राणि समादाय वनिर्गतः॥ ततः शनैः शनैर्भिल्लः कालहस्तीश्वरालयं॥ संप्राप्य पू
जाद्रव्याणि गृहीत्वा मुदिताननः॥ ततः स्नात्वा प्रयत्नेन सुवर्णमुखरीजले॥ भस्मनोद्धूलनं कृ
त्वा त्रिपुंड्रं च चकार सः॥ ततो गृहीत्वा पुष्पाणि बिल्वपत्राणि चादरात्॥ मांसं च जगृहे भिल्लो ज
लं च मुखतस्तदा॥ ततो मुखजलैः सम्यगभिषिच्य समाहितः॥ बिल्वपत्रैः सपुष्पैश्च चक्रे पूजां प्र
यत्नतः॥ ततो मांसानि सर्वाणि सुस्वादूनि प्रयत्नतः॥ मत्वा निवेदयामास पंचाक्षरपुरःसरं॥ प्र
दक्षिणनमस्कारानत्तेनं च चकार सः॥ ततः पंचाक्षरं शुद्धं जजाप प्रीतमानसः॥ एतस्मिन्नंत
रे देवा ऋषयो ब्रह्मवादिनः॥ सायंप्रदोषपूजार्थं कोटिशः समुपागताः॥ तदा मया भिल्लभक्तिः
प्रख्यापनमनीषया॥ इष्टदेवालयस्यैव भ्रंशस्तेभ्यः प्रदर्शितः॥ भ्रश्यमानं ततो दृष्ट्वा देवालय
मनुत्तमं॥ ऋषयो निर्ययुः सर्वे विस्मितास्ते शिवालयात्॥ भ्रंशमानं तु तं दृष्ट्वा भिल्लो देवालयं

श्रीः॥
२७८

तदा विस्मितं चिंतयामास किं कर्तव्यमिति प्रिये॥ भ्रश्यमानस्तु पाषाणः शिवलिंगे पतिष्यति॥ तत्पा
तेनात्र हाघातः शिवलिंगे भविष्यति॥ जीवतात्वयमाचैतो मया द्रष्टुं न शक्यते॥ भ्रश्यमानाश्च पा
षाणा न धर्तव्या यतो दृढाः॥ शक्तिश्च मम नास्त्येव हस्तपाषाणधारणे॥ पतिष्यत्येव पाषाणाः शि
वलिंगोपरि ध्रुवं॥ तनुं वितानवत्कृत्वा शिवलिंगोपरि स्थिते॥ भ्रश्यमानस्तु पाषाणो मत्पृष्ठेन
पतिष्यति॥ यदि पाषाणभारेण मच्छरीरं पतिष्यति॥ तदा तु शिवलिंगाग्रे शरीरं मे पतिष्यति॥ तत
परं तु पाषाणा बहवोपि पतंतु ते॥ तथापि शिवलिंगस्य त्वाघातो न भविष्यति॥ येन केनापि रू
पेण शिवलिंगस्य सर्वथा॥ आघातो न यथात्र स्यात्तथा कार्यं प्रयत्नतः॥ बहिः पलाय्यगमने
रक्षितं यत्तनुर्भवेत्॥ किमस्ति फलमेतस्य शरीरस्य तु रक्षणे॥ देहरक्षणमात्रे तु पुरुषार्थो न
सर्वथा॥ येतत्संरक्षणं कर्तुं कोनु यत्नं करिष्यति॥ सुखलेशोपि नास्त्यत्र बहिश्चेद्गम्यते तदा॥
शिवलिंगाघातहेतुदर्शनेनकसुखं भवेत्॥ किं चात्र यदि भाग्येन शरीरं चेत्पतिष्यति॥ तदा मुक्तिरन

शि०र० २७१

याः साद्भविष्यतिमम ध्रुवं॥ यदिस्याच्छिवलिंगस्य सन्निधौ मरणं तदा॥ मुक्तिकांता करा क्रांता सद्य एव
भविष्यति॥ मरणं दुर्लभं पुंसां शिवलिंगस्य सन्निधौ॥ तत्रैव मरणं पुंसां संसारो न पुनर्ध्रुवं॥ शरीरं म
गस्वभावस्य शरीरस्यास्य रक्षणं॥ अस्मिन्काले कथं कार्यं परलोकार्थिनामपि॥ यदा मृत्युः सम
याति तदा रक्षणमस्य तु॥ कर्त्तुं न शक्यते नूनमुपायैः कोटिशः कृतैः॥ मृत्योरागमने कुत्र कर्त्त
व्यं स्यात्पलायनं॥ कृते पलायने तेन त्यजतेपि न सर्वथा॥ मृत्युंजयं विनान्यस्तु न मृत्युभयना
शकः॥ यस्य मृत्युभयं नास्ति स तु मृत्युंजयः स्मृतः॥ एकस्यैव महेशस्य मृत्योर्नास्ति भयं यतः
शिव एव हि देवेषु मृत्युंजय इति स्मृतः॥ मृत्युपाशवशाः सर्वे विष्णुब्रह्मादयः सुराः॥ ततस्तद
र्चनात्तेषां मृत्युभीतिर्न नश्यति॥ अतो मृत्युंजयस्यैव पूजनं मृत्युनाशकं॥ मृत्युंजयस्य पूजापि
कर्त्तव्या भक्तिपूर्वकं॥ बहिर्देहस्य रक्षार्थमिदानीं यदि गम्यते॥ तदा मृत्युंजये भक्तिर्मम कावा भ
विष्यति॥ मृत्युंजयोन्यभक्तोयं न मृत्युभयनाशकः॥ ततोन्यभक्तिस्त्याज्यैव श्रीमृत्युंजयपू

श्री०॥ २७१

जकैः॥ श्रीमृत्युंजयभक्तस्य मृत्युर्नास्त्येव सर्वथा॥ ततो मया प्रयत्नेन स्थातव्यं शिवसन्निधौ॥ इत्यु
क्त्वा स दृढो भिल्लः पुनः संपूज्यमानतथा॥ संगविता नवद्वारे शिवलिंगोपरि स्थितः॥ तदा नैवा महा
नासीत्पाषाणवशसंभवः॥ तदाप्यतिदृढो भिल्लो धैर्येणैव हि संस्थितः॥ तदानीं तादृशं दृष्ट्वा सर्वे ते
ऋषिपुंगवाः॥ अतिविस्मयमापन्नास्तुष्टुवुर्भिल्लमादरात्॥ धन्योसि कृतकृत्योसि कृतार्थोसि
न संशयः॥ ततः सदाशिवे भक्तिरीदृशी त्वयि राजते॥ भाग्यस्य तव नांतोस्ति सत्यं सत्यं न संशयः
यतः सदाशिवे०॥ तव धन्यतरो देहः सत्यं सत्यं न संशयः॥ यतः०॥ तवैव जीवनं धन्यं सत्यं०॥
यतः०॥ तवैव जन्म सफलं सत्यं०॥ यतः०॥ तवैव जननी धन्या०॥ यतः०॥ तवैव जनको धन्यो
यतः०॥ तवैव कुलमुत्कृष्टं०॥ यतः०॥ शक्तिस्त्वमानुषी सेयं यैषा यमेतदमानुषं॥ भक्तिरेतादृ
शी लोके न कुत्रापि श्रुता ध्रुवं॥ यस्यास्ति तादृशी भक्तिर्महादेवे सुरोत्तमे॥ तस्य हस्तगतैवास्ते
मुक्तिकांता न संशयः॥ त्वयेदं मानुषं रूपं धृतमस्ति शिवप्रिय॥ त्वं वा कश्चन देवोसि मुक्ति

कांतानसंशयः॥ देवेष्वपीदृशोभक्तोशंकरस्यजनार्दनः॥ शिवार्चनपरोजातस्तत्ववेत्तायतोहरिः॥
विदित्वातत्वतोविष्णुर्देवदेवंसदाशिवं॥पूजयामासबहुधातपश्चरणपूर्वकं॥ विष्णुःस्वनेत्रकमलं
समुत्पाद्यप्रयत्नतः॥ चकारमुदितोभक्त्याशिवपदांबुजार्चनं॥अनेककल्पपर्यंतंपुरानारायणः
स्वयं॥चक्रेशंकरमुद्दिश्यतपश्चर्यांप्रयत्नतः॥ सएवविष्णुःशैवेंद्रोगृहीत्वामानुषींतनुं॥ एवंशि
वार्चनपरस्तिष्ठत्यत्रनसंशयः॥कथमेतादृशंधैर्यंमनुष्यस्यभविष्यति॥पश्यत्स्वमानपाषाणे
ष्वप्यासीत्सुस्थिरमनः॥एवंस्तुत्वास्थिताःसर्वेभिल्लमेनंमुनीश्वराः॥भिल्लस्तुमन्मनोभूत्वा
मांध्यायन्नेवसंस्थितः॥ ततोमुनिवरैर्दृष्टोयथास्थानंशिवालयः॥ ततोबभूवविमलापुष्पवृ
ष्टिर्मनोहरा॥ततःसभिल्लःसंतुष्टःपुनरप्यर्च्यमांमुदा॥विस्मितोनिर्ययोमंदंमुहुर्मांसविलो
कयन्॥भिल्लंविलोक्यमुनयस्तमेवबहिरागतं॥पुष्पाद्यैःपूजयामासुर्विनयाननकंधराः॥त
तःसंपूज्यमांभक्त्याबिल्वपत्रादिसाधनैः॥जग्मुःस्वंस्वालयंसर्वेशंसंतस्तस्यविक्रमं॥एत

दृशास्तुमद्भक्ताःकोटिशःसंतिशोभने॥तस्मिन्नेवशिवक्षेत्रेमदर्चनपरायणः॥पार्वत्युवाच॥ कोयं
पूर्वभवेशंभोकुत्रवासंस्थितःपुरा॥कथमेतादृशीभक्तिःस्वतस्तस्यवदप्रभो॥ सदाशिवउवाच॥
अयंपूर्वभवेदेविकुक्कुटोमांसभक्षकः॥भिल्लेनकेनचित्सोपिपोषितोहिमवद्गिरौ॥सभिल्लःप्रत्यहं
धन्वीवनेहत्वामृगान्बहून्॥उत्तमंमांसमादायपचतिप्रीतिपूर्वकं॥ततोमंदाल्लमादायसघृतं
मांसमुत्तमं॥महेशंनिवेद्ययत्नेनस्वयमश्नातिसादरं॥महेशनिवेदितंमांसमन्यस्मैनददाति
सः॥स्वयमेवातियत्नेनप्राश्नातिप्रीतिपूर्वकं॥तद्भक्ष्यमाणमांसस्यकश्चिल्लेशःकदाचन॥प
पातभूमौतन्मांसंकुक्कुटेनहिभक्षितं॥ततःसभिल्लस्तंशीघ्रंजघानक्रोधसंकुलः॥ततः
सकुक्कुटःप्रापभिल्लजन्मवरसत्वरं॥भिल्लजन्मसमासाद्यसतुजातिस्मरोभवत्॥ततोबाल्यंस
मारभ्यशिवपूजापरोभवत्॥कुक्कुटस्थितापूर्वंमांसभक्षणवासना॥तयावासनयामांसं
संपादयतिसादरं॥तत्तुमांसंनिवेद्यैवभक्षयत्यन्वहंमुदा॥संपूज्यसादरंभक्त्यालिंगरूपि

शि०स्य
२८१

णमव्ययं॥ अतीतज्ञानदानेन जातोभिल्लोगिरौ द्रुते॥ तस्यनानागतज्ञानं तत्रकारणमुच्यते॥ मद्यमन्नेप्र
पत्नेननिवेद्याश्वतिर्यक्संसदा॥ सभूपालः सर्ववेत्ता भवत्येवहिसर्वथा॥ अतीतानागतज्ञानेभूप
लत्वंतथाश्नुते॥ जातिस्मरत्वंसौंदर्यमन्नैवेद्यस्यभक्षणात्॥ मन्नैवेद्यमनुच्छिष्टमन्यानुच्छिष्टमु
त्तमं॥ योश्नातुसतुसर्वज्ञः सभूपालोपिजायते॥ ३०॥ अन्योच्छिष्टंकुक्कुटेन मन्नैवेद्यंतुभक्षि
तं॥ तेनातीतज्ञानमासीन्मयिभक्तिश्चशाश्वती॥ यथाभक्त्यामुनिश्रेष्ठकल्पिताः साधुदृतयः॥ भ
भिल्लुतादृशीप्राप्तामन्नैवेद्यस्यभक्षणात्॥ ततःपरमधर्मिष्ठः सर्वभूतकृपालुकः॥ बभूवसर्ववे
त्ताचसर्वसौभाग्यसंयुतः॥ स्वर्गलोकादिलोकेषुसंचचारनराधिप॥ विष्णुब्रह्मादिभिर्नित्यंपूजि
तश्चवासवः॥ राज्याधिपत्यंसंप्राप्यसायंप्रत्यहमादरात्॥ रत्नैर्लक्षमितैर्नित्यंचकारममपूजनं श्री:॥
अष्टलक्षमितैर्नित्यंस्वर्णपुष्पैश्चसादरं॥ पूजयामासभक्त्यायमामनाद्यंतमव्ययं॥ दीपांल्लक्षा २८१
वधिप्रीत्याकल्पगोघृतैः प्रीतान्॥ ततोदक्षिणकैलासेददातिमत्समन्निशांतथाक्षपूर्वदीपकान्

एवमत्यंतयत्नेनमदर्चनपरायणः॥ कृत्वाराज्यंततःपुत्रेराज्यंसर्वंन्यवेदयत्॥ ततोदक्षिणकैलासेनित्यं
कृत्वामदर्चनं॥ बहुकालमुवासायंततस्तत्रतनुंजहौ॥ ततस्तस्मैमयादत्तोमोक्षोपिवरवर्णिनि॥ मु
क्तेभिल्लेस्तथान्येपिमुक्तास्तत्रमदर्चकाः॥ विश्वस्यमांप्रयत्नेनयस्तुसंपूजयिष्यति॥ सभुक्त्वाराज्य
मनिशंमत्तेमुक्तिंप्रयास्यति॥ राज्यप्रदोहंविश्वस्याप्यन्वहंपूजितोबिके॥ मुक्तिदश्चनसंदेहः सत्यंसत्यं
नसंशयः॥ शरण्योहंवेदवेद्योभुक्तिमुक्तिप्रदायकः॥ नमदन्योमुक्तिदातामुक्तिदाताचसर्वदा॥ म
दन्यावैनसंसक्ताः प्रतिजन्मनिदुर्भगाः॥ भविष्यंतिभ्रष्टपुण्यानानाकुत्सितयोनिजाः॥ विश्व
स्यमांप्रयत्नेनसर्वदामामुपासते॥ भूरिभाग्याश्रितामर्त्यास्तदन्यान्यमुपासते॥ यस्यानुग्रहमि
च्छामितस्मैराज्यंददाम्यहं॥ मोक्षमंतेप्रयच्छामिप्रतिज्ञेयंममप्रिये॥ भुक्तिमुक्तिप्रदंमत्वामामेव
गतकल्मषाः॥ भजंतिसततंभक्त्याभवबंधविमोचकं॥ तत्रदक्षिणकैलासेपुराकश्चिद्द्विजोत्तमः
मामभ्यर्च्यस्थितः प्रीत्याबिल्वपत्रादिसाधनैः॥ तस्यपत्नीबभूवैकासुभगायुवतीप्रिया॥ तयासह

शि०रह
२८२

यं बहुधा नखक्षतैव संगमं॥ अयं निरंतरं सेवां करोति मम पश्यति॥ दूरी चकार सततं रजांसि शिवचिं
तकः॥ सुवर्णसुखरीतोयैरयमन्वहमादरात्॥ अभिषिच्य स्थितः पूर्वं रुद्राध्यायपुरःसरं॥ कोमलैर्बि
ल्वपत्रैर्मां पूजयामास सादरं॥ पुष्पैरन्यैश्च सततं पद्मैर्नीलोत्पलैरपि॥ चकारानुक्षणं विप्रो भ
स्मनोद्धूलनं मुदा॥ उद्धूलितं विलोक्यांगं हृष्टोभूत्सर्वदा द्विजः॥ भाले त्रिपुंड्ररेखाभिरलंकृतमह
र्निशं॥ स्मृत्वा स्मृत्वाति संतुष्टो नित्यं नृत्यं चकार सः॥ शिवेति नाम विमलं तदजस्रैव सः स्थितः
रुद्राक्षधारणे तस्य प्रीतिरुत्तमा स्थिता॥ भस्मरुद्राक्षसंछन्नो यदा मामर्चयत्ययं॥ तदा संतुष्ट
हृदयः करोत्यभ्यर्चनं मुदा॥ अशौचान्दूरतो दृष्ट्वा करोति रविदर्शनं॥ अशौचं स्पृष्ट्वा मां स्पृष्ट्वा प्राय
श्चित्तं करोति हि॥ ऊर्ध्वपुंड्रांकितान्विप्रांस्तु संत्यज्य दूरतः॥ त्रिपुंड्रचिह्नितान्दृष्ट्वा चकार प्रीतिम
न्वहं॥ एतादृशं विलोक्यैनं पत्नी भोगापराङ्मुखं॥ रात्रावाकारयामास भोगार्थं भोगलोलुपा॥ सा
शय्यायां विवसना तद्वक्त्रे वदनं ददौ॥ ददौ माल्यानि च प्रीत्या सुगंधीनि मनोहरा॥ तदा सत्वैवोत्ति

श्रीः॥
२८२

दृढं मातुलिंगफलोपमं॥ यस्याः कुचयुगं रम्यं ददर्श पृथुलं शिवे॥ ततस्तस्मिन्कुचयुगे शिवलिंगभ्रमो
ऽभवत्॥ ततः सल्लिंगसदृशं पस्पर्श कुचमंडलं॥ ततः सल्लिंगबुद्ध्यैव गंधमाल्यादिभिर्द्विजः॥ पूज
यामास पत्नीं न विकाररहितस्तदा॥ ततः प्रदक्षिणादीनि चकार प्रीतमानसः॥ ततः पूजां समा
प्यायं सत्वरं बहिरागतः॥ बहिर्निर्गतमालोक्य तत्पत्नी दुःखिता तदा॥ उवाचेदं वचो देवी तच्छृणु
ष्व यथाक्रमं॥ निर्विकारः पतिरयं सर्वदा शिवचिंतकः॥ मनोनिवृत्तिमेतस्य विषयेभ्यस्तु सर्वथा
भाग्यवान्नात्र संदेहो भाग्यमीदृक्कस्यचित्॥ वैराग्यमीदृशं लोके बहुपुण्यतपःफलं॥ स्वाधी
नां स्वलंकृतवसनां युवतीमति सुंदरीं॥ मामयं वीक्ष्य सुभगो विकारं नाप सर्वथा॥ शिवलिंगमयं सर्वं
जानात्येव मुदारधीः॥ अस्मिन्विकारलेशोपि न मया दृश्यते ध्रुवं॥ विकाररहितप्रीतिः स्त्रीषु नैव प्र
विष्यति॥ विकारतो यतः प्रीतिः स्त्रीपुंसां प्रजायते॥ ब्रह्मापि रूप्यवपुषा रोहिङ्कृतां स्वकन्यकां
विकाराक्रांतहृदयः सद्यो रंतुमुपक्रमे॥ व्यासाद्यैरपि दुर्वृत्तैः कृतः स्त्रीसंग्रहो मुदा॥ दुर्लभः पु

शि॰स्य॰
२८३

रूपाणांतु नित्यमिंद्रियनिग्रहः॥ विषयेभ्यस्तु सर्वेभ्यः स्त्रीरूपविषयो महान्॥ पुमांसं मोहयत्येव विरक्तम
पि सत्वरं॥ विषयेभ्यः परावृत्ता निराहारो कृतात्मनः॥ साहारो विषयेभ्यस्तु परावृत्तो न दृश्यते॥ भाग्येन
त्स्य विप्रस्य तपश्चर्यापि भूयसी॥ निवृत्तोयं न संदेहः प्रवृत्तिर्नास्य दृश्यते॥ एवं निवृत्तचित्तस्तु पुरुषो
दुर्लभो भुवि॥ विषयेभ्यो निवृत्तिश्च जितेन न संशयः॥ अतः परं कृशा कार्या मयेयं तनुरीदृशी
शिवलिंगैकनिरता शिवपूजां करोम्यहं॥ मयापि सर्वदा शंभुः पूजनीयः प्रयत्नतः॥ शिवपूजोपक
रणं शरीरं जायतां मम॥ किं वा पुष्टेन देहेन यौवनेनाथ किं मम॥ यावदस्ति बलं तावन्महेशं पूजया
म्यहं॥ नित्यं मृन्मयलिंगानां शतमभ्यर्चयाम्यहं॥ प्रदक्षिणनमस्कारान् करिष्ये हं यथेच्छया॥ रुद्रा
नी पार्वतीनाथो यदि नाभ्यर्चितो मया॥ वार्धके शिवपूजायां शक्तिर्मम कथं भवेत्॥ किं च तावदयं
देहः स्थास्यतीति न निश्चयः॥ एवं सत्यधुना सम्यक् शंकरं पूजयाम्यहं॥ शिवपूजापरं चित्तं यद्ये
तन्न भविष्यति॥ तदिदं चंचलं चित्तमन्यत्रैव प्रयास्यति॥ प्रकारो न तु नान्योस्ति विना शंकरपूज

श्री॥
२८३

या॥ चित्तं स्थिरीकरिष्यामि शंकरस्यैव पूजया॥ शिवपूजां विना मुक्तिर्न भविष्यति सर्वथा॥ अतः क
रिष्ये नियतं श्रीमहादेवपूजनं॥ महादेवोखिलाराध्यः कदाचिद्भक्तवत्सलः॥ करिष्यति कृपासिंधुः कृ
पां मयि न संशयः॥ प्रसन्ने देवदेवेशे शंकरे लोकशंकरे॥ संसारपाशनाशस्तु भविष्यत्येव नान्यथा॥ प्र
सन्ने पार्वतीनाथे कीटो वा पुल्कसोथवा॥ मुच्यते नात्र संदेहो घोरसंसारपाशतः॥ सर्वथा विषया
सक्तं यदि चित्तं भविष्यति॥ तदा कथं वा संसारसागरोत्तरणं भवेत्॥ मम भाग्यवशाद्देवभर्ता विषय
निस्पृहः॥ अन्यथा घोरसंसारान्निवृत्तिस्यात्कथं मम॥ गर्भधारणमुख्यानि स्त्रीणां दुःखानि कोटिशः
तानि दुःखानि सर्वाणि सह्यान्येव तु सर्वथा॥ प्रसूतिवेदना या सा बहुधा दुःसहा ततः॥ जीवनस्यापि
संदेहो भवत्येव हि वस्तुतः॥ तद्दुःखसहनेनाप्यं फलं नैव हि दृश्यते॥ तद्दुःखसहनेप्येषा दुःखापत्ति
र्भविष्यति॥ महेशस्य प्रसादोस्ति मयि सर्वात्मना यतः॥ विरक्तोयमभूद्भर्ता तपस्यापरमानसः
अतः परं तु दुःखानि मया प्राप्यानि न ध्रुवं॥ दुःखनाशार्थमेवाहं करिष्ये यत्नमादरात्॥ दुःखना

शि० स्क
२८४

शोपि नान्यस्माद्विनाशंकरपूजनं॥ अतएव महादेवं पूजयामि यथाविधि॥ नानाविधानि दुःखानि
पापजन्यानि वस्तुतः॥ तानि पापानि नश्यंति महेशस्यैव पूजया॥ इत्युक्त्वा विषयेभ्यः सा निवृत्ता
नियतेंद्रिया॥ गृहे दत्त्वा शंभवाय पराहृत्तात तो गृहात्॥ ततः परं प्रयत्नेन सुवर्णमुखरीजले॥ स्ना
त्वा चकार यत्नेन भस्मनोद्धूलनं मुदा॥ कृत्वा त्रिपुंड्रमनघा ललाटादौ ततः परं॥ सुवर्णाभरणे त्य
क्त्वा चक्रे रुद्राक्षधारणं॥ चकाराभरणं शुद्धा रुद्राक्षैनैव सादरं॥ कंठकर्णादिदेशेषु भक्तिश्रद्धा
पुरःसरं॥ ततस्तीर्थजलं रम्यं बिल्वपत्राणि चादरात्॥ गृहीत्वा सावधानेन ममपूजां चकार सा॥
ततः प्रदक्षिणादीनि कृत्वा मौनेन भक्तितः॥ निर्मालितो क्षिपद्देहे संविष्टा मयि तत्परा॥ ततो द
दर्श शैवेंद्रं कृपालुं शिवतत्परं॥ तं प्रणम्य बभाषे सा कृतांजलिपुरा शिवे॥ सुभगा उवाच॥ शैवो
त्तम महाकृपालुस्त्वं शिवपूजापरायणः॥ शिवपूजा कथं कार्या वदतन्मह्यमादरात्॥ इति तद्वचनं श्रु
त्वा स शैवो मत्परायणः॥ तामुवाच प्रहृष्टात्मा भूतिरुद्राक्षभूषणः॥ शैव०॥ धन्यासि कृत

श्री:॥
२८४

कृत्यासि यतस्त्वं शिवतत्परा॥ शिवपूजाविधिं वक्ष्ये शृणु मोक्षदमादरात्॥ शौचादिकं निवर्त्यादौ
स्नात्वा चोद्धूल्य वै भस्मना॥ त्रिपुंड्रधारणं कार्यं ततो रुद्राक्षधारणं॥ ततः परं बाणलिंगं मृन्मयं
लिंगमेव वा॥ पूजनीयं प्रयत्नेन बिल्वपत्रादिभिर्मुदा॥ पंचाक्षरेण कर्तव्यं स्त्रीभिः शंकरपूजनं॥
षडक्षरेण कर्तव्यं पुरुषैस्तु प्रयत्नतः॥ स्पर्शः पार्थिवलिंगस्य बाणलिंगस्य चादरात्॥ स्त्रीभिः
कार्यः स्थावरस्य लिंगस्य तु न सर्वथा॥ विहितश्चरलिंगेषु स्पर्शः स्त्रीणां प्रयत्नतः॥ न स्था
वरेषु लिंगेषु सत्यमेतन्मयोच्यते॥ स्थावरेष्वपि लिंगेषु पत्रादिव्यं भविष्यति॥ तत्र पर्वणि कर्तव्यं
स्त्रीभिरादरात्॥ स्त्रीभिः स्पर्शोपि कर्तव्यः पंचाक्षरपुरःसरं॥ पूजाप्यन्या यथायोगं पंचाक्ष
रपुरःसरं॥ पंचाक्षरपरो मंत्रः सर्वमंत्रशिरोमणिः॥ स्त्रीभिरप्यन्वहं जप्यः सह स्त्रं विधिपूर्व
कं॥ पंचाक्षरप्रभावस्तु न ज्ञातो मादृशैर्जनैः॥ किंतु वेद महादेवस्तत्प्रभावं यथार्थतः॥ जप्योपं
चाक्षरो मुद्दे नत्रयत्य चकुलक्षणात्॥ पंचाक्षरो महामंत्रः सशिवात्मकएव हि॥ इत्युक्ता सुभगा

शिं०स्य २८८ साध्वी तं प्रणम्य पुनर्द्विजं॥ मत्यं पंचाक्षरं देहि त्वाव भाषेऽकृतांजलिः॥ स शैवेंद्रः कृपासिंधुस्तत
स्तस्यै यथाविधि॥ ददौ पंचाक्षरं शुद्धं सर्वपापौघनाशकं॥ ततस्तदा गृह्य सा साध्वी तं प्रणम्य यथावि
धि॥ नित्यं पार्थिवलिंगानि पूजयामास सादरं॥ एतादृशीं सुशीलां तां दृष्ट्वा सर्वे मुनीश्वराः॥ धन्येयं
पूजनीयेति संवदंतः स्थिताः सदा॥ एवं स्थिता सुशीला सा तन्मनो दुष्टमेकदा॥ मयापुरुषवेषे
ण गतं लीलाविहारिणी॥ सा वा प्रतिम सौंदर्यमपि दृष्ट्वा ततः परं॥ निमीलिताक्षियुगला शि
वध्यानेऽवकारसा॥ तदेवोक्तमिदं वाक्यं मयासादरमंबिके॥ ते नापि तन्मनो वृत्तिरन्यथा न बभूव हि
तदेवं यौवने बाले परिपूर्णमिति स्फुटं॥ ईदृशं यौवनं क्वापि न दृष्टं सर्वथा मया॥ तवैव मुखचंद्रोयं
परिपूर्णकलः सदा॥ स तु चंद्रकलश्चंद्रः स तु पूर्णः कदाचन॥ तवेदमक्षियुगलं धिक्कृतामलपं श्री:॥ २८८
कजं॥ भालपट्टनिभं वस्तु न कुत्राप्यस्ति वस्तुतः॥ तव सीमंतरेखेयं केन वा सदृशी भवेत्॥ भ्रमद्भ्र
मरपुंजोपि धिक्कृतः केशपाशतः॥ नासेयं तिलपुष्पाणि धिक्करोत्येव सर्वथा॥ कुचयुग्ममिदं य

ते न दृष्टं न कदाचन॥ त्रिवल्युपरि नीलेयं रोमावल्यपि राजते॥ अयं जघनदेशोपि बाले सर्वसुर
प्रदः॥ ४०४॥ तद्रूपसदृशं रूपं नानुभूतं मया ध्रुवं॥ रंभोर्वश्यादिरूपं च नेदृशं हि भविष्यति॥ एवं
सति तदा बाले किमिदं क्रियते वद॥ वामां सुंदरं शीघ्रं विलंबं मा कुरु प्रिये॥ धनधान्यादिसंप
त्तिर्भूयसी मम विद्यते॥ सा च नानि वस्त्रान्येव भोगार्थं संति मद्गृहे॥ ईदृशं यौवनं प्राप्य भोगस्त्य
क्त्रियते यस्मादि॥ तदिदं यौवनं धन्यं मन्यथा त्वन्यथा ध्रुवं॥ इत्युक्तं तद्वचः श्रुत्वा तयैवं समदीरि
तं॥ तदा नेत्रे निमील्यैव पत्न्या पूजितं शिवं॥ सुभगा उवाच॥ मैवं वद त्वं विप्रेंद्र संसारे मा रतिं
कुरु॥ संसारोन्मूलनायेह कुरु त्वं शंकरपूजनं॥ नासारतरसंसारसारतुच्छं तु ते नरः॥ स्मरस्म
रहरं नित्यं स्मरं मा स्मर मा स्मर॥ अधीतवेदशास्त्राणां कथमेतादृशी मतिः॥ अज्ञानेन कथं ज्ञा
नं नावृतं स्फुरदुज्ज्वलं॥ दुर्लभं प्राप्य जन्मेदं ब्राह्मण्यमतिसत्तमं॥ कथं नाराध्यते नित्यं देव
देवो महेश्वरः॥ नित्यमस्मिन्नपि क्षेत्रे स्थित्वा स्मरहरो हरः॥ नाराध्यते कथं भक्त्या विहाय

विषये रतिं॥ भज नित्यं प्रयत्नेन सांबं संसारमोचकं॥ अनर्थहेतुं संसारं न कुरुष्व रतिं द्विज॥ सार
निःसारसंसारात् नरजन्माल्पमनातुरः॥ स्मरारिपुरारीयस्त्वमाराधय सादरं॥ संसारघोरकूपेषु
पतित्वापि मुहुर्मुहुः॥ पुनः संसारकूपेषु पतनेच्छा कथं तव॥ अयुतं क्रियते ब्रह्मन्पुत्रं न विम
पिश्रुतं॥ कथं संसारदृढं अर्थ्यपत्नीअग्रिक्रियते त्वया॥ अत्यंतदुर्लभं क्षेत्रमिदं ब्रह्मादिसेवितं॥
अत्रापि त्वासि सततं कथं नाराध्यते शिवः॥ नित्यं श्रीफलहस्तोसि सुवर्णमुखरीजलैः॥
अभिषिंच प्रयत्नेन बिल्वपत्रैः समर्चय॥ प्रदक्षिणनमस्कारैः प्रीणयस्व सदाशिवं॥ ज
पपंचाक्षरं शैवं संसारोन्मूलकारणं॥ शरीरं सबलं तिष्ठत्यधुना यौवने तव॥ सहस्रं कुरु साष्टां
गान्प्रणामान् शंभवे मुदा॥ बलं यावच्छरीरेस्ति तावच्छंकरमर्चय॥ निर्बलेन शरीरेण शंकरार्चा क
थं भवेत्॥ शंकरश्चेत्कृपासिंधुरधुनापूज्यते तदा॥ निःसारतरसंसारतरनाशो भविष्यति॥ पुरु
षार्थाय मे वैकः पुरुषाणां द्विजन्मनां॥ यः स्वभावो महादेवपदपंकजसात्कृतः॥ पूजितः संस्कृते

वापि यो ददाति परं पदं॥ तमेव देवदेवेशं महेशं शरणं व्रज॥ यथेदानीं मयि प्रीतिस्तथा प्रीतिं सदाशि
वे॥ कुरुष्व तेन विप्रेंद्र तां प्रीतिं मयि मा कुरु॥ मयि चेत्क्रियते प्रीतिः सुखमल्पं भविष्यति॥ सुखं तज्जन्म
मत्यल्पमेतेन नाकसाधनं॥ प्रीतिश्चेत्क्रियते नित्यं शंकरे भक्तशंकरे॥ तदा प्राप्स्यत्यल्पया विप्र सुखम
क्षयमन्वहं॥ जना निक्षेपलाभार्थं यत्नं कुर्वंति सादरं॥ तत्सुकृतकार्यं यत्नं कुर्वंति किं वदा॥ शं
करः सुखनिक्षेपान् स्वभक्तेभ्यो ददाति सः॥ अतस्त्वं सुखनिक्षेपांल्लभस्व शंकरपूजया॥ यं प्राप्य
न निवर्तंते योगिनो यतव्रतपः॥ तमेव भज देवेशं देवदेवमुमापतिं॥ सांबमद्य मानंदं लिंग
रूपं भज प्रभुं॥ तस्यैव भजनान्न त्वं तं प्रभुं प्राप्स्यसि ध्रुवं॥ प्रत्यगात्मा सर्वसाक्षी लिंगरूपेण तिष्ठ
ति॥ तमर्चय प्रयत्नेन भुक्तिमुक्तिप्रदायकं॥ उमासहायमानंदं यः श्रीत्या नार्चयिष्यति॥ न तस्यानं
दलेशोपि संसारे न संशयः॥ सर्वांतरगतं सर्वसाक्षिणं सर्वकर्मणां॥ नाराधयति विप्रेंद्र दु
र्थं वा सा वृथा नतः॥ न पश्यंति महादेवं सर्वसाक्षिणमीश्वरं॥ अत एव न कुर्वंति मूर्खाः शंक

रभ्रूजने॥ अनायासेन संप्राप्या मुक्तिर्येत्त्वज या द्विज॥ तस्मात्वयप्रयत्नेन बिल्वपत्रैर्नवस्थितैः॥ सुव
र्णमुखरीतोये बिल्वपत्रैश्च शंकरं॥ पंभजंतिमुनीन्द्राश्च तं भजस्व महेश्वरं॥ रुद्राध्यायी लोत्पलानि
संत्यत्र तैरर्चय सदाशिवं॥ तैरर्चितो महादेवो भुक्तिं मुक्तिं प्रयच्छति॥ पूजयित्वा महादेवं जपपंचा
क्षरं मुदा॥ तेनैव मोहविच्छित्तिर्भविष्यति तव ध्रुवं॥ श्रुतं श्रुतिश्रुतं पुण्यं जपरुद्रं द्विजोत्तम॥ रुद्रा
ध्यायजपेनेशः प्रीणाति भगवाञ्छिवः॥ मुक्तिप्रदं त्रयं प्राहुर्मुनयः शिवतत्पराः॥ लिंगार्च
नं रुद्रजपः पंचाक्षरजपस्तथा॥ तापत्रयापह्नामनेमेतत्त्रयतमो द्विज॥ कुरुयत्नेन सततं संसार
मारतिं कुरु॥ मामेकांतस्थितामेकां विप्र मां मा विलोकय॥ याहि याहि यथाकामं यत्र कुत्रापि स
त्वरं॥ येकांतवासिनीं दृष्ट्वा स्त्रियं सर्वेपि सज्जनाः॥ दूरं तो यांति विप्रेह त्वया किं क्रियते वद॥
विषयेभ्यो निवृत्तां मां बलाद्यदि वरिष्यसि॥ तुभ्यं शापं मया देयः सत्यमत्रान्यथा तु न॥ एवं वद
ति सा देवी दृष्ट्वा संपूजितं शिवं॥ निवारयेन मीरेति पूजां चक्रे पुनः पुनः॥ ततः परमहं देवीं त

स्मिंल्लिंगे मदात्मके॥ अविरासं त्वया सार्कं विष्णुब्रह्मादिवंदितः॥ ततस्तुष्टाव चक्रुधा सैव मां
सांबमुत्तमं॥ वरं पयाचे सा शंभो त्वयि भक्तिर्दृढास्त्विति॥ पुनः संपूज्य मां सम्यग्ययाचे सा व
रांतरं॥ त्वय्येवाहर्निशं चेतः स्थिरमास्त्विति सादरं॥ इत्युक्त्वा न प्रवदनाप भूपती मत्पदांबुजे॥ पुन
रप्यर्चया मास बिल्वपत्रादिभिर्मुदा॥ ततस्तस्यै वरान्दत्वा मया तत्र हितं शिवे॥ एवं सा सुभगा सा
ध्वी स्थिता दृढमनोरथा॥ ततस्तत्रैव सुभगा सा मामभ्यर्च्य सादरं॥ तत्रैव विजहौ प्राणान्महा
देवेति वादिनी॥ ततः सा सर्वदुःखानि विहायैव हि तत्क्षणे॥ शापमुक्तिं मत्प्रसादात्साम तत्पूजा
विधेः फलं॥ नरो भवतु नारी वा मामभ्यर्च्य सदाशिवं॥ धर्ममर्थं च कामं च प्राप्य मुक्तिं च विंद
ति॥ श्रीमद्दक्षिणकैलासे विलासः क्रियते मया॥ भक्तास्तत्रानुगृह्यंते शिवेन करुणाः शिवे
श्रीकालहस्तीश्वरपिनाकपाणे कंदर्पदर्पापहकालकाल॥ नारायणाराधितपादपद्म त्वयह
र्निशं त्ववदंति देवाः॥ ४५५॥ ॥ इति श्रीशिवरहस्य सप्तमांशे शिवगौरीसंवा

देदक्षिणकैलासमहिमानुवर्णनंनामएकोनविंशोऽध्यायः ।। १९।। ।।श्रीसदाशिवउवा
च।। देवीकांचीपुराकास्तियत्रवेगवतीनदी।। तत्रवासमपेक्षंते नित्यंब्रह्मादयः सुराः ।। १।।
एकाम्बराभिधंलिंगंतदात्यंकंयदात्मकं।। तद्दर्शनेनपापानिविनश्यंत्येवतत्क्षणे।। कोटि
तीर्थाभिधंतीर्थंतत्रास्तिकमघापहं।। तत्रैवमज्जनादेवब्रह्महत्याविमुच्यते।। तत्रश्राद्धंविधा
नेनकर्तव्यंपितृमुक्तये।। तर्पणीयाश्चपितरः कोटितीर्थोदकैःशुभैः।। कोटितीर्थेनरःस्नात्वा
संपूज्यैकाम्बरेश्वरं।। मुच्यतेसर्वथादेवी ब्रह्महत्यायुतोऽपि।। तत्रैवमामुपाश्रित्यऋषयोब्रह्म
वादिनः।। वसंतिबहवस्तेषांसंख्याकर्तुंनशक्यते।। भस्मोद्धूलितसर्वांगास्तेसर्वेनियतेंद्रि
याः।। रुद्राक्षमालाभरणास्त्रिपुंड्रांकितमस्तकाः।। मच्चित्तामद्गतःप्राणामदाराधनतत्पराः
स्वप्नेयन्यंनपश्यंतिविंमांहायवरानने।। तत्सत्रेभूरिभाग्येनप्राप्नुवंतिनराःशिवे।। तत्राप्य
थेतपश्चर्यांकुर्वंतिऋषयःसदा।। अनेकयुगपर्यंतंतत्रघोरतरंतपः।। वकारविष्णुरप्यपि

मामाराध्यमतिष्ठति।। तत्रमांप्रत्यहंविष्णुर्लक्षबिल्वदलैर्नवैः।। करोतिपूजनंभक्त्यात्रिकालं
सावधानतः।। प्रदोषसमयेविष्णुर्मामभ्यर्च्यविधानतः।। सेवांकरोतिसानंदंमृदंगमभिवा
द्यन।। विविधैःकुसुमैःशुद्धैः बिल्वपत्रैश्चतुर्मुखः।। मामभ्यर्च्यततःसायंतालान्वादयतेशि
वे।। वाग्देवीवल्लकींधृत्वासायमभ्यर्च्य

शिवरहस्य
२८९

श्रीः॥
२८९

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥ शिवरहस्यं समाप्तं ॥ श्रीरस्तु ॥

Dr BHAU DAJI MEMORIAL